CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमन्नारायणीयम्

डा० जीतराम भट्ट

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमस्नेही डॉ० रवीन्द्रनागर जी को
सादर श्रद्धापूर्वक भेंट स्वरूप
जीतराम
17-09-2010

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
1069

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमता मेल्पत्तूरनारायणभट्टतिरिवर्येण रचितम्

श्रीमन्नारायणीयम्

[पदविभागान्वयहिन्द्यनुवादैः सार्धम्]

डॉ. जीतराम भट्टः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्रिय संस्कृत संस्थान, नई दिल्ली के आर्थिक सहयोग से प्रकाशित ।

प्रकाशक:

डॉ० जीतराम भट्ट

६५-डी, एस.एफ.एस. फ्लैट्स,

मोतीयाखान, पहाड़गंज, नई दिल्ली

दूरभाष : २३६१७८९३

प्रथम संस्करण २००४

मूल्य : रु० ४४५/-

1069

मुद्रक:

भवानी प्रिंटर्स, मौजपुर, दिल्ली

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राक्कथनम्

भगवतः श्रीमन्नारायणस्य लीलानां श्लोकबद्धमाख्यानमेव 'श्रीमन्नारायणीयम्'। ग्रन्थोऽयं सार्धचतुः-शतवर्षेभ्यः पूर्वं श्रीमद्भिः मेल्पत्तूरनारायणभट्टतिरिवर्यैः विरचितः। शतशीर्षकान्वितदशकेषु सहस्राधिकेषु श्लोकेषु चोपनिबद्धमेतत्काव्यं श्रीमद्भागवतपुराणस्य स्वरूपमिव तादृगेव महत्त्वं भजते। विदुषां मतमेतद् यत् कविवर्याः श्रीमन्तः मेल्पत्तूरनारायणभट्टतिरिवर्याः संस्कृतभाषायाः महान्तो विद्वांस आसन्, सम्पूर्णे भारते तेषां वैदुष्यस्य प्रतिष्ठासीत्। जीवनकालस्य मध्ये कविवर्याः भट्टतिरिवर्याः वातरोगेण पीडिता अभवन्। तदातीव पीडामनुभवन्तस्ते भगवद्भक्तिं प्रत्युन्मुखाः जाताः, भगवद्भक्तिं कुर्वन्तो भक्तिभावभरिताः कविवर्याः 'श्रीमन्नारायणीयम्' इत्यस्य ग्रन्थस्य रचनामकुर्वन्। तदैव ते वातरोगादपि मुक्ताः जाताः। तदनन्तरं तैः कविवर्यैः स्वकीयं सम्पूर्णं जीवनं भगवतः श्रीमन्नारायणस्य बालस्वरूपस्य भक्त्यामेव समर्पितम्।

भारतवर्षस्य साम्प्रतिके केरलप्रदेशे त्रिचूरजनपदे 'गुरुवायुपुरम्' इति प्रसिद्धं नगरं विद्यते तत्र च भगवन्नारायणस्य बालस्वरूपविग्रहयुक्तं मन्दिरमस्ति। भगवन्नारायणस्तत्र गुरुवायुपुराधीशनाम्नापि ख्यातोऽस्ति। तस्यैव गुरुवायुपुराधीशस्य विग्रहस्य समक्षं भक्तिरसलीनाः विद्वद्वरेण्याः श्रीमन्तः मेल्पत्तूर-नारायणभट्टतिरिवर्याः चिदानन्दातिरेकेण भगवत्स्तुतिं कुर्वन्तः 'श्रीमन्नारायणीयम्' काव्यं विरचितवन्तः। तस्मिन् प्रदेशे मान्यता वर्तते यत् काव्यमेतत् सर्वरोगनिवारकं, सर्वकामनादायकं सर्वसिद्धिसाधकञ्चास्ति। अतः वर्तमानेऽपि आपद्भिः कष्टैः रोगैश्च व्यथिताः जनाः 'श्रीमन्नारायणीयम्' ग्रन्थस्य भक्तिपाठं कुर्वन्ति श्रीमन्नारायणस्य षोडशोपचारपूजनेन सह कथा-श्रवणकीर्तनायोजनञ्च कुर्वन्ति।

काव्यस्यास्य साहित्यिकमाध्यात्मिकमेतिहासिकं सामाजिकञ्च महत्त्वं विज्ञाय मया 'श्रीमन्नारायणीयम्' काव्यमधीतम्। काव्यमेतद्भक्तानां संस्कृतजिज्ञासूनां कृते बोधगम्यं भवेदित्येवमालक्ष्य पदविभागान्वयाभ्यां सार्द्धमस्य हिन्द्यामनुवादः प्रस्तूयते। भाषान्तरकार्येऽस्मिन् साङ्गोपाङ्गं श्रीमन्नारायणीयं विविधैः दृष्टिकोणैः पर्यालोचितम्। भगवतः श्रीमन्नारायणस्य भक्तिरसाप्लावितानां संस्कृतभाषेतरभक्तानां जिज्ञासूनां साम्प्रतिकानां संस्कृतच्छात्राणाञ्च कृते संस्कृतकाव्यपरम्परायाः वैशिष्ट्यावबोधनाय 'श्रीमन्नारायणीयम्' काव्यस्य सरलीकरणं भवेदत एवात्र पदविभागान्वययोरपि विधानं कृतम्। काव्यस्यास्य भक्तिमयेऽस्मिन्ननुवादानुष्ठाने पदे पदे मयानुभूतं यत्—

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥

कार्यायास्मै ममाभिप्रेरकाः मम सहयोगिनश्चातीव सरलाः श्रीमन्तः पी० एन० कृष्णन् महोदयास्तु स्वपत्न्याः रोगनिवारणार्थं श्रीमन्नारायणीयस्य स्वाध्यायमकुर्वन्। भगवतः कृपयैव तेषां रोगमुक्ता पत्नी साम्प्रतं न केवलं संगीतं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साधयत्यपितु जिज्ञासुभ्यश्छात्रेभ्यः निःशुल्कं संगीतमपि शिक्षयति । भगवतः कृपयैवं पुस्तकप्रकाशनाय राष्ट्रिय-संस्कृत संस्थानेन सहयोगः प्रदत्तः एतदर्थं संस्थानं प्रति कार्तज्ञ्यं ज्ञापयामि कुलपतिमहोदयानां प्रो० कुटुम्बशास्त्रिमहोदयानां हार्दं धन्यवादं करोमि संस्थानस्याधिकारिभ्यश्च मङ्गलकामनां वितनोम्यहम् । कर्मण्यस्मिन् मम भार्यायाः परिवारस्य च सहयोगोऽपि श्लाघनीयः । प्रयासेऽस्मिन् यदि काश्चित् त्रुटयः स्युः, तासां कृते क्षमां याचे संशोधनार्थञ्च सूचनाप्रदानायापि प्रार्थयेऽहम् । कार्यमिदं लोकोपयोगित्वं साधयिष्यतीति मे प्रत्ययः ।

दिल्ली

विदुषां भक्तानाञ्च वशंवदः

जीतराम भट्टः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयानुक्रमणिका

दशकम्		दशकविषया:	पृष्ठसंख्या
दशकम्-१	:	भगवत: स्वरूपं माहात्म्यञ्च	१-११
दशकम्-२	:	रूपमाधुर्यं भक्तिमहत्त्वञ्च	१२-२२
दशकम्-३	:	भक्ति-प्रार्थना	२३-३३
दशकम्-४	:	अष्टाङ्गयोग: तत्सिद्धिप्रकारश्च	३४-४५
दशकम्-५	:	विराट् - पुरुष - उत्पत्ति:	४६-५७
दशकम्-६	:	विराट् - स्वरूपम्	५८-६७
दशकम्-७	:	ब्रह्मण: तप: वैकुण्ठदर्शनञ्च	६८-७९
दशकम्-८	:	नैमित्तिकप्रलय: नाभि-कमलात् ब्रह्मण: आविर्भावश्च	८०-९०
दशकम्-९	:	ब्रह्मण: तप: भुवन-निर्मितिश्च	९१-१००
दशकम्-१०	:	सृष्टि - भेदा:	१०१-१०९
दशकम्-११	:	हिरण्याक्षस्य हिरण्यकशिपोश्चोत्पत्ति:	११०-११७
दशकम्-१२	:	वराह - अवतार:	११८-१२६
दशकम्-१३	:	हिरण्याक्ष - वध:	१२७-१३६
दशकम्-१४	:	कपिल - अवतार:	१३७-१४४
दशकम्-१५	:	कपिल - उपदेश:	१४५-१५३
दशकम्-१६	:	नरनारायणयो: अवतार: दक्षयागश्च	१५४-१६२
दशकम्-१७	:	ध्रुव - चरितम्	१६३-१७१
दशकम्-१८	:	पृथु - चक्रवर्ति - चरितम्	१७२-१७९
दशकम्-१९	:	प्रचेतसां कथा	१८०-१८७
दशकम्-२०	:	ऋषभ - योगीश्वर - चरितम्	१८८-१९५
दशकम्-२१	:	नव वर्षाणि सप्तद्वीपादयश्च	१९६-२०६
दशकम्-२२	:	अजामिल - मोक्ष:	२०७-२१५
दशकम्-२३	:	दक्ष - चरितं चित्रकेतूपाख्यानञ्च	२१६-२२४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२४	:	प्रह्लाद - चरितम्	२२५-२३३
दशकम्-२५	:	नरसिंह - अवतारः	२३४-२४४
दशकम्-२६	:	गजेन्द्र - मोक्षः	२४५-२५२
दशकम्-२७	:	क्षीराब्धि - मथनं कूर्मावतारश्च	२५३-२६१
दशकम्-२८	:	लक्ष्मी - स्वयंवरः अमृतप्रादुर्भावश्च	२६२-२६९
दशकम्-२९	:	अमृत - आहरणम्, असुर - निग्रहश्च	२७०-२७७
दशकम्-३०	:	वामन - अवतारः	२७८-२८५
दशकम्-३१	:	बलि - दर्पोच्छेदः	२८६-२९४
दशकम्-३२	:	मत्स्य - अवतारः	२९५-३०२
दशकम्-३३	:	अम्बरीष - चरितम्	३०३-३१०
दशकम्-३४	:	श्रीमद्रामायणम् - हनुमत्समागमपर्यन्तम्	३११-३२०
दशकम्-३५	:	श्रीमद्रामायणम् - सुग्रीवसख्यात् प्रभृति	३२१-३३१
दशकम्-३६	:	परशुराम - चरितम्	३३२-३४३
दशकम्-३७	:	श्रीकृष्ण - अवतार - प्रस्तावः	३४४-३५३
दशकम्-३८	:	श्रीकृष्ण - अवतारः	३५४-३६१
दशकम्-३९	:	योगमाया - प्रादुर्भावः कृष्णजन्मोत्सवश्च	३६२-३७०
दशकम्-४०	:	पूतना - मोक्षः	३७१-३७८
दशकम्-४१	:	पूतना - देह - दाहः कृष्ण - लालनाह्लादश्च	३७९-३८६
दशकम्-४२	:	शकटासुर - निग्रहः	३८७-३९५
दशकम्-४३	:	तृणावर्त - वधः	३९६-४०३
दशकम्-४४	:	नामकरणं जातकफल - कथनञ्च	४०४-४११
दशकम्-४५	:	बाल - लीला	४१२-४२०
दशकम्-४६	:	श्रीकृष्णस्य वदने यशोदया लोकानां दर्शनम्	४२१-४२७
दशकम्-४७	:	उलूखल- बन्धनम्	४२८-४३५
दशकम्-४८	:	नलकूबर - मणिग्रीवयोः शापमोक्षः	४३६-४४३
दशकम्-४९	:	बृन्दावन - प्रवेशः	४४४-४५१
दशकम्-५०	:	वत्सासुर - बकासुरयोः वधः	४५२-४६१
दशकम्-५१	:	अघासुर - निग्रहः वन - भोजनञ्च	४६२-४६९
दशकम्-५२	:	ब्रह्म - गर्व - शमनम्	४७०-४७७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-५३	:	धेनुकासुर - वधः	४७८-४८५
दशकम्-५४	:	कालिय - विष - वाधितानां गो - गोपानामुज्जीवनम्	४८६-४९३
दशकम्-५५	:	कालिय - मर्दनम्	४९४-५०१
दशकम्-५६	:	कालिय - अनुग्रहः	५०२-५०९
दशकम्-५७	:	प्रलम्बासुर - वधः	५१०-५१८
दशकम्-५८	:	दावाग्नि - मोक्षः ऋतुवर्णनञ्च	५१९-५२७
दशकम्-५९	:	वेणु - गान - वर्णनम्	५२८-५३५
दशकम्-६०	:	गोपी - वस्त्रापहरणम्	५३६-५४३
दशकम्-६१	:	विप्र - पत्नी - अनुग्रहः	५४४-५५१
दशकम्-६२	:	गोवर्द्धन - बलिः	५५२-५६२
दशकम्-६३	:	गोवर्द्धनोद्धारणम्	५६३-५७०
दशकम्-६४	:	गोविन्द - अभिषेकः	५७१-५७८
दशकम्-६५	:	गोपीनां भगवत्समीपगमनम्	५७९-५८६
दशकम्-६६	:	गोपीजन - आह्लादनम्	५८७-५९४
दशकम्-६७	:	भगवतः तिरोधानम् पुनः प्रादुर्भावश्च	५९५-६०२
दशकम्-६८	:	गोपिकानां परम - आह्लादः	६०३-६१०
दशकम्-६९	:	रास - क्रीडा	६११-६२२
दशकम्-७०	:	सुदर्शन - शाप - मोक्षः शङ्खचूड - वधः अरिष्टवधश्च	६२३-६३१
दशकम्-७१	:	केशिवधः व्योमासुरवधश्च	६३२-६३९
दशकम्-७२	:	अक्रूर - आगमनम्	६४०-६४९
दशकम्-७३	:	भगवतः मथुरापुर - यात्रा	६५०-६५७
दशकम्-७४	:	भगवतः मथुरापुरी - प्रवेशः	६५८-६६८
दशकम्-७५	:	कंस - वधः	६६९-६७९
दशकम्-७६	:	उद्धव - दौत्यम्	६८०-६९०
दशकम्-७७	:	उपश्लोक - उक्तिः जरासन्धादि - युद्धञ्च	६९१-७०१
दशकम्-७८	:	द्वारका - वासः रुक्मिणीसन्देशप्राप्तिश्च	७०२-७०९
दशकम्-७९	:	रुक्मिणी - हरणम्	७१०-७१८
दशकम्-८०	:	स्यमन्तक - उपाख्यानम्	७१९-७२८
दशकम्-८१	:	कालिन्दी - आदिपरिग्रहः पारिजातहरणञ्च	७२९-७३८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-८२	:	बाणयुद्धं नृगमोक्षश्च	७३९-७४७
दशकम्-८३	:	पौण्ड्रकवधः, विविधवधश्च	७४८-७५६
दशकम्-८४	:	समन्त - पञ्चक - यात्रा बन्धु - मित्र - आदिसमागमश्च	७५७-७६४
दशकम्-८५	:	जरासन्ध - वधः शिशुपालवधश्च	७६५-७७५
दशकम्-८६	:	साल्वादि - वधः भारतयुद्धञ्च	७७६-७८७
दशकम्-८७	:	कुचेल - वृत्तान्तः	७८८-७९५
दशकम्-८८	:	श्रीसन्तान - गोपालः	७९६-८०७
दशकम्-८९	:	वृकासुर - कथा भृगुपरीक्षणञ्च	८०८-८१७
दशकम्-९०	:	विष्णु - महत्त्व - स्थापनम्	८१८-८२६
दशकम्-९१	:	भक्ति - महत्त्वम्	८२७-८३७
दशकम्-९२	:	कर्म - मिश्र - भक्तिः	८३८-८४७
दशकम्-९३	:	चतुर्विंशतिः गुरवः	८४८-८५८
दशकम्-९४	:	तत्त्वज्ञान - उत्पत्तिः	८५९-८६८
दशकम्-९५	:	ध्यान - योगः	८६९-८७८
दशकम्-९६	:	भगवद्विभूतयः ज्ञानकर्मभक्तियोगश्च	८७९-८८८
दशकम्-९७	:	उत्तमभक्ति - प्रार्थना मार्कण्डेयकथा च	८८९-८९८
दशकम्-९८	:	निष्कल - ब्रह्म - उपासनम्	८९९-९०८
दशकम्-९९	:	वेद - स्तुतिः	९०९-९१८
दशकम्-१००	:	केश - आदि - पाद - वर्णनम्	९१९-९३०
श्लोकानुक्रमणिका			९३१-९६६
'श्रीमन्नारायणीयम्' में प्रयुक्त छन्द एवं लक्षण			९६७
अन्य आधार ग्रन्थ सूची			९६८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमन्नारायणीयम्

दशकम्-१

भगवतः स्वरूपं माहात्म्यञ्च

[स्रग्धराख्यं छन्दः]

॥ १ ॥

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम् ।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्त्वं
तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त भाग्यं जनानाम् ॥

पदविभागः— सान्द्रानन्दावबोधात्मकम्, अनुपमितम्, कालदेशावधिभ्याम्, निर्मुक्तम्, नित्यमुक्तम्, निगमशतसहस्रेणनिर्भास्यमानम्, अस्पष्टम्, दृष्टमात्रे, पुनः, उरुपुरुषार्थात्मकम्, ब्रह्मतत्त्वम्, तत्, तावत्, भाति, साक्षात्, गुरुपवनपुरे, हन्त, भाग्यम्, जनानाम् ॥

अन्वयः—सान्द्रानन्दावबोधात्मकम् अनुपमितं कालदेशावधिभ्यांनिर्मुक्तं निगमशतसहस्रेण निर्भास्यमानं नित्यमुक्तं दृष्टमात्रे पुनः अस्पष्टम् उरुपुरुषार्थात्मकं तत् ब्रह्मतत्त्वं गुरुपवनपुरे तावत् साक्षात् भाति । हन्त ! जनानां भाग्यम् ।

अन्वयार्थः

सान्द्रानन्दावबोधात्मकम् = परमानन्द तथा ज्ञानरूप

अनुपमितम् = उपमारहित

कालदेशावधिभ्यां निर्मुक्तम् = काल तथा देश की सीमा से मुक्त होते हुए भी

निगमशतसहस्रेण निर्भास्यमानम् = अनेक वेद-वाक्यों द्वारा स्पष्ट प्रमाणित (और)

नित्यमुक्तम् = शाश्वत है-ऐसा कहा गया है

दृष्टमात्रे पुनः = दृष्टिगत होने पर भी

अस्पष्टम् = अस्पष्ट

उरुपुरुषार्थात्मकम् = श्रेष्ठ पुरुषार्थ-स्वरूप

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत् ब्रह्मतत्त्वम् = वह ब्रह्मतत्त्व

गुरुपवनपुरे तावत् = गुरुवायुपुर में उस प्रकार

साक्षात् भाति = प्रत्यक्ष रूप से विराजमान् है ।

हन्त ! जनानां भाग्यम् = अहो ! जनसमुदाय का भाग्य !

भावार्थ—सत्यस्वरूप ब्रह्म आनन्दमय है ज्ञानस्वरूप है, निरुपम है । समय और देश की सीमा से अतीत होते हुए भी वेद आदि ग्रन्थों से परिभाषित है तथा शाश्वत है—ऐसा कहा गया है । दृष्टिगत होते हुए भी अस्पष्ट है, श्रेष्ठ पुरुषार्थ (धर्म, अर्थ, काम, मोक्ष) प्रदान करने वाले हैं । सर्वदा प्रकृति (अर्थात् माया) के कार्यों से दूर रहने वाले हैं । वे ही गुरुवायुपुर स्थित मन्दिर में प्रत्यक्ष रूप से विराजमान हैं । लोगों का कितना सौभाग्य है !

Word-Explanation

उरु=Wide, spacious, Great, Large, Excessive etc.

॥ २ ॥

एवं दुर्लभ्यवस्तुन्यपि सुलभतया हस्तलब्धे यदन्यत्
तन्वा वाचा धिया वा भजति बत जनः क्षुद्रतैव स्फुटेयम् ।
एते तावद्वयं तु स्थिरतरमनसा विश्वपीडापहत्यै
निश्शेषात्मानमेनं गुरुपवनपुराधीशमेवाश्रयामः ॥

पदविभागः—एवम्, दुर्लभ्यवस्तुनि, अपि, सुलभतया, हस्तलब्धे, यत्, अन्यत्, तन्वा, वाचा, धिया, वा, भजति, बत, जनः, क्षुद्रता, एव, स्फुटा, इयम्, एते, तावत्, वयम्, तु, स्थिरतरमनसा, विश्वपीडापहत्यै, निःशेषात्मानम्, एनम्, गुरुपवनपुराधीशम्, एव, आश्रयामः ॥

अन्वयः—दुर्लभ्यवस्तुनि अपि एवं सुलभतया हस्तलब्धे, बत जनः यत् अन्यत् तन्वा वाचा धिया वा भजति इयं स्फुटा क्षुद्रता एव । एते वयं तु तावत् स्थिरतरमनसा विश्वपीडापहत्यै निःशेषात्मानम् एनं गुरुपवनपुराधीशम् एव आश्रयामः ॥

अन्वयार्थः

दुर्लभ्यवस्तुनि अपि = दुर्लभ्य वस्तु होने पर भी

एवं सुलभतया = इस प्रकार सुलभता से

हस्तलब्धे = हाथ में प्राप्त होते हुए (भी)

बत = खेद है

जनः यत् अन्यत् = मनुष्य जिस किसी अन्य को

तन्वा, वाचा, धिया वा = शरीर, वाणी और बुद्धि से

भजति = भजता है

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इयम् स्फुटा क्षुद्रता एव = यह तो स्पष्ट रूप से क्षुद्रता (हीनता) ही है।

एते वयं तु तावत् = ये हम लोग तो अब

स्थिरतरमनसा = स्थिर मन से

विश्वपीडापहत्यै = संसार के समस्त दुःखों को मिटाने के लिए

निःशेषात्मानं = सर्वात्मस्वरूप

एनम् गुरुपवनपुराधीशम् एव = इस गुरुपवनपुराधीश का ही

आश्रयामः = आश्रय लेते हैं।

भावार्थ—इस प्रकार दुर्लभ्य वस्तु होने पर भी सुलभता से प्राप्त होते हुए भी खेद है कि मनुष्य शरीर, वाणी और मन से जिस किसी अन्य को भजता है अर्थात् लौकिक इच्छाओं में ही तन मन और समस्त इन्द्रियों को लगा देता है। यह तो सर्वथा निन्दनीय कार्य है। परन्तु हम लोग तो अटूट मन से समस्त दुःखों को मिटाने के लिए सर्वात्मस्वरूप इस गुरुवायुपुराधीश का ही आश्रय लेते हैं और इसी का भजन करते हैं।

॥ ३ ॥

सत्त्वं यत् तत् पराभ्यामपरिकलनतो निर्मलं तेन तावद्-
भूतैर्भूतेन्द्रियैस्ते वपुरिति बहुशः श्रूयते व्यासवाक्यम्।
तत् स्वच्छत्वाद्यदच्छादितपरसुखचिद्गर्भनिर्भासरूपं
तस्मिन् धन्याः रमन्ते श्रुतिमतिमधुरे सुग्रहे विग्रहे ते॥

पदविभागः—सत्त्वम्, यत्, तत्, पराभ्याम्, अपरिकलनतः, निर्मलम्, तेन, तावत्, भूतैः भूतेन्द्रियैः, ते, वपुः, इति, बहुशः, श्रूयते, व्यासवाक्यम्, तत्, स्वच्छत्वात्, यत्, अच्छादितपरसुखचिद्गर्भनिर्भासरूपम्, तस्मिन्, धन्याः रमन्ते, श्रुतिमतिमधुरे, सुग्रहे, निग्रहे, ते।

अन्वयः—तत् पराभ्याम् अपरिकलनतः निर्मलं यत् सत्त्वं तेन तावत् भूतैः भूतेन्द्रियैः ते वपुः, इति व्यासवाक्यं बहुशः श्रूयते। तत् स्वच्छत्वात् यत् अच्छादितपरसुखचिद्गर्भनिर्भासरूपं, श्रुतिमतिमधुरे सुग्रहे तस्मिन् ते विग्रहे धन्याः रमन्ते।

अन्वयार्थः

तत् पराभ्याम् अपरिकलनतः = जिस के द्वारा अन्य से सम्पर्क न होने पर

निर्मलं यत् सत्त्वम् = जो शुद्ध सत्त्व रूप (है)

तेन तावत् भूतैः = उससे ही उस प्रकार उत्पन्न

भूतेन्द्रियैः ते वपुः = (पांच) भूत और इन्द्रियों के द्वारा बना आपका शरीर (है)

इति व्यासवाक्यम् बहुशः श्रूयते = इस प्रकार व्यास जी का वाक्य अनेक बार सुनायी देता है।

तत् स्वच्छत्वात् यत् = उस निर्मलता से जो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अच्छादितपरसुखचिद्गर्भनिर्भासरूपम् = खुले, परमानन्ददायक प्रकाशमान और अन्तःकरण में विराजमान रूप को

श्रुतिमतिमधुरे = सुनने में और स्मरण करने में मधुर

सुग्रहे तस्मिन् ते विग्रहे = सुलभता से प्राप्त होने वाली आपकी मूर्ति में

धन्याः रमन्ते = भाग्यशाली मनुष्य आनन्द मग्न होते हैं।

भावार्थ—आपका शरीर रजस्, तमस् आदि गुणों से अस्पृश्य और सत्त्वगुणस्वरूप है तथा पंचभूत एवं इन्द्रियों से बना हुआ है ऐसा व्यास भगवान् ने अनेक बार कहा है। वह शरीर सत्त्वगुणी होने के कारण प्रकाश, आनन्द तथा ज्ञान से परिपूर्ण है। श्रवण और मनन करने से मधुर अनुभूत होता है। सुलभता से प्राप्त होता है। इसके कारण पुण्यशाली मनुष्य उसमें ध्यानमग्न होकर धन्य होते हैं।

॥ ४ ॥

निष्कम्पे नित्यपूर्णे निरवधिपरमानन्दपीयूषरूपे
निर्लीनानेकमुक्तावलिसुभगतमे निर्मलब्रह्मसिन्धौ।
कल्लोलोल्लासतुल्यं खलु विमलतरं सत्त्वमाहुस्तदात्मा
कस्मान्नो निष्कलस्त्वं सकल इति वचस्त्वत्कलास्वेव भूमन्॥

पदविभागः—निष्कम्पे, नित्यपूर्णे, निरवधिपरमानन्दपीयूषरूपे, निर्लीनानेकमुक्तावलिसुभगतमे, निर्मलब्रह्मसिन्धौ, कल्लोलोल्लासतुल्यम्, खलु, विमलतरम्, सत्त्वम्, आहुः, तत्, आत्मा, कस्मात्, नो, निष्कलत्वम्, सकलः, इति, वचः, त्वत्, कलासु, एव, भूमन्!

अन्वयः—निष्कम्पे नित्यपूर्णे निरवधिपरमानन्दपीयूषरूपे निर्लीनानेकमुक्तावलिसुभगतमे, निर्मलब्रह्मसिन्धौ कल्लोलोल्लासतुल्यं विमलतरं सत्त्वम् आहुः खलु। तदात्मा कस्मात् नो निष्कलत्वं? भूमन्! सकलः इति वचः त्वत् कलासु एव।

अन्वयार्थः

निष्कम्पे, नित्यपूर्णे = कम्पन रहित (स्थिर), सदा पूर्ण

निरवधिपरमानन्दपीयूषरूपे = असीमित आनन्दामृत स्वरूप

निर्लीनानेकमुक्तावलिसुभगतमे = अनेक मुक्तावलियों के मिलन से शोभित

निर्मलब्रह्मसिन्धौ = शुद्ध ब्रह्म रूप समुद्र में

कल्लोलोल्लासतुल्यम् = लहरों की तरंगों के समान

विमलतरं सत्त्वम् = निर्मल, सत्त्वगुण से युक्त

आहुः खलु = निश्चित् रूप से ऐसा कहा गया है।

तदात्मा = वह आत्मा

कस्मात् नो निष्कलत्वम्? = किससे स्पष्ट नहीं है?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूमन् ! = हे सर्वव्यापी !

सकल इति वचः = सकल इस प्रकार का शब्द

त्वत् कलासु एव = आपकी कलाओं में ही है ।

भावार्थ—ब्रह्मरूपी समुद्र अचल है । सदा भरा हुआ है । असीम आनन्द का आधार है । अपने अन्दर रखे मोतियों के समूह से सुन्दर है, शुद्ध है । उस समुद्र का सत्त्वगुण बड़ी लहरों की तरंगों के समान है, इस प्रकार ज्ञानीजन कहते हैं । हे सर्वव्यापी ! इस प्रकार के सत्त्वगुण रूपी आप किससे अछूते हो ? अर्थात् सभी को आपका अंश प्राप्त है । सम्पूर्णता केवल आपकी कलाओं में ही है । (आपके अंशावतारों को ध्यान में रखकर लोग भ्रमित होते हैं जबकि आप पूर्णता का पर्याय हैं ।) ।

॥ ५ ॥

निर्व्यापारोऽपि निष्कारणमज भजसे यत्क्रियामीक्षणाख्यां
तेनैवोदेति लीना प्रकृतिरसतिकल्पाऽपि कल्पाऽऽदिकाले ।
तस्याः संशुद्धमंशं कमपि तमतिरोधायकं सत्त्वरूपं
स त्वं धृत्वा दधासि स्वमहिमविभवाकुण्ठ-वैकुण्ठरूपम् ॥

पदविभागः—निर्व्यापारः, अपि, निष्कारणम्, अज, भजसे, यत्, क्रियाम्, ईक्षणाख्याम्, तेन, एव, उदेति, लीना, प्रकृतिः, असतिकल्पा, अपि, कल्पादिकाले, तस्याः, संशुद्धम्, अंशम्, कमपि, तम् अतिरोधायकम्, सत्त्वरूपम्, सः, त्वम्, धृत्वा, दधासि, स्वमहिमविभवाकुण्ठ-वैकुण्ठ-रूपम् ।

अन्वयः—अज ! निर्व्यापारः अपि (त्वम्) निष्कारणम् ईक्षणाख्यां यत् क्रियां भजसे तेन एव असतिकल्पा अपि लीना प्रकृतिः कल्पादिकाले उदेति संशुद्धं सत्त्वरूपं कमपि अंशं धृत्वा सः त्वम् स्वमहिमविभवाकुण्ठ-वैकुण्ठरूपं दधासि ।

अन्वयार्थः

अज ! निर्व्यापारः अपि = हे जन्मरहित ! (आप) चेष्टारहित होने पर भी

निष्कारणम् = बिना कोई कारण

ईक्षणाख्यां यत् क्रियां भजसे = 'देखना' इस प्रकार की जिस क्रिया को प्राप्त होते हो ।

तेन एव = उसी से ही

असतिकल्पा अपि = नहीं होने पर भी

लीना प्रकृतिः = (आप में) लीन प्रकृति (माया)

कल्पादिकाले = कल्प के आरम्भ में

उदेति = प्रकट होती है ।

तस्याः तमतिरोधायकम् = उस (प्रकृति/माया) के उन्मुक्त

संशुद्धं सत्त्वरूपं = शुद्ध सत्त्वगुण को (और उसके भी)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कमपि अंशं धृत्वा = किसी अंश को धारण करके

सः त्वम् = वह आप

स्वमहिमविभवाकुण्ठ = अपने स्वरूप के तेज से व्याप्त

वैकुण्ठरूपम् = वैकुण्ठ में रहने वाले विष्णुरूप को

दधासि = धारण करते हो।

भावार्थ—हे जन्मरहित ! आप कार्यरहित होने पर भी बिना कारण आँखों के द्वारा देखने की क्रिया को प्राप्त होते हो, इससे आप में लीन माया सृष्टि के आरम्भ में उत्पन्न होती है। उस प्रकृति के शुद्ध सात्त्विक स्वरूप में से किसी एक भाग को लेकर आप अपनी महिमा के तेज से व्याप्त वैकुण्ठ में निवास करने वाले विष्णुरूप को धारण करते हो।

॥ ६ ॥

तत्ते प्रत्यग्रधाराधरललितकलायावलीकेलिकारं
लावण्यस्यैकसारं सुकृतिजनदृशां पूर्णपुण्यावतारम्।
लक्ष्मीनिश्शङ्कलीलानिलयनममृतस्यन्दसन्दोहमन्तः
सिञ्चत्संचिन्तकानां वपुरनुकलये मारुतागारनाथ॥

पदविभागः—तत्, ते, प्रत्यग्रधाराधरललितकलायावलीकेलिकारम्, लावण्यस्य, एकसारम्, सुकृतिजनदृशाम्, पूर्ण-पुण्यावतारम्, लक्ष्मीनिःशङ्कलीलानिलयनम्, अमृतस्यन्दसन्दोहम्, अन्तः, सिञ्चत्, सञ्चिन्तकानाम्, वपुः, अनुकलये, मारुतागारनाथ।

अन्वयः—प्रत्यग्रधाराधरललितकलायावलीकेलिकारं लावण्यस्य एकसारं सुकृतिजनदृशां पूर्णपुण्यावतारं लक्ष्मीनिःशङ्कलीलानिलयनं सञ्चिन्तकानाम् अन्तः अमृतस्यन्दसन्दोहं सिञ्चत् मारुतागारनाथ ! तत् ते वपुः अनुकलये।

अन्वयार्थः

प्रत्यग्रधाराधरललितकलायावलीकेलिकारम् = नये बादलों और सुन्दर कमलपुष्पों आदि के द्वारा ललित क्रीडा दिखाने वाले (मधुर)

लावण्यस्य एकसारम् = लावण्य का एकमात्र सार

सुकृतिजनदृशाम् = सज्जनों को दृश्यमान्

पूर्णपुण्यावतारम् = पुण्य का पूर्ण अवतार

लक्ष्मीनिःशङ्कलीलानिलयनम् = लक्ष्मी जी के अन्तरङ्ग क्रीडास्थल

सञ्चिन्तकानाम् अन्तः = सज्जनों के अन्तः करण (हृदय) में

अमृतस्यन्दसन्दोहं सिञ्चत् = अमृत-धारा की वर्षा करते हुए

मारुतागारनाथ = हे गुरुवायुपुराधीश !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत् ते वपुः = आप के उस शरीर का

अनुकलये = मैं ध्यान करता हूँ।

भावार्थ—हे गुरुवायुपुराधीश ! आपका शरीर घने बादल जैसा सुन्दर है। कमल-पुष्प के समान चित्त को सन्तोष पहुंचाने वाला है। सुन्दरता का एकत्रित रूप है। सज्जनों को दृश्यमान् है। लक्ष्मी जी के निःसंकोच क्रीडा का स्थान है। ध्यान करने वालों के हृदय में परमानन्द का अमृत बहाने वाला है। उस विग्रह (स्वरूप) का मैं ध्यान करता हूँ।

Word-Explanation

धारा = A stream or current of water

धाराधरः = cloud

॥ ७ ॥

कष्टा ते सृष्टिचेष्टा बहुतरभवखेदावहा जीवभाजा-
मित्येवं पूर्वमालोचितमजित ! मया नैवमद्याभिजाने।
नो चेज्जीवाः कथं वा मधुरतरमिदं त्वद्वपुश्चिद्रसार्द्रं
नेत्रैः श्रोत्रैश्च पीत्वा परमरससुधाम्भोधिपूरे रमेरन् ॥

पदविभागः—कष्टा, ते, सृष्टिचेष्टा, बहुतरभवखेदावहा, जीवभाजाम्, इति, एवम्, पूर्वम्, आलोचितम्, अजित, मया, न, एवम्, अद्य, अभिजाने, नो, चेत्, जीवाः, कथम्, वा, मधुरतरम्, इदम्, त्वत्, वपुः, चिद्रसार्द्रम्, नेत्रैः, श्रोत्रैः, च, पीत्वा, परमरससुधाम्भोधिपूरे, रमेरन्।

अन्वयः—अजित ! ते सृष्टिचेष्टा कष्टा जीवभाजां बहुतरभवखेदावहा इति एवं मया पूर्वम् आलोचितम् अद्य एवं न अभिजाने नोचेत् जीवाः कथं वा चिद्रसार्द्रं मधुरतरं त्वत् वपुः नेत्रैः श्रोत्रैः च पीत्वा परमरससुधाम्भोधिपूरे रमेरन् ?

अन्वयार्थः

अजित ! ते सृष्टिचेष्टा = हे अजेय ! आपकी सृष्टि करने की क्रिया

कष्टा = कष्टप्रदा है

जीवभाजाम् = जीवन को धारण करने वालों को

बहुतरभवखेदावहा = बहुत सांसारिक दुःख देने वाली है

इति एवम् = इस प्रकार से

मया पूर्वम् आलोचितम् = मेरे द्वारा पहले सोचा गया,

अद्य एवं न अभिजाने = (परन्तु) वर्तमान में ऐसा नहीं मानता हूँ।

नोचेत् = अन्यथा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवाः कथं वा = सारे जीव कैसे

चिद्रसार्द्रं मधुरतरं त्वत् वपुः = ज्ञान तथा आनन्द बहाने वाले आपके सुन्दर विग्रह को

नेत्रैः श्रोत्रैः च पीत्वा = आखों तथा कानों से पीकर

परमरससुधाम्भोधिपूरे = परमानन्द-अमृत-सागर की तरंगों में

रमेरन्? = रम सकते हैं?

भावार्थ—हे अजेय ! आपकी सृष्टि करने की क्रिया कष्टकारी है, जीवन-धारण करने वालों को बहुत सांसारिक दुःख देने वाली है—इस प्रकार से मेरे द्वारा पहले सोचा गया था। किन्तु अब मैं इस प्रकार नहीं सोचता हूँ। यदि आपके द्वारा ऐसा नहीं किया जाता तो जीव-समुदाय ज्ञान तथा आनन्द बहाने वाले आपके सुन्दर स्वरूप को आँखों तथा कानों से पीकर परमानन्दमय अमृतसागर की तरङ्गों में कैसे रम सकता?

॥ ८ ॥

नम्राणां सन्निधत्से सततमपि पुरस्तैरनभ्यर्थितान-
प्यर्थान् कामानजस्रं वितरसि परमानन्दसान्द्रां गतिं च।
इत्थं निःशेषलभ्यो निरवधिकफलः पारिजातो हरे ! त्वं
क्षुद्रं तं शक्रवाटीद्रुममभिलषति व्यर्थमर्थिव्रजोऽयम्॥

पदविभागः—नम्राणाम्, सन्निधत्से सततम्, अपि, पुरः, तैः, अनभ्यर्थितान्, अपि अर्थान्, कामान्, अजस्रम्, वितरसि, परमानन्दसान्द्राम्, गतिम्, च इत्थम्, निःशेषलभ्यः, निरवधिकफलः, पारिजातः, हरे, त्वम्, क्षुद्रम्, तम्, शक्रवाटीद्रुमम्, अभिलषति, व्यर्थम्, अर्थिव्रजः, अयम्।

अन्वयः—नम्राणां पुरः सततम् अपि सन्निधत्से। तैः अनभ्यर्थितान्, अपि अर्थान्, कामान् परमानन्दसान्द्रां गतिं च अजस्रं वितरसि। इत्थं हरे ! त्वं निःशेषलभ्यः निरवधिकफलः पारिजातः। अयम् अर्थिव्रजः क्षुद्रं तं शक्रवाटीद्रुमं व्यर्थम् अभिलषति।

अन्वयार्थः

नम्राणां पुरः सततम् अपि = विनम्र (जीवों) के सम्मुख हर समय ही

सन्निधत्से = आप विराजमान हो।

तैः अनभ्यर्थितान् अपि = उनके न माँगने पर भी

अर्थान्, कामान् परमानन्दसान्द्रां गतिं च = सम्पत्ति, कामनाएँ तथा परमानन्द प्रदान करने वाली मुक्ति को भी

अजस्रं वितरसि = सदा वितरण करते हो।

इत्थं हरे ! त्वम् = इस प्रकार भगवन् ! आप

निःशेषलभ्यः = सब को प्राप्त

निरवधिकफलः पारिजातः = सीमा-रहित फल प्रदान करने वाले कल्पवृक्ष हो।

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयम् अर्थिव्रजः = यह याचना करने वाला

क्षुद्रं तं शक्रवाटीद्रुमम् = इन्द्र के उपवन में स्थित उस क्षुद्र (कल्प) वृक्ष को

व्यर्थम्, अभिलषति = व्यर्थ में चाहता है।

भावार्थ—विनम्र जीवों के सम्मुख हर समय आप विराजमान रहते हो; उनके न माँगने पर भी आप सम्पत्ति, कामनाएँ तथा परमानन्द प्रदान करने वाली मुक्ति को भी सदा वितरण करते हो। इस प्रकार भगवन्! आप सबको प्राप्त, सीमारहित फल प्रदान करने वाले कल्पवृक्ष हो। यह याचना करने वाला व्यर्थ ही इन्द्र के उपवन में स्थित क्षुद्र (कल्प) वृक्ष की अभिलाषा करता है।

॥ ९ ॥

कारुण्यात् काममन्यं ददति खलु परे स्वात्मदस्त्वं विशेषा-
दैश्वर्यादीशतेऽन्ये जगति परजने स्वात्मनोऽपीश्वरस्त्वम्।
त्वय्युच्चैरारमन्ति प्रतिपदमधुरे चेतनाः स्फीतभाग्या-
स्त्वं चात्माराम एवेत्यतुलगुणगणाधार शौरे! नमस्ते॥

पदविभागः—कारुण्यात्, कामम्, अन्यम्, ददति, खलु, परे, स्वात्मदः, त्वम्, विशेषात्, ऐश्वर्यात्, ईशते, अन्ये, जगति, परजने, स्वात्मनः, अपि, ईश्वरः, त्वम्, त्वयि, उच्चैः, आरमन्ति, प्रतिपदमधुरे, चेतनाः, स्फीतभाग्याः, त्वम्, च, आत्मारामः, एव, इति, अतुलगुणगणाधार, शौरे, नमः, ते।

अन्वयः—कारुण्यात् अन्यं कामं ददति खलु परे। त्वं विशेषात् स्वात्मदः। अन्ये ऐश्वर्यात्, जगति परजने ईशते। त्वं स्वात्मनः अपि ईश्वरः। स्फीतभाग्याः चेतनाः प्रतिपदमधुरे त्वयि उच्चैः आरमन्ति। त्वं च आत्मारामः एव। इति अतुलगुणगणाधार शौरे! ते नमः।

अन्वयार्थः

कारुण्यात् = करुणा से

अन्यं कामं ददति खलु = दूसरे की इच्छा पूरी करते हो।

परे त्वं विशेषात् = इससे भी आगे आप विशेषकर

स्वात्मदः = अपने आप को प्रदान करते हो।

अन्ये ऐश्वर्यात् = अन्य (देवता लोग) ईश्वरत्व द्वारा

जगति परजने ईशते = जगत् में दूसरों पर स्वामित्व करते हैं।

त्वम् = आप

स्वात्मनः अपि ईश्वरः = अपनी आत्मा के भी ईश्वर हो।

स्फीतभाग्याः चेतनाः = अधिक भाग्यशाली जीव

प्रतिपदमधुरे त्वयि = कण-कण में मधुर आप में

उच्चैः आरमन्ति = उच्चकोटि के आनन्द भोगते हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वं च आत्मारामः एव = और आप आत्माराम ही हो।

इति अतुलगुणगणाधार- = इस प्रकार के अनुपम गुणों के आधार

शौरे ! ते नमः = हे विष्णु ! आपको नमस्कार (है)।

भावार्थ—करुणा से द्रवित होकर आप भक्तों की इच्छा तो पूरी करते ही हो। इससे भी आगे आप विशेषकर अपने आप को प्रदान करते हो। अन्य (देवतागण) तो ईश्वरत्व द्वारा जगत् में दूसरों पर स्वामित्व करते हैं। आप अपनी आत्मा के भी ईश्वर हो। अधिक भाग्यशाली प्राणी कण-कण में मधुर आप का ध्यान करके उच्चकोटि के आनन्द भोगते हैं। आप आत्माराम ही हैं। इस प्रकार के अनुपम गुणों के आधार हे विष्णु ! आपको नमस्कार है।

॥ १० ॥

ऐश्वर्यं शङ्करादीश्वरविनियमनं विश्वतेजोहराणां
तेजस्संहारि वीर्यं विमलमपि यशो निस्पृहैश्चोपगीतम्।
अङ्गासङ्गा सदा श्रीरखिलविदसि न क्वापि ते सङ्गवार्ता
तद्वातागारवासिन्, मुरहर, भगवच्छब्दमुख्याश्रयोऽसि॥

पदविभागः—ऐश्वर्यम्, शङ्करादीश्वरविनियमनम्, विश्वतेजोहराणाम्, तेजः, संहारि, वीर्यम्, विमलम्, अपि, यशः, निःस्पृहैः, च, उपगीतम्, अङ्गासङ्गा, सदा, श्रीः, अखिलवित्, असि, न, क्व, अपि, ते सङ्गवार्ता, तत्, वातागारवासिन्, मुरहर, भगवत्, शब्दमुख्याश्रयः, असि।

अन्वयः—ऐश्वर्यं शङ्करादीश्वरविनियमनम्। वीर्यं विश्वतेजोहराणां तेजः संहारी। विमलं यशः अपि निस्पृहैः च उपगीतम्। श्रीः सदा अङ्गासङ्गा। अखिलवित् असि। सङ्गवार्ता ते न क्वापि। तत् वातागारवासिन्, मुरहर ! भगवत् शब्दमुख्याश्रयः असि।

अन्वयार्थः

ऐश्वर्यम् = (आपके) ऐश्वर्य

शङ्करादीश्वरविनियमनम् = शंकर आदि देवताओं को भी अधीन करते हैं।

वीर्यं विश्वतेजोहराणां तेजः संहारी = (आपके) वीर्य विश्व के तेज को अधीन करने वालों को भी अधीन करते हैं।

विमलं यशः अपि निस्पृहैः च उपगीतम् = (आपके) निर्मल यश को निस्पृह (विरक्त) भी गाते हैं।

श्रीः सदा अङ्गासङ्गा = लक्ष्मी जी सदा (आपके) साथ रहती हैं।

अखिलवित् असि = आप सब कुछ जानने वाले (सर्वज्ञ) हो।

सङ्गवार्ता ते न क्व अपि = आप में किसी के प्रति आसक्ति नहीं है।

तत् वातागारवासिन् = इस प्रकार के हे गुरुवायुपुराधीश !

मुरहर = हे मुरहर (मुर नामक राक्षस का वध करने वाले)

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भगवच्छब्दमुख्याश्रयः असि = आप भगवान् शब्द के प्रधान आश्रय हो।

भावार्थ—आपके ऐश्वर्य शंकर आदि देवताओं को भी अपने अधीन करते हैं। आपके वीर्य विश्व के तेज को अपने अधीन करने वालों को भी अधीन करते हैं। आपके निर्मल यश निस्पृह (अभिलाषा रहित विरक्त) जन भी गाते हैं। लक्ष्मीदेवी सदा आपके साथ रहती हैं। इस प्रकार के हे मुर नामक राक्षस का वध करने वाले गुरुवायुपुराधीश ! आप भगवान् शब्द के मुख्य आश्रय हो।

[इति प्रथमदशकं समाप्तम्]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२

रूपमाधुर्यं भक्तिमहत्त्वञ्च

शार्दूलविक्रीडितछन्दः

॥ १ ॥

सूर्यस्पर्धिकिरीटमूर्ध्वतिलकप्रोद्भासिफालान्तरं
कारुण्याकुलनेत्रमार्द्रहसितोल्लासं सुनासापुटम् ।
गण्डोद्यन्मकराभकुण्डलयुगं कण्ठोज्ज्वलत्कौस्तुभं
त्वद्रूपं वनमाल्यहारपटलश्रीवत्सदीप्रं भजे ॥

पदविभागः—सूर्यस्पर्धकिरीटम्, ऊर्ध्वतिलकप्रोद्भासिफालान्तरम्, कारुण्याकुलनेत्रम्, आर्द्रहसितोल्लासम्, सुनासापुटम्, गण्डोद्यन्मकराभकुण्डलयुगम्, कण्ठोज्ज्वलत्कौस्तुभम्, त्वत्, रूपम्, वनमाल्यहारपटलश्रीवत्सदीप्रम् । भजे ।

अन्वयः—सूर्यस्पर्धकिरीटम् ऊर्ध्वतिलकप्रोद्भासिफालान्तरं कारुण्याकुलनेत्रम् आर्द्रहसितोल्लासं सुनासापुटम् गण्डोद्यन्मकराभकुण्डलयुगं कण्ठोज्ज्वलत्कौत्सुभं वनमाल्यहारपटलश्रीवत्सदीप्रं त्वद्रूपं (अहम्) भजे ।

अन्वयार्थः

सूर्यस्पर्धकिरीटम् = सूर्य से भी अधिक प्रकाशमान् मुकुट

ऊर्ध्वतिलकप्रोद्भासिफालान्तरम् = ऊपर जाते तिलक से शोभित मस्तक

कारुण्याकुलनेत्रम् = करुणा से आकुल आँखें

आर्द्रहसितोल्लासम् = मनोहर मुस्कान

सुनासापुटम् = सुन्दर नाक

गण्डोद्यन्मकराभकुण्डलयुगम् = गाल के ऊपर शोभित मकर के स्वरूप वाली दो कुण्डल

कण्ठोज्ज्वलत्कौत्सुभम् = गले में प्रकाशित होती कौत्सुभ मणि

वनमाल्यहारपटलश्रीवत्सदीप्रम् = वनमाला, श्रीवत्स (वक्षः स्थल का चिह्न विशेष) आदि से प्रकाशमान्

त्वत् रूपम् = आप के विग्रह का

(अहम्) भजे = मैं ध्यान करता हूँ ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—सूर्य से भी अधिक प्रकाशमान् मुकुट, ऊपर की ओर अंकित तिलक से शोभित माथे, करुणा से भरी हुई आँखें, मनोहर मुस्कान, सुन्दर नाक, गाल के ऊपर शोभित मकर के आकार वाली दो कुण्डल, गले में प्रकाशित कौत्सुभ मणि, वनमाला, श्रीवत्स (वक्षः स्थल पर स्थित चिह्न विशेष) आदि से प्रकाशमान् आप के विग्रह का मैं ध्यान करता हूँ।

॥ २ ॥

केयूराङ्गदकङ्कणोत्तममहारत्नाङ्गुलीयाङ्कित-
श्रीमद्बाहुचतुष्कसङ्गतगदाशङ्खारिपङ्केरुहाम्।
काञ्चित्काञ्चनकाञ्चिलाञ्छितलसत्पीताम्बरालम्बिनी-
मालम्बे विमलाम्बुजद्युतिपदां मूर्तिं तवार्तिच्छिदम्॥

पदविभागः—केयूराङ्गदकङ्कणोत्तममहारत्नाङ्गुलीयाङ्कितश्रीमद्बाहुचतुष्कसङ्गतगदाशङ्खारिपङ्केरुहाम्, काञ्चित्, काञ्चनकाञ्चिलाञ्छितलसत्पीताम्बरालम्बिनीम्, आलम्बे, विमलाम्बुजद्युतिपदां, मूर्तिम्, तवार्तिच्छिदम्।

अन्वयः—केयूराङ्गदकङ्कणोत्तममहारत्नाङ्गुलीयाङ्कितश्रीमद्बाहुचतुष्कसङ्गतगदाशङ्खारिपङ्केरुहां, काञ्चित्काञ्चनकाञ्चिलाञ्छितलसत्पीताम्बरालम्बिनीं विमलाम्बुजद्युतिपदां आर्तिच्छिदं काञ्चित् तव मूर्तिम् (अहम्) आलम्बे।

अन्वयार्थः

केयूराङ्गदकङ्कणोत्तममहारत्नाङ्गुलीयाङ्कित- = केयूर, अंगद, उत्तम कंकण, श्रेष्ठ रत्नों से युक्त अङ्गुलियों से शोभित

श्रीमद्बाहुचतुष्कसङ्गतगदाशङ्खारिपङ्केरुहाम = चार भुजाओं में गदा, शङ्ख, चक्र तथा कमल धारण करने वाली

काञ्चनकाञ्चिलाञ्छितलसत्पीताम्बरालम्बिनीम् = स्वर्ण (सोने) से अलंकृत उज्ज्वल पीताम्बरधारी

विमलाम्बुजद्युतिपदाम् = स्वच्छ कमल के समान निर्मल चरणों वाली

आर्तिच्छिदम् = दुःख का विनाश करने वाली

काञ्चित् तव मूर्तिम् = (विश्व में) कोई अनुपम आपकी मूर्ति को

(अहम्) आलम्बे = (मैं) ग्रहण करता हूँ।

भावार्थ—केयूर, अंगद, उत्तम कङ्कण, रत्नों से युक्त अङ्गुलियों से शोभित चारों हाथों में गदा, शंख, चक्र तथा कमल धारण करने वाली, सोने से अलंकृत उज्ज्वल पीले वस्त्रों को धारण करने वाली, निर्मल कमल के समान सुन्दर चरणों वाली, दुःखों का विनाश करने वाली, विश्व में कोई एक अनुपम आपकी मूर्ति का मैं आश्रय लेता हूँ।

॥ ३ ॥

यत्त्रैलोक्यमहीयसोऽपि महितं सम्मोहनं मोहनात्
कान्तं कान्तिनिधानतोऽपि मधुरं माधुर्यधुर्यादपि।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सौन्दर्योत्तरतोऽपि सुन्दरतरं त्वद्रूपमाश्चर्यतो-
ऽप्याश्चर्यं भुवने न कस्य कुतुकं पुष्णाति विष्णो ! विभो ! ॥

पदविभागः—यत्, त्रैलोक्यमहीयसः, अपि, महितम्, सम्मोहनम्, मोहनात्, कान्तम्, कान्तिनिधानतः, अपि, मधुरम्, माधुर्यधुर्यात्, अपि, सौन्दर्योत्तरतः, अपि, सुन्दरतरम्, त्वत्, रूपम्, आश्चर्यतः, अपि, आश्चर्यम्, भुवने, न, कस्य, कुतुकम्, पुष्णाति, विष्णो, विभो ।

अन्वयः—विष्णो ! विभो ! यत् त्रैलोक्यमहीयसः अपि महितम्, मोहनात् सम्मोहनं, कान्तिनिधानतः अपि कान्तं, माधुर्यात् अपि मधुरं, सौन्दर्योत्तरतः अपि सुन्दरतरम्, आश्चर्यतः अपि आश्चर्यं, त्वत् रूपं भुवने कस्य कुतुकं न पुष्णाति ?

अन्वयार्थः

विष्णो, विभो = हे विभु, विष्णु !

यत् त्रैलोक्यमहीयसः अपि महितम् = जो तीनों लोकों में पूज्य से भी (अधिक) पूज्य

मोहनात् सम्मोहनम् = मनोहर से भी (अधिक) मनोहर

कान्तिनिधानतः अपि कान्तम् = प्रकाशमान् से भी (अधिक) प्रकाशमान्

माधुर्यात् अपि मधुरम् = मधुर से भी (अधिक) मधुर

सौन्दर्योत्तरतः अपि सुन्दरतरम् = उच्चकोटि की सुन्दरता से भी (अधिक) सुन्दर

आश्चर्यतः अपि आश्चर्यम् = आश्चर्य से भी (अधिक) आश्चर्य

त्वत् रूपम् = आप का विग्रह (रूप)

भुवने कस्य कुतुकं न पुष्णाति ? = जगत् में किस की उत्कण्ठा को नहीं बढ़ाता ?

भावार्थ—हे विष्णु ! विभु ! जो तीनों लोकों में पूज्य से भी अधिक पूज्य, आकर्षक से भी अधिक आकर्षक, प्रकाशमान् से भी अधिक प्रकाशमान्, मधुर से भी अधिक मधुर, उच्चकोटि की सुन्दरता से भी अधिक सुन्दर, आश्चर्य से भी अधिक आश्चर्य आप का रूप है, वह संसार में किसकी उत्कण्ठा को नहीं बढ़ाता ? अर्थात् आपको देखने के लिए सभी उत्साहित रहते हैं ।

Word-Explanation

महीयस् = Greater, Larger, More powerful etc.

महितम् = Greatness, Might, Exalted rank etc.

महित= =Honoured, Worshipped, Revered etc.

॥ ४ ॥

तत्तादृङ्मधुरात्मकं तव वपुस्संप्राप्य सम्पन्मयी
सा देवी परमोत्सुका चिरतरं नास्ते स्वभक्तेष्वपि ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेनास्याः बत कष्टमच्युत विभो ! त्वद्रूपमानोज्ञक-
प्रेमस्थैर्यमयादचापलबलाच्चापल्यवार्तोदभूत् ॥

पदविभागः—तत्तादृङ्मधुरात्मकम्, तव, वपुः, संप्राप्य, संपन्मयी, सा, देवी, परमोत्सुका, चिरतरम्, न, आस्ते, स्वभक्तेषु, अपि, तेन, अस्याः, बत, कष्टम्, अच्युत, विभो, त्वत् रूपमानोज्ञकप्रेमस्थैर्यमयात्, अचापलबलात्, चापल्यवार्ता, उदभूत् ॥

अन्वयः—तत्तादृङ्मधुरात्मकं तव वपुः संप्राप्य संपन्मयी सा देवी परमोत्सुका स्वभक्तेषु अपि चिरतरं न आस्ते। अच्युत ! विभो ! तेन अस्याः त्वद्रूपमानोज्ञकप्रेमस्थैर्यमयात् अचापलबलात् चापल्यवार्ता उदभूत् बत कष्टम्।

अन्वयार्थः

तत्तादृङ्मधुरात्मकम् = वह उस प्रकार स्वरूप वाला मधुर

तव वपुः = आप का शरीर (विग्रह)

संप्राप्य = प्राप्तकर

संपन्मयी सा देवी = संपत्ति रूपी वह देवी (लक्ष्मी)

परमोत्सुका = आप के प्रति अनुरक्त

स्वभक्तेषु अपि = अपने भक्तजनों के पास भी

चिरतरं न आस्ते = अधिक समय नहीं रहतीं।

अच्युत ! विभो ! = हे अच्युत, भगवन् !

तेन अस्याः = इसलिए उनके (लक्ष्मी जी के द्वारा)

त्वद्रूपमानोज्ञकप्रेमस्थैर्यमयात् अचापलबलात् = आप के रूप में दृढ़ (चपलता रहित) प्रेम के कारण स्थिर होते हुए भी

चापल्यवार्ता = चपलता से युक्त वार्ता

उदभूत् = प्रकट हुई।

बत कष्टम् ! = हाय, कितनी दुःख की बात है।

भावार्थ—वह उस प्रकार मधुर स्वरूप वाले आपके शरीर को प्राप्त करके, संपत्ति रूपी वह देवी (लक्ष्मी जी) आप के प्रति अनुरक्त होकर, अपने भक्तजनों के पास भी अधिक समय नहीं रहतीं। हे अच्युत ! हे भगवन् ! इसलिए उनका आप के प्रति दृढ़ चंचलतारहित प्रेम होने के बावजूद भी उनके विषय में चंचलता वाली बातें व्यक्त हुईं। हाय ! कितनी दुःख की बात है।

॥ ५ ॥

लक्ष्मीस्तावकरामणीयकहतैवेयं परेष्वस्थिरे-
त्यस्मिन्नन्यदपि प्रमाणमधुना वक्ष्यामि लक्ष्मीपते !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ये त्वद्ध्यानगुणानुकीर्तनरसासक्ता हि भक्ता जना-
स्तेष्वेषा वसति स्थिरैव दयितप्रस्तावदत्तादरा ॥

पदविभागः—लक्ष्मीः, तावकरामणीयकहृता, एव, इयम्, परेषु, अस्थिरा, इति, अस्मिन्, अन्यत्, अपि, प्रमाणम्, अधुना, वक्ष्यामि, लक्ष्मीपते, ये, त्वद्ध्यानगुणानुकीर्तनरसासक्ताः, हि, भक्ताः, जनाः, तेषु, एषा, वसति, स्थिरा, एव, दयितप्रस्तावदत्तादरा ॥

अन्वयः—लक्ष्मीपते ! इयं लक्ष्मीः तावकरामणीयकहृता एव परेषु अस्थिरा इति अस्मिन् अन्यत् प्रमाणम् अपि अधुना (अहं) वक्ष्यामि । ये जनाः त्वद्ध्यानगुणानुकीर्तनरसासक्ताः हि भक्ताः, तेषु एषा दयितप्रस्तावदत्तादरा स्थिरा एव वसति ।

अन्वयार्थः

लक्ष्मीपते ! = हे लक्ष्मी जी के पति !

इयं लक्ष्मीः = यह लक्ष्मी जी

तावकरामणीयकहृता एव = आपकी रमणीयता (सौन्दर्य) से आकर्षित होकर ही

परेषु अस्थिरा = दूसरों में स्थिर नहीं रहती हैं ।

इति अस्मिन् अन्यत् प्रमाणम् अपि = इस प्रकार इस में अन्य प्रमाण भी (है)

अधुना (अहं) वक्ष्यामि = अब (मैं) कहूँगा ।

ये जनाः = जो लोग

त्वद्ध्यानगुणानुकीर्तनरसासक्ताः हि भक्ताः = आप के ध्यान में मग्न तथा आपके गुण गाने वाले भक्त हैं

तेषु एषा = उनमें यह (लक्ष्मी)

दयितप्रस्तावदत्तादरा = अपने पतिदेव की प्रशंसा सुनने की इच्छा से

स्थिरा एव वसति = स्थिर ही रहती हैं ।

भावार्थ—हे लक्ष्मीपते ! यह लक्ष्मी जी आपकी रमणीयता (सुन्दरता) से आकर्षित होकर ही दूसरों के पास स्थिर नहीं रहती हैं । इस प्रकार इस में अन्य प्रमाण भी अब (मैं) कहूँगा । जो लोग आपके ध्यान में मग्न तथा आपके गुण गाने वाले भक्त हैं, उनके पास यह (लक्ष्मी) अपने पतिदेव की प्रशंसा सुनने की इच्छा से स्थिर रहती हैं ।

Word-Explanation

दयितः- = Beloved, Husband, Lover, Beloved person etc.

॥ ६ ॥

एवं भूतमनोज्ञतानवसुधानिष्यन्दसन्दोहनं
त्वद्रूपं परचिद्रसायनमयं चेतोहरं शृण्वताम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सद्यः प्रेरयते मतिं मदयते रोमाञ्चयत्यङ्गकं
व्यासिञ्चत्यपि शीतबाष्पविसरैरानन्दमूर्च्छोद्भवैः ॥

पदविभागः—एवम्, भूतमनोज्ञतानवसुधानिष्यन्दसन्दोहनम्, त्वत्, रूपम्, परचिद्रसायनमयम्, चेतोहरम्, शृण्वताम्, सद्यः, प्रेरयते, मतिम्, मदयते, रोमाञ्चयति, अङ्गकम्, व्यासिञ्चति, अपि, शीतबाष्पविसरैः, आनन्दमूर्च्छोद्भवैः ॥

अन्वयः—एवं भूतमनोज्ञनवसुधानिष्यन्दसन्दोहनं, परचिद्रसायनं, चेतोहरं त्वद्रूपं, शृण्वतां मतिं सद्यः प्रेरयते, मदयते, अङ्गकं रोमाञ्चयति, आनन्दमूर्च्छोद्भवैः शीतबाष्पविसरैः व्यासिञ्चति अपि ।

अन्वयार्थः

एवम् = इस प्रकार के

भूतमनोज्ञनवसुधानिष्यन्दसन्दोहनम् = मंगलमय नये अमृत का आगार

परचिद्रसायनमयम् = परब्रह्मरूपी रसायन

चेतोहरं त्वद्रूपम् = मन लुभाने वाला आप का शरीर

शृण्वतां मतिं सद्यः प्रेरयते = सुनने वालों के मन को तुरन्त प्रेरणा देता है ।

मदयते = आनन्द देता है ।

अङ्गकं रोमाञ्चयति = समस्त शरीर में रोमांच पैदा करता है ।

आनन्दमूर्च्छोद्भवैः = असीम आनन्द से उत्पन्न

शीतबाष्पविसरैः = शीतल आँसुओं से

व्यासिञ्चति अपि = नहलाता भी है ।

भावार्थ—इस प्रकार के मंगलमय नये अमृत का आगार, परब्रह्मरूपी रसायन, मन को लुभानेवाला आपका स्वरूप आपके विषय में सुनने वालों के मन को प्रेरणा देता है, आनन्द देता है, समस्त शरीर में रोमांच पैदा करता है । असीम आनन्द से उत्पन्न शीतल आँसुओं से नहलाता भी है ।

World-Explanation

सन्दोहः = Assemblage, Milking, The whole quantity of anything.

सिञ्चति = Sprinkling

॥ ७ ॥

एवं भूततया हि भक्त्यभिहितो योगः स योगद्वयात्
कर्मज्ञानमयाद्भृशोत्तमतरो योगीश्वरैर्गीयते ।
सौन्दर्यैकरसात्मके त्वयि खलु प्रेमप्रकर्षात्मिका
भक्तिर्निःश्रममेव विश्वपुरुषैर्लभ्या रमावल्लभ ! ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—एवम्, भूततया, हि, भक्त्यभिहितः, योगः, सः, योगद्वयात्, कर्मज्ञानमयात्, भृशोत्तमतरः, योगीश्वरैः, गीयते । सौन्दर्यैकरसात्मके, त्वयि, खलु, प्रेमप्रकर्षात्मिका, भक्तिः, निःश्रमम्, एव, विश्वपुरुषैः, लभ्या, रमावल्लभ !

अन्वयः—एवं भूततया हि योगीश्वरैः भक्त्यभिहितः सः योगः कर्मज्ञानमयात् योगद्वयात् भृशोत्तमतरः (इति) गीयते । रमावल्लभ ! सौन्दर्यैकरसात्मके त्वयि प्रेमप्रकर्षात्मिका भक्तिः विश्वपुरुषैः निःश्रमम् एव लभ्या ।

अन्वयार्थः

एवम् भूततया हि = इस प्रकार भगवत्प्राप्ति से ही

योगीश्वरैः = श्रेष्ठ योगीजनों के द्वारा

भक्त्याभिहितः = भक्तिपूर्वक कहा गया

सः योगः = वह योग

कर्मज्ञानमयात् = कर्म और ज्ञान

योगद्वयात् = दोनों योगों से

भृशोत्तमतरः (इति) गीयते = अति उत्तम है (ऐसा) गाया जाता है

रमावल्लभ ! = हे लक्ष्मीपते !

सौन्दर्यैकरसात्मके त्वयि = सौन्दर्यरस के एकमात्र स्वरूप आप में

प्रेमप्रकर्षात्मिका भक्तिः = प्रेम को बढ़ाने वाली भक्ति

विश्वपुरुषैः = जनसाधारण के द्वारा

निःश्रमम् एव = बिना प्रयास के ही

लभ्या = प्राप्त की जाती है ।

भावार्थ—इस प्रकार भगवत् प्राप्ति से ही श्रेष्ठ योगी जनों के द्वारा भक्तिपूर्वक कहा गया, वह योग कर्म और ज्ञान दोनों योगों से अति उत्तम है (इस प्रकार) गाया जाता है । हे लक्ष्मीपते ! सौन्दर्य रस के एकमात्र स्वरूप आप में प्रेम को बढ़ाने वाली आपकी भक्ति साधारण जनों को भी बिना प्रयत्न के प्राप्त होती है ।

Word-Explanation

अभिहितः = Said, Spoken

॥ ८ ॥

निष्कामं नियतस्वधर्मचरणं यत् कर्मयोगाभिधं
तद्दूरेत्यफलं यदौपनिषदज्ञानोपलभ्यं पुनः ।
तत्त्वव्यक्ततया सुदुर्गमतरं चित्तस्य तस्माद्विभो !
त्वत्प्रेमात्मकभक्तिरेव सततं स्वादीयसी श्रेयसी ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—निष्कामम्, नियतस्वधर्मचरणं, यत्, कर्मयोगाभिधम्, तत्, दूरेत्यफलम्, यत्, औपनिषदज्ञानोपलभ्यम्, पुनः तत्, तु, अव्यक्ततया, सुदुर्गमतरम्, चित्तस्य, तस्मात्, विभो, त्वत्, प्रेमात्मकभक्तिः, एव, सततम्, स्वादीयसी, श्रेयसी ।

अन्वयः—निष्कामं नियतस्वधर्मचरणं कर्मयोगाभिधम् तत् दूरेत्यफलम् । पुनः यत् औपनिषदज्ञानोपलभ्यं तत् तु अव्यक्ततया चित्तस्य सुदुर्गमतरम् । विभो ! तस्मात् त्वत् प्रेमात्मकभक्तिः एव सदा स्वादीयसी श्रेयसी ।

अन्वयार्थः

निष्कामम् = फल की इच्छा न रखकर

नियतस्वधर्मचरणम् = विधिवत् अपने धर्माचरण को

कर्मयोगाभिदम् = "कर्मयोग" कहते हैं ।

तत् दूरेत्यफलम् = वह बहुत समय के बाद फल देता है ।

पुनः यत् = और जो

औपनिषदज्ञानोपलभ्यम् = उपनिषद् के ज्ञान से प्राप्त (ज्ञानयोग) है

तत् तु = वह तो

अव्यक्ततया = अव्यक्त (जटिल) होने का कारण

चित्तस्य सुदुर्गमतरम् = सरलता से समझ में नहीं आता ।

विभो ! = हे भगवन् !

तस्मात् = इसलिए

त्वत्प्रेमात्मकभक्तिः एव = आप की प्रेममयी भक्ति ही

सततम् = सर्वदा

स्वादीयसी श्रेयसी = रुचिकर तथा श्रेय प्रदान करने वाली है ।

भावार्थ—फल की इच्छा न रखकर विधिवत् अपने धर्म का आचरण करने को ही कर्मयोग कहते हैं । वह बहुत समय के पश्चात् ही फल देता है और जो उपनिषदों के ज्ञान से प्राप्त (ज्ञानयोग) है, वह भी अव्यक्त (जटिल) होने के कारण सरलता से समझ में नहीं आता, इसलिए आप की प्रेममयी भक्ति ही सर्वदा रुचिकर तथा श्रेय प्रदान करने वाली है ।

॥ ९ ॥

अत्यायासकराणि कर्मपटलान्याचर्य निर्यन्मला
बोधे भक्तिपथेऽथवाप्युचिततामायान्ति किं तावता ।
क्लिष्ट्वा तर्कपथे परं तव वपुर्ब्रह्माख्यमन्ये पुन-
श्चित्तार्द्रत्वमृते विचिन्त्य बहुभिः सिध्यन्ति जन्मान्तरैः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—अत्यायासकराणि, कर्मपटलानि, आचर्य, निर्यन्मलाः, बोधे, भक्तिपथे, अथवा, अपि, उचितताम्, आयान्ति, किम्, तावता, क्लिष्ट्वा, तर्कपथे, परम्, तव, वपुः, ब्रह्माख्यम्, अन्ये पुनः, चित्तार्द्रत्वम्, ऋते, विचिन्त्य, बहुभिः, सिध्यन्ति, जन्मान्तरैः ॥

अन्वयः—(केचन जनाः) अत्यायासकरणानि कर्मपटलानि आचर्य निर्यन्मला बोधे। अथवा भक्तिपथे अपि उचितताम् आयान्ति। तावता किम्? अन्यः पुनः तर्कपथे क्लिष्ट्वा चित्तार्द्रत्वम् ऋते ब्रह्माख्यं तव परं वपुः विचिन्त्य बहुभिः जन्मान्तरैः सिध्यन्ति।

अन्वयार्थः

(केचन जनाः) अत्यायासकरणानि कर्मपटलानि आचर्य = (कुछ लोग) बहुत परिश्रम (कर्म) करके

निर्यन्मलाः बोधे। = मन निर्मल हो जाते हैं।

अथवा भक्तिपथे अपि = अथवा भक्ति मार्ग के भी

उचिततां आयान्ति। = अधिकारी हो जाते हैं।

तावता किम्? = इस से क्या लाभ?

अन्यः पुनः = फिर कुछ अन्य लोग

तर्कपथे क्लिष्ट्वा = तर्क मार्ग से दुःखी होकर

चित्तार्द्रत्वम् ऋते = मन में रसाभास के बिना

ब्रह्माख्यं = "ब्रह्म" इस प्रकार प्रसिद्ध

तव परं वपुः = आप के दूसरे रूप का (निर्गुणस्वरूप का)

विचिन्त्य = ध्यान करके

बहुभिः जन्मान्तरैः = बहुत जन्मों के पश्चात्

सिध्यन्ति। = मोक्ष प्राप्त करते हैं।

भावार्थ—(कुछ लोग) बहुत परिश्रम (कर्म) करके मन निर्मल हो जाते हैं। अथवा भक्तिमार्ग के भी योग्य हो जाते हैं। इस से क्या लाभ? फिर कुछ अन्य लोग तर्क मार्ग से दुःखी होकर, मन में रसाभास के बिना (सूखे हृदय से) "ब्रह्म" इस प्रकार प्रसिद्ध आपके दूसरे रूप (निर्गुणस्वरूप) का ध्यान करके, बहुत जन्मों के पश्चात् मोक्ष प्राप्त करते हैं।

Word-Explanation

पटलम् =A roof, A cover, A Tree, A heap, Multitude, Mass etc.

कर्मपटलम् =Massive work, Lot of work etc.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ १० ॥

त्वद्भक्तिस्तु कथारसामृतझरी निर्मज्जनेन स्वयम्
सिद्ध्यन्ती विमलप्रबोधपदवीमक्लेशतस्तन्वती ।
सद्यः सिद्धिकरी जयत्ययि विभो, सैवास्तु मे त्वत्पद-
प्रेमप्रौढिरसार्द्रता द्रुततरं वातालयाधीश्वर ॥

पदविभागः—त्वत्, भक्तिः, तु, कथारसामृतझरी निर्मज्जनेन, स्वयम्, सिध्यन्ती, विमलप्रबोधपदवीम्, अक्लेशतः, तन्वती, सद्यः, सिद्धिकरी, जयति, अयि, विभो, सा, एव, अस्तु, मे, त्वत्, पदप्रेमप्रौढिरसार्द्रता, द्रुततरम्, वातालयाधीश्वर ॥

अन्वयः—त्वत् भक्तिः तु, कथारसामृतझरी निर्मज्जनेन स्वयं सिद्ध्यन्ती विमल प्रबोधपदवीम् अक्लेशतः तन्वती सद्यः सिद्धिकरी जयति । अयि विभो, वातालयाधीश्वर ! त्वत् पादप्रेमप्रौढरसार्द्रता सा एव मे द्रुततरम् अस्तु ।

अन्वयार्थः

त्वत् भक्तिः तु = आप की भक्ति तो,

कथारसामृतझरी = आपके कथारसामृत-प्रवाह में

निर्मज्जनेन = स्नान करने से (मुग्ध होने पर)

स्वयं सिद्ध्यन्ती = स्वयं प्राप्त होने वाली

विमलप्रबोधपदवीम् = निर्मल ब्रह्म पदवी को

अक्लेशतः तन्वती = कष्ट के बिना प्राप्त कर के

सद्यः सिद्धिकरी जयति । = तुरन्त सिद्धि प्रदान करने वाली हो जाती है ।

अयि विभो वातालयाधीश्वर ! = हे विभो । गुरुपवनपुराधीश्वर !

त्वत् पादप्रेमप्रौढिरसार्द्रता = आपके चरणों में पूर्ण (दृढ) प्रेमपूर्वक मन भक्ति रस से

सा एव = वह ही (भक्ति हो)

मे द्रुततरम् अस्तु । = मुझे तुरन्त प्राप्त हो ।

भावार्थ—आपकी भक्ति तो, कथारसामृत प्रवाह में स्नान करने से (मुग्ध होने से) स्वयं प्राप्त होने वाली निर्मल ब्रह्म की पदवी को, कष्ट के बिना प्राप्त करके, तुरन्त सिद्धि को प्रदान करने वाली हो जाती है । हे विभो, गुरुपवनपुराधीश्वर ! आपके चरणों में पूर्ण प्रेमपूर्वक मन भक्ति रस से, वह भक्ति ही मुझे तुरन्त प्राप्त हो ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation

प्रौढि: =Full growth, Full development, Maturity, Perfection, Proud, Arrogance etc.

प्रेमप्रौढि: =Full grown devotion (love), Perfect devotion.

[इति द्वितीयदशकं समाप्तम्]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३

भक्तस्वरूपवर्णनं भक्तिप्रार्थना च

शिखरिणी छन्दः

॥ १ ॥

पठन्तो नामानि प्रमदभरसिन्धौ निपतिताः
स्मरन्तो रूपं ते वरद, कथयन्तो गुणकथाः ।
चरन्तो ये भक्तास्त्वयि खलु रमन्ते परममू-
नहं धन्यान् मन्ये समधिगतसर्वाभिलषितान् ॥

पदविभागः—पठन्तः, नामानि, प्रमदभरसिन्धौ, निपतिताः, स्मरन्तः, रूपम्, ते, वरद, कथयन्तः, गुणकथाः, चरन्तः, ये, भक्ताः, त्वयि, खलु, रमन्ते, परम्, अमून्, अहम, धन्यान्, मन्ये, समधिगतसर्वाभिलषितान् ।

अन्वयः—वरद ! ते नामानि पठन्तः, रूपं स्मरन्तः, गुणकथाः कथयन्तः, प्रमदभरसिन्धौ निपतिताः चरन्तः ये भक्ताः त्वयि रमन्ते खलु, अमून् परम अहं समधिगतसर्वाभिलषितान् धन्यान् मन्ये ।

अन्वयार्थः

वरद ! = हे वर देने वाले (भगवन्) !

ते नामानि पठन्तः = आप के नामों को कहते हुए

रूपं स्मरन्तः = रूप को स्मरण करते हुए

गुणकथाः कथयन्तः = गुणों तथा कथाओं को सुनाते हुए

प्रमदभरसिन्धौ निपतिताः = परमानन्द सागर में डूब कर

चरन्तः ये भक्ताः = चलते हुए जो भक्तजन

त्वयि रमन्ते खलु = आप में रमते हैं निश्चित रूप से

अमून् परम् अहम् = उन लोगों को ही मैं

समधिगतसर्वाभिलषितान् = समस्त अभिलाषाओं को प्राप्त करने वाले

धन्यान् मन्ये = भाग्यशाली जन मानता हूँ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—वरद ! आप के नामों को कहते हुए, रूप को स्मरण करते हुए गुणों तथा कथाओं को सुनाते हुए परमानन्द सागर में डूबकर चलते हुए जो भक्तजन आप में ही रमते हैं निश्चित रूप से उन लोगों को ही मैं समस्त अभिलाषाओं को प्राप्त करने वाले भाग्यशाली जन मानता हूँ ।

Word-Explanation :

खलु = A particle implying certainly, Verily, Indeed, Entreaty, Pray, Reason, etc., and sometimes used only to add grace to the sentence. In Hindi as "है न" is used. (त्वयि रमन्ते खलु)

॥ २ ॥

गदक्लिष्टं कष्टं तवचरणसेवारसभरे-
प्यनासक्तं चित्तं भवति बत विष्णो, कुरु दयाम् ।
भवत्पादाम्भोजस्मरणरसिको नामनिवहा-
नहं गायं गायं कुहचन विवत्स्यामि विजने ॥

पदविभागः—गदक्लिष्टम्, कष्टम्, तव, चरणसेवारसभरे, अपि, अनासक्तम् चित्तम्, भवति, बत, विष्णो, कुरु, दयाम् भवत्पादाम्भोजस्मरणरसिकः, नामनिवहान्, अहम, गायम्, गायम्, कुहचन, विवत्स्यामि, विजने ।

अन्वयः—गदक्लिष्टं कष्टं चित्तं तव चरणसेवावसरे अपि अनासक्तं भवति, बत ! विष्णो ! दयां कुरु । अहं भवत्पादाम्भोजस्मरणरसिकः नामनिवहान् गायं गायं कुहचन विजने विवत्स्यामि ।

अन्वयार्थः

गदक्लिष्टं कष्टं चित्तम्, = रोग के क्लेश से कष्ट अनुभव करता मन,

तव चरणसेवावसरे अपि = आप के चरणों की सेवा के अवसर में भी

अनासक्तं भवति, बत !। = हाय ! आसक्ति रहित हो जाता है

विष्णो ! दयां कुरु = हे विष्णो ! दया करो ।

अहम् = मैं

भवत्पादाम्भोजस्मरणरसिकः = आपके चरणकमलों को स्मरण करने का इच्छुक,

नामनिवहान् = नामों के समूहों को

गायम् गायम् कुहचन विजने = गाते गाते कहीं निर्जन स्थल पर

विवत्स्यामि = निवास करुँ ।

भावार्थ—रोग के क्लेश से कष्ट अनुभव करता मन, आप के चरणों की सेवा के अवसर में भी हाय ! आसक्तिरहित हो जाता है । हे विष्णो, ! दया करो । मैं आप के चरण कमलों को स्मरण करने का इच्छुक नामों के समूहों को गाते गाते, कहीं निर्जन स्थल पर निवास करूँ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation

गदः =Disease, Sickness, Speaking, Speech, A sentence, Thunder. (As in गदक्लिष्टम्) (Here meaning - Disease/sickness)

॥ ३ ॥

कृपा ते जाता चेत् किमिव नहि लभ्यं तनुभृताम्
मदीयक्लेशौघप्रशमनदशा नाम कियती ।

न के के लोकेऽस्मिन्ननिशमयि शोकाभिरहिता
भवद्भक्ता मुक्ताः सुखगतिमसक्ता विदधते ॥

पदविभागः—कृपा, ते, जाता, चेत्, किम्, इव, नहि, लभ्यम्, तनुभृताम्, मदीयक्लेशौघप्रशमनदशा नाम, कियती, न, के, के, लोके, अस्मिन्, अनिशम्, अयि, शोकाभिरहिताः, भवद्भक्ताः, मुक्ताः, सुखगतिम्, असक्ताः, विदधते ।

अन्वयः—ते कृपा जाता चेत्, तनुभृतां किम् इव नहि लभ्यम् ? मदीयक्लेशौघप्रशमनदशा नाम कियती ? अयि, अस्मिन् लोके के के भवद्भक्ताः अनिशं शोकाभिरहिताः, मुक्ताः असक्ताः सुखगतिं न विदधते ?

अन्वयार्थः

ते कृपा जाता चेत् = आपकी कृपा हो तो

तनुभृताम् = शरीर धारण करने वालों को (लोगों को)

किम् इव नहि लभ्यम् ? = क्या कुछ प्राप्त नहीं होता ?

मदीयक्लेशौघप्रशमनदशा नाम कियती ? = मेरे दुःखों को दूर करना कौन सी बड़ी बात है ?

अयि, अस्मिन लोके = अरे, इस लोक में

के के भवद्भक्ताः = कौन कौन आप के भक्त

अनिशं शोकरहिताः, मुक्ताः = सर्वदा शोकरहित, मुक्त

असक्ताः = आसक्तिरहित

सुखगतिं न विदधते ? = सुख की गति को प्राप्त नहीं होते ?

भावार्थ—आपकी कृपा हो तो (आप दया करें तो) शरीरधारण करने वालों को (लोगों को) क्या कुछ नहीं प्राप्त होता ? मेरे दुःखों को दूर करना कौन सी बड़ी बात है ? अरे, इस लोक में कौन कौन आप के भक्त सर्वदा शोक रहित, मुक्तिप्राप्त, इच्छारहित, सुख गति को नहीं पहुँचे ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

अयि =As a gentle address to address as "friend," Oh, Ah, or simply used as a vocative particle. Used also as a particle of entreaty, solicitation as "I pray"., Also used for encouragement or persuation.

औघः =Flood.

"क्लेशौघ"प्रशमनदशा =Multitude of pain

नाम =A particle used in the following senses:

Named, Called, By name, indeed, certainly, truly, verily, to be sure, Probably, perhaps, Possibly, would that?. Is it truly that?, that?, Well, Though, granted. Also used as "I would like to know" as in को नाम राज्ञः ?

॥ ४ ॥

मुनिप्रौढा रुढा जगति खलु गूढात्मगतयो
भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः ।
चरन्तीश स्वैरं सततपरिनिर्भातपरचित्-
सदानन्दाद्वैतप्रसरपरिमग्नाः किमपरम् ॥

पदविभागः—मुनिप्रौढाः, रूढाः, जगति, खलु, गूढात्मगतयः, भवत्पादाम्भोजस्मरणविरुजः, नारदमुखाः, चरन्ति, ईश, स्वैरम्, सततपरिनिर्भातपरचित्सदानन्दाद्वैतप्रसरपरिमग्नाः, किम्, अपरम् ॥

अन्वयः—ईश ! गूढात्मगतयः भवत्पादाम्भोजस्मरणविरुजः नारदमुखाः मुनिप्रौढ़ा जगति रूढा खलु । (ते) सतत-परिनिर्भातपरचित्सदानन्दाद्वैतप्रसरपरिमग्नाः स्वैरं चरन्ति अपरं किम् ?

अन्वयार्थः

ईश ! = भगवन् !

गूढात्मगतयः = गूढ (गहरी) आत्मगति को प्राप्त जन

भवत्पादाम्भोजस्मरणविरुजः = आपके चरण कमलों का ध्यान करके दुःख से विमुक्त

नारदमुखाः मुनिप्रौढाः = नारद मुनि आदि श्रेष्ठ मुनिगण

जगति रूढा खलु । = निश्चित रूप से जगत् में प्रसिद्ध हैं ।

(ते) सततपरिनिर्भातपरचित्सदानन्दाद्वैतप्रसरपरिमग्नाः = (वे) सदा प्रकाशमान परमानन्द में मग्न होकर

स्वैरं चरन्ति । = स्वतन्त्र विचरण करते हैं ।

अपरं किम् ? = इस के अतिरिक्त और क्या चाहिए ?

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—भगवन् ! गूढ (गहरी) आत्मगति को प्राप्त जन आपके चरण कमलों का ध्यान करके दुःख से विमुक्त नारद मुनि आदि श्रेष्ठ मुनिगण निश्चित रूप से जगत् में प्रसिद्ध हैं ? (वे) सदा प्रकाशमान् परमानन्द में मग्न होकर स्वतन्त्र रूप से विचरण करते हैं । इसके अतिरिक्त और क्या चाहिए ?

Word-Explanation :

रुज् =To break to pieces, Destroy, Pain, Afflict with disease.

विरुजः =Without disease

रूढाः (रूढीः) =Celebrity, Fame

प्रसरः =Diffusion, Great quantity, A stream, Flow, Free, Ggoing forward etc. (Here diffusion)

॥ ५ ॥

भवद्भक्तिः स्फीता भवतु मम, सैव प्रशमये-
दशेषक्लेशौघं न खलु हृदि सन्देहकणिका ।
न चेद्व्यासस्योक्तिस्तव च वचनं नैगमवचो
भवेन्मिथ्या, रथ्यापुरुषवचनप्रायमखिलम् ॥

पदविभागः—भवद्भक्तिः, स्फीता, भवतु, मम, सा, एव, प्रशमयत्, अशेषक्लेशौघम्, न, खलु, हृदि, सन्देहकणिका, न, चेत्, व्यासस्य, उक्तिः, तव, च, वचनम्, नैगमवचः, भवेत्, मिथ्या, रथ्यापुरुषवचनप्रायम्, अखिलम् ।

दंष्ट्रा =A large tooth, Molar (As in दंष्ट्रा शमनः च)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

मायाविलासहसितं श्वसितं समीरो जिह्वा जलं वचनमीश शकुन्तपङ्क्तिः ।
सिद्धादयः स्वरगणा मुखरन्ध्रमग्निर्देवा भुजाः स्तनयुगं तव धर्मदेवः ॥

पदविभागः—माया, विलासहसितम्, स्वसितम्, समीरः, जिह्वा, जलम्, वचनम्, ईश, शकुन्तपङ्क्तिः, सिद्धादयः, स्वरगणाः, मुखरन्ध्रम्, अग्निः, देव, भुजाः, स्तनयुगम्, तव धर्मदेवः ॥

अन्वयः—ईश, तव विलासहसितं माया । (तव) श्वसितं समीरः । (तव) जिह्वा जलम् । (तव) वचनं शकुन्तपङ्क्तिः । (तव) स्वरगणाः सिद्धादयः । (तव) मुखरन्ध्रम् अग्निः । (तव) भुजाः देवाः । (तव) स्तनद्वयं धर्मदेवः ।

अन्वयार्थः

ईश, तव विलासहसितम् = ईश्वर, आपकी हँसने की लीला

माया । (तव) श्वसितं समीरः = माया है । (आप की) श्वास पवन है ।

(तव) जिह्वा जलम् । = (आप की) जीभ जल है ।

(तव) वचनं शकुन्तपङ्क्तिः । = (आप के) वचन पक्षिगण हैं ।

(तव) स्वरगणाः सिद्धादयः = (आप के) स्वरों का समूह सिद्ध आदि हैं ।

(तव) मुखरन्ध्रम् अग्निः । = (आप का) मुख द्वार अग्नि हैं ।

(तव) भुजाः देवाः । = (आप की) भुजायें देवगण हैं ।

(तव) स्तनद्वयं धर्मदेवः । = (आप के) दोनों वक्ष धर्म देवता हैं ।

भावार्थ—हे ईश्वर, आप की हँसने की लीला माया है । (आप की) श्वास पवन है । (आप की) जीभ जल है । (आप के) स्वरों का समूह सिद्ध आदि हैं । (आपका) मुख-द्वार अग्नि है । (आप के) हाथ देवगण हैं । आप के दोनों (वक्ष) धर्मदेवता है ।

Word-Explanation :

जिह्वा = Tongue

स्वरगणाः = Tunes, Songs

रन्ध्रम् = Hole, द्वार (As in मुखरन्ध्रम्)

॥ ७ ॥

पृष्टन्त्वधर्म इह देव मनः सुधांशुरव्यक्तमेव हृदयाम्बुजमम्बुजाक्ष ।
कुक्षिः समुद्रनिवहा वसनं तु सन्ध्ये शेफः प्रजापतिरसौ वृषणौ च मित्रः ।।

पदविभागः—पृष्टम्, तु, अधर्मः, इह, देव, मनः, सुधांशुः, अव्यक्तम्, एव, हृदयाम्बुजम्, अम्बुजाक्ष, कुक्षिः, समुद्र-निवहाः, वसनम्, तु, सन्ध्ये, शेफः, प्रजापतिः, असौ, वृषणौ, च, मित्रः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अम्बुजाक्ष, देव, (तव) पृष्टं तु अधर्मः । इह मनः सुधांशुः । (तव) हृदयाम्बुजम् अव्यक्तम् एव । (तव) कुक्षिः समुद्रनिवहाः । (तव) वसनं तु सन्ध्ये । (तव) शेफः प्रजापतिः । (तव) वृषणौ असौ मित्रः च ।

अन्वयार्थः

अम्बुजाक्ष, देव ! = हे कमलनयन, देव !

(तव) पृष्टं तु अधर्मः । = (आप की) पीठ तो अधर्म है ।

इह मनः सुधांशुः । = यहां (आगे) मन चन्द्रमा है ।

(तव) हृदयाम्बुजम् अव्यक्तम् एव । = (आप का) हृदय कमल अव्यक्त ही है ।

(तव) कुक्षिः समुद्रनिवहाः = (आप की) कोख सागर समूह है ।

(तव) वसनं तु सन्ध्ये । = (आप के) वस्त्र तो सन्ध्यायें हैं ।

(तव) असौ शेफः प्रजापतिः । = (आप की) यह जननेन्द्रिय प्रजापति है ।

(तव) वृषणौ च = और (आप के) दोनों अण्डकोष

मित्रः (अस्ति) = मित्र (मित्र देवता) हैं ।

भावार्थ—हे कमलनयन, देव (आप का) पृष्ट भाग (पीठ) तो अधर्म है । यहाँ (आगे) मन चन्द्रमा है । (आपका) हृदय कमल अव्यक्त ही है । (आपकी) कोख सागर समूह है । (आप के) वस्त्र तो सन्ध्यायें हैं । (आप की) जननेन्द्रिय प्रजापति है और (आपके) दोनों अण्डकोष मित्र (मित्र देवता) हैं ।

Word-Explanation :

निवहः =A collection, Multitude (As in समुद्रनिवहाः)

॥ ८ ॥

श्रोणिस्थलं मृगगणाः पदयोर्नखास्ते हस्त्युष्ट्रसैन्धवमुखा गमनन्तु कालः ।
विप्रादिवर्णभवनं वदनाब्जबाहुचारूरुयुग्मचरणं करुणाम्बुधे ते ॥

पदविभागः—श्रोणिस्थलम्, मृगगणाः, पदयोः, नखाः, ते, हस्युष्ट्रसैन्धवमुखाः, गमनम्, तु, कालः, विप्रादिवर्णभवनम्, वदनाब्जबाहुचारूरुयुग्मचरणम्, करुणाम्बुधे, ते ॥

अन्वयः—ते श्रोणिस्थलं मृगगणाः । (ते) नखाः हस्त्युष्ट्रसैन्वमुखाः । (ते) गमनं तु कालः । करुणाम्बुधे, ते वदनाब्जबाहुचारूरुयुग्मचरणं विप्रादिवर्ण भवनम् ॥

अन्वयार्थः

ते श्रोणिस्थलम् = आप का श्रोणि प्रदेश (Back of the waist)

मृगगणाः । = वनचर जीव समुदाय हैं

(ते) नखाः = (आप के) नाखून

हस्त्युष्ट्रसैन्धवमुखाः । = हाथी, ऊंट, (और) घोड़े हैं ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ते) गमनं तु कालः । = (आप का) संचार (घूमना) काल है ।

करुणाम्बुधे, = हे करुणा के समुद्र !

ते वदनाब्जबाहुचारूरुयुग्मचरणम् = आप के मुखारविन्द, हाथ, सुन्दर जाघें और दोनों पैर

विप्रादिवर्ण भवनम् । = ब्राह्मण आदि चतुर्वर्ण के उत्पत्ति स्थान हैं ।

भावार्थ—आप का श्रोणिप्रदेश (छाती के पीछे का भाग) वनचर प्राणी हैं । (आप के) नाखून हाथी, ऊंट और घोड़े हैं । (आपका) संचरण करना (घूमना) काल है । हे करुणासमुद्र ! आप के मुखारविन्द, हाथ, सुन्दर जाँघें और दोनों पैर, ब्राह्मण आदि चतुर्वर्ण के उत्पत्ति के स्थान हैं ।

Word-Explanation :

उष्ट्रः = =Camel (Also used for Buffalo) (Here camel)

सैन्धवमुखः सैन्धवः =Horse

मृगः =A quadruped, An animal in general. A deer in particular or an antelope.

॥ ९ ॥

संसारचक्रमयि चक्रधर क्रियास्ते वीर्यं महासुरगणोऽस्थिकुलानि शैलाः ।
नाड्यः सरित्समुदयस्तरवश्च रोम जीयादिदं वपुरनिर्वचनीयमीश ॥

पदविभागः—संसारचक्रम्, अयि, चक्रधर, क्रियाः, ते, वीर्यम्, महासुरगणाः, अस्थिकुलानि शैलाः, नाड्यः, सरित्समुदयः तरवः, च, रोम, जीयात्, इदम्, वपुः, अनिर्वचनीयम्, ईश ॥

अन्वयः—अयि, चक्रधर, संसारचक्रम् ते क्रियाः । (ते) वीर्यं महासुरगणाः । (ते) अस्थिकुलानि शैलाः । (ते) नाड्यः सरित्समुदयः । (ते) रोम तरवः च । ईश, अनिर्वचनीयं इदं वपुः जीयात् ।

अन्वयार्थः

अयि, चक्रधर, = हे चक्रधारी !

संसारचक्रम् = संसार चक्र को चलाना ।

ते क्रियाः = आप का कार्य है

(ते) वीर्यं महासुरगणाः । = (आपकी) वीरता महान् असुरगण हैं ।

(ते) अस्थिकुलानि शैलाः । = (आपकी) हड्डियां पर्वत हैं ।

(ते) नाड्यः सरित्समुदयः = (आपकी) नाड़ियाँ नदियों के समूह हैं ।

(ते) रोम तरवः च । = तथा आपके रोम (बाल) वृक्षों के समूह हैं ।

ईश, = हे ईश्वर !

अनिर्वचनीयं इदं वपुः = (आपके) इस अनिर्वचनीय शरीर की

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीयात् = जय हो।

भावार्थ—हे चक्रधारी ! संसार चक्र को चलाना आप का कार्य है। (आपकी) वीरता महान् असुरगण हैं। (आपकी) हड्डियां पर्वत हैं। (आपकी) नाड़ियां नदियों के समूह हैं तथा (आप के) रोम वृक्षों के समूह हैं। हे ईश्वर ! (आपके) इस अनिर्वचनीय शरीर की जय हो।

Word-Explanation :

समुदयः =Collection, Multitude, Heap etc.

कुलम् =Collection, Multitude, Herd. Race etc. (Here collection) (As in अस्थिकुलानि)

॥ १० ॥

ईदृग्जगन्मयवपुस्तव कर्मभाजां कर्मावसानसमये स्मरणीयमाहुः।
तस्यान्तरात्मवपुषे विमलात्मने ते वातालयाधिप नमोस्तु निरुन्धि रोगान् ॥

पदविभागः—ईदृक्, जगन्मयवपुः, तव, कर्मभाजाम्, कर्मावसानसमये स्मरणीयम्, अहुः, तस्य, अन्तरात्मवपुषे, विमलात्मने, ते, वातालयाधिप, नमः, अस्तु, निरुन्धि, रोगान् ॥

अन्वयः—ईदृक् तव जगन्मयवपुः कर्मभाजां कर्मावसानसमये स्मरणीयम् आहुः। तस्य (विराट्स्वरूपस्य) अन्तरात्मवपुषे, निर्मलात्मने वातालयाधिप ते नमः अस्तु। (मम) रोगान् निरुन्धि।

अन्वयार्थः

ईदृक् तव = इस प्रकार का आप का

जगन्मयवपुः = संसार के स्वरूप वाला शरीर

कर्मभाजाम् = कर्म करने वालों को

कर्मावसानसमये = कर्म के अन्त के समय

स्मरणीयम् आहुः। = स्मरण करने योग्य है। इस प्रकार कहा गया है

तस्य = हे उस (विराट् स्वरूप विग्रह) के

अन्तरात्मवपुषे = अन्तरात्म रूपधारी

निर्मलात्मने = निर्मलरूपी !

वातालयाधिप, = गुरुवायुपुराधीश !

ते नमः अस्तु। = आप को नमस्कार हो।

(मम) रोगान् निरुन्धि। = (मेरे) रोगों का निवारण करें।

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—इस प्रकार का आप का संसार के स्वरूप वाला शरीर कर्म करने वालों को कर्म के अन्त के समय स्मरण करने योग्य हैं, इस प्रकार कहा गया है । हे उस (विराट् स्वरूप विग्रह) के अन्तरात्म रूपधारी, निर्मलरूपी आपको नमस्कार हो । (मेरे) रोगों का निवारण करें ।

Word-Explanation :

भाज =(This is usually added at the end of a compound word) Sharing, Participating in, Liable to, Having, Enjoying, Falling in the lot etc. (As in कर्मभाजाम्) ।

[इति षष्ठदशकं समाप्तम्]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७

हिरण्यगर्भोत्पत्तिवर्णनं, वैकुण्ठस्वरूपवर्णनञ्च

[शार्दूलविक्रीडितछन्दः]

॥ १ ॥

एवं देव, चतुर्दशात्मकजगद्रूपेण जातः पुन-
स्तस्योर्ध्वं खलु सत्यलोकनिलये जातोऽसि धाता स्वयम् ।
यं शंसन्ति हिरण्यगर्भमखिलत्रैलोक्यजीवात्मकम्
योऽभूत् स्फीतरजोविकारविकसन्नानासिसृक्षारसः ॥

पदविभागः—एवम्, देव, चतुर्दशात्मकजगद्रूपेण, जातः, पुनः, तस्य, ऊर्ध्वम्, खलु, सत्यलोकनिलये, जातः, असि, धाता, स्वयम्, यम्, शंसन्ति, हिरण्यगर्भम्, अखिलत्रैलोक्यजीवात्मकम्, यः, अभूत्, स्फीतरजोविकारविकसन्नानासिसृक्षारसः ॥

अन्वयः—देव, एवं (त्वं) चतुर्दशात्मकजगद्रूपेण जातः । पुनः, स्वयं तस्य ऊर्ध्वं खलु सत्यलोकनिलये धाता जातः असि । यम् अखिलत्रैलोक्यजीवात्मकं हिरण्यगर्भं शंसन्ति । यः स्फीतरजोविकारविकसन्नानासिसृष्टारसः अभूत् ।

अन्वयार्थः

देव, एवम् = हे देव, इस प्रकार

(त्वं) चतुर्दशात्मकजगद्रूपेण = (आप) चौदह लोकों के रूप में

जातः = प्रकट हो गये ।

पुनः, स्वयम् = फिर, अपने आप (स्वयं)

तस्य ऊर्ध्वं खलु = उस के ही ऊपर के

सत्यलोकनिलये = सत्य लोक में

धाता जातः असि । = ब्रह्मा के रूप में प्रकट हुए ।

यम् = जिन को (उस हिरण्यगर्भ को)

अखिलत्रैलोक्यजीवात्मकम् = तीनों लोकों के समस्त जीवात्मस्वरूपी

हिरण्यगर्भं शंसन्ति । = "हिरण्यगर्भ" इस प्रकार कहते हैं ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः = जो (हिरण्यगर्भ)

स्फीतरजोविकारविकसन्नानासिसृक्षारसः = रजोगुण के विकास करता हुआ नाना प्रकार की सृष्टि करने की रुचि वाला

अभूत् = हो गया।

भावार्थ—हे देव, इस प्रकार (आप) चौदह लोकों के रूप में प्रकट हो गये। फिर स्वयं (अपने आप) उसके ही ऊपर के लोक सत्यलोक में ब्रह्मा के रूप में प्रकट हुए, जिन को तीनों लोकों के समस्त जीवात्मरूपी "हिरण्यगर्भ" इस प्रकार कहते हैं, जो (हिरण्यगर्भ) रजोगुण का विकास करता हुआ नाना प्रकार की सृष्टि करने की रुचि वाला हो गया।

Word-Explanation :

धातृ = =Maker, Creater, Brahma (As in धाताजातः असि)

स्फीत = =Swollen, Increased, Fat, Thick etc. (As in स्फीतरजोविकारविकसन्)

॥ २ ॥

सोऽयं विश्वविसर्गदत्तहृदयः सम्पश्यमानः स्वयम्
बोधं खल्वनवाप्य विश्वविषयं चिन्ताकुलस्तस्थिवान्।
तावत् त्वं जगतांपते "तपतपे"त्येवं हि वैहायसीं
वाणीमेनमशिश्रिवः श्रुतिसुखां कुर्वंस्तपः प्रेरणाम्॥

पदविभागः—सः, अयम्, विश्वविसर्गदत्तहृदयः, सम्पश्यमानः, स्वयम्, बोधम्, खलु, अनवाप्य, विश्वविषयम्, चिन्ताकुलः, तस्थिवान्, तावत्, त्वम्, जगतांपते, तप, तप, इति, एवम्, हि, वैहायसीम्,वाणीम्, एनम्, अशिश्रवः, श्रुतिसुखाम्, कुर्वन्, तपः, प्रेरणाम्।

अन्वयः—सः अयं (ब्रह्मा) विश्वविसर्गदत्तहृदयः सम्पश्यमानः स्वयं विश्वविषयं बोधं खलु अनवाप्य चिन्ताकुलः तस्थिवान्। जगतांपते, तावत्, त्वं तपः प्रेरणं कुर्वन् "तप" "तप" इति श्रुतिसुखां वैहायसीं वाणीम् एनं हि अशिश्रवः।

अन्वयार्थः

सः अयम् (ब्रह्मा) = वह (उस प्रकार का) यह (ब्रह्मा)

विश्वविसर्गदत्तहृदयः = विश्व की सृष्टि में दत्तचित्त होकर

सम्पश्यमानः = देखते हुए (भी)

स्वयं विश्वविषयं बोधं खलु अनवाप्य = स्वयं (अपने आप) विश्वरचना के ज्ञान को न प्राप्त कर

चिन्ताकुलः तस्थिवान् = (और) चिन्तित होकर बैठ गये।

जगतांपते, तावत् त्वम् = हे जगत् पते ! उस समय आप ने

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तप तप" इति = "तपस्या कर, तपस्या कर" इस प्रकार

तपः प्रेरणं कुर्वन् = तपस्या करने के लिए प्रेरित कर

श्रुतिसुखां = सुनने में मधुर

वैहायसीं वाणीम् = आकाशवाणी को

एनम् हि अशिश्रवः । = उस (ब्रह्मा) को ही सुनाया ।

भावार्थ—वह (उस प्रकार का) यह (ब्रह्मा), विश्व की सृष्टि में दत्तचित्त होकर देखते हुए (भी) कि अपने आप विश्वरचना के ज्ञान को न पाकर चिन्तामग्न होकर बैठ गये । हे जगत्पते ! उस समय आपने "तपस्या कर, तपस्या कर" इस प्रकार तपस्या करने के लिए प्रेरित करने हेतु सुनने में मधुर आकाशवाणी को उस (ब्रह्मा) को सुनाया ।

Word-Explanation :

विसर्गः = Casting, Sending forth, Emission, Voiding, Departure, The penis, light, Splendour, A punctuation mark as (:) etc. (Here casting) (As in विश्वविसर्गदत्तहृदयः)

वैहायस/वैहायसी = Being in the air, Aerial (As in वैहायसीं वाणीम्)

॥ ३ ॥

कोऽसौ मामवदत् पुमानिति जलापूर्णे जगन्मण्डले
दिक्षूद्वीक्ष्य किमप्यनीक्षितवता वाक्यार्थमुत्पश्यता ।
दिव्यं वर्षसहस्रमात्ततपसा तेन त्वमाराधित-
स्तस्मै दर्शितवानसि स्वनिलयं वैकुण्ठमेकाद्भुतम् ॥

पदविभागः—कः, असौ, माम, अवदत्, पुमान, इति, जलापूर्णे, जगन्मण्डले, दिक्षु, उद्वीक्ष्य, किमपि, अनीक्षितवता, वाक्यार्थम्, उत्पश्यता, दिव्यम्, वर्षसहस्रम्, आत्ततपसा, तेन, त्वम्, आराधितः, तस्मै, दर्शितवान्, असि, स्वनिलयम्, वैकुण्ठम्, एकाद्भुतम् ॥

अन्वयः—कः असौ पुमान् माम् अवदत् इति जलापूर्णे जगन्मण्डले दिक्षु उद्वीक्ष्य किमपि अनीक्षितवता वाक्यार्थम् उत्पश्यता, दिव्यं वर्षसहस्रम् आत्ततपसा तेन आराधितः त्वं स्वनिलयम् एकाद्भुतं वैकुण्ठम् तस्मै दर्शितवान् असि ।

अन्वयार्थः

कः असौ पुमान् = यह किस पुरुष ने

माम् अवदत् = मुझे कहा

इति जलापूर्णे = इस प्रकार जल से भरे

जगन्मण्डले = लोकों के समूह में

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिक्षु उद्वीक्ष्य = सब दिशाओं में देखकर

किमपि अनीक्षितवता = कुछ भी नहीं देखते हुए

वाक्यार्थम् उत्पश्यता = वाक्य (कहे हुए वाक्य) के अर्थ को समझकर

दिव्यं वर्ष सहस्रम् = दिव्य सहस्र वर्षों तक

आत्ततपसा = गहन तपस्या के द्वारा

तेन आराधितः त्वम् = उस (ब्रह्मा) से आराधित आप ने

स्वनिलयम् एकाद्भुतम् = अनोखे अपने धाम

वेकुण्ठम् = वैकुण्ठ को

तस्मै दर्शितवान् असि = उस (ब्रह्मा) को दिखाया

भावार्थ—'यह किस पुरुष ने मुझे कहा', इस प्रकार जल से भरे लोकों के समूह में सब दिशाओं में देखकर कुछ भी नहीं देखते हुए कहे हुए वाक्य के अर्थ को समझकर, दिव्य सहस्र वर्षों तक घोर तपस्या के द्वारा उस (ब्रह्मा) से आराधित आपने अनोखे अपने धाम वैकुण्ठ के उस (ब्रह्मा) को दिखाया ।

Word-Explanation :

मण्डलम् - Round, circular, A dog, A Snake, A disc, the charmed circle, Visible horizen, A surrounding District or territory, A multitude, A group, Collection, Assemblage, Society, Association etc. (Here the meaning collection/multitude) (As in जगन्मण्डले)

ईक्षणम् = Seeing, Beholding, A look, Sight, Viewing etc. (As in उद्वीक्ष्य & अनीक्षितवता)

॥ ४ ॥

माया यत्र कदापि नो विकुरुते भाते जगद्भ्यो बहिः
शोकक्रोधविमोहसाध्वसमुखा भावास्तु दूरं गताः ।
सान्द्रानन्दझरी च यत्र परमज्योतिः प्रकाशात्मके
तत्ते धाम विभावितं विजयते वैकुण्ठरूपं विभो ॥

पदविभागः—माया, यत्र, कदापि, नो, विकुरुते, भाते, जगद्भ्यः बहिः, शोकक्रोधविमोहसाध्वसमुखाः भावाः, तु दूरम्, गताः, सान्द्रानन्दझरी, च यत्र, परमज्योतिः, प्रकाशात्मके, तत्, ते, धाम, विभावितम्, विजयते, वैकुण्ठरूपम्, विभो ।

अन्वयः—विभो, जगदभ्यः बहिः भाते, यत्र माया किमपि नो विकुरुते, शोकक्रोधविमोहसाध्वसमुखाः भावाः दूरं गताः, परमज्योतिः प्रकाशात्मके च यत्र सान्द्रानन्दझरी (ब्रह्माणं) विभावितं तत् वैकुण्ठरूपं, ते धाम, विजयते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः—

विभो, = हे सर्वव्यापी !

जगद्भ्यः बहिः भाते = लोकों (चौदह लोकों) के बाहर प्रकाशमान

यत्र माया किमपि नो विकुरुते = जहां माया कुछ भी नही करती है ।

शोकक्रोधविमोहसाध्वसमुखाः = शोक, क्रोध, मोह, अज्ञान, भय आदि

भावाः दूरं गताः = भाव दूर हो गये हैं

परमज्योति प्रकाशात्मके च = और तेजोमय प्रकाशमान रूप में

यत्र सान्द्रानन्दझरी = जहां परमानन्द का बहाव है, (ऐसा)

(ब्रह्माणं) विभावितं तत् वैकुण्ठरूपं ते धाम विजयते = (ब्रह्माजी को) दिखाया गया वह वैकुण्ठ स्वरूप आपके धाम के रूप में (चौदह लोकों पर विजय प्राप्त करके) विराजमान है ।

भावार्थ—हे सर्वव्यापी ! लोकों (चौदह लोकों) के बाहर प्रकाशित, जहां माया कुछ भी नहीं करती है (जहाँ) शोक, क्रोध, मोह, अज्ञान, भय आदि भाव दूर हो गये हैं, और तेजोमय प्रकाशमान रूप मे जहां परमानन्द का बहाव है, ऐसे ब्रह्माजी का दिखाया गया वह वैकुण्ठ स्वरूप, आप के धाम के रूप में (चौदह लोकों को विजय प्राप्त करके) विराजमान है ।

Word-Explanation:

विभावित =Manifested, Made clearly visible (As in तत्त धाम विभावितम्)

झरी/झरा/झरः =A Cascade, Spring, Fountain, Stream (As in सान्द्रानन्दझरी)

साध्वसम् =Fear, Alarm, Terror, Agitation, Perturbation. (As in साध्वसमुखाः)

॥ ५ ॥

यस्मिन् नाम चतुर्भुजा हरिमणिश्यामावदातत्विषो
नानाभूषणरत्नदीपितदिशो राजद्विमानालयाः ।
भक्तिप्राप्ततथाविधोन्नतपदा दीव्यन्ति दिव्या जना-
स्तते धाम निरस्तसर्वशमलं वैकुण्ठरूपं जयेत् ॥

पदविभागः—यस्मिन्, नाम, चतुर्भुजाः, हरिमणिश्यामावदातत्विषः, नानाभूषणरत्नदीपितदिशः, राजद्विमानालयाः, भक्तिप्राप्त-तथाविधोन्नतपदाः, दीव्यन्ति, दिव्याः, जनाः, तत्, ते, धाम, निरस्तसर्वशमलम्, वैकुण्ठरूपम्, जयेत् ।

अन्वयः—यस्मिन् नाम चतुर्भुजाः हरिमणिश्यामावदातत्विषः, नानाभूषणरत्नदीपितदिशः, राजद्विमानालयः, भक्तिप्राप्ततथाविधोन्नतपदाः दिव्याः जनाः दीव्यन्ति निरस्तसर्वशमलं वैकुण्ठरूपं ते तत् धाम जयेत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

यस्मिन् नाम चतुर्भुजाः = जिस (वैकुण्ठ) में चार हाथों वाले,

हरिमणिश्यामावदातत्विषः = नील रत्न जैसे निर्मल नीलवर्ण से प्रकाशमान्

नानाभूषणरत्नदीपितदिशः = चमकते हुए नाना प्रकार के आभरणों से सुसज्जित,

राजद्विमानालयः = प्रकाशमान् विमानों में रहने वाले,

भक्तिप्राप्ततथाविधोन्नतपदाः = भक्ति द्वारा प्राप्त उस प्रकार के ऊंचे पदों पर पहुँचे

दिव्याः जनाः दीव्यन्ति = भाग्यशाली लोग रहते हैं (रमते हैं)

निरस्तसर्वशमलं = समस्त पापों से मुक्त

वैकुण्ठरूपं ते तत् धाम जयेत्। = वैकुण्ठ स्वरूप आप के उस धाम की जय हो।

भावार्थ—जिस (वैकुण्ठ) में चार हाथों वाले, नील रत्न जैसे निर्मल नीलवर्ण से प्रकाशमान् चमकते हुए नाना प्रकार के आभरणों से सुसज्जित, प्रकाशमान विमानों में रहने वाले, भक्ति द्वारा प्राप्त उस प्रकार के ऊंचे पदों पर पहुँचे भाग्यशाली लोग रहते हैं, समस्त पापों से मुक्त, वैकुण्ठ स्वरूप आपके उस धाम की जय हो।

Word-Explanation :

आवदात =Beautiful, Clean, Pure, Spotless, Polished etc. (As in हरिमणिश्यामावदातत्विषः)

त्विष =Light, Lustre, Splendour, Brillance, Beauty, Sun etc. (here splendour/ lustre) (As in हरिमणिश्यामावदातत्विषः).

निरस्त =Cast off, Cast away, Thrown out, Dispelled, Deserted, Abondened, Removed, Deprived, Discharged, Vomitted, Spitout etc. (here cast away) (As in निरस्तसर्वशमलम्)

शमलम् =Excrement, Impurity, Sediment, Sin, Moral impurity, etc. (here sin) (As in निरस्तसर्वशमलम्)

धामन् =Dwelling, abode. (As in तत्ते धाम)

॥ ६ ॥

नानादिव्यवधूजनैरभिवृता विद्युल्लतातुल्यया
विश्वोन्मादनहृद्यगात्रलतया विद्योतिताशान्तरा।
त्वत्पादाम्बुजसौरभैककुतुका लक्ष्मीः स्वयं लक्ष्यते
यस्मिन् विस्मयनीयदिव्यविभवं तत्ते पदं देहि मे॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—नानादिव्यवधूजनैः, अभिवृता, विद्युल्लतातुल्यया, विश्वोन्मादनहृद्यगात्रलतया, विद्योतिताशान्तरा, त्वत्पादाम्बोजसौरभैककुतुका, लक्ष्मीः, स्वयम्, लक्ष्यते, यस्मिन्, विस्मयनीयदिव्यविभवम्, तत्, ते, पदम्, देहि, मे ।

अन्वयः—नानादिव्यवधूजनैः अभिवृता विद्युल्लतातुल्यया विद्योतिशान्तरा लक्ष्मीः त्वत् पादाम्बुजसौरभैककुतुका यस्मिन् स्वयं लक्ष्यते । विस्मयनीयदिव्यविभवं ते तत् पदं मे देहि ॥

अन्वयार्थः

जानादिव्यवधूजनैः अभिवृता = अनेक दिव्य स्त्रियों से आवृत

विद्युल्लतातुल्यया = बिजली की चमक के समान (विद्युत् के समान)

विश्वोन्मादनहृद्यगात्रलतया = समस्त विश्व को मोहित करती सुन्दर शरीर के द्वारा

विद्योतिशान्तरा लक्ष्मीः = सर्वत्र प्रकाश करती लक्ष्मी जी

त्वत् पादाम्बुजसौरभैककुतुका = आप के चरण कमलों की सुगन्ध में आसक्त होकर

यस्मिन् स्वयं लक्ष्यते । = जहां स्वयं रहती हैं । (दिखाई देती हैं) ।

विस्मयनीयदिव्यविभवम् = विस्मय (आश्चर्य) कराते दिव्य वैभव रूप

ते तत् पदम् = आप के उस धाम (वैकुण्ठ) को

मे देहि = मुझे प्रदान करो ।

भावार्थ—अनेक दिव्य स्त्रियों से आवृत बिजली की चमक के समान समस्त विश्व को मोह में करती सुन्दर शरीर के द्वारा सर्वत्र प्रकाश करती लक्ष्मी जी, आप के चरण कमलों की सुगन्ध में आसक्त होकर जहां स्वयं दिखाई देती है कौतूहल पैदा करने वाले दिव्य वैभव रूप आपके उस धाम (वैकुण्ठ) को मुझे प्रदान करें ।

Word-Explanation :

अभिवृत =Surrounded

अश् =To pervade, Fill completely, Penetrate, Reach etc.

सौरभ =Fragrant, Fragnance. (As in पादाम्बुजसौरभैककुतुका)

कुतुकम् =Desire, Inclination, Curiosity, (As in पादाम्बुजसौरभैककुतुका)

विस्मयः =Wonder, Pride, Amazement, Uncertainty, Doubt etc. (here wonder) (As in विस्मयनीयदिव्यविभवम्)

विभवः =Greatness, Exalted position, Dignity, Magnanimity, Final Beatitude, Absolution, Wealth, Rich, Property, Might etc. (As in विस्मयनीयदिव्यविभवम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

तत्रैवं प्रतिदर्शिते निजपदे रत्नासनाध्यासितम्
भास्वत्कोटिलसत्किरीटकटकाद्याकल्पदीप्राकृति ।

श्रीवत्साङ्कितमात्तकौस्तुभमणिच्छायारुणं कारणम्
विश्वेषां तव रूपमैक्षत विधिस्ततेविभो भातु मे ॥

पदविभागः—तत्र, एवम्, प्रतिदर्शिते, निजपदे, रत्नासनाध्यासितम्, भास्वत्कोटिलसत्किरीटकटकाद्याकल्पदीप्राकृति, श्रीवत्साङ्कितम्, आत्तकौस्तुभमणिच्छायारूणम्, कारणम्, विश्वेषाम्, तव रूपम्, ऐक्षत, विधिः, तत्, ते, विभो, भातु, मे ।

अन्वयः—तत्र एवं प्रतिदर्शिते निजपदे, रत्नासनाध्यासितं, किरीटकटकाद्याकल्पदीप्राकृति, श्रीवत्साङ्कितम् आत्तकौस्तुभमणिच्छायारुणं, विश्वेषां कारणं, तव रूपं विधिः ऐक्षत । विभो, ते तत् (रूपं) मे भातु ।

अन्वयार्थः

तत्र एवं प्रतिदर्शिते = वहां इस प्रकार प्रदर्शित

निजपदे = अपने पद में

रत्नासनाध्यासितम् = रत्न-आसन पर विराजमान,

किरीटकटकाद्याकल्पदीप्राकृति = सूरज जैसे प्रकाशमान, मुकुट आदि से अलंकृत,

श्रीवत्साङ्कितम् = श्रीवत्स चिह्न से शोभित,

आत्तकौस्तुभमणिच्छायारूणम् = कौस्तुभ रत्न के प्रकाश से अलंकृत

विश्वेषां कारणम् = समस्त लोकों के कारण भूत,

तव रूपम् = आप के विग्रह को

विधिः ऐक्षत । = ब्रह्मा जी ने देखा ।

विभो, ते तत् (रूपम्) = हे विभो ! आप के उस (रूप) के

मे भातु । = मुझे (भी) दर्शन दो ।

भावार्थ—वहां इस प्रकार प्रदर्शित अपने स्थान में रत्न-आसन पर विराजमान, सूरज जैसे प्रकाशमान्, मुकुट आदि से अलंकृत, श्रीवत्स चिह्न से शोभित, कौस्तुभ रत्न के प्रकाश से अलंकृत, समस्त लोकों के कारणभूत, आप के विग्रह को ब्रह्मा जी ने देखा । हे विभो ! आप के उस (रूप) के मुझे दर्शन दो ।

Word-Explanation :

कटकः =Bracelet, A string, The link of a chain, The side ridge of a mountain, An army, A camp, A circle etc. (here - Bracelet) (As in किरीटकटकाद्याकल्पदीप्राकृति)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आकल्प =An ornament, Dress in general, Decoration, Sickness, disease. (here ornament/decoration) ।

॥ ८ ॥

कालांभोदकलायकोमलरुचीचक्रेण चक्रं दिशा-
मावृण्वानमुदारमन्दहसितस्यन्दप्रसन्नाननम् ।
राजत्कम्बुगदारिपङ्कजधरश्रीमद्भुजामण्डलम्
स्रष्टुस्तुष्टिकरं वपुस्तव विभो मद्रोगमुद्वासयेत् ॥

पदविभागः—कालांभोदकलायकोमलरुचीचक्रेण, चक्रम्, दिशाम्, आवृण्वानम्, उदारमन्दहसितस्यन्दप्रसन्नानम्, राजत्कम्बुगदारिपङ्कजधरश्रीमद्भुजामण्डलम्, स्रष्टुः, तुष्टिकरम्, वपुः तव, विभो, मद्रोगम्, उद्वासयेत् ॥

अन्वयः—विभो, कालाम्भोदकलायकोमलरुचीचक्रेण दिशां चक्रम् आवृण्वानम्, उदारमन्दहसितस्यन्दप्रसन्नाननं, राजत्कम्बुगदारिपङ्कजधरश्रीमद्भुजामण्डलं, स्रष्टुः तुष्टिकरं तव वपुः मद्रोगम् उद्वासयेत् ॥

अन्वयार्थः

विभो, = हे विभो !

कालाम्भोदकलायकोमलरुचीचक्रेण = काले बादल (मेघ) और कलायपुष्प जैसे कोमल प्रभाचक्र से

दिशाम् चक्रम् आवृण्वानम् = समस्त दिशाओं को ढकते,

उदारमन्दहसितस्यन्दप्रसन्नाननम् = सुन्दर मन्दहास से प्रसन्न मुख,

राजत्कम्बुगदारिपङ्कजधरश्रीमद्भुजामण्डलम् = चमकते शंख, चक्र, गदा, कमल आदि को धारण किये हाथ

स्रष्टुः तुष्टिकरम् = (इस प्रकार का) ब्रह्मा जी को सन्तुष्ट कराता

तव वपुः = आप का विग्रह

मद्रोगम् उद्वासयेत् = मेरे रोगों को दूर करें ।

भावार्थ—हे विभो ! काले बादल तथा कलायपुष्प जैसे कोमल प्रभाचक्र से समस्त दिशाओं को ढकते, सुन्दर मन्दहास से प्रसन्न मुख, चमकते शंख, चक्र, गदा, कमल आदि धारण किये हाथ (इस प्रकार का) ब्रह्मा जी को सन्तुष्ट कराता आप का विग्रह मेरे रोगों को दूर करे ।

Word-Explanation :

अरि = चक्र, Wheel, Any part of a carriage, Enemy etc. (here wheel - चक्र) (As in कम्भुगदारिपङ्कज—)

स्रष्टु =Creator, Maker, Brahma (here Brahma) (As in स्रष्टुस्तुष्टिकरम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

दृष्ट्वा सम्भृतसम्भ्रमः कमलभूस्त्वत्पादपाथोरुहे
हर्षावेशवशंवदो निपतितः प्रीत्या कृतार्थीभवन् ।
जानास्येव मनीषितं मम विभो ज्ञानं तदापादय
द्वैताद्वैतभवत्स्वरूपपरमित्याचष्ट तं त्वां भजे ॥

पदविभागः—दृष्ट्वा, सम्भृतसम्भ्रमः, कमलभूः, त्वत्, पादपाथोरुहे, हर्षावेशवशंवदः, निपतितः, प्रीत्या, कृतार्थीभवन्, जानासि, एव, मनीषितम्, मम, विभो, ज्ञानाम्, तत्, आपादय, द्वैतादैत, भवत्, स्वरूपपरम्, इति, आचष्ट, तम्, त्वाम्, भजे ।

अन्वयः—(भवन्तं) दृष्ट्वा सम्भृतसम्भ्रमः कमलभूः त्वत् पादपाथोरुहे प्रीत्या कृतार्थीभवन्, हर्षावेशवशंवदः निपतितः । विभो, मम मनीषितं (त्वं) जानासि एव । द्वैताद्वैतभवत्स्वरूपपरं तत् ज्ञानम् आपादय । इति आचष्ट तं त्वां (अहं) भजे ।

अन्वयार्थः

(भवन्तम्) दृष्ट्वा = (आपको) देखकर

सम्भृतसम्भ्रमः = भ्रमित (आश्चर्य चकित) होते हुए

कमलभूः = कमल से उत्पन्न ब्रह्माजी

त्वत् पादपथोरुहे = आपके चरण कमलों में

प्रीत्या कृतार्थीभवन् = प्रीति से कृतार्थ होकर

हर्षावेशवशंवदः = हर्ष से प्रफुल्लित होकर

निपतितः । = साष्टांग करते हुए गिर गये

विभो, मम मनीषितम् = हे विभो ! मेरे मन की इच्छा

(त्वम्) जानासि एव । = (आप) जानते ही हैं ।

द्वैताद्वैत भवत्स्वरूपपरम् = द्वैत, अद्वैत आदि आप के स्वरूप से सम्बन्धित

तत् ज्ञानम् आपादय । = वह जानकारी (मुझे) प्राप्त हो ।

इति आचष्ट = इस प्रकार (ब्रह्मा जी द्वारा) आचरित

तं त्वां (अहं) भजे = उन आप को मैं नमस्कार करता हूँ ।

भावार्थ—(आपको) देखकर भ्रमित (आश्चर्य चकित) होकर कमल से उत्पन्न ब्रह्मा जी, आप के चरण कमलों में आपकी) प्रीति से कृतार्थ होकर, हर्ष से प्रफुल्लित होकर (साष्टांग) करते हुए गिर गये । हे विभो ! (आप) मेरे मन की इच्छा जानते ही हो । द्वैत, अद्वैत आदि आप के स्वरूप से सम्बन्धित वह जानकारी (मुझे) प्राप्त हो । इस प्रकार ब्रह्मा जी द्वारा आचरित उन आपको (मैं) नमस्कार करता हूँ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

पाथोरुहम् =Lotus, कमल (As in पादपाथोरुहे)

पाथम् = =Water

पाथजम्/पाथोरुहम् =Lotus

॥ १० ॥

आताम्रे चरणे विनम्रमथ तं हस्तेन हस्ते स्पृशन्
"बोधस्ते भविता न सर्गविधिभिर्बन्धोपि सञ्जायते ।"
इत्याभाष्य गिरं प्रतोष्य नितरां तच्चित्तगूढः स्वयम्
सृष्टौ तं समुदैरयः स भगवन्नुल्लासयोल्लाघताम् ॥

पदविभागः—आताम्रे, चरणे, विनम्रम्, अथ, मम्, हस्तेन, हस्ते, स्पृशन, बोधः, ते, भविता, न, सर्गविधिभिः, बन्धः, अपि, सञ्जायते, इति, आभाष्य, गिरम्, प्रतोष्य, नितराम्, तच्चित्तगूढः, स्वयम्, सृष्टौ, तम्, समुदैरयः, सः, भगवन्, उल्लासय, उल्लाघताम् ॥

अन्वयः—अथ आताम्रे चरणे विनम्रं तं हस्तेन हस्ते स्पृशन् "ते बोधः भविता, सर्गविधिभिः बन्धः अपि न सञ्जायते" । इति गिरम् आभाष्य, नितरां प्रतोष्य, स्वयं तच्चित्तगूढः, तं सृष्टौ समुदारयः । भगवन् सः (त्वं) (मम) उल्लाघताम् उल्लासय ।

अन्वयार्थः

अथ = उसके बाद

आताम्रे चरणे = ताम्रवर्ण के आप के चरणों में

विनम्रं तम् = नमस्कृत उस (ब्रह्मा) को

हस्तेन हस्ते स्पृशन् = हाथ से हाथ का स्पर्श करते हुए

ते बोधः भविता = आपको ज्ञान होगा,

सर्गविधिभिः = सृष्टि कार्यों के द्वारा

बन्धः अपि = बन्धन भी

न सञ्जायते । = नहीं होगा ।

इति गिरम् आभाष्य, = इस प्रकार के शब्द कहकर,

नितरां प्रतोष्य, = महान् सन्तोष देकर,

स्वयं तच्चित्तगूढः = स्वयं उस (ब्रह्मा) के मन में प्रवेश करके

तं सृष्टौ समुदारयः । = उस (ब्रह्मा) को सृष्टि-कार्य की प्रेरणा दी ।

Funding by IKS-MoE

भगवन्, सः (त्वम्) = हे भगवन्, वह (आप)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(मम) उल्लाघताम् = (मेरे) आरोग्य की

उल्लासय। = वृद्धि करो

भावार्थ—उस के बाद ताम्रवर्ण के आपके चरणों में नमस्कृत उस (ब्रह्मा जी) को अपने हाथ से ब्रह्मा जी के हाथ का स्पर्श करते हुए "आपको ज्ञान होगा और सृष्टि कार्यों के द्वारा बन्धन भी नहीं होगा"। इस प्रकार के शब्द कहकर, महान् सन्तोष देकर, स्वयं उस (ब्रह्मा) के मन में प्रवेश करके उस (ब्रह्मा) को सृष्टिकार्य की प्रेरणा दी। हे भगवन्! वह (आप) (मेरे) आरोग्य की वृद्धि करो।

Word-Explanation :

सर्गः =Creation, Siva, Canto as of a poem etc. (here creation) (As in सर्गविधिभिः)

उल्लाघ =Recovered from illness, Convalescent, Pure, Happy, Delighted, Clever etc. (here recovered from illness) (As in उल्लाघताम् उल्लासय)

।। इति सप्तमदशकं समाप्तम् ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-८

प्रलयवर्णनं जगत्सृष्टिप्रकारवर्णनञ्च

शालिनीछन्दः

॥ १ ॥

एवं तावत् प्राकृतप्रक्षयान्ते ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा ।
ब्रह्मा भूयस्त्वत्त एवाप्य वेदान् सृष्टिं चक्रे पूर्वकल्पोपमानाम् ॥

पदविभागः—एवम्, तावत्, प्राकृतप्रक्षयान्ते, ब्राह्मे, कल्पे, आदिमे, लब्धजन्मा, तावत्, भूयः, त्वत्तः एव, आप्य, वेदान्, सृष्टिम्, चक्रे, पूर्वकल्पोपमानाम् ।

अन्वयः—प्राकृतप्रक्षयान्ते आदिमे ब्राह्मकल्पे एवं तावत् लब्धजन्मा भूयः त्वत्तः एव वेदान् आप्य, पूर्वकल्पोपमानां सृष्टिं चक्रे ।

अन्वयार्थः

प्राकृतप्रक्षयान्ते = प्राकृत प्रलय के अन्त में

आदिमे ब्राह्मकल्पे = प्रथम ब्रह्मकल्प में

एवं तावत् लब्धजन्मा = इस प्रकार का जन्म लेने वाले ब्रह्माजी

भूयः त्वत्तः एव = पुनः आप से ही

वेदान् आप्य = वेदों का ज्ञान प्राप्त करके

पूर्वकल्पोपमानाम् = पिछले कल्पों के अनुसार

सृष्टिं चक्रे । = सृष्टि करने लगे ।

भावार्थ—प्राकृत प्रलय के अन्त में प्रथम ब्रह्मकल्प में, इस प्रकार का जन्म लेने वाले ब्रह्माजी, पुनः आप से ही वेदों का ज्ञान प्राप्त करके पिछले कल्पों के अनुसार सृष्टि करने लगे ।

Word-Explanation :

प्रक्षयः = Ruin, Destruction (प्रलय) (As in प्राकृतप्रक्षये)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसन्ततिलकछन्दः

॥ २ ॥

सोऽयं चतुर्युगसहस्रमितान्यहानि तावन्मिताश्च रजनीर्बहुशो निनाय।
निद्रात्यसौ त्वयि निलीय समं स्वसृष्टैर्नैमित्तिकप्रलयमाहुरतोऽस्य रात्रिम् ॥

पदविभागः—सः, अयम्, चतुर्युगरहस्रमितानि, अहानि, तावन्मिताः, च, रजनीः, बहुशः, निनाय, निद्राति, असौ, त्वयि, निलीय, समम्, स्वसृष्टैः, नैमित्तिकप्रलयम्, आहुः, अतः, अस्य, रात्रिम् ॥

अन्वयः—सः अयं (ब्रह्मा) चतुर्युगसहस्रमितानि अहानि, तावन्मिता रजनी च, बहुशः निनाय असौ (ब्रह्मा) स्वसृष्टैः समं त्वयि निलीय निद्राति। अतः नैमित्तिकप्रलयम् अस्य रात्रिम् आहुः।

अन्वयार्थः

सः अयम् (ब्रह्मा) = वह यह (ब्रह्मा)

चतुर्युगसहस्रमितानि अहानि = सहस्र चतुर्युगों तक के दिनों

तावन्मिता रजनी च = और उतनी ही रातों को

बहुशः निनाय = कई बार बिताकर

असौ (ब्रह्मा) = यह (ब्रह्मा)

स्वसृष्टैः समम् = अपनी सृष्टियों के साथ

त्वयि निलीय निद्राति। = आप में लीन होकर सोते हैं।

अतः नैमित्तिकप्रलयम् = इसलिए नैमित्तिकप्रलय

अस्य रात्रिम् आहुः। = उस की रात कही जाती है।

भावार्थ—वह यह (ब्रह्मा) सहस्र चतुर्युगों तक के दिनों तथा उतनी ही रातों को कई बार बिताकर यह (ब्रह्मा) अपनी सृष्टियों के साथ आप में विलीन होकर सोते हैं। इसलिए नैमित्तिकप्रलय उस की रात कही जाती है।

Word-Explanation :

रजनी =Night.

॥ ३ ॥

अस्मादृशां पुनरहर्मुखकृत्यतुल्यां सृष्टिं करोत्यनुदिनं स भवत्प्रसादात्।
प्राग्ब्राह्मकल्पजनुषां च परायुषां तु सुप्तप्रबोधनसमाऽस्ति तदापि सृष्टिः ॥

पदविभागः—अस्मादृशाम्, पुनः, अहर्मुखकृत्यतुल्याम्, सृष्टिम्, करोति, अनुदिनम्, सः, भवत्, प्रसादात्, प्राक्, ब्राह्मकल्पजनुषाम्, च, परायुषाम्, तु, सुप्तप्रबोधनसमा, अस्ति, तदा, अपि, सृष्टिः।

अन्वयः—सः पुनः भवत्प्रसादात् अनुदिनम् अस्मादृशां अहर्मुखकृत्यतुल्यां सृष्टिं करोति। प्राक् ब्राह्मकल्पजनुषां परायुषाम् अपि तु तदा सुप्तप्रबोधनसमा सृष्टिः अस्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

सः पुनः भवत्प्रसादात् = वह (ब्रह्मा) फिर आपकी कृपा से

अनुदिनम् अस्मादृशाम् = प्रतिदिन हम लोगों के समान

अहर्मुखकृत्यतुल्याम् = प्रातःकाल के कार्यों के समान

सृष्टिं करोति। = सृष्टि करता है।

प्राक् ब्राह्मकल्पजनुषाम् = पिछले ब्रह्मकल्प में जन्मे

परायुषाम् अपि तु = चिरञ्जीवियों की भी तो

तदा सुप्तप्रबोधनसमा = तब सोने - जागने के समान

सृष्टिः अस्ति। = सृष्टि होती है।

भावार्थ—वह (ब्रह्मा) फिर आपकी कृपा से प्रतिदिन हम लोगों के प्रातःकाल के कार्यों के समान सृष्टि करता है। पिछले ब्रह्मकल्प में जन्मे चिरञ्जीवियों की भी तो तब सोने-जागने के समान सृष्टि है।

Word-Explanation :

प्राक् = पुरा, In the past

अहर्मुखम् = Commencement of the day.

परायुषः = चिरंजीवि

प्रबोधः = Awakening, Awaking

सुप्त = Sleeping/Slept।

॥ ४ ॥

पञ्चाशदब्दमधुना स्ववयोऽर्धरूपमेकं परार्धमतिवृत्य हि वर्ततेऽसौ।
तत्रान्त्यरात्रिजनितान् कथयामि भूमन् पश्चाद्दिनावतरणे च भवद्विलासान्॥

पदविभागः—पञ्चाशदब्दम्, अधुना, स्ववयः, अर्धरूपम्, एकम्, परार्धम्, अतिवृत्य, हि, वर्तते, असौ, तत्र, अन्त्यरात्रिजनितान्, कथयामि, भूमन्, पश्चात्, दिनावतरणे, च भवद्विलासान्॥

अन्वयः—अधुना असौ (ब्रह्मा) स्ववयः अर्धरूपं पञ्चाशदब्दम् एकं परार्धम् अतिवृत्य वर्तते हि। भूमन्, तत्र अन्त्यरात्रिजनितान् भवद्विलासान् पश्चात् दिनावतरणे (भवद्विलासान्) च (अहं) कथयामि।

अन्वयार्थः

अधुना असौ (ब्रह्मा) = इस समय यह (ब्रह्मा)

स्ववयः अर्धरूपम् = अपनी आयु के आधा भाग

पञ्चाशदब्दम् एकं परार्धम् = पचास वर्ष के एक परार्ध को

अतिवृत्य वर्तते हि। = पार करके विराजमान है

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूमन्, तत्र = हे भूमन् (सर्वव्यापी) ! वहाँ

अन्त्यरात्रिजनितान् = अन्तिम रात के अन्त में प्रकट की गयीं

भवद्विलासान् = आप की लीलायें

पश्चात् दिनावतरणे (भवद्विलासान्) च = बाद में दिन के आरम्भ में की गयी लीलायें भी

(अहं) कथयामि। = (मैं) कहता हूँ।

भावार्थ—इस समय (ब्रह्मा) अपनी आयु के आधा भाग, पचास वर्ष के एक परार्ध को पार करके विराजमान हैं। हे भूमन् ! वहाँ रात के अन्त में प्रकट की गयीं आप की लीलायें, बाद में दिन के आरम्भ में की गयीं लीलायें भी (मैं) कहता हूँ।

Word-Explanation :

अधुना =Presently, Now, At this time

हि =(This is never used in the beginning of a sentence) Meanings are: For, because, indeed, surely, for instance, only, alone, (sometimes used merely as an expletive) (As in हि वर्तते)।

उपेन्द्रवज्र छन्दः

॥ ५ ॥

दिनावसानेऽथ सरोजयोनिः सुषुप्तिकामस्त्वयि सन्निलिल्ये।
जगन्ति च त्वज्जठरं समीयुस्तदेदमेकार्णवमास विश्वम्॥

पदविभागः—दिनावसाने, अथ, सरोजयोनिः, सुषुप्तिकामः, त्वयि, सन्निलिल्ये, जगन्ति, च, त्वज्जठरम्, समीयुः, तदा, इदम्, एकार्णवम्, आस, विश्वम्।

अन्वयः—अथ सरोजयोनिः दिनावसाने सुषुप्तिकामः त्वय सन्निलिल्ये। जगन्ति त्वज्जठरं समीयुः च। तदा इदं विश्वम् एकार्णवम् आस।

अन्वयार्थः

अथ सरोजयोनिः = उस के बाद ब्रह्मा जी

दिनावसाने सुषुप्तिकामः = दिन (कल्प) के अन्त में निद्रा करने की इच्छा से

त्वयि सन्निलिल्ये। = आप में लीन हो गये।

जगन्ति त्वज्जठरं समीयुः च। = समस्त जगत् के जीवादि भी आप के उदर में (पेट में) लीन हो गये।

तदा इदं विश्वम् = तब यह विश्व

एकार्णवम् आस। = एक समुद्र बन गया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—उस के बाद ब्रह्माजी दिन (कल्प) के अन्त में निद्रा करने की इच्छा से आप में लीन हो गये। समस्त जगत् के जीवादि भी आपके उदर (पेट) में लीन हो गये। तब यह विश्व एक समुद्र बन गया।

Word-Explanation :

सरोजयोनिः =Brahma

सुषुप्ति =Deep or Profound sleep.।

॥ ६ ॥

तवैव वेषे फणिराजि शेषे जलैकशेषे भुवने स्म शेषे।
आनन्दसान्द्रानुभवस्वरूपः स्वयोगनिद्रापरिमुद्रितात्मा ॥

पदविभागः—तव, एव, विषे, फणिराजि, शेषे, जलैकशेषे, भुवने, स्म, शेषे, जलैकशेषे, भुवने, स्म, शेषे, आनन्द-सान्द्रानुभवस्वरूपः, स्वयोगनिद्रापरिमुद्रितात्मा।

अन्वयः—भुवने जलैकशेषे तए एव वेषे फणिराजि शेषे त्वम् आनन्दसान्द्रानुभवस्वरूपः स्वयोगनिद्रापरिमुद्रितात्मा शेषे स्म।

अन्वयार्थः

भुवने जलैकशेषे, = जगत् में केवल जल ही शेष रहने पर

तव एव वेषे = आप के ही वेष (रूप) में

फणिराजि शेषे त्वम् = सर्पराज शेष नाग पर आप

आनन्दसान्द्रानुभवस्वरूपः = आनन्दमय रूप होकर

स्वयोगनिद्रापरिमुद्रितात्मा = अपनी योगनिद्रा में लीन होकर

शेषे स्म। = सोये थे।

भावार्थ—जगत् में केवल जल ही शेष रहने पर, आप के ही वेष (रूप) में सर्पराज शेष नाग पर आप आनन्दमय रूप होकर, अपनी योगनिद्रा में लीन होकर सोये थे।

Word-Explanation :

फणि =Snake (As in फणिराजि)

सान्द्र =Strong, Excessive, Abundant (As in सान्द्रानुभव...)

मुद्रणम् =Printing, Selling, Shutting, Closing. (here - closing)

इस श्लोक में "शेषे" शब्द का सुन्दर रूप में उपयोग किया है। जलशेषे-केवल जल ही शेष। फणिराजि शेषे-सर्पराज शेषनाग। शेषे स्म-सोते थे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

कालाख्यशक्तिं प्रलयावसाने प्रबोधयेत्यादिशता किलादौ ।
त्वया प्रसुप्तं परिसुप्तशक्तिव्रजेन तत्राखिलजीवधाम्ना ॥

पदविभागः—कालाख्यशक्तिम्, प्रलयावसाने, प्रबोधय, इति, आदिशता, किल, आदौ, त्वया, प्रसुप्तम्, परिसुप्तशक्तिव्रजेन, तत्र, अखिलजीवधाम्ना ।

अन्वयः—तत्र आदौ परिसुप्तशक्तिव्रजेन अखिलजीवधाम्ना त्वया "प्रलयावसाने (माम्) प्रबोधय" इति कालाख्यशक्तिम् आदिशता प्रसुप्तं किल ।

अन्वयार्थः

तत्र आदौ = वहां पहले

परिसुप्तशक्तिव्रजेन = (अपने में) लीन समस्त शक्तियों सहित (सोये)

अखिलजीवधाम्ना त्वया = समस्त जीवों के आधार आप द्वारा

"प्रलयावसाने (माम्) प्रबोधय" इति = "प्रलय के अन्त में (मुझे) जगाओ" इस प्रकार

कालाख्यशक्तिम् = काल नामक शक्ति को

आदिशता प्रसुप्तं किल । = निश्चित रूप से आज्ञा देकर सोये हुए थे ।

भावार्थ—वहां पहले (आप में) लीन समस्त शक्तियों सहित सोये समस्त जीवों के आधार आप द्वारा "प्रलय के अन्त में (मुझे) जगाओ" इस प्रकार काल (समय) नामक शक्ति को निश्चित रूप से आज्ञा देकर सोये हुए थे ।

Word-Explanation :

व्रजः - Multitude, Collection, Group, A place in Mathura where Krishna spend his childhood. (Here meaning - collection) (As in परिसुप्तशक्तिव्रजेन)

धामन्- A dwelling Place, Abode, Residence, House, Hight, Lustre, etc. (Here dwelling Place) (As in अखिलजीवधाम्ना)

॥ ८ ॥

चतुर्युगाणां च सहस्रमेवं त्वयि प्रसुप्ते पुनरद्वितीये ।
कालाख्यशक्तिः प्रथमप्रबुद्धा प्राबोधयत् त्वां किल विश्वनाथ ॥

पदविभागः—चतुर्युगाणाम्, च, सहस्रम्, एकम्, त्वयि, प्रसुप्ते, पुनः अद्वितीये, कालाख्यशक्तिः, प्रथमप्रबुद्धा, प्राबोधयत्, त्वाम्, किल, विश्वनाथ ॥

अन्वयः—विश्वनाथ, त्वयि अद्वितीये चतुर्युगसहस्रम् एवं प्रसुप्ते पुनः कालाख्यशक्तिः प्रथमप्रबुद्धा त्वां प्राबोधयत् च किल ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

विश्वनाथ = हे विश्व के नाथ !

त्वयि अद्वितीये = आप के द्वारा (एकाकी) ही

चतुर्युगाणां सहस्रम् = सहस्र चतुर्युगों तक

एवं प्रसुप्ते = इस प्रकार निद्रा में रहने पर

पुनः कालाख्यशक्तिः = पुनः काल नामक शक्ति ने

प्रथम प्रबुद्धा त्वाम् च = पहले स्वयं जागकर और (पुनः) आपको

प्राबोधयत् किल = भी जगा दिया।

भावार्थ—हे विश्व के नाथ ! आप के द्वारा अकेले (एकाकी) ही सहस्र चतुर्युगों तक इस प्रकार निद्रा में रहने पर पुनः काल नामक शक्ति ने पहले स्वयं जागकर और (पुनः) आप को भी जगा दिया।

Word-Explanation :

आख्या =A name appellation often at the end of compound words meaning "named" "called" (As in कालाख्यशक्तिः)

किल =Verily, Indeed, Certainly, Assuredly, As they say, As is reported (showing report or tradition), for he said etc. (As in त्वां प्राबोधयत् च किल)

उपजाति छन्दः

॥ ९ ॥

विबुध्य च त्वं जलगर्भशायिन् विलोक्य लोकानखिलान् प्रलीनान्।
तेष्वेव सूक्ष्मात्मतया निजान्तःस्थितेषु विश्वेश ददाथ दृष्टिम्॥

पदविभागः—विबुध्य, च, त्वम्, जलगर्भशायिन्, विलोक्य, लोकान्, अखिलान्, प्रलीनान्, तेषु, एव, सूक्ष्मात्मतया, निजान्तः, स्थितेषु, विश्वेश, ददाथ, दृष्टिम्।

अन्वयः—जलगर्भशायिन्, विश्वेश, त्वं विबुध्य अखिलान् लोकान् प्रलीनान् विलोक्य सूक्ष्मात्मतया निजान्तः स्थितेषु तेषु एव दृष्टिं ददाथ।

अन्वयार्थः

जलगर्भशायिन्, = हे जल के मध्य में सोये भगवान्,

विश्वेश, त्वं विबुध्य = हे जगदीश ! आपने जाग कर

अखिलान् लोकान् = समस्त लोकों को

प्रलीनान् विलोक्य = (अपने में) लीन देखकर

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूक्ष्मात्मतया निजान्तः = सूक्ष्म रूप से अपने अन्दर

स्थितेषु तेषु एव = रहने वाले उनके ऊपर ही

दृष्टिं ददाथ। = दृष्टि को स्थापित किया।

भावार्थ—हे जल के मध्य में शयन करने वाले भगवान् ! हे जगदीश ! आपने जाग कर समस्त लोकों को (अपने में) लीन देखकर सूक्ष्म रूप से अपने अन्दर रहने वाले उनके ऊपर ही दृष्टि को स्थापित किया।

Word-Explanation :

विलोक्य = देखकर (As in प्रलीनान् विलोक्य)

विलोकनं =Looking at, Seeing.

॥ १० ॥

ततस्त्वदीयादयि नाभिरन्ध्रादुदञ्चितं किञ्चन दिव्यपद्मम्।
निलीन निःशेषपदार्थमालासंक्षेपरूपं मुकुलायमानम्॥

पदविभागः—ततः, त्वदीयात्, अयि, नाभिरन्ध्रात्, उदञ्चितम्, किञ्चन, दिव्यपद्मम्, निलीननिःशेषपदार्थमालासंक्षेपरूपम्, मुकुलायमानम्।

अन्वयः—अयि, ततः त्वदीयात् नाभिरन्ध्रात् निलीननिःशेषपदार्थमालासंक्षेपरूपं किञ्चन दिव्यपद्मम् मुकुलायमानम् उदञ्चितम्॥

अन्वयार्थः

अयि, ततः = हे (भगवान् !) उसके बाद

त्वदीयात् नाभिरन्ध्रात् = आप की नाभि के रन्ध्र से

निलीननिःशेषपदार्थमालासंक्षेपरूपम् = (आप में) विलीन समस्त पदार्थों की श्रृंखला के संक्षिप्त रूप

मुकुलायमानम् = कोंपल के रूप विकसित होता हुआ

किञ्चन दिव्यपद्मम् = कोई दिव्य कमल

उदञ्चितम्। = प्रकट हुआ। (ऊपर आया)।

भावार्थ—हे भगवान् ! उसके बाद, आप की नाभि के रन्ध्र से (आप में) विलीन समस्त पदार्थों की श्रृंखला के संक्षिप्त रूप कोंपल के रूप में विकसित होता हुआ कोई दिव्य कमल ऊपर आया।

Word-Explanation :

उदञ्च, उदच्, उदङ्, उदक् =Rising upwards, Going up. (As in उदञ्चितम्)

मुकुलः/मुकुलम् =A bud (As in मुकुलायमानम्)

Funding By IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ११ ॥

तदेतदम्भोरुहकुड्मलं ते कलेबरात् तोयपथे प्ररूढम् ।
बहिर्निरीतं परितः स्फुरद्भिः स्वधामभिर्ध्वान्तमलं न्यकृन्तत् ॥

पदविभागः—तत्, एतत्, अम्भोरुहकुड्मलं, ते, कलेबरात्, तोयपथे, प्ररूढम्, बहिः, निरीतम्, परितः, स्फुरद्भिः, स्वधामभिः, ध्वान्तम्, अलम्, न्यकृन्तत् ।

अन्वयः—तत् एतत् अम्भोरुहकुडमलं ते कलेबरात् तोयपथे प्ररूढं बहिः निरीतं परितः स्फुरद्भिः स्वधामभिः ध्वान्तम् अलं न्यकृन्तत् ।

अन्वयार्थः

तत् एतत् = उस प्रकार से यह

अम्भोरुहकुडमलम् = कमल की कोंपल

ते कलेबरात् = आप के शरीर से

तोयपथे प्ररूढम् = जल में से विकसित होती हुई ।

बहिः निरीतम् = बाहर आयी

परितः स्फुरद्भिः स्वधामभिः = समस्त दिशाओं में अपनी प्रभा से प्रकाश करके

ध्वान्तम् अलं न्यकृन्तत् । = अन्धकार को पूर्ण रूप से दूर किया ।

भावार्थ—उस प्रकार से यह कमल की कोंपल आप के शरीर से जल में से विकसित होती हुई बाहर आयी और समस्त दिशाओं में अपनी प्रभा से प्रकाशित होकर उसने अन्धकार को पूर्ण रूप से दूर कर दिया ।

Word-Explanation :

कलेवरम्/कलेबरम्/कलेवरः = =The body (As in ते कलेबरम्) (In this sometimes "व" is written as "ब")

ध्वान्तम् = =Darkness

कुडमलः/ कुडमलम् = =An opening bud,

प्ररूढ = =Full Grown, Developed, Sprung, Produced, Grown long etc.

॥ १२ ॥

संफुल्लपत्रे नितरां विचित्रे तस्मिन् भवद्वीर्यधृते सरोजे ।
स पद्मजन्मा विधिराविरासीत् स्वयं प्रबुद्धाखिल वेदराशिः ॥

पदविभागः—संफुल्लपत्रे, नितराम्, विचित्रे, तस्मिन्, भवत्, वीर्यधृते, सरोजे, सः, पद्मजन्मा, विधिः, आविरासीत्, स्वयम्, प्रबुद्धाखिलवेदराशिः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—संफुल्लपत्रे नितरां विचित्रे भवद्वीर्यधृते तस्मिन् सरोजे स्वयं प्रबुद्धाखिलवेदराशिः, सः पद्मजन्मा विधिः आविरासीत् ।

अन्वयार्थः

संफुल्लपत्रे = विकसित पत्तों पर

नितरां विचित्रे = बहुत विचित्र

भवद्वीर्यधृते = आपकी शक्ति से स्थित

तस्मिन् सरोजे = उस कमल पर

स्वयं प्रबुद्धाखिलवेदराशिः = स्वयं प्रकाशित वेदों (के साथ)

सः पद्मजन्मा विधिः = वह कमल से उत्पन्न ब्रह्मा

आविरासीत् = प्रकट हो गया ।

भावार्थ—विकसित पत्तों पर बहुत विचित्र आपकी शक्ति से स्थित उस कमल पर, स्वयं प्रकाशित वेदों के साथ, वह कमल से उत्पन्न ब्रह्मा प्रकट हो गया ।

Word-Explanation :

संफुल्ल/ प्रफुल्ल = =Full blown, Expanded etc.

प्रबुद्ध =Awakened, Roused, Wise, Learned, Full blown, Expanded etc. (As in स्वयं प्रबुद्धाखिलवेदराशिः)

॥ १३ ॥

अस्मिन् परात्मन् ननु पाद्मकल्पे त्वमित्थमुत्थापितपद्मयोनिः ।
अनन्तभूमा मम रोगराशिम् निरुन्धि वातालयवास विष्णो ॥

पदविभागः—अस्मिन्, परात्मन्, ननु, पाद्मकल्पे, त्वम्, इत्थम्, उत्थापितपद्मयोनिः, अनन्तभूमा, मम, रोगराशिम्, निरुन्धि, वातालयवास, विष्णो ।

अन्वयः—परमात्मन्, वातालयवास विष्णो, अस्मिन् पाद्मकल्पे ननु इत्थम् उत्थापितपद्मयोनिः अनन्तभूमा (त्वं) मम रोगराशिं निरुन्धि ।

अन्वयार्थः

परमात्मन्, = हे परमात्मस्वरूप !

वातालयवास विष्णो = गुरुवायुपुरि में स्थित हे विष्णो !

अस्मिन् पाद्मकल्पे = इस पद्मकल्प में

ननु इत्थम् उत्थापितपद्मयोनिः = निश्चित रूप से इस प्रकार ब्रह्मा को ऊपर कराने वाला

अनन्तभूमा (त्वम्) = हे महात्मन् ! (of incomprehensible greatness)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मम रोगराशिम् निरुन्धि = (आप) मेरे रोग समूह का निवारण करो ।

भावार्थ—हे परमात्मस्वरूप ! गुरुवायुपुरी में स्थित हे विष्णो ! इस पाद्मकल्प में निश्चित रूप से इस प्रकार ब्रह्मा को ऊपर कराने वाले हे महात्मन् ! (आप) मेरे रोग समूह का निवारण करो ।

Word-Explanation :

ननु =A particle implying the following:-Surely, certainly,indeed, inquiry, interrogation, ofcourse, "Be pleased", "pray", oh, "I say", why etc-etc. (As in ननु परमात्मन्)

उत्थापनम् =Causing to rise, Elevating, Awakening, Vomitting etc. (here elevating) ((As in उत्थापितपद्मयोनिः)

(इति अष्टमदशकं समाप्तम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-९

जगत्सृष्टिप्रकारवर्णनम्

पृथ्वीछन्दः

॥ १ ॥

स्थितः स कमलोद्भवस्तव हि नाभिपङ्केरुहे
कुतः स्विदिदमम्बुधावुदितमित्यनालोकयन् ।
तदीक्षणकुतूहलात् प्रतिदिशं विवृत्तानन-
श्चतुर्वदनतामगाद् विकसदष्टदृष्ट्यम्बुजाम् ॥

पदविभागः—स्थितः, सः, कमलोद्भवः, तव, हि, नाभिपङ्केरुहे, कुतः स्वित्, इदम्, अम्बुधौ, उदितम्, इति, अनालोकयन्, तदीक्षणकुतूहलात्, प्रतिदिशम्, विवृत्ताननः, चतुर्वदनताम्, अगात्, विकसदष्टदृष्ट्यम्बुजाम् ॥

अन्वयः—सः कमलोद्भवः तव नाभिपङ्केरुहे हि स्थितः अम्बुधौ इदं कुतः स्वित् उदितम् इति अनालोकयन् तदीक्षणकुतूहलात् प्रतिदिशं, विवृत्ताननः विकसदष्टदृष्ट्यम्बुजाम् चतुर्वदनताम् अगात् ॥

अन्वयार्थः

सः कमलोद्भवः = वह कमल से उत्पन्न ब्रह्मा

तव नाभिपङ्केरुहे हि स्थितः = आपके नाभि-कमल में ही रहता हुआ

अम्बुधौ इदं कुतः स्वित् उदितम् = समुद्र में यह (कमल) कहाँ से निकला

इति अनालोकयन् = इस प्रकार कुछ भी न देखता हुआ

तदीक्षणकुतूहलात् = उसको देखने की इच्छा से

प्रतिदिशं विवृत्ताननः = प्रत्येक दिशा में सिर घुमाता हुआ

विकसदष्टदृष्ट्यम्बुजाम् = विकसित आठ कमलों की दृष्टि को

चतुर्वदनताम् अगात् = और चार मुखों के स्वरूप को प्राप्त हुआ ।

भावार्थ—वह कमल से उत्पन्न ब्रह्मा आपके नाभि-कमल में रहता हुआ समुद्र में यह (कमल) कहां से निकला इस प्रकार कुछ भी न देखता हुआ उसको देखने की इच्छा से प्रत्येक दिशा में सिर घुमाता हुआ विकसित आठ कमलों की दृष्टि को और चार मुखों के स्वरूप को प्राप्त हुआ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

ईक्षणम् =Seeing, Beholding

आलोकः/आलोकनम् =Seeing, Beholding. (As in अनालोकयन्)

॥ २ ॥

महार्णवविघूर्णितं कमलमेव तत्केवलम्
विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन् ।
"क एष कमलोदरे महति निःसहायो ह्यहम्
कुतः स्विदिदमम्बुजं समजनीति" चिन्तामगात् ॥

पदविभागः—महार्णवविघूर्णितम्, कमलम्, एव, तत्, केवलम्, विलोक्य, तदुपाश्रयम्, तव, तनुम्, तु, नालोकयन्, कः, एषः, कमलोदरे, महति, निःसहायः, अहम्, कुतःस्वित्, इदम्, अम्बुजम्, इति, चिन्ताम्, अगात् ॥

अन्वयः—महार्णवविघूर्णितं तत् कमलं केवलम् एव विलोक्य, तदुपाश्रयं तव तनुं तु न आलोकयन्, "महति कमलोदरे निःसहायः हि एषः अहं कः ?" "इदम् अम्बुजं कुतः स्वित् समजनि ?" इति चिन्ताम् अगात् ।

अन्वयार्थः

महार्णवविघूर्णितम् = महासमुद्र में हिलते हुए

तत् कमलं केवलम् एव = उस कमल को केवल अकेले ही

विलोक्य, तदुपाश्रयम् = देखकर, उस के आश्रय (आधार)

तव तनुं तु न आलोकयन् = आप के विग्रह को बिल्कुल न देखते हुए

"महति कमलोदरे निःसहायः हि एषः अहं कः ?" = "विशाल कमल के अन्दर सर्वथा निस्सहाय यह मैं कौन हूँ ?"

"इदम् अम्बुजम् कुतः स्वित् समजनि ?" = "यह कमल कहां से उत्पन्न हुआ ?"

इति चिन्ताम् अगात् = इस प्रकार (ब्रह्मा) चिन्तित हो गया ।

भावार्थ—महासमुद्र में हिलते हुए उस कमल को केवल अकेले ही देखकर, उसके आश्रय (आधार) आपके विग्रह को बिल्कुल न देखते हुए "विशाल कमल के अन्दर सर्वथा निःसहाय यह मैं कौन हूँ ?" "यह कमल कहाँ से उत्पन्न हुआ ?" इस प्रकार ब्रह्मा चिन्तित हो गये ।

Word-Explanation :

विघूर्णित =Rolled, Shaken about,

हि =For, Because, Surely, Certainly (This is not used in the beginning of a sentence)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

अमुष्य हि सरोरुहः किमपि कारणं सम्भवे-
दिति स्म कृतनिश्चयः स खलु नालरन्ध्राध्वना ।

स्वयोगबलविद्यया समवरूढवान् प्रौढधी-
स्त्वदीयमतिमोहनं नतु कलेबरं दृष्टवान् ॥

पदविभागः—अमुष्य, हि, सरोरुहः, किमपि, कारणम्, सम्भवेत्, इति, स्म, कृतनिश्चयः सः, खलु, नालरन्ध्राध्वना, स्वयोगबलविद्यया, समवरूढवान्, प्रौढधीः, त्वदीयम्, अतिमोहनम्, न, तु, कलेबरम्, दृष्टवान् ॥

अन्वयः—अमुष्य सरोरुहः किमपि कारणं सम्भवेत् हि । इति कृतनिश्चयः प्रौढधीः सः खलु स्वयोगबलविद्यया नालरन्ध्राध्वना समवरूढवान् । अतिमोहनं त्वदीयं कलेबरं तु न दृष्टवान् ॥

अन्वयार्थः

अमुष्य सरोरुहः = इस कमल का

किमपि कारणं सम्भवेत् हि = कोई कारण निश्चित रूप से अवश्य होगा ।

इति कृतनिश्चयः = इस प्रकार निश्चय करते हुए

प्रौढधीः सः खलु = गम्भीर बुद्धि वाला वह (ब्रह्मा) तो

स्वयोगबलविद्यया = अपनी तपस्या की शक्ति के द्वारा

नालरन्ध्राध्वना = कमलनाल के रन्ध्र से

समवरूढवान् = नीचे उतर गया ।

अतिमोहनं त्वदीयं कलेबरम् तु = (किन्तु फिर भी) आपके अति सुन्दर विग्रह को

न दृष्टवान् = नहीं देख पाया ।

भावार्थ—इस कमल का कोई कारण निश्चित रूप से अवश्य होगा । इस प्रकार निश्चय करते हुए गम्भीर बुद्धि वाला वह ब्रह्मा तो अपनी तपस्या की शक्ति के द्वारा कमल नाल के रन्ध्र से नीचे उतर गया किन्तु फिर भी आपके अति सुन्दर विग्रह को नहीं देख पाया ।

Word-Explanation :

धीः =Intellect, Understanding, Mind. (As in प्रौढधीः)

प्रौढ =Full grown, Fully developed, Matured. (As in प्रौढधीः)

रन्ध्रम् =Hole, सुषिर (As in नालरन्ध्राध्वना)

अध्वन् =A way, A road. (As in नालरन्ध्राध्वना)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ४ ॥

ततः सकलनालिकाविवरमार्गगोमार्गयन्
प्रयस्य शतवत्सरं किमपि नैव संदृष्टवान् ।
निवृत्य कमलोदरे सुखनिषण्ण एकाग्रधीः
समाधिबलमादधे भवदनुग्रहैकाग्रही ॥

पदविभागः—ततः, सकलनालिकाविवरमार्गगः, मार्गयन्, प्रयस्य, शतवत्सरम्, किमपि, न, एव, संदृष्टवान्, निवृत्य, कमलोदरे, सुखनिषण्णः, एकाग्रधीः, समाधिबलम्, आदधे, भवतः, अनुग्रहैकाग्रही ।

अन्वयः—ततः सकलनालिकाविवरमार्गगः मार्गयन् शतवत्सरं प्रयस्य किमपि न एव संदृष्टवान् । निवृत्य कमलोदरे सुखनिषण्णः एकाग्रधीः भवदनुग्रहैकाग्रही समाधिबलम् आदधे ।

अन्वयार्थः

ततः = उसके बाद

सकलनालिकाविवरमार्गगः = कमल नाल के समस्त द्वारों में जाते हुए

मार्गयन् शतवत्सरं प्रयस्य = सौ वर्षों तक प्रयत्न करके खोजते हुए

किमपि न एव संदृष्टवान् = (ब्रह्मा ने) कुछ भी नहीं देखा ।

निवृत्य कमलोदरे सुखनिषण्णः = वापस लौटकर कमल के बीच में सुखासन में बैठकर

एकाग्रधीः = चित्त को एकाग्र करते हुए

भवदनुग्रहैकाग्रही = आपके अनुग्रह की इच्छा करते हुए

समाधिबलम् आदधे = समाधि शक्ति को स्वीकार किया ।

भावार्थ—उसके बाद कमल नाल के समस्त द्वारों में जाते हुए सौ वर्षों तक प्रयत्न करके खोजते हुए ब्रह्मा ने कुछ भी नहीं देखा । वापस लौटकर कमल के बीच में सुखासन में बैठकर चित्त को एकाग्र करते हुए आपके अनुग्रह की इच्छा करते हुए समाधि शक्ति को स्वीकार किया ।

Word-Explanation :

मार्ग (मार्गति/मार्गयति/मार्गते) - To seek, To hunt after, To look out, To chase, To solicit, To ask in marriage, To adorn etc.(here to look out) (As in मार्गयन् शतवत्सरम्)

निषण्ण= Seated, Sitting on, Rested, Resting (As in सुखनिषण्णः)

विवरम् =A hole, A cavity, Hollow (As in नालिकविवरमार्गगः)

प्रयस्य =प्रयास करके

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ५ ॥

शतेन परिवत्सरैर्दृढसमाधिबन्धोल्लसत्
प्रबोधविशदीकृतः स खलु पद्मिनीसम्भवः ।

अदृष्टचरमद्भुतं तव हि रूपमन्तर्दृशा
व्यचष्ट परितुष्टधीर्भुजगभोगभागाश्रयम् ॥

पदविभागः—शतेन, परिवत्सरैः, दृढसमाधिबन्धोल्लसत्, प्रबोधविशदीकृतः, सः, खलु, पद्मिनीसम्भवः, अदृष्टचरम्, अद्भुतम्, तव, हि, रूपम्, अन्तर्दृशा, व्यचष्ट, परितुष्टधीः, भुजगभोगभागाश्रयम् ॥

अन्वयः—सः पद्मिनीसम्भवः खलु शतेन परिवत्सरैः दृढसमाधिबन्धोल्लसत् प्रबेधविशदीकृतः परितुष्टधीः अदृष्टचरम् अद्भुतं भुजगभोगभागाश्रयं तव रूपम् अन्तर्दृशा व्यचष्ट हि ।

अन्वयार्थः

सः पद्मिनीसम्भवः खलु = उस कमल से उत्पन्न हुए ब्रह्मा ने तो

शतेन परिवत्सरैः = सौ दिव्य वर्षों की

दृढसमाधिबन्धोल्लसत् = तीव्र समाधि में तल्लीन होते हुए

प्रबोधविशदीकृतः = ज्ञान प्राप्ति के द्वारा निर्मल होकर

परितुष्टधीः = चित्त से सन्तुष्ट होते हुए

अदृष्टचरम् अद्भुतम् = पहले कभी न देखे अद्भुत

भुजगभोगभागश्रयम् = शेषनाग के कुछ भाग की शय्या पर

तव रूपम् अन्तर्दृशा = आप के विग्रह को ज्ञानदृष्टि द्वारा

व्यचष्ट हि । = निश्चित रूप से देखा ।

भावार्थ—उस कमल से उत्पन्न ब्रह्मा ने तो सौ दिव्य वर्षों की तीव्र समाधि में तल्लीन होते हुए ज्ञान प्राप्ति के द्वारा निर्मल होकर चित्त से सन्तुष्ट होते हुए पहले कभी न देखे अद्भुत शेषनाग के कुछ भाग की शय्या पर लिये आपके विग्रह को ज्ञानदृष्टि द्वारा निश्चित रूप से देखा ।

Word-Explanation :

भोगः - The expanded hood of a serpent, A curve, A coil, Winding, The food offered to God, Ruling, Possession, Enjoyment, Wages of prostitutes, Banquet etc-etc. (here expended hood of a serpent). (As in भुजगभोगभागाश्रयम्)

भुजगः =Snake, A serpent. (As in भुजगभोगभागाश्रयम्) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

किरीटमकुटोल्लसत्कटकहारकेयूरयुङ्-
मणिस्फुरितमेखलं सुपरिवीतपीताम्बरम्

कलायकुसुमप्रभं गलतलोल्लसत्कौस्तुभम्
वपुस्तदयि भावये कमलजन्मने दर्शितम् ॥

पदविभागः—किरीटमकुटोल्लसत्, कटकहारकेयूरयुङ्, मणिस्फुरितमेखलम्, सुपरिवीतपीताम्बरम् कलायकुसुम-प्रभम्, गलतलोल्लसत्कौस्तुभम्, वपुः, तत्, अयि, भावये, कमलजन्मने, दर्शितम् ॥

अन्वयः—किरीटमकुटोल्लसत् कटकहारकेयूरयुङ्मणिस्फुरितमेखलम् सुपरिवीतपीताम्बरं कलायकुसुमप्रभं गलतलोल्लसत्कौस्तुभं अयि कमलजन्मने दर्शितम् तत् ते वपुः (अहं) भावये ।

अन्वयार्थः

किरीटमकुटोल्लसत् = किरीट तथा मुकुट से प्रकाशित

कटकहारकेयूरयुक् = कङ्कण, हार, केयूर आदि से अलंकृत

मणिस्फुरितमेखलम् = रत्न से दीप्त मेखला (कमरबन्ध)

सुपरिवीतपीताम्बरम् = सुचारु रूप से धारण किये पीताम्बर

कलायकुसुमप्रभम् = कलायपुष्प के समान शोभित

गलतलोल्लसत्कौस्तुभम् = गले में प्रकाशित कौस्तुभ मणि (से युक्त स्वरूप)

अयि, कमलजन्मने दर्शितम् = हे भगवन् कमल से उत्पन्न ब्रह्मा को दिखाये, (दर्शाये)

तत् ते वपुः = उस आपके विग्रह का

(अहम्) भावये । = (मैं) ध्यान करता हूँ ।

भावार्थ—किरीट तथा मुकुट से प्रकाशित , कङ्कण, हार, केयूर (बाजूबन्ध) आदि से अलंकृत, रत्न से दीप्त मेखला (कमरबन्ध), सुचारु रूप से धारण किये पीताम्बर, कलायपुष्प के समान शोभित, गले में प्रकाशित कौस्तुभ मणि (से युक्त स्वरूप के) हे भगवन् ! उत्पन्न ब्रह्मा को दिखाये (दर्शाये) उस आपके विग्रह का (मैं) ध्यान करता हूँ ।

Word-Explanation :

केयूरः/केयूरम् =A bracelet worn on the upper arm (बाजूबन्ध)

मेखला =A belt, Girdle, Waistband (कमरबन्ध)

उल्लसित् =Shining, Brilliant, Splendid, Happy (here shining) (As in गलतलोल्लसत्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

"श्रुतिप्रकरदर्शितप्रचुरवैभव श्रीपते
हरे, जय जय प्रभो पदमुपैषि दिष्ट्या दृशोः ।
कुरुष्व धियमाशु मे भुवननिर्मितौ कर्मठा"-
मिति द्रुहिणवर्णितस्वगुणबंहिमा पाहि माम् ॥

पदविभागः—श्रुतिप्रकरदर्शितप्रचुरवैभव, श्रीपते, हरे, जय, जय, प्रभो, पदम्, उपैषि, दिष्ट्या, दृशोः, कुरुष्व, धियम्, आशु, मे, भुवननिर्मितौ, कर्मठाम्, इति, द्रुहिणवर्णितस्वगुणबंहिमा, पाहि, माम् ॥

अन्वयः—श्रुतिप्रकरदर्शितप्रचुरवैभव श्रीपते, हरे, जय जय । प्रभो, दिष्ट्या (मम) दृशोः पदम् उपैषि । आशु मे धियं भुवननिर्मितौ कर्मठां कुरुष्व । इति द्रुहिणवर्णितस्वगुणबंहिमा, मां पाहि ।

अन्वयार्थः

श्रुतिप्रकरदर्शितप्रचुरवैभव = समस्त वेदों में सम्पूर्ण रूप से व्यक्त, अत्यधिक मात्रा में वैभव स्वरूप ।

श्रीपते, हरे, जय जय । = हे लक्ष्मीपते, हे हरे ! आपकी जय जयकार हो ।

प्रभो, दिष्ट्या (मम) दृशोः = हे प्रभो भाग्यवश (मेरे) नयनों को

पदम् उपैषि = आप मिले । (दृष्टिगोचर हो गये)

आशु मे धियं भुवननिर्मितौ = तुरन्त मेरी बुद्धि को भुवननिर्माण में

कर्मठां कुरुष्व । = कर्मठ बना दें ।

इति द्रुहिणवर्णितस्वगुणबंहिमा = इस प्रकार ब्रह्मा द्वारा वर्णित अपने गुणों की महामहिमा को सुनने वाले

मां पाहि । = मेरी रक्षा करो ।

भावार्थ—समस्त वेदों में सम्पूर्ण रूप से व्यक्त, अत्यधिक मात्रा में वैभव स्वरूप हे लक्ष्मीपते ! हे हरे ! आपकी जय जयकार हो । हे प्रभो ! भाग्यवश (मेरे) नयनों को आप मिले (दृष्टिगोचर हो गये) ।तुरन्त मेरी बुद्धि को भुवननिर्माण में कर्मठ (सामर्थ्यशाली) बना दें । इस प्रकार ब्रह्मा द्वारा वर्णित अपने गुणों की महामहिमा को सुनने वाले मेरी रक्षा करो ।

Word-Explanation :

प्रकर =A heap, Multitude, Collection (As in श्रुतिप्रकरदर्शित...)

प्रचुर =Much, Ample (As in प्रचुरवैभव)

कर्मठ =Proficient in any work, Clever etc. (As in कर्मठां कुरुष्व)

द्रुहिणः/ द्रुहणः =Brahma/Siva (here Brahma) (As in द्रुहिणवर्णित...) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ८ ॥

"लभस्व भुवनत्रयीरचनदक्षताम् अक्षताम्
गृहाण मदनुग्रहं कुरु तपश्च भूयो विधे ।
भवत्वखिलसाधनी मयि च भक्तिरत्युत्कटे"-
त्युदीर्य गिरमादधा मुदितचेतसं वेधसम् ॥

पदविभागः—लभस्व, भुवनत्रयीरचनदक्षताम्, अक्षताम्, गृहाण, मदनुग्रहम्, कुरु, तपः, च, भूयः, विधे, भवत्, अखिलसाधनी, मयि, च, भक्तिः, अत्युत्कटा, इति, उदीर्य, गिरम्, आदधाः, मुदितचेतसम्, वेधसम् ॥

अन्वयः—विधे, अक्षतां भुवनत्रयीरचनदक्षतां लभस्व । (तदर्थं) मदनुग्रहं गृहाण । तपः च भूयः कुरु । अखिलसाधनी मयि भक्तिः च अत्युत्कटा भवेत्, इति गिरम् उदीर्य वेधसं मुदितचेतसम् आदधाः ।

अन्वयार्थः

विधे, अक्षताम् = हे ब्रह्मा ! क्षति के बिना

भुवनत्रयीरचनदक्षताम् = तीनों लोकों की सृष्टि की दक्षता को

लभस्व = प्राप्त करो ।

(तदर्थं) मदनुग्रहं गृहाण = (उसके लिए) मेरा आशीर्वाद स्वीकार करो ।

तपः च भूयः कुरु । = और फिर तपस्या भी करो ।

अखिलसाधनी मयि भक्तिः च = तथा मुझमें सर्वफलदायक (आपकी) भक्ति भी

अत्युत्कटा भवेत् = अत्यन्त दृढ हो ।

इति गिरम् उदीर्य वेधसम् = इस प्रकार कहकर ब्रह्मा को

मुदितचेतसम् आदधाः । = सन्तुष्ट मन वाला बना दिया ।

भावार्थ—हे ब्रह्मा ! क्षति के बिना तीनों लोकों की सृष्टि की दक्षता प्राप्त करो । (उसके लिए) मेरा आशीर्वाद स्वीकार करो । और फिर तपस्या भी करो तथा मुझमें सर्वफलदायक आपकी भक्ति भी अत्यन्त दृढ हो । इस प्रकार कहकर ब्रह्मा को सन्तुष्ट मन वाला बना दिया ।

Word-Explanation :

क्षति =Injury, Wound, Ruin, Loss, Disadvantage, etc.(As in अक्षताम्)

विधि =Brahma (विधिवधू = सरस्वती) (As in विधे)

अत्कट (अत्युत्कटा भवेत्) =Excellent, Best, Superior, Drawn up etc.

गिर्/गिरा =Speech, Speaking. (As in गिरम् उदीर्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

शतं कृततपास्ततः स खलु दिव्यसंवत्सरा-
नवाप्य च तपोबलं मतिबलं च पूर्वाधिकम् ।
उदीक्ष्य किल कम्पितं पयसि पङ्कजं वायुना
भवद्बलविजृम्भितः पवनपाथसी पीतवान् ॥

पदविभागः—शतम्, कृततपाः, ततः, सः, खलु, दिव्यसंवत्सरान्, अवाप्य, च, तपोबलम्, मतिबलम्, च, पूर्वाधिकम्, उदीक्ष्य, किल, कम्पितम्, पयसि, पङ्कजम्, वायुना, भवद्बलविजृम्भितः, पवनपाथसी, पीतवान् ।

अन्वयः—ततः सः खलु शतं दिव्यसंवत्सरान् कृततपाः, पूर्वाधिकं तपोबलं मतिबलं च अवाप्य च, पङ्कजं वायुना पयसि कम्पितं किल उदीक्ष्य, भवद्बलविजृम्भितः पवनपाथसी पीतवान् ।

अन्वयार्थः

ततः सः खलु = उसके बाद उस (ब्रह्मा) ने तो

शतं दिव्यसंवत्सरान् कृततपाः = सौ दिव्य वर्षों की तपस्या करते हुए

पूर्वाधिकं तपोबलं मतिबलं च = और पूर्व से अधिक तपोबल तथा मनोबल को

अवाप्य च = प्राप्त करके

पङ्कजं वायुना पयसि कम्पितं किल उदीक्ष्य = कमल को वायु से जल में हिलता हुआ देखकर

भवद्बलविजृम्भितः = आपकी शक्ति से प्रेरित होकर

पवनपाथसी पीतवान् = वायु तथा जल को पी लिया ।

भावार्थ—उसके बाद उसने (ब्रह्मा) तो सौ दिव्य वर्षों की तपस्या करते हुए और पूर्व से अधिक तपोबल तथा मनोबल को प्राप्त करके कमल को जल में वायु से हिलता हुआ देखकर, वायु तथा जल को पी लिया ।

Word-Explanation :

विजृम्भित =Expanded, Opened, Blown, Displayed, Appeared etc. - (here expanded) (As in भवद्बलविजृम्भितः)

पाथम् =Water, Air, Wind, Food, A conch etc. (Here Water) (As in पवनपाथसी पीतवान्) ।

॥ १० ॥

तवैव कृपया पुनः सरसिजेन तेनैव स
प्रकल्प्य भुवनत्रयीं प्रववृते प्रजानिर्मितौ ।
तथाविधकृपाभरो गुरुमरुत्पुराधीश्वर
त्वमाशु परिपाहि मां गुरुदयोक्षितैरीक्षितैः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—तव, एव, कृपया, पुनः, सरसिजेन, तेन, एव, सः, प्रकल्प्य, भुवनत्रयीम्, प्रववृते, प्रजानिर्मितौ, तथाविध-कृपाभरः, गुरुमरुत्पुराधीश्वर, त्वम्, आशु, परिपाहि, माम्, गुरुदयोक्षितैः, ईक्षितैः ॥

अन्वयः—पुनः सः तव एव कृपया, तेन सरसिजेन एव, भुवनत्रयीं प्रकल्प्य प्रजानिर्मितौ प्रववृते । गुरुमरुत्पुराधीश्वर, त्वं तथाविधकृपाभरः गुरुदयोक्षितैः ईक्षितै आशु मां परिपाहि ।

अन्वयार्थः

पुनः सः तव एव कृपया = पुनः वह (ब्रह्मा) आपकी ही कृपा से

तेन सरसिजेन एव = उस कमल से ही

भुवनत्रयीं प्रकल्प्य = तीनों लोकों को रचकर

प्रजानिर्मितौ प्रववृते । = सृष्टकार्य में प्रवृत्त है ।

गुरुमरुत्पुराधीश्वर, त्वम् = हे गुरुवायुपुराधीश ! आप

तथाविधकृपाभरः = उस तरह के कृपा निधि

गुरुदयोक्षितैः = अत्यन्त दया से परिपूर्ण

ईक्षितै = दृष्टियों से

आशु माम् परिपाहि । = शीघ्र मेरी रक्षा करें ।

भावार्थ—पुनः वह (ब्रह्मा) आपकी ही कृपा से, उस कमल से ही तीनों लोकों को रच कर सृष्टिकार्य में प्रवृत्त है । हे गुरुवायुपुराधीश ! आप उस तरह के कृपानिधि अत्यन्त दया से परिपूर्ण दृष्टियों से शीघ्र मेरी रक्षा करें ।

Word-Explanation :

प्रकल्पित =Made, Done, Formed. (As in प्रकल्प)

उक्ष् (उक्षति/उक्षित) =To sprinkle, Wet, Moisten, To emit, To send forth. (As in गुरुदयोक्षितैः) ।

[इति नवमदशकं समाप्तम्]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-१०

सृष्टिभेदवर्णनम्

[वसन्ततिलकछन्द]

॥ १ ॥

वैकुण्ठ वर्धितबलोऽथ भवत्प्रसादादंभोजयोनिरसृजत् किल जीवदेहान्।
स्थास्नूनि भूरुहमयाणि तथा तिरश्चां जातीर्मनुष्यनिवहानपि देवभेदान्॥

पदविभागः—वैकुण्ठ, वर्धितबलः, अथ, भवत्, प्रसादात्, अम्भोजयोनिः, असृजत्, किल, जीवदेहान्, स्थास्नूनि, भूरुहमयानि, तथा, तिरश्चाम्, जातीः, मनुष्यनिवहान्, अपि, देवभेदान्।।

अन्वयः—वैकुण्ठ भवत् प्रसादात् वर्धितबलः अम्भोजयोनिः अथ भूरुहमयाणि स्थास्नूनि तथा तिरश्चां जातीः, मनुष्यनिवहान्, देवभेदान् जीवदेहान् अपि असृजत् किल।

अन्वयार्थः

वैकुण्ठ, भवत् प्रसादात् = हे वैकुण्ठवासी ! आपकी कृपा से

वर्धितबलः अम्भोजयोनिः = शक्ति प्राप्त करके ब्रह्मा ने

अथ भूरुहमयाणि स्थास्नूनि = उसके बाद मिट्टी में उगते स्थावर,

तथा तिरश्चां जातीः = उसी प्रकार पक्षिमृगादि जातियाँ,

मनुष्यनिवहान्, देवभेदान् = मनुष्य वर्ग, देवगण

जीवदेहान् अपि = और देहधारी प्राणियों की भी

असृजत् किल। = सृष्टि की।

भावार्थ—हे वैकुण्ठवासी ! आपकी कृपा से शक्ति प्राप्त करके ब्रह्मा ने उसके बाद, मिट्टी में उगते स्थावर उसी प्रकार पक्षिमृगादि जातियाँ, मनुष्य वर्ग, देवगण तथा देवधारी प्राणियों की भी सृष्टि की।

Word-Explanation :

भूरुहः =A Tree (As in भूरुहमयाणि)

निवहः = =A collection, Multitude (As in मनुष्यनिवहान्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तिर्यच्, तिरस्, तिरश्चीन् = =Crooked, Curved, An animal (going horizontally as distinguished from man who walks erect), a lower irrational animal. (As in तिरश्चां जातीः)

स्थास्नु - Disposed to stand, Firm, Imovable, Permanent, Eternal, lasting, durable etc. (here disposed to stand/immovable) (As in स्थास्नूनि)।

॥ २ ॥

मिथ्याग्रहास्मिमतिरागविकोपभीतिरज्ञानवृत्तिमिति पञ्चविधां ससृष्ट्वा।
उद्दामतामसपदार्थविधानदूनस्तेने त्वदीयचरणस्मरणं विशुद्ध्यै ॥

पदविभागः—मिथ्याग्रहास्मिमतिरागविकोपभीतिः, अज्ञानवृत्तिम्, इति, पञ्चविधाम् ससृष्ट्वा, उद्दामतामसपदार्थ-विधानदूनः, तेने, त्वदीयचरणस्मरणम्, विशुद्धैः।

अन्वयः—सः मिथ्याग्रहस्मिमतिरागविकोपभीतिः इति पञ्चविधाम् अज्ञानवृत्तिं सृष्ट्वा, उद्दामतामसपदार्थविधान-दूनः विशुद्धै त्वदीयचरणस्मरणं तेने।

अन्वयार्थः

सः मिथ्याग्रहास्मिमतिरागविकोपभीतिः = उस (ब्रह्मा ने) मिथ्या आग्रह, अहं बुद्धि (अहंकार), राग, कोप, भय

इति पञ्चविधाम् अज्ञानवृत्तिं सृष्ट्वा = इस प्रकार के पाँच प्रकार की अज्ञान वृत्तियों की सृष्टि करके

उद्दामतामसपदार्थविधानदूनः = तामस प्रधान पदार्थों की सृष्टि से दुखी होकर

विशुद्धै = शुद्धि के लिए

त्वदीयचरणस्मरणं तेने। = आप के चरण कमलों का स्मरण किया।

भावार्थ—उस (ब्रह्मा ने) मिथ्या आग्रह, अहं बुद्धि (अहंकार), राग, कोप, भय, इस प्रकार के पाँच प्रकार की अज्ञान वृत्तियों की सृष्टि करके, तामस प्रधान पदार्थों की सृष्टि से दुखी होकर शुद्धि के लिए आप के चरण-कमलों का स्मरण किया।

Word-Explanation :

अस्मिमति = मेरापन (As in मिथ्याग्रहास्मिमतिराग....)

उद्दाम =Unbound, Unrestrained, unchecked, Large, Great etc. (As in उद्दामतामसपदार्थ...)

दून =Pained, Afflicted. (As in विशुद्धदून)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

तावत् ससर्ज मनसा सनकं सनन्दं भूयः सनातनमुनिं च सनत्कुमारम् ।
ते सृष्टिकर्मणि तु तेन नियुज्यमानास्त्वत्पादभक्तिरसिका जगृहुर्न वाणीम् ॥

पदविभागः—तावत्, ससर्ज, मनसा, सनकम्, सनन्दम्, भूयः, सनातनमुनिम्, च, सनत्कुमारम्, ते, सृष्टिकर्मणि, तु, तेन, नियुज्यमानाः, त्वत्, पादभक्तिरसिकाः जगृहुः, न, वाणीम् ॥

अन्वयः—तावत् भूयः मनसा सनकं, सनन्दं, सनातनमुनिं, सनत्कुमारं च ससर्ज । त्वत्पादभक्तिरसिकाः ते तु तेन सृष्टिकर्मणि नियुज्यमानाः (अपि) वाणीं न जगृहुः ।

अन्वयार्थः

तावत् भूयः मनसा = तव फिर मन के द्वारा

सनकं, सनन्दं, सनातनमुनिं सनत्कुमारं च ससर्ज । = सनक, सनन्दन, सनातन और सनत्कुमार आदि की सृष्टि की ।

त्वत्पादभक्तिरसिकाः ते तु = आपके चरणों की भक्ति में लीन वे (मुनि) तो

तेन सृष्टिकर्मणि नियुज्यमानाः (अपि) = उनके द्वारा (ब्रह्मा जी के द्वारा) सृष्टि कार्यों में नियुक्त किये जाने पर भी

वाणीं न जगृहुः । = (ब्रह्मा की) वाणी को अस्वीकार कर गये ।

भावार्थ—तब फिर मन के द्वारा सनक, सनन्दन, सनातन, सनत्कुमार आदि की सृष्टि की । आप के चरणों की भक्ति में लीन उन मुनियों ने तो उस ब्रह्मा जी के द्वारा सृष्टिकार्यों में नियुक्त किये जाने पर भी (ब्रह्मा की) वाणी को स्वीकार नहीं किया ।

॥ ४ ॥

तावत्प्रकोपमुदितं प्रतिरुन्धतोऽस्य भ्रूमध्यतोऽजनि मृडो भवदेकदेशः ।
नामानि मे कुरु पदानि च हा विरिञ्चेत्यादौ रुरोद किल तेन स रुद्रनामा ॥

पदविभागः—तावत्, प्रकोपम्, उदितम्, प्रतिरुन्धतः, अस्य, भ्रूमध्यतः, अजनि, मृडः, भवदेकदेशः, नामानि, मे, कुरु, पदानि, च, हा, विरिञ्च, इति, आदौ, रुरोद, किल, तेन, सः, रुद्रनामा ॥

अन्वयः—तावत् उदितं प्रकोपं परिरुन्धतः भवदेकदेशः मृडः अजनि । "हा विरिञ्च मे नामानि पदानि च कुरु" इति सः आदौ रुरोद किल । तेन सः रुद्रनामा ।

अन्वयार्थः

तावत् उदितम् प्रकोपं प्रतिरुन्धतः अस्य (ब्रह्मणः) = तब उठते हुए क्रोध को रोकते हुए इस (ब्रह्मा) के

भ्रूमध्यतः भवदेकदेशः = भ्रूमध्य से आपके ही समान

मृडः अजनि = मृड (शिव) का जन्म हुआ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"हा विरिञ्च मे नामानि पदानि च कुरु" = "हे सृष्टिकर्ता ! मुझे नाम तथा पद प्रदान करो"

इति आदौ सः = इस प्रकार सर्वप्रथम वह

रुरोद किल। = रोया था।

तेन सः रुद्रनामा। = इससे वह रुद्र नाम को प्राप्त हुआ।

भावार्थ—तब उठते हुए क्रोध को रोकते हुए इस (ब्रह्मा) के भ्रूमध्य से आपके सदृश मृड (शिव) का जन्म हुआ। "हे सृष्टिकर्ता ! मुझे नाम तथा पद प्रदान करो"। इस प्रकार सर्वप्रथम वह रोया था। इससे वह रुद्र नाम को प्राप्त हुआ।

Word-Explanation :

भ्रू =Brow, Eyebrow (As in भ्रूमध्यतः)

रुध् =To obstruct, To stop, Arrest, Check, Oppose, Hinder etc. (As in प्रतिरुन्धतः)

विरिंचिः =Brahma (As in हा विरिञ्च)

॥ ५ ॥

एकादशाह्वयतया च विभिन्नरूपम् रुद्रं विधाय दयिता वनिताश्च दत्वा।
तावन्त्यदत्त च पदानि भवत्प्रणुन्नः प्राह प्रजाविरचनाय च सादरं तम्॥

पदविभागः—एकादशाह्वयतया, च, विभिन्नरूपम, रुद्रम्, विधाय, दयिताः, वनिताः, च, दत्वा, तावन्ति, अदत्त, च, पदानि, भवत्प्रणुन्नः, प्राह, प्रजाविरचनाय, च, सादरम्, तम्।

अन्वयः—भवत्प्रणुन्नः रुद्रम् एकादशाह्वयतया विभिन्नरूपं च विधाय, तावन्ति पदानि च अदत्त, दयिताः वनिताः च दत्वा, सादरं तं प्रजाविरचनाय प्राह च।

अन्वयार्थः

भवत्प्रणुन्नः रुद्रम् = आपकी प्रेरणा से रुद्र को

एकादशाह्वयतया = ग्यारह प्रकार के नाम और तदनुसार

विभिन्नरूपं च विधाय = विभिन्न रूप भी देकर,

तावन्ति पदानि च अदत्त, = उस के समान पद भी प्रदान किये।

दयिताः वनिताः च दत्वा, = पत्नियों के रूप में वनिताओं को भी देकर

सादरं तं प्रजाविरचनाय च = और आदर के साथ उस को प्रजा-सृष्टि करने के लिए

प्राह = कहा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—आपकी प्रेरणा से रुद्र को ग्यारह प्रकार के नाम और तदनुसार विभिन्न रूप भी देकर, उस के समान पद भी प्रदान किये। पत्नियों के रूप में वनिताओं को भी देकर और आदर के साथ उस को प्रजा-सृष्टि करने के लिए कहा।

Word-Explanation :

दयित =Beloved, Desired, Liked

दयितः =Husband

दयिता =Wife (As in दयिताः वनिताः)

आह्वयनम्/आह्वयः =A name, Appellation, A law suit arising from a dispute about games with animals such as cock fight etc. (Here a name, appellation). (As in आह्वयतया)।

॥ ६ ॥

रुद्राभिसृष्टभयदाकृतिरुद्रसङ्घसम्पूर्यमाणभुवनत्रयभीतचेताः।
मा मा प्रजाः सृज तपश्चर मङ्गलायेत्याचष्ट तं कमलभूर्भवदीरितात्मा॥

पदविभागः—रुद्राभिसृष्ट भयदाकृतिरुद्रसङ्घसम्पूर्यमाणभुवनत्रयभीतचेताः, मा, मा, प्रजाः, सृजः, तपः, चर, मङ्गलाय, इति, आचष्ट, कमलभूः, भवदीरितात्मा।

अन्वयः—रुद्राभिसृष्टभयदाकृतिरुद्रसङ्घसम्पूर्यमाणभुवनत्रयभीतचेताः कमल भूः भवदीरितात्मा "(त्वं) प्रजाः मा मा सृज। मङ्गलाय तपः चर।" इति तम् आचष्ट।

अन्वयार्थः

रुद्राभिसृष्टभयदाकृतिरुद्रसङ्घसम्पूर्यमाणभुवनत्रयभीतचेताः = रुद्र द्वारा उत्पन्न भयंकर रूप के रुद्रगणों से भरे तीनों लोकों को देखकर भयभीत

कमलभूः = कमल से उत्पन्न ब्रह्मा ने

भवदीरितात्मा = आप से प्रेरित होकर।

"(त्वं) प्रजाः मा मा सृज। मङ्गलाय तपः चर।" = "(तुम) प्रजा की सृष्टि मत करो। (लोक) कल्याण के लिए तपस्या करो।"

इति तम् आचष्ट = इस प्रकार उस (रुद्र) को आदेश दिया।

भावार्थ—रुद्र द्वारा उत्पन्न भयंकर रूप के रुद्रगणों से व्याप्त तीनों लोकों को देखकर भयभीत कमल से उत्पन्न ब्रह्मा ने, आप से प्रेरित होकर "(तुम) प्रजा की सृष्टि मत करो। (लोक) कल्याण के लिए तपस्या करो"। इस प्रकार उस (रुद्र) को आदेश दिया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

ईर् =To go, To propel, To set in motion, Shake, To incite, Instigate etc. (As in भवदीरितात्मा)

सृज् =To create, to produce, To procreate, Beget etc. (As in मा मा सृज)

॥ ७ ॥

तस्याथ सर्गरसिकस्य मरीचिरत्रिस्तत्राङ्गिराः क्रतुमुनिः पुलहः पुलस्त्यः ।
अङ्गादजायत भृगुश्च वसिष्ठदक्षौ श्रीनारदश्च भगवन् भवदङ्घ्रिदासः ॥

पदविभागः—तस्य, अथ, सर्गरसिकस्य, मरीचिः, अत्रिः, तत्र, अङ्गिराः, क्रतुमुनिः, पुलहः, पुलस्त्यः, अङ्गात्, अजायत, भृगुः, च, वसिष्ठदक्षौ, च, श्रीनारदः, च, भगवन्, भवदङ्घ्रिदासः ॥

अन्वयः—अथ तत्र सर्गरसिकस्य तस्य अङ्गात् मरीचिः, अत्रिः, अङ्गिराः, क्रतुमुनिः, पुलहः, पुलस्त्यः, भृगुः, च, अजायत । वसिष्ठदक्षौ च (अजायेताम्) । भगवन् भवदङ्घ्रिदासः श्रीनारदः च (अजायत) ।

अन्वयार्थः

अथ तत्र सर्गरसिकस्य = उस के बाद वहाँ सृष्टि में आसक्त

तस्य अङ्गात् = उस (ब्रह्मा) के अंगों (शरीर) से

मरीचिः, अत्रिः, अङ्गिराः क्रतुमुनिः, पुलहः, पुलस्त्यः भृगुः च अजायत्। = मरीचि, अत्रि, अङ्गिरा, क्रतुमुनि, पुलह, पुलस्त्य, और भृगु (ऋषियों) का जन्म हुआ ।

वसिष्ठदक्षौ च (अजायेताम्) = वसिष्ठ और दक्ष

भगवन् भवदङ्घ्रिदासः = तथा हे भगवन् ! आपके चरणों के दास

श्रीनारदः च (अजायत) = श्रीनारद का भी जन्म हुआ ।

भावार्थ—उसके बाद वहाँ सृष्टि में आसक्त उस (ब्रह्मा) के शरीर के भागों से मरीचि, अत्रि, अङ्गिरा, क्रतुमुनि, पुलह, पुलस्त्य तथा भृगु (ऋषियों) का जन्म हुआ । हे भगवन् ! वसिष्ठ, दक्ष और आप के चरणों के दास श्रीनारद का भी जन्म हुआ ।

Word-Explanation :

अङ्घ्रिः =A foot, The root of a tree, A quarter of a stanza (Here a foot) (As in भवदङ्घ्रिदासः)

अङ्घ्रियुगम् =Feet.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ८ ॥

धर्मादिकानभिसृजन्नथ कर्दमं च वाणीं विधाय विधिरङ्गजसंकुलोऽभूत् ।
त्वद्बोधितैः सनकदक्षमुखैस्तनूजैरुद्बोधितश्च विरराम तमो विमुञ्चन् ।।

पदविभागः—धर्मादिकान्, अभिसृजन्, अथ, कर्दमम्, च, वाणीम्, विधाय, विधिः, अङ्गजसङ्कुलः, अभूत्, त्वत्, बोधितैः, सनकदक्षमुखैः, तनूजैः, उद्बोधितः, च, विरराम, तमः, विमुञ्चन् ।

अन्वयः—अथ धर्मादिकान् कर्दमं च अभिसृजन्, वाणीं विधाय विधिः अङ्गजसङ्कुलः अभूत् । त्वत् बोधितैः सनकदक्षमुखैः तनूजैः उद्बोधितः तमः विमुञ्चन् विरराम च ।

अन्वयार्थः

अथ धर्मादिकान् कर्दमं च अभिसृजन् = तदनन्तर धर्म देवता आदि की सृष्टि करते हुए

वाणीं विधाय विधिः = वाणी (सरस्वती) की सृष्टि करके ब्रह्मा

अङ्गजसङ्कुलः अभूत् = अङ्गज (कामदेव) से पीड़ित हो गया ।

त्वत् बोधितै = आप से प्रेरित होकर

सनकदक्षमुखैः तनूजैः = सनक, दक्ष आदि पुत्रों द्वारा

उद्बोधितः तमः विमुञ्चन् = समझाने पर अज्ञान को छोड़ते हुए

विरराम च = पीछे हट गया ।

भावार्थ—तदनन्तर धर्म देवता आदि की सृष्टि करते हुए वाणी (सरस्वती) की सृष्टि करके ब्रह्मा अङ्गज (कामदेव) से पीड़ित हो गया । आप से प्रेरित होकर सनक, दक्ष आदि पुत्रों द्वारा समझाने पर अज्ञान को छोड़ते हुए (ब्रह्मा) पीछे हट गया ।

Word-Explanation :

सङ्कुलः =Filled with, Full of, Confused etc. (As in अङ्गजसङ्कुलः) =

विरामः =Cessation, Termination, Discontinuance (As in विरराम च)

विधानम् = Making, Doing, Arranging etc. (As in वाणीं विधाय)

॥ ९ ॥

वेदान् पुराणनिवहानपि सर्वविद्याः कुर्वन् निजाननगणाच्चतुराननोऽसौ ।
पुत्रेषु तेषु विनिधाय स सर्गवृद्धिमप्राप्नुवंस्तव पदाम्बुजमाश्रितोऽभूत् ।।

पदविभागः—वेदान्, पुराणनिवहान्, अपि, सर्वविद्याः, कुर्वन्, निजाननगणात्, चतुराननः, असौ, पुत्रेषु, तेषु, विनिधाय, सः, सर्गवृद्धिम्, अप्राप्नुवन्, तव, पदाम्बुजम्, आश्रितः, अभूत् ।।

अन्वयः—सः असौ चतुराननः निजाननगणात्, वेदान्, पुराणनिवहान्, सर्वविद्याः अपि कुर्वन्, तेषु पुत्रेषु विनिधाय सर्गवृद्धिम् अप्राप्नुवन् तव पदाम्बुजम् आश्रितः अभूत् ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

असौ सः चतुराननः = इस प्रकार का वह ब्रह्मा

निजाननगणात् = अपने मुखों से

वेदान् पुराणनिवहान्, सर्वविद्याः अपि कुर्वन् = वेदों और समस्त पुराणों सभी विद्याओं का भी निर्माण करते हुए

तेषु पुत्रेषु विनिधाय = उनको पुत्रों में बाँट कर

सर्गवृद्धिम् अप्राप्नुवन् = सृष्टि कार्य की वृद्धि न होने से

तव पदाम्बुजम् आश्रितः अभूत्। = आपके चरणकमलों का आश्रित हो गया।

भावार्थ—इस प्रकार का वह ब्रह्मा अपने मुखों (चारों मुखों) से वेदों, समस्त पुराणों और सभी विद्याओं का भी निर्माण करते हुए उनको पुत्रों में बाँट कर सृष्टिकार्य की वृद्धि न होने से आप के चरणकमलों का आश्रित हो गया।

Word-Explanation :

गणः =A flock, A group (As in निजाननगणात्)

निधानम् =Putting down, A place where anything is kept, Keeping, Preserving etc. (As in पुत्रेषु विनिधाय)

॥ १० ॥

जानन्नुपायमथ देहमजो विभज्य स्त्रीपुंसभावमभजन्मनुतद्वधूभ्याम्।
ताभ्यां च मानुषकुलानि विवर्धयंस्त्वं गोविन्द, मारुतपुरेश, निरुन्धि रोगान्॥

पदविभागः—जानान्, उपायम्, अथ, देहम्, अजः, विभज्य, स्त्रीपुंसभावम्, अभजत्, मनुः, तत्, वधूभ्याम्, ताभ्याम्, च, मानुषकुलानि, विवर्धयन्, त्वम्, गोविन्द, मारुतपुरेश, निरुन्धि, रोगान्।

अन्वयः—अथ अजः उपायं जानन् देहं विभज्य मनुः तत् वधूभ्याम् स्त्रीपुंसभावम् अभजत्। मारुतपुरेश, गोविन्द ताभ्यां च मानुषकुलानि विवर्धयन् त्वम् (मे) रोगान् निरुन्धि।

अन्वयार्थः

अथ अजः उपायं जानन् = उस के बाद ब्रह्मा ने उपाय जानते हुए

देहं विभज्य = शरीर को विभाजित करके

मनुः तत् वधूभ्याम् = मनु तथा उसकी बधू के द्वारा

स्त्रीपुंसभावम् अभजत्। = स्त्री तथा पुरुष के स्वरूप को बनाया

मारुतपुरेश, गोविन्द = हे गुरुवायुपुराधीश ! हे गोविन्द !

ताभ्यां च मानुषकुलानि = उन दोनों से मनुष्य जाति की

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवर्धयन् त्वम् = वृद्धि कराते हुए आप

(मे) रोगान् निरुन्धि। = (मेरे) रोगों का निराकरण करो।

भावार्थ—उसके बाद ब्रह्मा ने सृष्टि का उपाय जानते हुए शरीर को विभाजित करके मनु तथा उसकी वधू के द्वारा स्त्री तथा पुरुष के स्वरूप को बनाया। हे गुरुवायुपुराधीश ! हे गोविन्द ! उन दोनों से मनुष्य जाति की वृद्धि कराते हुए आप (मेरे) रोगों का निराकरण करो।

Word-Explanation :

निरुन्धि रोगान् = रोगों का निवारण करो। रोगों को रोक दो

[इति दशमदशकं समाप्तम्]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम् - ११

सनकादीनां वैकुण्ठप्रवेशवर्णनम्

उपजाति छन्दः

॥ १ ॥

क्रमेण सर्गे परिवर्धमाने कदापि दिव्याः सनकादयस्ते ।
भवद्विलोकाय विकुण्ठलोकं प्रपेदिरे मारुतमन्दिरेश ॥

पदविभागः—क्रमेण, सर्गे, परिवर्धमाने, कदापि, दिव्याः, सनकादयः, ते, भवद्विलोकाय, विकुण्ठलोकम्, प्रपेदिरे, मारुतमन्दिरेश ।

अन्वयः—सर्गे क्रमेण परिवर्धमाने, कदापि ते दिव्याः सनकादयः मारुतपुरेश, भवद्विलोकाय विकुण्ठलोकं प्रपेदिरे ।

अन्वयार्थः

सर्गे क्रमेण परिवर्धमाने, = सृष्टि कार्य में क्रम से बढ़ते रहने पर

कदापि ते दिव्याः सनकादयः = कभी वे दिव्य सनकादि मुनिगण

मारुतपुरेश भवद्विलोकाय = हे गुरुवायुपुराधीश ! आपके दर्शन के लिए

विकुण्ठलोक प्रपेदिरे । = वैकुण्ठलोक में पहुँचे ।

भावार्थः—सृष्टि कार्य में क्रम से बढ़ते रहने पर, कभी वे दिव्य सनकादि मुनिगण (सनक, सनन्दन, सनातन तथा सनत्कुमार) हे गुरुवायुपुराधीश ! आप के दर्शन के लिए वैकुण्ठलोक में पहुँचे ।

Word-Explanation :

दिव्य - Divine, Heavenly, Celestial, Brilliant, Splendid, Charming, Supernatural, Barley, A Philosopher, An oath, Cloves, A kind of sandal etc. (Here Divine) (As in दिव्याः ते सनकादयः)

॥ २ ॥

मनोज्ञनैश्रेयसकाननाद्यैरनेकवापीमणिमन्दिरैश्च ।
अनोपमं तं भवतो निकेतं मुनीश्वराः प्रापुरतीतकक्ष्याः ॥

पदविभागः—मनोज्ञनैश्रेयसकाननाद्यैः, अनेकवापीमणिमन्दिरैः, च, अनोपमम्, तम्, भवतः, निकेतनम्, मुनीश्वराः, प्रापुः, अतीतकक्ष्याः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—मुनीश्वराः अतीतकक्ष्याः मनोज्ञनैश्रेयसकाननद्यैः अनेकवापीमणिमन्दिरैः च अनोपमं भवतः तं निकेतं प्रापुः ।

अन्वयार्थः

मुनीश्वराः अतीतकक्ष्याः = (वे) मुनियों में श्रेष्ठ (अनेक) कक्षों को पार करके

मनोज्ञनैश्रेयसकाननाद्यैः = मन को लुभाने वाले नैश्रेयस नामक उद्यान आदि से,

अनेकवापीमणिमन्दिरैः च = अनेक झीलों रथा रत्न से अलंकृत भवनों से, (होते हुए)

अनोपमं भवतः तं निकेतम् = उपमारहित आपके उस निवास स्थान को (धाम को)

प्रापुः = प्राप्त हुए ।

भावार्थः—(वे) मुनियों में श्रेष्ठ (अनेक) कक्षों को पार करके, मन को लुभाने वाले "नैश्रेयस" नामक उद्यान आदि से, अनेक झीलों तथा रत्न से अलंकृत भवनों से (होते हुए) उपमा रहित आपके उस धाम को प्राप्त हुए ।

Word-Explanation :

अतीत - Gone beyond, Crossed, Past, Going beyond, Gone by, Innumerable, Dead, Exceedingly etc. (Here crossed) (As in अतीतकक्ष्याः)

निकेतः - A house, Mansion, Abode. (As in तं निकेतम्)

काननम् - A forest, A grove. (As in कानयाद्यैः)

॥ ३ ॥

भवद्दिदृक्षून् भवनं विविक्षून् द्वास्थौ जयस्तान् विजयोऽप्यरुन्धाम् ।
तेषां च चित्ते पदमाप कोपः सर्वं भवत्प्रेरणयैव भूमन् ॥

पदविभागः—भवद्दिदृक्षून्, भवनम्, विविक्षून्, द्वास्थौ, जयः, तान्, विजयः, अपि, अरुन्धाम्, तेषाम्, च, चित्ते, पदम्, आप, कोपः, सर्वम्, भवत्, प्रेरणया, एव, भूमन् ॥

अन्वयः—भवद्दिदृक्षून् भवनं विविक्षून् तान् द्वास्थौ जयः विजयः अपि अरुन्धाम् । तेषां (मुनीनां) चित्ते कोपः पदम् आप च । भूमन्, सर्वं भवत् प्रेरणया एव ।

अन्वयार्थः

भवद्दिदृक्षून् भवनं विविक्षून् तान् = आप के दर्शन के लिए (आप के) भवन में प्रवेश करते उन को

द्वास्थौ जयः विजयः अपि अरुन्धाम् = द्वार पर स्थित दो द्वारपालकों जय तथा विजय ने रोका ।

तेषां (मुनीनां) चित्ते च कोपः पदम् आप = और उन (मुनियों) के मन में क्रोध उत्पन्न हुआ ।

भूमन्, सर्वं भवत् प्रेरणया एव = हे भगवन्, सब आपकी प्रेरणा से ही (हुआ)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थः—आपके दर्शन के लिए (आप के) भवन में प्रवेश करते उन को द्वार पर स्थित दो द्वारपालकों जय तथा विजय ने रोका। और उन (मुनियों) के मन में क्रोध उत्पन्न हुआ। हे भगवन्, यह सब आपकी प्रेरणा से ही हुआ।

Word-Explanation :

द्वास्थः - Gatekeeper, द्वारपालक

॥ ४ ॥

"वैकुण्ठलोकानुचितप्रचेष्टौ कष्टौ युवां दैत्यगतिं भजेतम्।"
इति प्रशप्तौ भवदाश्रयौ तौ हरिस्मृतिर्नोऽस्त्विति नेमतुस्तान्॥

पदविभागः—वैकुण्ठलोकः, अनुचितप्रचेष्टौ, कष्टौ, युवाम्, दैत्यगतिम्, भजेतम्, इति, प्रशप्तौ, भवदाश्रयौ, तौ, हरिस्मृतिः, नः, अस्तु, इति, नेमतुः, तान्।

अन्वयः—वैकुण्ठलोकानुचितप्रचेष्टौ कष्टौ युवां दैत्यगतिं भजेतम्। इति प्रशप्तौ भवदाश्रयौ तौ नः हरिस्मृतिः अस्तु इति तान् नेमतुः।

अन्वयार्थः

वैकुण्ठलोकानुचितप्रचेष्टौ = वैकुण्ठ लोक के अनुसार उचित कार्य न करने वाले

कष्टौ युवां दैत्यगतिं भजेतम् = हे दुष्टो ! तुम दोनों दैत्य बन जाओ।

इति प्रशप्तौ भवदाश्रयौ तौ = इस प्रकार का शाप प्राप्त करने वाले आप के आश्रित उन दोनों ने

नः = हम को

हरिस्मृतिः अस्तु = हरि की स्मृति रहे

इति तान् नेमतुः = इस प्रकार कहकर उनको नमस्कार किया।

भावार्थः—वैकुण्ठ लोक के अनुसार उचित आचरण न करने वाले हे दुष्टो ! तुम दोनों दैत्य बन जाओ। इस प्रकार का शाप प्राप्त करने वाले आप के आश्रित उन दोनों ने हम को हरि की स्मृति रहे इस प्रकार कहकर उनको नमस्कार किया।

॥ ५ ॥

तदेतदाज्ञाय भवानवाप्तः सहैव लक्ष्म्या बहिरम्बुजाक्ष।
खगेश्वरांसार्पितचारुबाहुरानन्दयंस्तानभिराममूर्त्या॥

पदविभागः—तत्, एतत्, आज्ञाय, भवान्, अवाप्तः, सह, एव, लक्ष्म्या, बहिः, अम्बुजाक्ष, खगेश्वरांसार्पितचारुबाहुः, आनन्दयन्, तान्, अभिराममूर्त्या।

अन्वयः—अम्बुजाक्ष, भवान् तत् एतत् अज्ञाय, लक्ष्म्या सह एव खगेश्वरांसार्पितचारुबाहुः अभिराममूर्त्या तान् (मुनीन्) आनन्दयन् बहिः अवाप्तः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अम्बुजाक्ष, भवान् = हे कमलनयन ! आप

तत् एतत् आज्ञाय = उस प्रकार का यह (जय, विजय के कार्य को) जानकर

लक्ष्म्या सह एव = लक्ष्मी के साथ

खगेश्वरांसार्पितचारुबाहुः = गरुड़ के ऊपर सुन्दर हाथ रखकर

अभिराममूर्त्या = देखने में सुन्दर स्वरूप सहित

तान् (मुनीन्) आनन्दयन् = उन (मुनियों) को आनन्दित करते हुए

बहिः अवाप्तः = बाहर आये ।

भावार्थः—हे कमलनयन ! आप उस प्रकार का यह (जय, विजय के कार्य को) जानकर लक्ष्मी के साथ गरुड़ के ऊपर सुन्दर हाथ रखकर देखने में सुन्दर स्वरूप सहित उन (मुनियों) को आनन्दित करते हुए बाहर आये ।

Word-Explanation :

खगः = A Bird

खगेश्वरः = गरुड़ (King of Birds) (As in खगेश्वरांसार्पितचारुबाहुः)

अभिराम- Pleasing, Delightful, Lovely, Beautiful, Graceful, Charming. (As in अभिराममूर्त्या)

॥ ६ ॥

प्रसाद्य गीर्भिः स्तुवतो मुनीन्द्राननन्यनाथावथ पार्षदौ तौ ।
संरम्भयोगेन भवैस्त्रिभिर्मामुपेतमित्यात्तकृपं न्यगादीः ॥

पदविभागः—प्रसाद्य, गीर्भिः, स्तुवतः, मुनीन्द्रान्, अनन्यनाथौ, अथ, पार्षदौ, तौ, संरम्भयोगेन, भवैः त्रिभिः, माम्, उपेतम्, इति, आत्तकृपम्, न्यगादीः ॥

अन्वयः—स्तुवतः मुनीन्द्रान् प्रसाद्य, अथ अनन्यनाथौ तौ पार्षदौ "(युवां) संरम्भयोगेन त्रिभिः भवैः माम् उपेतम्" इति आत्तकृपं न्यगादीः ।

अन्वयार्थः

स्तुवतः मुनीन्द्रान् = स्तुति करते श्रेष्ठ मुनियों को

प्रसाद्य, अथ अनन्यनाथौ = सन्तुष्ट कराकर, तदनन्तर सर्वथा आश्रय रहित (अनाथ)

तौ पार्षदौ = उन दोनों द्वारपालकों को

(युवां) संरम्भयोगेन = रोष भरित स्मरण मार्ग द्वारा (Agitated, Arrogant, Pride)

त्रिभिः भवैः माम् उपेतम् = तीन जन्मों के बाद मुझे प्राप्त करो ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति आत्तकृपं न्यगादीः = इस प्रकार कृपापूर्ण होकर बोले ।

भावार्थः—स्तुति करते श्रेष्ठ मुनियों को सन्तुष्ट कराकर तदनन्तर सर्वथा आश्रय रहित (अनाथ) उन दोनों द्वारपालकों को "रोष भरे स्मरण मार्ग से, तीन जन्मों के बाद मुझे प्राप्त करो ।" इस प्रकार कृपापूर्ण होकर बोले ।

Word-Explanation :

संरम्भ - Beginning, Turbulance, Violence, Impetuosity, Agitation, Pride, Arrogance, Anger, Rage, Wrath etc. (Here : Agitated. Arrogant, Pride) (As in संरम्भयोगेन)

भवः -Being, State of being, Birth, Production, Wordly existence, Prosperity, Wellbeing, Excellence, Superiority etc. (Here : Birth) (As in त्रिभिः भवैः)

आत्त - Taken, Received, Accepted, Agreed to, Drawn out, extracted, Taken away, Assumed etc. (Here Assumed) (As in आत्तकृपम्)

॥ ७ ॥

त्वदीयभृत्यावथ काश्यपात्तौ सुरारिवीरावुदितौ दितौ द्वौ ।

सन्ध्यासमुत्पादनकष्टचेष्टौ यमौ च लोकस्य यमाविवान्यौ ॥

पदविभागः—त्वदीयभृत्यौ, अथ, काश्यपात्, तौ, सुरारिवीरौ, उदितौ, दितौ, द्वौ, सन्ध्यासमुत्पादनकष्टचेष्टौ, यमौ, च, लोकस्य, यमौ, इव, अन्यौ ।

अन्वयः—अथ तौ त्वदीयभृत्यौ, काश्यपात् दितौ सन्ध्यासमुत्पादनकष्टचेष्टौ यमौ च (तौ) द्वौ सुरारिवीरौ लोकस्य अन्यौ यमौ इव उदितौ ।

अन्वयार्थः

अथ तौ त्वदीयभृत्यौ = तदनन्तर वे आप के दोनों सेवक

काश्यपात् दितौ = काश्यप मुनि और (उनकी पत्नी) दिति द्वारा

सन्ध्यासमुत्पादनकष्टचेष्टौ = सन्ध्या के समय पैदा करने के कारण क्रूर

यमौ च (तौ) = वे जुड़वा भाई

द्वौ सुरारिवीरौ= देवताओं के दो शत्रु

लोकस्य अन्यौ यमौ इव उदितौ = लोक के अन्य यमराज के समान जन्मे ।

भावार्थः—तदनन्तर वे आपके दोनों सेवक काश्यप मुनि और (उनकी पत्नी) दिति द्वारा सन्ध्या के समय पैदा करने के कारण क्रूर, वे जुड़वा भाई देवताओं के दो शत्रु लोक के अन्य यमराज के समान जन्मे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

यमः - Restraning, Controlling, Control, Self-Control, A great moral or religious duty, The first of the eight angas of Astanga Yoga, God of Death, Twin. (Here God of Death & Twin) (As in यमै च लोकस्य यमाविवान्यौ)

॥ ८ ॥

हिरण्यपूर्वः कशिपुः किलैकः परो हिरण्याक्ष इति प्रतीतः ।
उभौ भवन्नाथमशेषलोकं रुषा न्यरुन्धां निजवासनान्धौ ॥

पदविभागः—हिरण्यपूर्वः, कशिपुः, किल, एकः, परः, हिरण्याक्ष, इति, प्रतीतः, उभौ, भवन्नाथम्, अशेषलोकम्, रुषा, न्यरुन्धाम्, निजवासनान्धौ ॥

अन्वयः—एकः हिरण्यपूर्वः कशिपुः किल, परः हिरण्याक्षः इति प्रतीतः । उभौ निजवासनान्धौ रुषा भवन्नाथम् अशेषलोकं न्यरुन्धाम् ॥

अन्वयार्थः

एकः हिरण्यपूर्वः कशिपुः किल, = एक कशिपु से आगे हिरण्य अर्थात् हिरण्यकशिपु तो

परः हिरण्याक्षः इति प्रतीतः = दूसरा हिरण्याक्ष इस प्रकार प्रसिद्ध हुआ ।

उभौ निजवासनान्धौ रुषा = उन दोनों ने अपनी वासनाओं से अन्धे होकर क्रोध से

भवन्नाथम् अशेषलोकम् = जिसके आप नाथ हैं उन समस्त लोकों (के विकास) को

न्यरुन्धाम् = रोक दिया ।

भावार्थः—एक कशिपु से आगे हिरण्य-अर्थात् हिरण्यकशिपु-तो दूसरा हिरण्याक्ष इस प्रकार प्रसिद्ध हुआ । उन दोनों ने अपनी वासनाओं से अन्धे होकर क्रोध से जिनके स्वामी आप हैं उन समस्त लोकों (के विकास) को रोक दिया अर्थात् दुःख पहुँचाया ।

Word-Explanation :

प्रतीत - Set forth, Started, Believed, acknowledged, Recognised, Called, well-known, renowned etc - (As in **हिरण्याक्षः इति प्रतीतः**)

रुष्, रुषा - Anger, wrath, rage. (As in निजवासनान्धौ रुषा) ।

॥ ९ ॥

तयोर्हिरण्याक्षमहासुरेन्द्रो रणायधावन्ननवाप्तवैरी ।
भवत्प्रियां क्ष्मां सलिलेनिमज्य चचार गर्वाद्विनदन् गदावान् ॥

पदविभागः—तयोः, हिरण्याक्षमहासुरेन्द्रः, रणाय, धावन्, अनवाप्तवैरी, भवत्प्रियाम्, क्ष्माम्, सलिले, निमज्य, चचार, गर्वात्, विनदन्, गदावान् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—तयोः हिरण्याक्षमहासुरेन्द्रः धावन् अनवाप्तवैरी, भवत् प्रियां क्ष्मां सलिले निमज्य गर्वात् विनदन् गदावान् चचार ।

अन्वयार्थः

तयोः हिरण्याक्षमहासुरेन्द्रः = उन दोनों में से असुर प्रमुख हिरण्याक्ष

धावन् अनवाप्तवैरी = दौड़ता हुआ, कोई भी शत्रु न मिलने पर

भवत् प्रियां क्ष्माम् = आपकी प्रिया भूमि को

सलिले निमज्य = जल में डुबोकर

गर्वात् विनदन् = गर्व से गर्जन करते हुए

गदावान् चचार = गदा को लेकर घूमता था

भावार्थः—उन दोनों में से असुर प्रमुख हिरण्याक्ष दौड़ता हुआ, कोई भी शत्रु न मिलने पर आपकी प्रिया भूमि को जल में डुबोकर गर्व से गर्जन करते हुए गदा को लेकर घूमता था ।

Word-Explanation :

क्ष्मा - Earth. (As in प्रियां क्ष्मां सलिले निमज्य)

नद्(नदति) - To Sound, resound, Thunder as a cloud. (As in विनदन्)

॥ १० ॥

ततो जलेशात् सदृशं भवन्तं निशम्य बभ्राम गवेषयंस्त्वाम् ।
भक्तैकदृश्यः स कृपानिधे त्वं निरुन्धिरोगान् मरुदालयेश ॥

पदविभागः—ततः, जलेशात्, सदृशम्, भवन्तम्, निशम्य, बभ्राम, गवेषयन्, त्वाम्, भक्तैकदृश्यः, सः, कृपानिधे, त्वम्, निरुन्धि, रोगान्, मरुदालयेश ।

अन्वयः—ततः जलेशात् भवन्तं सदृशं निशम्य, त्वां गवेषयन् बभ्राम । कृपानिधे, मरुदालयेश, भक्तैकदृश्यः सः त्वं (मे) रोगान् निरुन्धि ।

अन्वयार्थः

ततः जलेशात् = उसके बाद जल के अधिपति वरुण से

भवन्तं सदृशं निशम्य = आप के समान (स्वरूप को) सुनकर

त्वां गवेषयन् बभ्राम = आप को ढूंढता हुआ घूमता था

कृपानिधे, मरुदालयेश = हे कृपानिधे ! हे गुरुवायुपुराधीश !

भक्तैकदृश्यः सः त्वम् = केवल भक्तजनों को ही प्रत्यक्ष वह आप

(मे) रोगान् निरुन्धि = (मेरे) रोगों को दूर कर दें ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थः—उसके बाद जल के अधिपति वरुण से आप के समान (स्वरूप को) सुनकर आप को ढूंढता हुआ घूमता था। हे कृपानिधे ! हे गुरुवायुपुराधीश ! केवल भक्तजनों को ही प्रत्यक्ष वह आप (मेरे) रोगों को शान्त करें।

[इति एकादशदशकं समाप्तम्]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-१२

वराहावतारवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

स्वायम्भुवो मनुरथो जनसर्गशीलो दृष्ट्वा महीमसमये सलिले निमग्नाम् ।
स्रष्टारमाप शरणं भवदंघ्रिसेवातुष्टाशयं मुनिजनैः सह सत्यलोके ॥

पदविभागः—स्वायम्भुवः, मनुः, अथ, जनसर्गशीलः, दृष्ट्वा, महीम्, असमये, सलिले, निमग्नाम्, स्रष्टारम्, आप, शरणम्, भवदंघ्रिसेवातुष्टाशयम्, मुनिजनैः, सह, सत्यलोके ॥

अन्वयः—अथ जनसर्गशीलः स्वायम्भुवः मनुः, असमये सलिले निमग्नां महीम् दृष्ट्वा, मुनिजनैः सह सत्यलोके भवदंघ्रिसेवातुष्टाशयं स्रष्टारं शरणम् आप ।

अन्वयार्थः

अथ जनसर्गशीलः = तदनन्तर प्रजा के सृष्टिकर्ता

स्वायम्भुवः मनुः = स्वायम्भुव मनु ने

असमये सलिले निमग्नां महीम् दृष्ट्वा = असमय जल में डूबी हुई भूमि को देखकर

मुनिजनैः सह सत्यलोके = मुनिगणों के साथ सत्यलोक में

भवदंघ्रिसेवातुष्टाशयम् स्रष्टारम् = आप के चरणों की सेवा में सन्तुष्टचित्त ब्रह्मा की

शरणम् आप = शरण ली ।

भावार्थः—तदनन्तर प्रजा के सृष्टिकर्ता स्वायम्भुव मनु ने असमय जल में डूबी हुई भूमि को देखकर, मुनिगणों के साथ सत्यलोक में आप के चरणों की सेवा में सन्तुष्ट चित्त ब्रह्मा की शरण ली ।

Word-Explanation :

आशयः - A bed chamber, resting place, An abode, seat, retreat, receptacle, reservoir, The stomach, meaning, intention, purport, the seat of feelings, mind, heart, fate, fortune, a kind of pit to catch animals etc. (Here Mind/heart) (As in भवदंघ्रिसेवातुष्टाशयम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्गः - सृष्टि, Creation, Nature, Universe (Here creation) (As in जनसर्गशीलो)

॥ २ ॥

कष्टं प्रजाः सृजति मय्यवनिर्निमग्ना स्थानं सरोजभव कल्पय तत्प्रजानाम् ।
इत्येवमेष कथितो मनुना स्वयम्भूरम्भोरुहाक्ष तव पादयुगं व्यचिन्तीत् ॥

पदविभागः—कष्टम्, प्रजाः, सृजति, मयि, अवनि, निमग्ना, स्थानम्, सरोजभव, कल्पय, तत्, प्रजानाम्, इति, एवम्, एषः, कथितः, मनुना, स्वयम्भूः, अम्भोरुहाक्ष, तव, पादयुगम्, व्यचिन्तीत् ।

अन्वयः—अम्भोरुहाक्ष, एषः स्वयम्भूः (स्वायम्भुव) मनुना "सरोजभव, मयि प्रजाः सृजति अवनिः निमग्ना, कष्टं, तत् प्रजानां स्थानं कल्पय" । इति एवं कथितः तव पादयुगं व्यचिन्तीत् ।

अन्वयार्थः

अम्भोरुहाक्ष, एषः स्वयम्भूः = हे कमलनयन ! इस ब्रह्मा ने

(स्वायम्भुव) मनुना = (स्वायम्भुव) मनु के द्वारा

"सरोजभव, मयि प्रजाः सृजति अवनिः निमग्ना, कष्टं, तत् प्रजानां स्थानं कल्पय" = मेरे द्वारा प्रजा-सृष्टि करते हुए भूमि डूब गई, हाय ! उन प्रजाओं का स्थान निश्चित करें ।

इति एवं कथितः = इस प्रकार कहने पर

तव पादयुगम् व्यचिन्तीत् = आप के दोनों चरणों का ध्यान किया ।

भावार्थः—हे कमलनयन ! इस ब्रह्मा ने (स्वायम्भुव) मनु के द्वारा "मेरे द्वारा प्रजा-सृष्टि करते हुए भूमि डूब गई हाय ! उन प्रजाओं का स्थान निश्चित कीजिए ।" इस प्रकार कहने पर आप के दोनों चरणों का ध्यान किया ।

Word-Explanation :

स्वयम्भूः - Brahma, Vishnu, Siva (Here Brahma)

॥ ३ ॥

"हा हा विभो जलमहं न्यपिबं पुरस्तादद्यापि मज्जति मही किमहं करोमि ?" ।
इत्थं त्वदङ्घ्रियुगलं शरणं यतोऽस्य नासापुटात् समभवः शिशुकोलरूपी ।।

पदविभागः—हा, हा, विभो, जलम्, अहम्, न्यपिबम्, पुरस्तात्, अद्य, अपि, मज्जति, मही, किम्, अहम्, करोमि, इत्थम्, त्वदङ्घ्रियुगलम्, शरणम्, यतः अस्य, नासापुटात्, समभवः शिशुकोलरूपी ॥

अन्वयः—"हा, हा विभो अहं पुरस्तात् जलं न्यपिबम् । अद्य अपि मही मज्जति । अहं किं करोमि ?" इत्थं त्वदङ्घ्रियुगलं शरणं यतः अस्य (ब्रह्मणः) नासापुटात् शिशुकोलरूपी (त्वम्) समभवः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

हा, हा, विभो = हाय, आश्चर्य है कि हे विभो !

अहं पुरस्तात् जलं न्यपिबम् = मैंने पूर्व में जल पिया ।

अद्य अपि मही मज्जति = अब भी धरती डूब रही है ।

अहं किं करोमि ? = मैं क्या करूं ?

इत्थं त्वदङ्घ्रियुगलं शरणं यतः = इस प्रकार आप के दोनों चरणों की शरण में आये

अस्य (ब्रह्मणः) नासापुटात् = उस (ब्रह्मा) के नाक के द्वार से

शिशुकोलरूपी (त्वम्) समभवः = वराह शिशु के रूप में (आप) प्रकट हुए ।

भावार्थः—"हाय आश्चर्य है कि हे विभो ! मैंने पूर्व में जल पिया । अब भी धरती डूब रही है । मैं क्या करूँ ?" इस प्रकार आप के दोनों चरणों की शरण में आये उस (ब्रह्मा) के नाक के द्वार से वराह शिशु के रूप में (आप) प्रकट हुए ।

Word-Explanation :

कोलः - A hog, A Boar, A raft, A Boat, The Breast, The hip etc. (Here A Boar) (As in शिशुकोलरूपी)

पुटः/पुटम् - A fold, A hollow space, Cavity, Concavity, Any shallow vessel, The pod or capsule which envelope young shoots etc. (Here cavity) (As in नासापुटात्)

॥ ४ ॥

अङ्गुष्ठमात्रवपुरुत्पतितः पुरस्ताद् भूयोऽथ कुम्भिसदृशः समजृम्भथास्त्वम् ।
अभ्रे तथाविधमुदीक्ष्य भवन्तमुच्चैर्विस्मेरतां विधिरगात् सह सूनुभिः स्वैः ॥

पदविभागः—अङ्गुष्ठमात्रवपुः, उत्पतितः, पुरस्तात्, भूयः, अथ, कुम्भिसदृशः, समजृम्भथाः, त्वम्, अभ्रे, तथाविधम्, उदीक्ष्य, भवन्तम्, उच्चैः विस्मेरताम्, विधिः, अगात्, सह, सूनिभिः स्वैः ॥

अन्वयः—त्वं पुरस्तात् अङ्गुष्ठमात्रवपुः उत्पतितः । अथ भूयः कुम्भिसदृशः समजृम्भथाः । विधिः अभ्रे तथावधम् उच्चै भवन्तम् उदीक्ष्य स्वैः सूनुभिः सह विस्मेरताम् अगात् ।

अन्वयार्थः

त्वं पुरस्तात् = आप पूर्व में

अङ्गुष्ठमात्रवपुः उत्पतितः = केवल अंगूठे के परिमाण में शरीर के रूप में बाहर उत्पन्न हुए ।

अथ भूयः = उसके बाद फिर

कुम्भिसदृशः समजृम्भथाः = हाथी के समान बड़े हो गये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधिः अभ्रे = ब्रह्मा, आकाश में

तथाविधम् उच्चैः भवन्तम् उदीक्ष्य = उस प्रकार बड़े आपको देखकर

स्वैः सूनुभिः सह = अपने पुत्रों के साथ

विस्मेरताम् अगात् = आश्चर्यचकित हो गये।

भावार्थः—आप पूर्व में केवल अंगूठे के परिमाण में शरीर के रूप में बाहर उत्पन्न हुए। तत्पश्चात्, हाथी के समान बड़े हो गये। ब्रह्मा आकाश में उस प्रकार बढ़ते हुए आप को देखकर अपने पुत्रों के साथ आश्चर्यचकित हो गये।

Word-Explanation :

जृम्भ् - To gape, Yawn, To expand, Burst open (As flower), To increase, To spread, To expand, To appear, Manifest etc. (Here to expand) (As in समजृम्भथाः)

कुम्भिन्- An elephant (As in कुम्भिसदृशः)

॥ ५ ॥

"कोऽसावचिन्त्यमहिमा किटिरुत्थितो मे नासापुटात् किमु भवेदजितस्य माया।"
इत्थं विचिन्तयति धातरि शैलमात्रः स्वद्यो भवन् किल जगर्जिथ घोरघोरम्।।

पदविभागः—कः, असौ, अचिन्त्यमहिमा, किटिः, उत्थितः, मे, नासापुटात्, किमु, भवेत्, अजितस्य, माया, इत्थम्, विचिन्तयति, धातरि, शैलमात्रः, सद्यः, भवन्, किल, जगर्जिथ, घोरघोरम्।।

अन्वयः—मे नासापुटात् उत्थितः अचिन्त्यमहिमा असौ किटिः कः ? अजितस्य माया भवेत् किमु ? धातरि इत्थं विचिन्तयति सति (त्वं) सद्यः शैलमात्रः भवन् घोरघोरं जगर्जिथ किल।

अन्वयार्थः

मे नासापुटात् उत्थितः = मेरे नाक के द्वार से उत्पन्न

अचिन्त्यमहिमा असौ किटिः कः ? = अचिन्त्य महिमा का यह वराह कौन है ?

अजितस्य माया भवेत् किमु ? = विष्णु की माया हो सकती है क्या ?

धातरि इत्थं विचिन्तयति (सति) = ब्रह्माजी के इस प्रकार के सोच में रहने पर

(त्वं) सद्यः शैलमात्रः भवन् = (आपने) शीघ्र ही पर्वत के समान होकर

घोरघोरं जगर्जिथ किल = निश्चित रूप से जोर-जोर से गर्जना की।

भावार्थः—"मेरे नाक के द्वार से उत्पन्न, अचिन्त्य महिमा का यह वराह कौन है ? विष्णु की माया हो सकती है क्या ?" ब्रह्माजी के इस प्रकार के सोच में रहने पर (आपने) शीघ्र ही पर्वत के समान होकर निश्चित रूप से जोर-जोर से गर्जना की।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

किटिः - A hog, A Boar (As in असौ किटिः कः ?)

धातृ - Creator, Marker, An epithet for Brahma & Vishnu, The soul, A married woman's parmour, Adulteror. (Here Brahma) (As in धातरि इत्थं विचिन्यति)

॥ ६ ॥

तं ते निनादमुपकर्ण्य जनस्तपस्थाः सत्यस्थिताश्च मुनयो नुनुवुर्भवन्तम् ।
तत्स्तोत्रहर्षुलमनाः परिणद्य भूयस्तोयाशयं विपुलमूर्तिरवातरस्त्वम् ॥

पदविभागः—तम्, ते, निनादम्, उपकर्ण्य, जनस्तपस्थाः, सत्यस्थिताः, च, मुनयः, नुनुवुः, भवन्तम्, तत्, स्तोत्रहर्षुलमनाः, परिणद्य, भूयः, तोयाशयम्, विपुलमूर्तिः, अवातरः, त्वम् ॥

अन्वयः—जनस्तपस्थाः, सत्यस्थिताः च मुनयः, ते तं निनादम् उपकर्ण्य भवन्तं नुनुवुः । तत् स्तोत्र हर्षुलमनाः भूयः परिणद्य विपुलमूर्तिः त्वम् तोयाशयम् अवातरः ।

अन्वयार्थः

जनस्तपस्थाः, सत्यस्थिता च मुनयः = जनलोक, तपोलोक तथा सत्यलोक वासी मुनिगण ने

ते तं निनादम् उपकर्ण्य = आप के उस गर्जन को सुनकर

भवन्तं नुनुवुः = आप की स्तुति की ।

तत् स्तोत्रहर्षुलमनाः = उस स्तोत्र से प्रसन्नचित्त होकर

भूयः परिणद्य = पुनः गर्जन करके

विपुलमूर्तिः त्वम् = विशाल शरीर वाले आप

तोयाशयम् अवातरः । = समुद्र में उतरे ।

भावार्थ—जनलोक, तपोलोक तथा सत्यलोक वासी मुनिगण ने आपके उस गर्जन को सुनकर, आप की स्तुति की । उस स्तोत्र से प्रसन्नचित्त होकर पुनः गर्जन करके विशाल शरीर वाले आप समुद्र में उतरे ।

Word-Explanation :

नु, नौति, प्रणौति, नुत, नावयति, ननूषति - To Praise, To extol, To commend. (As in नुनुवुः)

विपुल - Large, Extensive, Capacious, Broad, Wide, Deep, Profound, Ample, Copious, Abundant etc., (Here Large). (As in विपुलमूर्ति)

आशयः - **(तोयाशयम् - समुद्र)** - Reservoir, Receptacle etc. (As in तोयाशयम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

ऊर्ध्वप्रसारिपरिधूम्रविधूतरोमा प्रोत्क्षिप्तवालधिरवाङ्मुखघोरघोणः ।
तूर्णप्रदीर्णजलदः परिघूर्णदक्षणा स्तोतृन् मुनीन् शिशिरयन्नवतेरिथ त्वम् ॥

पदविभागः—ऊर्ध्वप्रसारिपरिधूम्रविधूतरोमा, प्रोक्षिप्तवालधिः, अवाङ्मुखघोरघोणः, तूर्णप्रतीर्णजलदः, परिघूर्णदक्षणा, स्तोतृन्, मुनीन्, शिशिरयन् अवतेरिथ, त्वम् ॥

अन्वयः—ऊर्ध्वप्रसारिपरिधूम्रविधूतरोमा प्रोक्षिप्तवालधिः अवाङ्मुखघोरघोणः तूर्णप्रतीर्णजलदः स्तोतृन् मुनीन् शिशिरयन् त्वम् अवतेरिथ ॥

अन्वयार्थः

ऊर्ध्वप्रसारिपरिधूम्रविधूतरोमा = ऊपर उठे ताम्बे के समान रंग के हिलते रोम युक्त (बालों से युक्त)

प्रोक्षिप्तवालधिः = उठी पूँछ के

अवाङ्मुखघोरघोणः = नीचे की ओर भयंकर नाक के

तूर्णप्रतीर्णजलदः = आसानी से मेघों को फाड़कर

स्तोतृन् मुनीन शिशिरयन् = स्तोत्र करते मुनियों को सन्तुष्ट कराके

त्वम् अवतेरिथ । = आप नीचे की ओर उतरे ।

भावार्थ—ऊपर उठे ताम्बे के समान रंग के हिलते रोमयुक्त उठी पूँछ के नीचे की ओर भयंकर नाक के आसानी से बादलों को फाड़कर, स्तुति करते मुनियों को सन्तुष्ट कराके, आप समुद्र में नीचे की ओर उतरे ।

Word-Explanation :

विधूत - Shaken, Tremulous, Tossed about, etc. (As in विधूतरोमा)

धूम्र - A mix of red and black colour (Copper like) (As in परिधूम्रविधूतरोमा)

प्रोत्क्षिप्त - Held upwards. (As in प्रोत्क्षिप्तवालधिः)

घोणः - The nose of a horse, Snout of a hog, boar etc. (As in घोरघोणः) -

परिघूर्ण - Rotating

तूर्ण - Quick, Rapid.

॥ ८ ॥

अन्तर्जलं तदनु संकुलनक्रचक्रं भ्राम्यत्तिमिङ्गिलकुलं कलुषोर्मिमालम् ।
आविश्य भीषणरवेण रसातलस्थानाक्रमयन् वसुमतीमगवेषयस्त्वम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—अन्तर्जलम्, तदनु, संकुलनक्रचक्रम्, भ्राम्यत्तिमिङ्गिलकुलम्, कलुषोर्मिमालम्, आविश्य, भीषणरवेण, रसातलस्थान्, आकम्पयन्, वसुमतीम्, अगवेषयः, त्वम् ॥

अन्वयः—त्वं तदनु संकुलनक्रचक्रं, भ्राम्यत्तिमिङ्गिलकुलं, कलुषोर्मिमालम् अन्तर्जलम् आविश्य, भीषणरवेण रसातलस्थान् आकम्पयन् वसुमतीम् अगवेषयः ॥

अन्वयार्थः

त्वं तदनु संकुलनक्रचक्रम् = आप ने उस के बाद इधर-उधर जाते घड़ियालों के समूह (से युक्त)

भ्राम्यत्तिमिङ्गिलकुलम् = घूमते तिमिंगिलों के समूह (से युक्त)

कलुषोर्मिमालम् = भयंकर रूप से उड़ती सागर-तरंगों (से युक्त)

अन्तर्जलम् आविश्य = जल के अन्दर प्रवेश करके

भीषणरवेण = भयंकर गर्जन के द्वारा

रसातलस्थान् आकम्पयन् = रसातल वासियों के हिलाते हुए

वसुमतीम् अगवेषयः = पृथ्वी का अन्वेषण किया ॥

भावार्थ—आपने उसके बाद, इधर-उधर जाते घड़ियालों के समूह से युक्त, घूमते तिमिंगिलों के समूह से युक्त, भयंकर रूप से उड़ते सागर-तरंगो से युक्त जल के अन्दर प्रवेश करके भयंकर घोर गर्जन के द्वारा, रसातल वासियों को हिलाते हुए, पृथ्वी का अन्वेषण किया।

Word-Explanation :

संकुल -Confused, Thronged with, Filled with, (As in संकुलनक्रचक्रम्)

चक्रम् - Collection, Circular etc. (As in संकुलनक्रचक्रम्)

कलुष - Turbid, Dirty, Muddy, Angry, Excited etc. (As in कलुषोर्मिमालम्)

ऊर्मिः- A wave (As in कुलुषोर्मिमालम्)

रवः - Cry, Shriek, Scream, Yell, Roar etc. (As in भीषणरवेण)

॥ ९ ॥

दृष्ट्वाऽथ दैत्यहतकेन रसातलान्ते संवेशितां झटिति कूटकिटिर्विभो त्वम्
आपातुकानविगणय्य सुरारिखेटान् दंष्ट्राङ्कुरेण वसुधामदधाः सलीलम् ॥

पदविभागः—दृष्ट्वा, अथ, दैत्यहतकेन, रसातलान्ते, संवेशिताम्, झटिति, कूटकिटिः, विभो, त्वम्, आपातुकान्, अविगणय्य, सुरारिखेटान्, दंष्ट्राङ्कुरेण, वसुधाम्, अदधाः, सलीलम्।

अन्वयः—विभो, कूटकिटिः त्वम् अथ दैत्यहतकेन रसातलान्ते संवेशितां वसुधां दृष्ट्वा, आपातुकान् सुरारिखेटान् अवगणय्य, सलीलं दंष्ट्राङ्कुरेण (वसुधाम्) अदधाः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

विभो, कूटकिटिः त्वम् = हे विभो ! महावराह के रूप में आप ने

अथ दैत्यहतकेन = उस के बाद, नीच असुर के द्वारा

रसातलान्ते संवेशितां वसुधां दृष्ट्वा = रसातल के अन्दर रखी हुई पृथ्वी को देखकर

आपातुकान् सुरारिखेटान् = भागकर आते हुए ऊपर गिरने वाले असुराधमों की

अवगणय्य सलीलम् = उपेक्षा करके आसानी से

दंष्ट्राङ्कुरेण (वसुधाम्) अदधाः = दांत के अग्र भाग से (पृथ्वी को) उठाया ।

भावार्थ—हे विभो ! महावराह के रूप में आप ने उस के बाद, नीच असुर के द्वारा रसातल के अन्दर रखी हुई पृथ्वी को देखकर, भागकर आते हुए ऊपर गिरने वाले असुराधमों की उपेक्षा करके आसानी से दांत के अग्र भाग से (पृथ्वी को) उठाया ।

Word-Explanation :

कूट- Immovable, Steady (As in कूटकिटि)

किटि - A hog, A Boar (As in कूटकिटि)

खेटः - A village, Small Town, Phelgm, Club of Brahma, A horse etc. (used at the end of a compound word खेट expresses "Miserable" "wretched" etc - सुरारिखेटान् = wretched Asuras) (As in सुरारिखेटान्)

दंष्ट्रा - A Large tooth, Tusk, Fang etc. (Here Tooth, Tusk)

हत - Killed, Wretched, Miserable etc. (As in दैत्यहतकेन)

॥ १० ॥

अभ्युद्धरन्नथ धरां दशनाग्रलग्नमुस्ताङ्कुराङ्कित इवाधिकपीवरात्मा ।
उद्धूतघोरसलिलाज्जलधेरुदञ्चन् क्रीडावराहवपुरीश्वर पाहि रोगात् ॥

पदविभागः—अभ्युद्धरन्, अथ, धराम्, दशनाग्रलग्नमुस्ताङ्कुराङ्कित, इव, अधिकपीवरात्मा, उद्धूतघोरसलिलात्, जलधेः, उदञ्चन्, क्रीडावराहवपुरीश्वर, पाहि, रोगात् ।

अन्वयः—अथ धराम् अभ्युद्धरन् दशनाग्रलग्नमुस्ताङ्कुराङ्कित इव अधिकपीवरात्मा उद्धूतघोरसलिलात् जलधेः उदञ्चन् क्रीडावराहवपुः त्वं रोगात् (मां) पाहि ।

अन्वयार्थः

अथ धराम् अभ्युद्धरन् = उसके बाद भूमि को उठाते हुए

दशनाग्रलग्नमुस्ताङ्कुराङ्कित इव = दाँत के अग्र भाग में पकड़े मोथे के फल जैसे,

अधिकपीवरात्मा = अत्यधिक स्थूल शरीरधारी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्धूतघोरसलिलात् = भयानक रूप से हिलते पानी वाले

जलधेः उदञ्चन् = समुद्र से ऊपर को आने वाले

क्रीडावराहवपुः = वराह-शरीर से लीला करने वाले

त्वं रोगात् (मां) पाहि। = आप रोग से मेरी रक्षा करें।

भावार्थ—उसके बाद भूमि को उठाते हुए दाँत के अग्र भाग में पकड़े मोथे के फल जैसे अत्यधिक स्थूल शरीरधारी भयानक रूप से पानी वाले समुद्र से ऊपर को आने वाले वराह-शरीर से लीला करने वाले आप रोग से मेरी रक्षा करें।

Word-Explanation :

दशनः/दशनम् - A Tooth (As in दशनाग्रलग्न-)

मुस्तः मुस्ता, मुस्तम् - A kind of grass. (As in दशनाग्रलग्नमुस्ताङ्कुराङ्कित)

अङ्कुरः/अङ्कुरम् - A sprout, A Blade, A tumor, A swelling (Here a swelling) (As in दशनाग्रलग्नमुस्ताङ्कुराङ्कित)

उद्धूत - Shaken off.

॥ इति द्वादशदशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-१३

हिरण्याक्षवधवर्णनम्

[शिखरिणीछन्दः]

॥ १ ॥

हिरण्याक्षं तावद्वरद, भवदन्वेषणपरम्
चरन्तं सांवर्ते पयसि निजजङ्घापरिमिते ।
भवद्भक्तो गत्वा कपटपटुधीर्नारदमुनिः
शनैरूचे नन्दन् दनुजमपि निन्दंस्तवबलम् ॥

पदविभागः—हिरण्याक्षम्, तावत्, वरद, भवदन्वेषणपरम्, चरन्तम्, सांवर्ते, पयसि, निजजङ्घापरिमिते, भवद्भक्तः, गत्वा, कपटपटुधीः, नारदमुनिः, शनैः, ऊचे, नन्दन्, दनुजम्, अपि, निन्दन्, तव, बलम् ॥

अन्वयः—तावत् भवद्भक्तः कपटपटुधीः नारदमुनिः, वरद, भवदन्वेषणपरं निजजङ्घापरिमिते सांवर्ते पयसि चरन्तं हिरण्याक्षं गत्वा (त्वं) दनुजं नन्दन्, तव बलं निन्दन् अपि शनैः ऊचे ।

अन्वयार्थः

तावत् भवद्भक्तः = तब आप के भक्त

कपटपटुधीः नारदमुनिः = कपट बुद्धि में श्रेष्ठ नारदमुनि

वरद, भवदन्वेषणपरम् = हे वरद ! आप को अन्वेषण करने वाले

निजजङ्घापरिमिते सांवर्ते पयसि चरन्तम् = अपने घुटने तक ही सीमित पानी में चलते

हिरण्याक्षं गत्वा = हिरण्याक्ष के पास जाकर

(तं) दनुजं नन्दन्, तव बलं निन्दन् अपि = (उस) असुर की प्रशंसा करके तथा आपकी शक्ति की निन्दा करके

शनैः ऊचे । = शनैः (धीरे से) बोले ।

भावार्थ—तब आप के भक्त कपट बुद्धि में श्रेष्ठ नारदमुनि हे वरद ! आप को अन्वेषण करने वाले, अपने घुटने तक ही सीमित पानी में चलते हिरण्याक्ष के पास जाकर, (उस) असुर की प्रशंसा करके तथा आपकी शक्ति की निन्दा करके धीरे से बोले।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

धीः - Intellect, Mind, Understanding, Idea, Imagination etc. (As in कपटपटुधीः)

पयस् - Water, Milk (Here water) (As in पयसि चरन्तम्)

पटु (पटी, पटीयस्, पटिष्ठ) - Clever, Skillfull, Cunning Proficeint, Sharp, Smart, (Mushroom when it is used as a noun). (As in कपटपटु)

परिमिति - Limitation, Measure, Quantity.

॥ २ ॥

स मायावी विष्णुर्हरति भवदीयां वसुमतीम्
प्रभो कष्टं कष्टं किमिदमिति तेनाभिगदितः ।
नदन् क्वासौ क्वासाविति स मुनिना दर्शितपथो
भवन्तं सम्प्रापद्धरणिधरमुद्यन्तमुदकात् ॥

पदविभागः—सः, मायावी, विष्णुः, हरति, भवदीयम्, वसुमतीम्, प्रभो, कष्टम्, कष्टम्, किमिदम, इति, तेन, अभिगदितः, नदन्, क्वासौ, क्वासौ, इति, सः, मुनिना, दर्शितपथः, भवन्तम्, सम्प्रापत्, धरणिधरम्, उद्यन्तम्, उदकात् ॥

अन्वयः—सः मायावी विष्णुः भवतीयां वसुमतीं हरति । प्रभो, कष्टं कष्टं किम् इति तेन अभिगदितः, सः (असुरः) क्वः असौ, क्वः असौ इति नदन्, (नारद) मुनिना दर्शितपथः धरणिधरम् उदकात् उद्यन्तं भवन्तं सम्प्रापत् ।

अन्वयार्थः

सः मायावी विष्णुः = वह मायावी विष्णु

भवतीया वसुमतीं हरति = आपकी पृथ्वी को हर कर ले जाता है ।

प्रभो, कष्टं, कष्टं किम् इति तेन अभिगदितः = हाय, हे प्रभो ! यह कैसे ? इस प्रकार उसके द्वारा (नारदमुनि) कहने पर

सः क्वः असौ, क्वः असौ इति नदन् = वह (असुर) कहां है ? वह कहां है ? इस प्रकार गर्जन करते हुए

मुनिना दर्शितपथः = (नारद) मुनि के द्वारा दिखाये मार्ग पर

धरणिधरम् = भूमि को धारण किये

उदकात् उद्यन्तं = पानी से (समुद्र से) ऊपर आते

भवन्तं सम्प्रापत् = आप को प्राप्त किया ।

भावार्थ—वह मायावी विष्णु आपकी पृथ्वी को हर कर ले जाता है ।हाय हे प्रभो ! यह कैसे ? इस प्रकार उसके द्वारा (नारदमुनि द्वारा) कहे जाने पर, वह (असुर) कहां है ? वह कहां है ? इस प्रकार गर्जन करते हुए

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(नारद) मुनि के द्वारा दिखाये गये मार्ग पर, भूमि को धारण किये समुद्र से ऊपर आते आप को प्राप्त किया।

Word-Explanation :

वसुमति - Earth. (वसुमत् is wealthy, Rich)

उदकम् - Water.

॥ ३ ॥

अहो, आरण्योऽयं मृग इति हसन्तं बहुतरै-
र्दुरुक्तैर्विध्यन्तं दितिसुतमवज्ञाय भगवन्।
महीं दृष्ट्वा दम्ष्ट्राशिरसि चकितां स्वेन महसा
पयोधावाधाय प्रसभमुदयुङ्था मृधविधौ ॥

पदविभागः—अहो, आरण्य, अयम्, मृगः, इति, हसन्तम्, बहुतरैः, दुरुक्तैः, विध्यन्तम्, दितिसुतम्, अवज्ञाय, भगवन्, महीम्, दृष्ट्वा, दम्ष्ट्राशिरसि, चकिताम्, स्वेन, महसा, पयोधौ, आधाय, प्रसभम्, उदयुङ्था, मृधविधौ ॥

अन्वयः—"अहो, अयम् आरण्य मृगः" इति हसन्तं, बहुतरैः दुरुक्तैः विध्यन्तं दितिसुतम् अवज्ञाय, भगवन् दम्ष्ट्राशिरसि महीं चकितं दृष्ट्वा, स्वेन महसा पयोधौ आधाय, प्रसभं मृगविधौ उदभुङ्थाः ॥

अन्वयार्थः

"अहो, अयम् आरण्यः मृगः" = "अच्छा, यह तो जंगल में रहने वाला जानवर है",

इति हसन्तम् = इस प्रकार हंसता हुआ

बहुतरैः- दुरुक्तैः विध्यन्तम् = अनेक प्रकार के दुर्वचनों द्वारा दुःखी कराते

दितिसुतम् अवज्ञाय = दिति के पुत्र (हिरण्याक्ष) की अवहेलना करके

भगवन् (त्वं) दम्ष्ट्राशिरसि महीं चकितं दृष्ट्वा, = हे ईश्वर (आप) दांत के ऊपर भयभीत भूमि को देखकर

स्वेन महसा पयोधौ आधाय = अपनी शक्ति से पानी में स्थापित करके

प्रसभं मृधविधौ उदभुङ्थाः = तत्क्षण युद्ध के लिए तैयार हो गये।

पदविभागः—नव, अभवन्, योगिवराः, नव, अन्ये, तु, अपालयन्, भारतवर्षखण्डान्, सैका, तु, अशीतिः, तव, शेषपुत्राः, तपोबलात्, भूसुरभूयमीयुः ।

अन्वयः—नव योगिवराः अभवन् । अन्ये नव तु भारतवर्षखण्डान् अपालयन् । सैकाशीतिः तव शेषपुत्राः, तपोबलात् भूसुरभूयम् ईयुः ।

अन्वयार्थः

नव योगिवराः अभवन् । = (उनमें से) नौ (पुत्र) श्रेष्ठ योगी बने ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्ये नव तु = अन्य नौ पुत्रों ने तो

भारतवर्षखण्डान् अपालयन् = भारतवर्ष के भागों का पालन किया।

सौका अशीतिः (सैकाशीतिः) तव शेषपुत्राः तपोबलात् = वे इक्यासी शेष आपके पुत्र तपस्या की शक्ति द्वारा

भूसुरभूयम् ईयुः = ब्राह्मणत्व को प्राप्त हुए।

भावार्थ—उनमें से नौ (पुत्र) श्रेष्ठ योगी बने। अन्य नौ पुत्रों ने तो भारतवर्ष के प्रान्तों का पालन किया। वे इक्यासी शेष आपके पुत्र, तपस्या की शक्ति द्वारा ब्राह्मणत्व को प्राप्त हुए।

Word-Explanation :

भूयम् - The State of being or becoming.(As in भूसुरभूयम्)

भूसुरः - A Brahmana (A Brahmin) (As in भूसुरभूयम्)

अशीति - Eighty (अस्सी)

॥ ८ ॥

उक्त्वा सुतेभ्योऽथ मुनीन्द्रमध्ये विरक्तिभक्त्यन्वितमुक्तिमार्गम्।
स्वयं गतः पारमहम्स्यवृत्तिमधा जडोन्मत्तपिशाचचर्याम्॥

पदविभागः—उक्त्वा, सुतेभ्यः, अथ, मुनीन्द्रमध्ये, विरक्तिभक्यन्वितमुक्तिमार्गम्, स्वयम्, गतः, पारमहम्स्यवृत्तिम्, अधा, जडोन्मत्तपिशाचचर्याम्॥

अन्वयः—अथ (त्वं) मुनीन्द्रमध्ये सुतेभ्यः विरक्तिभक्त्यन्वितमुक्तिमार्गम् उक्त्वा, स्वयं पारमहम्स्यवृत्तिं गतः। जडोनमत्तपिशाचचर्याम् अधाः।

अन्वयार्थः

अथ (त्वम्) मुनीन्द्रमध्ये = बाद में (आप) श्रेष्ठ मुनियों के बीच

सुतेभ्यः विरक्तिभक्त्यन्वितमुक्तिमार्गम् उक्त्वा, = पुत्रों को विरक्ति के साथ जुड़े भक्ति द्वारा प्राप्त मुक्ति मार्ग का उपदेश करके,

स्वयं पारमहम्स्यवृत्तिं गतः। = स्वयं पारमहंस वृत्ति को प्राप्त हुए।

जडोन्मत्तपिशाचचर्याम् अधाः। = (और) जड़ (ज्ञान रहित), उन्मत्त पिशाच जैसे आचरण करने लगे।

भावार्थ—बाद में (आप) श्रेष्ठ मुनियों के मध्य पुत्रों के विरक्ति के साथ जुड़े भक्ति द्वारा प्राप्त मुक्ति-मार्ग का उपदेश करके, स्वयं पारमहंस वृत्ति को प्राप्त हुए (और) जड़ (ज्ञानहीन), उन्मत्त पिशाच जैसे आचरण करने लगे।

Word-Explanation :

अन्वित - Followed or attended by, Connected with etc.(As in भक्त्यन्वित)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जड- Cold, Frigid, Chilly, Dull, Paralysed, Motionless, Senseless, Irrational, Stupid, Dullwitted, Benumbered etc. (Here-Irrational) (As in जडोन्मत्तपिशाचचर्याम्)

वृत्तिः (As in पारमहम्स्यवृत्तिम्) - Being, Existance, Profession, Occupation, Cause of activity, Conduct, Behaviour, Mode of leading life etc. (Here: Mode of leading life).

॥ ९ ॥

परात्मभूतोऽपि परोपदेशं कुर्वन भवान् सर्वनिरस्यमानः ।
विकारहीनो विचचार कृत्स्नां महीमहीनात्मरसाभिलीनः ॥

पदविभागः—परात्मभूतः, अपि, परोपदेशम्, कुर्वन्, भवान्, सर्वनिरस्यमानः, विकारहीनः, विचचार, कृत्स्नाम्, महीम्, अहीनात्मरसाभिलीनः ।

अन्वयः—भवान् परात्मभूतः अपि, परोपदेशं कुर्वन् सर्वनिरस्यमानः विकारहीनः अहीनात्मरसाभिलीनः कृत्स्नां महीं विचचार ।

अन्वयार्थः

भवान् परात्मभूतः अपि = आप ने परब्रह्म रूप होकर भी

परोपदेशं कुर्वन् = दूसरों को उपदेश देते हुए

सर्वनिरस्यमानः = सबसे तिरस्कृत

विकारहीनः = विकार रहित (कोप, ताप आदि रहित)

अहीनात्मरसाभिलीनः = नष्ट नहीं होने वाले आनन्द रस में लीन होकर

कृत्स्नां महीं विचचार । = समस्त पृथ्वी पर विचरण किया ।

भावार्थ—आप ने परब्रह्म रूप होकर भी, दूसरों को उपदेश देते हुए सबसे तिरस्कृत, विकार रहित (कोप आदि से निवृत्त) नष्ट नहीं होने वाले आनन्दरस में लीन होकर समस्त पृथ्वी पर विचरण किया ।

Word-Explanation :

कृत्स्न - All, Whole, Entire. (As in कृत्स्नां महीम्)

हीन- Left, Less, Substracted. (As in विकारहीनः)

(अहीन) - कम नहीं होने वाले

निरसन/निरसनी- Expelling, Electing, Removal, Spitting out, Vomiting, Removing, Driving away etc. (As in सर्वनिरस्यमानः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ १० ॥

शयुव्रतं गोमृगकाकचर्यां चिरं चरन्नाप्य परं स्वरूपम् ।
दवाहताङ्गः कुटकाचले त्वं तापान् ममापाकुरु वातनाथ ॥

पदविभागः—शयुव्रतम्, गोमृगकाकचर्याम्, चिरम्, चरन्, आप्य, परम्, स्वरूपम्, दवाहताङ्गः, कुटकाचले, त्वम्, तापान्, मम, अपाकुरु, वातनाथ ॥

अन्वयः—शयुव्रतं, गोमृगकाकचर्यां, चिरं चरन् परमं स्वरूपं, आप्य कुटकाचले दवाहदाङ्गः (अभूत्) । वातनाथ त्वं मम तापान् अपाकुरु ॥

अन्वयार्थः

शयुव्रतम् = सांप जैसे व्रत को अपनाने वाले (अर्थात् सांप जैसे पड़े रहना)

गोमृगकाकचर्याम् = गाय, हिरण, कौए जैसे आचरण करके (अर्थात् शुद्धता का परवाह न करके)

चिरं चरन् = बहुत समय तक चलकर

परमं स्वरूपम् = परम स्वरूप को

आप्य = प्राप्त करके

कुटलाचले = कुटक पर्वत क्षेत्र पर

दवाहदाङ्गः (अभूत्) । = दावानल (जंगली आग) में जल गये ।

वातनाथ त्वम् = (इस प्रकार के) हे गुरुवायुपुराधीश ! आप

मम तापान् अपाकुरु = मेरे दुःखों को दूर करें ।

भावार्थ—सांप जैसे व्रत को अपनाने वाले , गाय, हिरण, कौए जैसी दिनचर्या बिताते हुए बहुत समय तक चलते हुए परम स्वरूप को प्राप्त करते हुए कुटक पर्वत क्षेत्र में दावानल में दग्ध हे गुरुवायुपुराधीश आप मेरे दुःखों को दूर करें ।

Word-Explanation :

शयुः - A large snake, The Boa. (As in शयुव्रतम्)

दवः - A wood, A forest, Wild fire, Fire, Heat, Fever (Here Forest fire) (As in दवाहदाङ्गः)

ह (हरति, हत, हयते) - Take away, Strip, Destroy, Rob, Plunder (As in दवाहदाङ्गः)

अङ्गम् - The Body, Part of a Body etc.

॥ इति विंशतितमं दशकं समाप्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२१

जम्बूद्वीपादिषु भगवदुपासनाप्रकारवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

मध्योद्भवे भुव इलावृतनाम्नि वर्षे गौरीप्रधानवनिताजनमात्रभाजि ।
शर्वेण मन्त्रनुतिभिः समुपास्यमानं सङ्कर्षणात्मकमधीश्वर, संश्रये त्वाम् ॥

पदविभागः—मध्योद्भवे, भुवः, इलावृतनाम्नि, वर्षे, गौरीप्रधानवनिताजनमात्रभाजि, शर्वेण, मन्त्रनुतिभिः, समुपास्यमानम्, सङ्कर्षणात्मकम्, अधीश्वर, संश्रये, त्वाम् ॥

अन्वयः—भुवः मध्योद्भवे गौरीप्रधानवनिताजनमात्रभाजि इलावृतनाम्नि वर्षे शर्वेण मन्त्रनुतिभिः समुपास्यमानं सङ्कर्षणात्मकम् अधीश्वर, त्वाम् (अहम्) संश्रये ॥

अन्वयार्थः

भुवः मध्योद्भवे, = भूमि के मध्य भाग में

गौरीप्रधानवनिताजनमात्रभाजि इलावृतनाम्नि वर्षे शर्वेण = केवल स्त्रियाँ ही जहाँ रहती थीं ऐसे गौरी प्रधान इलावृत नामक देश में शिवजी द्वारा

मन्त्रनुतिभिः समुपास्यमानम् = मन्त्रों से स्तुति करके सेवित

सङ्कर्षणात्मकम् अधीश्वर = सङ्कर्षण रूपी हे ईश्वर !

त्वाम् संश्रये । = आप को (मैं अपना) आश्रय चुनता हूँ ।

भावार्थ—भूमि के मध्य भाग में केवल स्त्रियाँ ही जहाँ रहती थीं ऐसे गौरी प्रधान इलावृत नामक देश में शिवजी द्वारा मन्त्रों से स्तुति करके सेवित सङ्कर्षण रूपी हे ईश्वर ! मैं आपकी शरण में हूँ ।

Word-Explanation :

अधीश्वर = Supreme Lord, (As in सङ्कर्षणात्मकम् अधीश्वर)

अधि + ईश्वर = अधीश्वर । अधि = is used as a prefix to mean "above", "over", "cheif", "Supreme" etc.

भाज् usually used at the end of a composite word meaning : Sharing, Enjoying, Possesing, Obtaining etc. (As in वनिताजनमात्रभाजि)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

भद्राश्वनामक इलावृतपूर्ववर्षे भद्रश्रवोभिऋषिभिः परिणूयमानम् ।
कल्पान्तगूढनिगमोद्धरणप्रवीणं ध्यायानि देव हयशीर्षतनुं भवन्तम् ॥

पदविभागः—भद्राश्वनामक, इलावृतपूर्ववर्षे, भद्रश्रवोभिः, ऋषिभिः, परिणूयमानम्, कल्पान्तगूढनिगमोद्धरणप्रवीणम्, ध्यायामि, देव, हयशीर्षतनुम्, भवन्तम् ॥

अन्वयः—भद्राश्वनामक इलावृतपूर्ववर्षे भद्रश्रवोभिः ऋषिभिः परिणूयमानं कल्पान्तगूढनिगमोद्धरणप्रवीणं हयशीर्षतनुं देव, भवन्तम् (अहम्) ध्यायामि ।

अन्वयार्थः

भद्राश्वनामक इलावृतपूर्ववर्षे = इलावृत की पूर्व दिशा में स्थित भद्राश्रव नाम के वर्ष (देश) में

भद्रश्रवोभिः ऋषिभिः = भद्रश्रव नाम के मुनियों द्वारा

परिणूयमानम् = प्रार्थित

कल्पान्तगूढनिगमोद्धरणप्रवीणम् = प्रलय के समय रहस्य से रखे वेदों को ऊपर लाने में प्रवीण (समर्थ)

हयशीर्षतनुं देव, = अश्व के सिर के स्वरूप वाले हे देव (हयग्रीव) !

भवन्तम् (अहम्) ध्यायामि । = आप का (मैं) ध्यान करता हूँ ।

भावार्थ—इलावृत्त की पूर्व दिशा में स्थित भद्राश्व नाम के वर्ष (देश) में भद्रश्रव नाम के मुनियों द्वारा प्रार्थित प्रलय के समय रहस्य से रखे वेदों को ऊपर लाने में प्रवीण (समर्थ) घोड़े के सिर के स्वरूप वाले हे देव (हयग्रीव) ! आप का (मैं) ध्यान करता हूँ ।

Word-Explanation :

कल्प End of the world, Universal destruction, A day of Brahma of 1000 yugas being a period of 432 million years of mortals and measuring the duration of the world. (As in कल्पान्तगूढ—) =

हयः= Horse. (As in हयशीर्षतनुम्)

गूढ = Hidden, Concealed, Kept secret (As in कल्पान्तगूढ—)

निगमः = Vedas.

॥ ३ ॥

ध्यायामि दक्षिणगते हरिवर्षवर्षे प्रह्लादमुख्यपुरुषैः परिषेव्यमाणम् ।
उत्तुङ्गशान्तधवलाकृतिमेकशुद्धज्ञानप्रदं नरहरिं भगवन् भवन्तम् ॥

पदविभागः—ध्यायामि, दक्षिणगते, हरिवर्षवर्षे, प्रह्लादमुख्यपुरुषैः, परिषेव्यमाणम्, उत्तुङ्गशान्तधवलकृतिम्, एकशुद्धज्ञानप्रदम्, नरहरिं, भगवन्, भवन्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—दक्षिणगते हरिवर्षवर्षे प्रह्लादमुख्यपुरुषैः परिषेव्यमाणम् उत्तुङ्गशान्तधवलाकृतिम् एकशुद्धज्ञानप्रदं भगवन् नरहरिं भवन्तम् (अहम्) ध्यायामि ।

अन्वयार्थः

दक्षिणगते हरिवर्षवर्षे = (इलावृत के) दक्षिण भाग में हरिवर्ष (देश) में

प्रह्लादमुख्यपुरुषैः = प्रह्लाद आदि प्रमुख जनों द्वारा

परिषेव्यमाणम् = सेवित

उत्तङ्गशान्तधवलाकृतिम् = श्रेष्ठ शान्त गुण के धवल शरीर के

एकशुद्धज्ञानप्रदम् = अद्वैत ज्ञान प्रदान करते

भगवन् नरहरिम् = हे भगवान् ! नरसिंह रूपी

भवन्तम् (अहम्) ध्यायामि । = आप का (मैं) ध्यान करता हूँ ।

भावार्थ—(इलावृत के) दक्षिण भाग में हरिवर्ष (देश) में प्रह्लाद आदि प्रमुख जनों द्वारा सेवित, श्रेष्ठ शान्त गुण के धवल शरीर के अद्वैत ज्ञान प्रदान करते हे भगवान् ! नरसिंह रूपी आप का (मैं) ध्यान करता हूँ ।

Word-Explanation :

उत्तुङ्ग = Lofty, High, Tall (As in उत्तुङ्गशान्त.....)

धवल = White, Handsome, Clear, Pure etc. (As in उत्तुङ्गशान्तधवलाकृतिम्)

॥ ४ ॥

वर्षे प्रतीचि ललितात्मनि केतुमाले लीलाविशेषलसितस्मितशोभनाङ्गम् ।
लक्ष्म्या प्रजापतिसुतैश्च निषेव्यमाणं तस्याः प्रियाय धृतकामतनुं भजे त्वाम् ॥

पदविभागः—वर्षे, प्रतीचि, ललितात्मनि, केतुमाले, लीलाविशेषलसितस्मितशोभनाङ्गम्, लक्ष्म्या, प्रजापतिसुतैः, च, निषेव्यमाणम्, तस्याः, प्रियाय, धृतकामतनुम्, भजे, त्वाम् ।

अन्वयः—प्रतीचि ललितात्मनि केतुमाले लीलाविशेषलसितस्मितशोभनाङ्गं लक्ष्म्या प्रजापतिसुतैः च निषेव्यमाणं तस्याः प्रियाय धृतकामतनुं त्वां (अहं) भजे ।

अन्वयार्थः

प्रतीचि ललितात्मनि केतुमाले = (इलावृत की) पश्चिम दिशा में सुन्दर केतुमाल (देश) में

लीलाविशेषलसितस्मितशोभनाङ्गम् = सुन्दर तथा मन्द हास्ययुक्त सुचारु शरीर वाले,

लक्ष्म्या प्रजापतिसुतैः च = लक्ष्मी तथा प्रजापति के सुतों द्वारा

निषेव्यमाणं तस्याः प्रियाय = सेवित, उन (लक्ष्मीजी) की तृप्ति के लिए

धृतकामतनुं त्वां (अहं) भजे । = कामदेव का रूप धारण करने वाले आपका (मैं) भजन करता हूँ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—(इलावृत की) पश्चिम दिशा में स्थित सुन्दर केतुमाल (देश) में सुन्दर तथा मन्द हास्ययुक्त सुचारु शरीर वाले, लक्ष्मी तथा प्रजापति द्वारा सेवित, उन (लक्ष्मीजी) की तृप्ति के लिए कामदेव का रूप धारण करने वाले आपका (मैं) भजन करता हूँ।

Word-Explanation :

ललित = Indulgent (As in ललितात्मनि केतुमाले)

लीला (लीलाविशेषलसितस्मित—) = Play, Sport, Appearance, Semblence, Beauty, Charm etc.

लसित = Played, Sported, Appeared, Manifested, Skipping about etc. (As in लीलाविशेषलसितस्मित—)

॥ ५ ॥

रम्येह्युदीचि खलु रम्यकनाम्नि वर्षे तद्वर्षनाथमनुवर्यसपर्यमाणम्।
भक्तैकवत्सलममत्सरहृत्सु भान्तं मत्स्याकृतिं भुवननाथ भजे भवन्तम्।।

पदविभागः—रम्ये, हि, उदीचि, खलु, रम्यकनाम्नि, वर्षे, तद्वर्षनाथमनुवर्यसपर्यमाणम्, भक्तैकवत्सलम्, अमत्सर-हृत्सु, भान्तम्, मत्स्याकृतिम्, भुवननाथ, भजे, भवन्तम्।

अन्वयः—उदीचि खलु रम्ये हि, रम्यकनाम्नि वर्षे तद्वर्षनाथमनुवर्यसपर्यमाणं भक्तैकवत्सलम् अमत्सरहृत्सु भान्तं मत्स्याकृतिं भुवननाथ, भवन्तम् (अहम्) भजे।

अन्वयार्थः

उदीचि खलु रम्ये हि = (इलावृत के) उत्तर भाग में निश्चित रूप से सुन्दर

रम्यकनाम्नि वर्षे = रम्यक नामक वर्ष (देश) में

तद्वर्षनाथमनुवर्यसपर्यमाणम् = उस वर्ष (देश) के राजा, मनु द्वारा सेवित

भक्तैकवत्सलम् = भक्तों को ही प्रेम करने वाले

अमत्सरहृत्सु भान्तम् = किसी से वैर (विरोधभाव) नहीं रखने वाले हृदयों में प्रकाशित

मत्स्याकृतिं भुवननाथ, = मत्स्य रूपी हे लोकपते,

भवन्तम् (अहं) भजे। = आप का (मैं) भजन करता हूँ।

भावार्थ—(इलावृत के) उत्तर भाग में निश्चित रूप से सुन्दर रम्यक नामक वर्ष (देश) में उस वर्ष (देश/भूभाग) के राजा मनु द्वारा सेवित भक्तों को ही प्रेम करने वाले किसी से विरोध भाव नहीं रखने वाले हृदयों में प्रकाशित मत्स्यरूपी हे जगतपते ! आपका (मैं) भजन करता हूँ।

Word-Explanation :

उदीची == North (As in Goerene Kueg—)

Funding by IKS-KoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रम् (रमते) = To be pleased, To be delighted, Rejoice (As in उदीचि खलु रम्ये हि)

सपर्य Worship, Honouring, Service, Attendance (As in मनुवर्यसपर्यमाणम्)

मत्सर = Jealous, Envious, Greedy, Wicked, Enimity, Hostile etc. (अमत्सर - Without enimity) (As in अमत्सरहृत्सु भान्तम्)

भा (भाति, भातः, भापयति, भापते) = To shine, To show oneself, To appear, To maniest, To exist. (As in अमत्सरहृत्सु भान्तम्)

॥ ६ ॥

वर्षं हिरण्मयसमाह्वयमौत्तराहमासीनमद्रिधृतिकर्मठकामठाङ्गम् ।
संसेवते पितृगणप्रवरोऽर्यमा यं तं त्वाम् भजामि भगवन् परचिन्मयात्मन् ॥

पदविभागः—वर्षम्, हिरण्मयसमाह्वयम्, औत्तराहम्, आसीनम्, अद्रिधृतिकर्मठकामठाङ्गम्, संसेवते, पितृगणप्रवरः, अर्यमा, यम्, तम्, त्वाम्, भजामि, भगवन्, परचिन्मयात्मन् ॥

अन्वयः—औत्तराहं हिरण्मयसमाह्वयं वर्षम् आसीनम् अद्रिधृतिकर्मठकामठाङ्गं; पितृगणप्रवरः अर्यमा यं संसेवते, तं त्वां परचिन्मयात्मन् भगवन् (अहं) भजामि ।

अन्वयार्थः

औत्तराहं हिरण्मयसमाह्वयं वर्षम् आसीनम् = (इलावृत के) उत्तर में हिरण्मय नामक वर्ष (देश) में स्थित,

अद्रिधृतिकर्मठकामठाङ्गम् = पर्वत को ऊपर उठाने में शक्तिशाली कूर्म रूपधारी

पितृगणप्रवरः अर्यमा यं संसेवते = पितृगणों में मुख्य अर्यमा जिसकी सेवा करता है

तं त्वां परचिन्मयात्मन् भगवन्, (अहम्) भजामि । = उस तरह के आप का हे परमार्थज्ञान स्वरूप भगवन् ! (मैं) भजन करता हूँ ।

भावार्थ—(इलावृत के) उत्तर में हिरण्मय नामक वर्ष में स्थित, पर्वत को ऊपर उठाने में शक्तिशाली कूर्मरूपधारी, पितृगणों के मुख्य अर्यमा जिसकी सेवा करता है, उस तरह के आप का हे पारमार्थज्ञान स्वरूप भगवन् ! (मैं) भजन करता हूँ ।

Word-Explanation :

कर्मठ = Proficient in any work, Clever. (As in कर्मठकामठाङ्गम्)

कमठः = A Tortoise. (As in कर्मठकामठाङ्गम्)

Funding by IKS-MoE

औत्तर, औत्तरा, औत्तरी = Northern (As in औत्तराहम्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आह्वयः = A name, Appellation, As is called etc. (As in हिरण्मयसमाह्वयम्)

धृ (ध्रियते, धृत) = To hold, To Bear, (As in अद्रिधृति—)

अद्रि =Mountain (As in अद्रिधृति—)

चिन्मय = Consisting of Pure Intelligence, Supreme Spirit. (As in परचिन्मयात्मन्)

॥ ७ ॥

किञ्चोत्तरेषु कुरुषु प्रियया धरण्या संसेवितो महितमन्त्रनुतिप्रभेदैः ।
दम्ष्ट्राग्रघृष्टघनपृष्ठगरिष्ठवर्ष्मा त्वं पाहि विज्ञनुतयज्ञवराहमूर्ते ॥

पदविभागः—किम्, च, उत्तरेषु, कुरुषु, प्रियया, धरण्या, संसेविता, महितमन्त्रनुतिप्रभेदैः, संसेवितः, दम्ष्ट्राग्रघृष्टघनपृष्ठगरिष्ठवर्ष्मा, त्वम्, पाहि, विज्ञनुत, यज्ञवराहमूर्ते ॥

अन्वयः—किम् च उत्तरेषु कुरुषु प्रियया धरण्या महितमन्त्रनुतिप्रभेदैः संसेवितः दम्ष्ट्राग्रघृष्टघनपृष्ठगरिष्ठवर्ष्मा त्वं विज्ञनुत यज्ञवराहमूर्ते (मां) पाहि ॥

अन्वयार्थः

किम् च उत्तरेषु कुरुषु = इस के अतिरिक्त (हिरण्मय) के उत्तर में स्थित कुरु वर्ष में

प्रियया धरण्या महितमन्त्रनुतिप्रभेदैः संसेवितः = प्रिया धरणी द्वारा श्रेष्ठ मन्त्रों से विशेष स्तुति से सेवित

दम्ष्ट्राग्रघृष्टघनपृष्ठगरिष्ठवर्ष्मा त्वम् = दान्तों के अग्रभाग से मेघों को स्पर्श करते मज़बूत पृष्ठ वाले वृहदाकार आप

विज्ञनुत यज्ञवराहमूर्ते (मां) पाहि । = ज्ञानी जनों से प्रार्थित हे यज्ञवराहमूर्ते ! मेरी रक्षा करो ।

भावार्थ—इसके अतिरिक्त (हिरण्मय) के उत्तर में स्थित कुरु वर्ष में प्रिया धरणी द्वारा श्रेष्ठ मन्त्रों से सेवित, दान्तों के अग्रभाग से मेघों को स्पर्श करते मजबूत पृष्ठ वाले वृहदाकार आप ज्ञानी जनों से प्रार्थित हे यज्ञवराहमूर्ते ! मेरी रक्षा करो ।

Word-Explanation :

महित = Honoured, worshipped, esteemed, Revered, (As in महितमन्त्रनुति—)

प्रभेदः Distinction (As in नुतिप्रभेदैः) =

घृष् (घर्वति, घृष्ठ) = To rub, To strike against. (As in दंष्ट्राग्रघृष्ट—)

घन = Compact, Firm, Thick, Close etc. (As in घनपृष्ठ)

गरिष्ठ= Heaviest, Most important etc. (As in गरिष्ठवर्ष्मा)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्ष्म/वर्ष्मन् = Body, Form, Handsome or lovely form. (As in गरिष्ठ-वर्ष्मा)

विज्ञ = Learned, Intelligent, Knowing etc. (As in विज्ञनुत)

॥ ८ ॥

याम्यां दिशं भजति किम्पुरुषाख्यवर्षे संसेवितो हनुमता दृढ़भक्तिभाजा ।
सीताभिरामपरमाद्भुतरूपशाली रामात्मकः परिलसन् परिपाहि विष्णो ॥

पदविभागः—याम्याम्, दिशं, भजति, किम्पुरुषाख्यवर्षे, संसेवितः, हनुमता, दृढभक्तिभाजा, सीताभिरामपरमाद्भुतरूपशाली, रामात्मकः, परिलसन्, परिपाहि, विष्णो ।

अन्वयः—याम्यां दिशं भजति किम्पुरुषाख्यवर्षे दृढभक्तिभाजा हनुमता संसेवितः सीताभिरामपरमाद्भुतरूपशाली रामात्मकः परिलसन् विष्णो, (त्वं) (मां) परिपाहि ।

अन्वयार्थः

याम्यां दिशं भजति = (हरिवर्ष की) दक्षिण दिशा में स्थित

किम्पुरुषाख्यवर्षे = किम्पुरुष नाम के वर्ष (देश/भूभाग) में

दृढभक्तिभाजा हनुमता = दृढभक्ति रखने वाले हनुमान् द्वारा

संसेवितः सीताभिरामपरमाद्भुतरूपशाली = सेवित, सीता के मन को जीतने वाले अद्भुत सुन्दर स्वरूप

रामात्मकः परिलसन् = राम अवतार द्वारा शोभायमान

विष्णो, (त्वं) (मां) परिपाहि = हे विष्णो ! (आप) मेरी रक्षा करें ।

भावार्थ—(हरिवर्ष की) दक्षिण दिशा में स्थित किम्पुरुष नाम के वर्ष (देश) में दृढभक्ति रखने वाले हनुमान् द्वारा सेवित, सीता के मन को जीतने वाले अद्भुत सुन्दर स्वरूप राम अवतार द्वारा शोभायमान हे विष्णो ! (आप) मेरी रक्षा करें ।

Word-Explanation :

याम्य = Southern. (As in याम्यां दिशम्)

भाज् Having, Enjoying, Dwelling, Living in etc. (As in भक्ति-भाजा)

लस् (लसति, लसित) (As in परिलसन्) = To shine, To glitter, To flash, To adorn etc.

शालिन् = Endowed with, Possessed of, Possessing, Resplendent with etc. (As in परमाद्भुतरूपशाली)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(usually this is added at the end of a compound word such as शक्तिशाली)

॥ ९ ॥

श्रीनारदेन सह भारतखण्डमुख्यैस्त्वं साङ्ख्ययोगनुतिभिः समुपास्यमानः ।
आकल्पकालमिह साधुजनाभिरक्षी नारायणो नरसखः परिपाहि भूमन् ॥

पदविभागः—श्रीनारदेन, सह, भारतखण्डमुख्यैः, त्वम्, साङ्ख्ययोगनुतिभिः, समुपास्यमानः, आकल्पकालम्, इह, साधुजनाभिरक्षी, नारायणः, नरसखः, परिपाहि, भूमन् ॥

अन्वयः—श्रीनारदेन सह भारतखण्डमुख्यैः साङ्ख्ययोगनुतिभिः समुपास्यमानः इह आकल्पकालं साधुजनाभिरक्षी नरसखः नारायणः त्वं भूमन् (माम्) पाहि ।

अन्वयार्थः

श्रीनारदेन सह = श्रीनारद मुनि के साथ

भारतखण्डमुख्यैः = भारतवर्ष के मुख्य भक्तों द्वारा

साङ्ख्ययोगनुतिभिः समुपास्यमानः = सांख्ययोग के स्तोत्रों द्वारा सेवित

इह आकल्पकालम् = इधर कल्प के अन्त तक (प्रलय तक)

साधुजनाभिरक्षी = साधुजनों की रक्षा करने वाले

नरसखः नारायणः त्वम् = मनुष्य (नर) के सखा नारायण आप

भूमन्, (माम्) पाहि । = हे सर्वव्यापी ! (मेरी) रक्षा करें ।

भावार्थ—श्रीनारद मुनि के साथ, भारतवर्ष के मुख्य (श्रेष्ठ) भक्तों द्वारा सांख्य योग के स्तोत्रों द्वारा सेवित इधर कल्प के अन्त तक (प्रलय तक) साधुजनों की रक्षा करने वाले नर के सखा नारायण, आप हे सर्वव्यापी ! (मेरी) रक्षा करें ।

Word-Explanation :

अभिरक्ष/अभिरक्षणम् = Universal or complete protection, Protection in every quarter. (As in साधुजनाभिरक्षी)

॥ १० ॥

प्लाक्षेऽर्करूपमयि शाल्मल इन्दुरूपं द्वीपे भजन्ति कुशनामनि वह्निरूपम् ।
क्रौञ्चेऽम्बुरूपमथ वायुमयं च शाके त्वां ब्रह्मरूपमपि पुष्करनाम्नि लोकाः ॥ १० ॥

पदविभागः—प्लाक्षे, अर्करूपम्, शाल्मले, इन्दुरूपम्, द्वीपे, भजन्ति, कुशनामनि, वह्निरूपम्, क्रौञ्चे, अम्बुरूपम्, अथ, वायुमयम्, च, शाके, त्वाम्, ब्रह्मरूपम्, अपि, पुष्करनाम्नि, लोकाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अयि प्लाक्षे (द्वीपे) अर्करूपं, शाल्मले (द्वीपे) इन्दुरूपं, कुशनामनि (द्वीपे) वह्निरूपम्, क्रौञ्चे (द्वीपे) अम्बुरूपम्, अथ शाके (द्वीपे) वायुमयं च, पुष्करनाम्नि (द्वीपे) ब्रह्मरूपम् अपि त्वां लोकाः भजन्ति ।

अन्वयार्थः

अयि, प्लाक्षे (द्वीपे) अर्करूपम् = हे प्लाक्ष (द्वीप) में सूर्य रूपी,

शाल्मले (द्वीपे) इन्दुरूपम् = शाल्मल (द्वीप) में इन्दुरूप (चन्द्र रूपी)

कुशनामनि (द्वीपे) वह्निरूपम् = कुश नामक (द्वीप) में अग्नि रूपी,

क्रौञ्चे (द्वीपे) अम्बुरूपम् = क्रौञ्च (द्वीप) में जल रूपी,

अथ शाके (द्वीपे) वायुमयं च = और उसके बाद शाक (द्वीप) में वायु रूपी,

पुष्करनाम्नि (द्वीपे) = पुष्कर नामक (द्वीप) में

ब्रह्मरूपम् अपि त्वाम् = ब्रह्म रूपी आप को

लोकाः भजन्ति । = लोग नमन करते हैं ।

भावार्थ—हे प्लाक्ष (द्वीप) में सूर्य रूपी, शाल्मल (द्वीप) में चन्द्र रूपी, कुश नामक (द्वीप) में अग्नि रूपी, क्रौञ्च (द्वीप) में जल रूपी तथा शाक (द्वीप) में वायु रूपी, पुष्कर नामक (द्वीप) में ब्रह्म रूपी आप को लोग नमन करते हैं ।

Word-Explanation :

अयि = Used as a gentle address in the sense, "Friend", "OH", "AH" "I Pray" "Pray Thee" etc. (As in अयि, प्लाक्षे अर्करूपम्)

॥ ११ ॥

सर्वैर्ध्रुवादिभिरुडुप्रकरैर्ग्रहैश्च पुच्छादिकेष्ववयवेष्वभिकल्प्यमानैः ।
त्वं शिंशुमारवपुषा महतामुपास्यः सन्ध्यासु रुन्धि नरकं मम सिन्धुशायिन् ॥ ११ ॥

पदविभागः—सर्वैः, ध्रुवादिभिः, उडुप्रकरैः, ग्रहैः, च, पुच्छादिकेषु, अवयवेषु, अभिकल्प्यमानैः, त्वम्, शिंशुमारवपुषा, महताम्, उपास्य, सन्ध्यासु, रुन्धि, नरकम्, मम, सिन्धुशायिन् ॥

अन्वयः—पुच्छादिकेषु अवयवेषु अभिकल्प्यमानैः ध्रुवादिभिः सर्वैः उडुप्रकरैः ग्रहैः च सन्ध्यासु शिंशुमारवपुषा महताम् उपास्य, सिन्धुशायिन् त्वं मम नरकं रुन्धि ।

अन्वयार्थः

पुच्छादिकेषु अवयवेषु = पुच्छ आदि भागों में

अभिकल्प्यमानैः ध्रुवादिभिः = संकल्पित ध्रुव आदि

सर्वैः उडुप्रकरैः ग्रहैः च = समस्त नक्षत्र समूहों तथा ग्रहों द्वारा (अलंकृत)

सन्ध्यासु शिंशुमारवपुषा = सन्ध्या के समय शिंशुमार (मत्स्य) जैसे रूप द्वारा

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महताम् उपास्यः = महान् लोगों द्वारा सेवित

सिन्धुशायिन् त्वम् = क्षीर सागर में शयन करने वाले आप

मम नरकं रुन्धि। = मेरे नरक (गमन) को रोकें।

भावार्थ—पुच्छ आदि भागों में संकल्पित ध्रुव आदि समस्त नक्षत्र समूहों तथा ग्रहों द्वारा (अलंकृत), सन्ध्या के समय शिंशुमार मत्स्य जैसे आकृति द्वारा महान् लोगों द्वारा उपासित, क्षीरसागर में शयन करने वाले आप मेरे नरक (गमन) को रोकें।

Word-Explanation :

उडुः =A Star (As in उडुप्रकरैः)

प्रकरः =A Collection, Multitude, A heap. (As in उडुप्रकरैः)

शिंशुमार= A great fish named Simsumara (As in शिंशुमारवपुषा)

वपुः (शिंशुमारवपुषा) - शरीर = Body.

॥ १२ ॥

पातालमूलभुवि शेषतनुं भवन्तं लोलैककुण्डलविराजिसहस्रशीर्षम्।
नीलाम्बरं धृतहलं भुजगाङ्गनाभिर्जुष्टं भजे हर गदान् गुरुगेहनाथ॥

पदविभागः—पातालभुवि, शेषतनुम्, भवन्तम्, लोलैककुण्डलविराजिसहस्रशीर्षम्, नीलाम्बरम्, धृतहलम्, भुजगाङ्गनाभिः, जुष्टम्, भजे, हर, गदान्, गुरुगेहनाथ॥

अन्वयः—पातालभुवि लोलैककुण्डलविराजि सहस्रशीर्षं, नीलाम्बरं धृतहलं, भुजगाङ्गनाभिः जुष्टं शेषतनुं भवन्तम् (अहम्) भजे। गुरुगेहनाथ, (मम) गदान् हर।

अन्वयार्थः

पातालभुवि लोलैककुण्डलविराजिसहस्रशीर्षम् = पाताल के तट पर हिलते एक कुण्डल से अलंकृत सहस्र फणधारी

नीलाम्बरं धृतहलम् = नील वस्त्र पहने हल को धारण करके

भुजगाङ्गनाभिः जुष्टम् = नाग-स्त्रियों द्वारा सेवित

शेषतनुं भवन्तम् (अहम्) भजे। = शेषनाग रूपी आप का (मैं) भजन करता हूँ।

गुरुगेहनाथ, (मम) गदान् हर। = हे गुरुवायुपुराधीश ! (मेरे) रोगों को दूर करो।

भावार्थ—पाताल के तट पर हिलते एक कुण्डल से अलंकृत सहस्र फणधारी नीलवस्त्र पहने, हल को धारण करके नाग-स्त्रियों द्वारा सेवित शेषनाग रूपी आप का (मैं) भजन करता हूँ। हे गुरुवायुपुराधीश ! (मेरे) रोगों को दूर करो।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

कुण्डलः/कुण्डलम् (लोलैककुण्डलविराजि) = Ear Ring, A Bracelet etc.

गदः == Sickness, Disease, Also speaking, Speech etc. (Here: Disease) (As in मम गदान् हर)

लोल (लोलैककुण्डल—) = Shaking, Rolling, Moving to and fro.

जुष्ट = Pleased, Gratified. (As in भुजगाङ्गनाभिः जुष्टम्)

॥ इति एकविंशतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२२

अजामिलोपाख्यानम्

[वंशस्थछन्दः]

॥ १ ॥

अजामिलो नाम महीसुरः पुरा चरन् विभो धर्मपथान् गृहाश्रमी ।
गुरोर्गिरा काननमेत्य दृष्टवान् सुधृष्टशीलां कुलटां मदाकुलाम् ॥

पदविभागः—अजामिलः, नाम, महीसुरः, पुरा, चरन्, विभो, धर्मपथान्, गृहाश्रमी, गुरोः, गिरा, काननम्, एत्य, दृष्टवान्, सुधृष्टशीलाम्, कुलटाम्, मदाकुलाम् ।

अन्वयः—विभो, पुरा गृहाश्रमी धर्मपथान् चरन् अजामिलः नाम महीसुरः गुरोः गिरा काननम् एत्य (तत्र) सुधृष्टशीलां मदाकुलां कुलटां दृष्टवान् ॥

अन्वयार्थः

विभो, पुरा गृहाश्रमी = हे विभो ! प्राचीन समय में गृहस्थ का पालन करते हुए

धर्मपथान् चरन् = धर्म के पथ पर चलते हुए

अजामिलः नाम महीसुरः = अजामिल नाम के ब्राह्मण ने

गुरोः गिरा = पिता के वचनानुसार

काननम् एत्य (तत्र) = वन में पहुँचकर (वहां)

सुधृष्टशीलां मदाकुलां कुलटां दृष्टवान् । = लज्जाहीन अहंकारी कुलटा को देखा ।

भावार्थ—हे विभो, प्राचीन काल में गृहस्थ का पालन करते हुए और धर्म के पथ पर चलते हुए अजामिल नाम के ब्राह्मण ने पिता के वचनानुसार वन में पहुँचकर (वहां) लज्जाहीन अहंकारी कुलटा को देखा ।

Word-Explanation :

कुलटा = Unchaste woman, (बदचलन औरत) (As in कुलटां दृष्टवान्)

गुरु = A Spiritual Teacher, A percepter, A Teacher, Father (Father is called guru because he initiates the son to Gayatri Mantra). (As in गुरोः गिरा)

महीसुरः = Brahmin, Brahmana. (As in अजामिलः नाम महीसुरः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृष्ट = Shameless, Rude, Courageous, Insolent, Presumptious, Forward etc. (As in सुधृष्टशीलाम्)

॥ २ ॥

स्वतः प्रशान्तोऽपि तदाहताशयः स्वधर्ममुत्सृज्य तया समारमन्।
अधर्मकारी दशमीभवन् पुनर्दधौ भवन्नामयुते सुते रतिम् ॥ २ ॥

पदविभागः—स्वतः, प्रशान्तः, अपि, तदाहताशयः, स्वधर्मम्, उत्सृज्य, तया, समारमन्, अधर्मकारी, दशमीभवन्, पुनः, दधौ, भवन्नामयुते, सुते, रतिम् ॥

अन्वयः—स्वतः प्रशान्तः अपि (सः) तदाहताशयः स्वधर्मम् उत्सृज्य तया समारमन् अधर्मकारी (अभवत्) । दशमी भवन् पुनः भवन्नामयुते सुते रतिं दधौ ॥

अन्वयार्थः

स्वतः प्रशान्तः अपि (सः) = स्वयं शान्त होने पर भी (वह)

तदाहताशयः स्वधर्मम् उत्सृज्य = उसके वशीभूत होकर अपना धर्म छोड़कर

तया समारमन् = उस (कुलटा) के साथ रमते हुए

अधर्मकारी (अभवन्) ॥ = अधर्मी हो गया ॥

दशमीभवन् पुनः = वृद्ध होने पर फिर

भवन्नामयुते सुते रतिं दधौ । = आप के नाम (नारायण) के पुत्र को अधिक प्रेम करने लगा ।

भावार्थ—स्वयं शान्त होने पर भी (वह) उसके वशीभूत होकर अपना धर्म छोड़कर उस (कुलटा) के साथ रमते हुए अधर्मी हो गया । वृद्ध होने पर फिर आप के नाम (नारायण) के पुत्र को अधिक प्रेम करने लगा ।

Word-Explanation :

आशयः (तदाहदाशयः) = A Bed chamber, Residence, The seat of feeling such as mind or heart, Fate, Fortune, The stomach, etc. (Here: Heart)

उत्सर्जनम् = Leaving, Abandoning, Suspension of Vedic studies etc. (As in स्वधर्मम् उत्सृज्य)

दशमन्/दशमी =Very old. (Above Ninety years) (As in दशमी भवन्)

रतिः= Love, Affection. (As in रतिं दधौ)

॥ ३ ॥

स मृत्युकाले यमराजकिङ्करान् भयङ्करांस्त्रीनभिलक्षयन् भिया ।
पुरा मनाक् त्वत्स्मृतिवासनाबलात् जुहाव नारायणनामकं सुतम् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—सः, मृत्युकाले, यमराजकिङ्करान्, भयङ्करान्, त्रीन्, अभिलक्षयन्, भिया, पुरा, मनाक्, त्वत्स्मृतिवासनाबलात्, जुहाव, नारायणनामकम्, सुतम् ॥

अन्वयः—सः अजामिलः मृत्युकाले भयङ्करान् त्रीन् यमकिङ्करान् अभिलक्षयन् भिया पुरा मनाक् त्वत्स्मृतिवासनाबलात् नारायणनामकं सुतं जुहाव ।

अन्वयार्थः

सः अजामिलः मृत्युकाले = उस अजामिल ने मृत्यु के समय

भयङ्करान् त्रीन् यमकिङ्करान् अभिलक्षयन् भिया = भयंकर तीन यम दूतों को देखकर डर के मारे

पुरा मनाक् = पूर्व में (किये गये) किञ्चित्

त्वत्स्मृतिवासनाबलात् = आपके स्मरण अभ्यास के कारण

नारायणनामकं सुतं जुहाव । = "नारायण" नाम के अपने पुत्र को पुकारा ।

भावार्थ—उस अजामिल ने मृत्यु के समय भयंकर तीन यम-दूतों को देखकर डर के मारे पूर्व में किये गये किंचित् आपके स्मरण अभयास के कारण, "नारायण" नाम के अपने पुत्र को पुकारा ।

Word-Explanation :

मनाक् = A little, Slightly, In a small degree (As in पुरा मनाक्)

॥ ४ ॥

दुराशयस्यापि तदास्यनिर्गतत्वदीयनामाक्षरमात्रवैभवात् ।
पुरोऽभिपेतुर्भवदीयपार्षदाः चतुर्भुजाः पीतपटा मनोरमाः ॥

पदविभागः—दुराशयस्य, अपि, तदास्यनिर्गतत्वदीयनामाक्षरमात्रवैभवात्, पुरः, अभिपेतः, भवदीयपार्षदाः, चतुर्भुजाः, पीतपटाः, मनोरमाः ॥

अन्वयः—दुराशयस्य अपि (अस्य अजामिलस्य) पुरः तदास्यनिर्गतत्वदीयनामाक्षरमात्रवैभवात्, चतुर्भुजाः, पीतपटाः, मनोरमाः भवदीयपार्षदाः अभिपेतुः ॥

अन्वयार्थः

दुराशयस्य अपि = दुष्ट मन के होने पर भी

(अस्य अजामिलस्य) पुरः = (उस अजामिल के) सामने

तदास्यनिर्गतत्वदीयनामाक्षरमात्रवैभवात् = उसके मुँह से निकले आपके नाम मात्र के वैभव से

चतुर्भुजाः, पीतपटाः मनोरमाः = चार हाथ वाले, पीले रंग के वस्त्र पहने सुन्दर

भवदीयपार्षदाः अभिपेतुः = आपके सेवकगण प्रकट हो गये ।

भावार्थ—दुष्ट मन के होने पर भी (उस अजामिल के) सामने, उस के मुँह से निकले आप के नाम मात्र के वैभव से, चार हाथ वाले, पीले रंग के वस्त्र पहने हुए सुन्दर कान्ति वाले आप के सेवक गण प्रकट हो गये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

वैभवम् = Power, Might, Splendour, etc. (As in नामाक्षरमात्रवैभवात्)

आस्यम् = Face, Mouth. (As in तदास्यनिर्गत–)

पार्षदः = A companion, An associate, An Assessor, An attendant - (Here: An attendant) (As in भवदीयपार्षदाः)

पटः/पटम् = A Garment, Fine cloth, Cloth etc. (As in पीतपटाः)

॥ ५ ॥

अमुं च सम्पाश्य विकर्षतो भटान् विमुञ्चतेत्यारुरुधुर्बलादमी ।
निवारितास्ते च भवज्जनैस्तदा तदीयपापं निखिलं न्यवेदयन् ॥

पदविभागः—अमुम्, च, सम्पश्य, विकर्षतः, भटान्, विमुञ्चत, इति, आरुरुधुः, बलात्, अमी, निवारिताः, ते, च, भवज्जनैः, तदा, तदीय, पापम्, निखिलम्, न्यवेदयन् ॥

अन्वयः—अमुम् (अजामिलं) च सम्पश्य विकर्षतः भटान् "विमुञ्चत" इति अमी (भवज्जनः) बलात् आरुरुधुः । तदा भवज्जनैः निवारिताः ते च निखिलं तदीयपापं न्यवेदयन् ॥

अन्वयार्थः

अमुम् (अजामिलं) च = और इस (अजामिल) को

सम्पाश्य विकर्षतः = बन्धन से बान्धकर खींचते हुए

भटान् "विमुञ्चत" इति = (यम के) सेवकों को "छोड़ो" इस प्रकार

अमी (भवज्जनः) बलात् = इन (आपके सेवकगण) ने बल से

आरुरुधुः । = रोका ।

तदा भवज्जनैः निवारिताः = तब आपके सेवकों द्वारा रोके गये

ते च = वे (यम के सेवक) भी

निखिलं तदीयपापं न्यवेदयन् = उस (अजामिल) के सारे पापों को बताने लगे ।

भावार्थ—और इस (अजामिल) को बन्धन से बान्धकर खींचते हुए (यम के) दूतों को "छोड़ो" इस प्रकार इन (आपके दूत) ने बल से रोका । तब आप के दूतों द्वारा रोके गये वे (यम के दूत) भी उस (अजामिल) के सारे पापों को बताने लगे ।

Word-Explanation :

निखिल = Complete, Whole, Entire, All. (As in निखिलं तदीयपापम्)

कर्षणम् = Drawing, Dragging (As in सम्पाश्य विकर्षतः)

मुंच् (मुंचति, मुंचते, मुक्त) = To let loose, To liberate. (As in विमुञ्चत इति)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

भवन्तु पापानि कथं तु निष्कृते कृतेऽपि भो, दण्डनमस्ति पण्डिताः ।
न निष्कृतिः किं विदिता भवादृशामिति प्रभो त्वत्पुरुषा बभाषिरे ॥

पदविभागः—भवन्तु, पापानि, कथम्, तु, निष्कृते, कृते, अपि, भो, दण्डनम्, अस्ति, पण्डिताः, न, निष्कृतिः, किम्, विदिता, भवादृशाम्, इति, प्रभो, त्वत्पुरुषा, बभाषिरे ॥

अन्वयः—भो, पण्डिताः, पापानि भवन्तु । निकृते कृते अपि कथं तु दण्डनम् अस्ति ? भवदृशां निष्कृतिः विदिता किम् ? इति प्रभो त्वत्पुरुषाः (तान् यमकिङ्करान्) बभाषिरे ।

अन्वयार्थः

भो, पण्डिताः, पापानि भवन्तु । = हे पण्डित लोग ! पापों को रहने दो ।

निष्कृते कृते अपि कथं तु दण्डनम् अस्ति ? = प्रायश्चित करने के पश्चात् भी क्या दण्ड दिया जाता है ?

भवादृशाम् निष्कृतिः विदिता न किम् ? = आप जैसे लोगों को प्रायश्चित का ज्ञान नहीं क्या ?

इति प्रभोः त्वत्पुरुषाः = इस प्रकार हे प्रभो ! आपके पार्षदों (दूतों) ने

(तान्) (यमकिङ्करान्) बभाषिरे । = (उन यमदूतों से) कहा ।

भावार्थ—हे पण्डित लोग ! पापों को रहने दो । प्रायश्चित करने के पश्चात् भी क्या दण्ड दिया जाता है ? आप जैसे लोगों को प्रायश्चित का ज्ञान नहीं क्या ? इस प्रकार, हे प्रभो ! आप के दूतों ने (उन यमदूतों से) कहा ।

Word-Explanation :

विदित = Known, Understood, Learnt. (As in निष्कृतिः विदिता न किम् ?)

निकृत = Taken away, Pardoned, Expiated, Absolved etc. (As in निष्कृते कृतेऽपि—)

॥ ७ ॥

श्रुतिस्मृतिभ्यां विहिता व्रतादयः पुनन्ति पापं न लुनन्ति वासनाम् ।
अनन्तसेवा तु निकृन्तति द्वयीमिति प्रभो त्वत्पुरुषा बभाषिरे ॥

पदविभागः—श्रुतिस्मृतिभ्याम्, विहिता, व्रतादयः, पुनन्ति, पापम्, न, लुनन्ति, वासनाम्, अनन्तसेवा, तु, निकृन्तति, द्वयीम्, इति, प्रभो, त्वत्पुरुषाः, बभाषिरे ॥

अन्वयः—श्रुतिस्मृतिभ्यां विहिता व्रतादयः पापं पुनन्ति । (परन्तु) वासनां न लुनन्ति । अनन्तसेवा तु द्वयीं निकृन्तती । इति प्रभो, त्वत्पुरुषाः (तान् यमकिङ्करान्) बभाषिरे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

श्रुतिस्मृतिभ्यां विहिता व्रतादयः = श्रुति तथा स्मृति में बताये गये व्रत आदि

पापं पुनन्ति = पाप का नाश कर देते हैं।

(परन्तु) वासनां न लुनन्ति। = (परन्तु) पाप करने की वासना का नाश नहीं करते।

अनन्तसेवा तु द्वयीं निकृन्तती। = अन्त रहित भगवान् की सेवा तो दोनों (पाप तथा पाप करने की वासना) का नाश कर देती है।

इति प्रभो, त्वत्पुरुषाः = इस प्रकार आप के दूतों ने

(तान्) बभाषिरे। = (उन यम दूतों को) कहा।

भावार्थ—श्रुति तथा स्मृति में बताये गये व्रत आदि, पाप का नाश कर देते हैं। (परन्तु) पाप करने की वासना का नाश नहीं करते। अन्त रहित भगवान् की सेवा तो दोनों (पाप तथा पाप करने की वासना) का नाश कर देती है। इस प्रकार आप के दूतों ने (उन यमकिङ्करों को) कहा।

Word-Explanation :

निकृन्तनम् = Cutting down, Destroying (As in निकृन्तति द्वयीम्)

विहित = **Done, Performed, (As in** विहित व्रतादयः)

॥ ८ ॥

अनेन भो, जन्मसहस्रकोटिभिः कृतेषु पापेष्वपि निष्कृतिः कृता।
यदग्रहीन्नाम भयाकुलो हरेरिति प्रभो, त्वत्पुरुषा बभाषिरे॥

पदविभागः—अनेन, भो, जन्मसहस्रकोटिभिः, कृतेषु, पापेषु, अपि, निष्कृतिः, कृता, यत्, अग्रहीत, नाम, भयाकुलः, हरेः, इति, प्रभो, त्वत्पुरुषाः, बभाषिरे।

अन्वयः—भो, अनेन (अजामिलेन) जन्मसहस्रकोटिभिः कृतेषुपापेषु अपि निष्कृतिः कृता। यतः (अयं) भयाकुल हरेः नाम अग्रहीत्। इति प्रभो त्वत्पुरुषाः (यमकिङ्करान्) बभाषिरे।

अन्वयार्थः

भो, अनेन (अजामिलेन) अरे! इस (अजामिल) के द्वारा

जन्मसहस्रकोटिभिः = हजारों, करोड़ों जन्मों में

कृतेषुपापेषु अपि = किये गये पापों का भी

निष्कृतिः कृता। = प्रायश्चित कर दिया गया है।

यतः (अयं) भयाकुलः = क्योंकि (इसने) भयभीत होकर

हरेः नाम अग्रहीत्। = हरि के नाम की शरण ली।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति प्रभो त्वत्पुरुषाः (यमकिङ्करान्) बभाषिरे । = इस प्रकार आपके दूतों ने (यमराज के दूतों को) कहा ।

भावार्थ—अरे ! इसके (अजामिल) के द्वारा हजारों, करोड़ों जन्मों में किये गये पापों का भी प्रायश्चित कर दिया गया है । क्योंकि (इसने) भयभीत होकर हरि के नाम का उच्चारण किया । इस प्रकार आप के दूतों ने यमराज के दूतों को कहा ।

Word-Explanation :

ग्रह् (गृह्यति, गृहीत, ग्राहयति) = To seize, To take, To Buy, To Purchase, To utter etc. (Here- To utter) (As in अग्रहीत्)

॥ ९ ॥

नृणामबुद्ध्यापि मुकुन्दकीर्तनं दहत्यघौघान् महिमाऽस्य तादृशः ।
यथाग्निरेधाम्सि यथौषधं गदानिति प्रभो, त्वत्पुरुषा बभाषिरे ॥

पदविभागः—नृणाम्, अबुद्ध्या, अपि, मुकुन्दकीर्तनम्, दहति, अघौघान्, महिमा, अस्य, तादृशः, यथा, अग्निः, एधाम्सि, यथा, औषधम्, गदान्, इति, प्रभो, त्वत्पुरुषाः, बभाषिरे ॥

अन्वयः—अबुद्ध्या अपि (कृतं) मुकुन्दकीर्तनं नृणान् अघौघान्, अग्निः यथा एधाम्सि (दहति), औषधं यथा गदान् (दहति) तथा दहति । अस्य महिमा तादृशः । इति प्रभो, त्वत्पुरुषाः (यमकिङ्करान्) बभाषिरे ।

अन्वयार्थः

अबुद्ध्या अपि (कृतं) मुकुन्दकीर्तनम् = अनजाने में भी की गयी मुकुन्द (नारायण) की स्तुति

नृणान् अघौघान् = मनुष्यों के पापों को

अग्निः यथा एधाम्सि (दहति) = आग जैसे लकड़ी को, (जलाती है)

औषधं यथा गदान् (दहति) = औषधि जैसे रोगों को (जलाती है)

तथा दहति । = उसी प्रकार जला देती है ।

अस्य महिमा तादृशः । = उस (भगवन्नाम्) की महिमा ऐसी है ।

इति प्रभो, त्वत्पुरुषाः = इस प्रकार हे प्रभो ! आप के दूतों ने

(यमकिङ्करान्) बभाषिरे । = (यमदूतों को) कहा ।

भावार्थ—अनजाने में भी की गई मुकुन्द (नारायण) की स्तुति, मनुष्यों के पापों को जैसे आग लकड़ी को (जलाती है), जैसे औषधि रोगों को (जलाती है) उसी प्रकार जला देती है । उस (भगवान्नाम) की महिमा ऐसी है । इस प्रकार हे प्रभो ! आपके दूतों ने (यमदूतों को) कहा ।

Word-Explanation :

एधस्/एधः = Fuel (As in एधाम्सि)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गदः =Disease, Sickness (As in यथा गदान्)

॥ १० ॥

इतीरितैर्याम्यभटैरपासृते भवद्भटानां च गणे तिरोहिते ।
भवत्स्मृतिं कंचनकालमाचरन् भवत्पदं प्रापि भवद्भटैरसौ ॥ १० ॥

पदविभागः—इति, ईरितैः, याम्यभटैः, अपासृते, भवद्भटानाम्, च, गणे, तिरोहिते, भवत्स्मृतिम्, कंचन, कालम्, आचरन्, भवत्पदम्, प्रापि, भवद्भटैः, असौ ॥

अन्वयः—इति ईरितैः याम्यभटैः अपासृते (सति) भवद्भटानांगणे तिरोहितं च, असौ (अजामिलः) कञ्चन कालं भवत् स्मृतिम् आचरन्, भवद्भटैः भवद्पदं प्रापि ।

अन्वयार्थः

इति ईरितैः याम्यभटैः अपासृते (सति) = इस प्रकार के वचनों से अभिप्रेरित यम दूतों के जाने पर

भवद्भटानांगणे तिरोहितं च = तथा आप के सेवकों के तिरोधान होने पर

असौ (अजामिलः) कञ्चन कालं स्मृतिम् आचरन् = यह (अजामिल) कुछ समय तक आपका स्मरण करता हुआ

भवद्भटैः भवद्पदं प्रापि । = आप के पार्षदों द्वारा आप के धाम (वैकुण्ठ) को पहुँचाया गया ।

भावार्थ—इस प्रकार के वचनों से अभिप्रेरित यम दूतों के जाने पर तथा आप के सेवकों के तिरोधान होने पर यह (अजामिल) कुछ समय तक आपका स्मरण करता हुआ आपके पार्षदों द्वारा आप के धाम (वैकुण्ठ) को पहुँचाया गया ।

Word-Explanation :

ईर् (ईर्ते, ईर्णे, ईरित, ईरयति) =To utter, To repeat, To Pronounce etc. (As in इति ईरितैः)

याम्य = Belonging to the South, Yama. (As in याम्यभटैः)

अपसरणम् = Removing to a distance, Expelling. (As in अपासृते)

॥ ११ ॥

स्वकिङ्करावेदनशङ्कितो यमस्त्वदङ्घ्रिभक्तेषु न गम्यतामिति ।
स्वकीयभृत्यानशिशिक्षदुच्चकैः स देव, वातालयनाथ पाहि माम् ॥

पदविभागः—स्वकिङ्करावेदनशङ्कितः, यमः, त्वदङ्घ्रिभक्तेषु, न, गम्यताम्, इति, स्वकीयभृत्यान्, अशिशिक्षत्, उच्चकैः, सः, देव, वातालयनाथ, पाहि, माम् ॥

अन्वयः—यमः स्वकिङ्करावेदनशङ्कितः त्वदङ्घ्रिभक्तेषु न गम्यताम् इति स्वकीयभृत्यान् उच्चकैः अशिशिक्षत् । देव, वातालयनाथ, सः (त्वम्) मां पाहि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

यमः स्वकिङ्करावेदनशङ्कितः = यमराज ने अपने दूतों की बातों से डरकर (भयभीत होकर)

त्वदङ्घ्रिभक्तेषु न गम्यताम् इति = आपके प्रिय भक्तों के पास न जायें, इस प्रकार

स्वकीय भृत्यान् उच्चकैः अशिशिक्षत्। = अपने सेवकों (दूतों) को दृढ़तापूर्वक आदेश दिया।

देव, वातालयनाथ, सः (त्वं) मां पाहि। = हे देव ! गुरुवायुपुराधीश ! उस स्वरूप वाले आप मेरी रक्षा करें।

भावार्थ—यमराज ने अपने दूतों की बातों से डरकर (भयभीत होकर) आपके प्रिय भक्तों के समीप न जायें, इस प्रकार अपने सेवकों (दूतों) को दृढ़तापूर्वक आदेश दिया। हे देव ! गुरुवायुपुराधीश ! उस स्वरूप वाले आप मेरी रक्षा करें।

Word-Explanation :

शंकित = Doubted, Feared, Alarmed etc. (Here feared/Alarmed) (As in स्वकिङ्करावेदनशंकितः)।

॥ इति द्वाविंशतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२३

दक्षचरितं चित्रकेतूपाख्यानं वृत्तवधवर्णनञ्च

[वसन्ततिलकछन्दः]

॥ १ ॥

प्रचेतसस्तु भगवन्नपरो हि दक्षस्त्वत्सेवनं व्यधित सर्गविवृद्धिकामः ।
आविर्बभूविथ तदा लसदष्टबाहुस्तस्मै वरं ददिथ तां च वधूमसिक्नीम् ॥

पदविभागः—प्रचेतसः, तु, भगवन्, अपरः, हि, दक्षः, त्वत्सेवनम्, व्यधित, सर्गविवृद्धिकामः, अविर्बभूविथ, तदा, लसदष्टबाहुः, तस्मै, वरम्, ददिथ, ताम्, च, वधूम्, असिक्नीम् ॥

अन्वयः—भगवन्, प्रचेतसः अपरः (पुत्रः) हि दक्षः तु सर्गविवृद्धिकामः त्वत्सेवनं व्यधित । तदा लसदष्टबाहुः आविर्बभूविथ । तस्मै (दक्षाय) वरं, ताम् असिक्नीं वधूं च ददिथ ॥

अन्वयार्थः

भगवन्, प्रचेतसः अपरः (पुत्रः) हि दक्षः तु = हे भगवन्, प्रचेतसों के अन्य (पुत्र) दक्ष ने ही तो

सर्गविवृद्धिकामः त्वत्सेवनं व्यधित । = सृष्टि की वृद्धि करने की इच्छा से आप की सेवा की ।

तदा लसदष्टबाहुः आविर्बभूविथ = उस समय आठ हाथों से शोभायमान् आप प्रकट हुए ।

तस्मै (दक्षाय) वरं ताम् असिक्नीं वधूं च ददिथ । = (आपने) उस (दक्ष) को वरदान तथा असिक्नी (नाम की) वधू भी प्रदान की ।

भावार्थ—हे भगवन् ! प्रचेतसों के अन्य (पुत्र) दक्ष ने ही तो सृष्टि की वृद्धि करने की इच्छा से आपकी सेवा की । उस समय आठ हाथों से शोभायमान् आप प्रकट हुए । आपने उस (दक्ष) को वरदान तथा असिक्नी (नाम की) वधू भी प्रदान की ।

Word-Explanation :

लस् (लसति/लसित) (As in लसदष्टबाहुः) = Glittering, shining to shine, To Glitter.

॥ २ ॥

तस्यात्मजास्त्वयुतमीश पुनः सहस्रम् श्रीनारदस्य वचसा तव मार्गमापुः ।
नैकत्रवासमृषये स मुमोच शापम् भक्तोत्तमस्त्वृषिरनुग्रहमेव मेने ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—तस्य, आत्मजाः, तु, अयुतम्, ईश, पुनः, सहस्रम्, श्रीनारदस्य, वचसा, तव, मार्गम्, आपुः, न, एकत्र, वासम्, ऋषये, सः, मुमोच, शापम्, भक्तोत्तमः, तु, ऋषिः, अनुग्रहम्, एव, मेने ।

अन्वयः—ईश, तस्य (दक्षस्य) आत्मजाः तु अयुतं पुनः सहस्रं, श्रीनारदस्य वचसा तव मार्गम् आपुः । सः (दक्षः) ऋषये "न एकत्र वासं शापं" मुमोच । भक्तोत्तमः ऋषिः तु, अनुग्रहम् एव मेने ।

अन्वयार्थः

ईश, तस्य (दक्षस्य) आत्मजाः तु = हे ईश ! उस (दक्ष) के पुत्र तो

अयुतं पुनः सहस्रम् = दस हजार और सहस्र,

श्रीनारदस्य वचसा तव मार्गम् आपुः = श्रीनारदमुनि के उपदेशानुसार आपके (भक्ति) मार्ग पर गये ।

सः (दक्षः) ऋषये = उस (दक्ष) ने ऋषि (नारदमुनि) को

"न एकत्र वासं शापं" मुमोच । = "एक स्थान पर न रहने का शाप" दिया ।

भक्तोत्तमः ऋषिः तु = भक्तों में श्रेष्ठ नारद मुनि ने तो

अनुग्रहम् एव मेने । = (उस शाप को) अनुग्रह ही माना ।

भावार्थ—हे ईश ! उस (दक्ष) के दस हजार और सहस्र पुत्र तो श्रीनारदमुनि के उपदेशानुसार आप के (भक्ति) मार्ग पर गये । वह (दक्ष) ऋषि को (नारदमुनि को) "एक स्थान पर न रहने का शाप" दिया । भक्तों में उत्तम नारद मुनि ने तो (उसको) अनुग्रह ही माना ।

Word-Explanation :

अयुतम् = दस हजार (As in अयुतम् पुनः सहस्रम्)

आत्मजः आत्मनः = पुत्र, Son, (As in आत्मजाः तु)

॥ ३ ॥

षष्ट्या ततो दुहितृभिः सृजतः कुलौघान् दौहित्रसूनुरथ तस्य स विश्वरूपः ।
त्वत्स्तोत्रवर्मितमजापयदिन्द्रमाजौ देव त्वदीयमहिमा खलु सर्वजैत्रः ॥

पदविभागः—षष्ट्या, ततः, दुहितृभिः, सृजतः, कुलौघान्, दौहित्रसूनुः, अथ, तस्य, सः, विश्वरूपः, त्वत्सोत्रवर्मितम्, अजापयत्, इन्द्रम्, अजौ, देव, त्वदीयमहिमा, खलु, सर्वजैत्रः ॥

अन्वयः—ततः षष्ट्या दुहितृभिः कुलौघान् सृजतः अथ तस्य दौहित्रसूनुः सः विश्वरूपः अजौ इन्द्रं त्वत्स्तोत्रवर्मितम् अजापयत् । देव त्वदीयमहिमा सर्व जैत्रः खलु ।

अन्वयार्थः

ततः षष्ट्या दुहितृभिः = बाद में साठ पुत्रियों द्वारा

कुलौघान् सृजतः अथ तस्य = कुल की बहुमुखी वृद्धि करते हुए तदनन्तर उस (दक्ष) के

दौहित्रसूनुः सः विश्वरूपः = प्रपौत्र (लड़की के पौत्र) उस विश्वरूप ने

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अजौ त्वत्स्तोत्रवर्मितम् इन्द्रं अजापयत्। = युद्ध में आप के स्तोत्रों द्वारा रक्षा पाकर इन्द्र को हरा दिया।

देव त्वदीयमहिमा सर्व जैत्रः खलु। = हे देव ! आप की महिमा निश्चित रूप से सबको जिताने वाली है।

भावार्थ—बाद में साठ पुत्रियों द्वारा कुल की बहुमुखी वृद्धि करते हुए, तदनन्तर उस (दक्ष) के प्रपौत्र (पुत्री के पौत्र) उस विश्वरूप ने, युद्ध में आप के स्तोत्र के कवच पाकर इन्द्र को हरा दिया। हे देव ! आप की महिमा सबको जिताने वाली है।

Word-Explanation :

दुहित् =Daughter (As in दुहितृभिः सृजतः)

दौहित्रः = A daughter's son. (As in दौहित्रसूनुः)

दौहित्रसूनुः, दौहित्रायणः = A daughter's son's son

वर्मन् = An armour, (कवच) (As in त्वस्तोत्रवर्मितम्)

॥ ४ ॥

प्राक् शूरसेनविषये किल चित्रकेतुः पुत्राग्रही नृपतिरङ्गिरसः प्रभावात्।
लब्ध्वैकपुत्रमथ तत्र हते सपत्नीसङ्घैरमुह्यदवशस्तव माययाऽसौ ॥

पदविभागः—प्राक्, शूरसेनविषये, किल, चित्रकेतुः, पुत्राग्रही, नृपतिरङ्गिरसः, प्रभावात्, लब्ध्वा, एकपुत्रम्, अथ, तत्र, हते, सपत्नीसङ्घैः, अमुह्यत्, अवशः, तव, मायया, असौ।

अन्वयः—प्राक् शूरसेनविषये चित्रकेतुः पुत्राग्रही नृपतिः (असीत्) किल। असौ अङ्गिरसः प्रभावात् एकपुत्रं लब्ध्वा, अथ तत्र सपत्नीसङ्घैः हते तव मायया अवशः अमुह्यत्।

अन्वयार्थः

प्राक् शूरसेनविषये = प्राचीन समय में पुरा शूरसेन के राज्य में

चित्रकेतुः पुत्राग्राही नृपतिः (आसीत्) किल। = पुत्र का आग्रह करने वाला चित्रकेतु नाम का एक राजा था।

असौ अङ्गिरसः प्रभावात् एकपुत्रं लब्ध्वा = वह अङ्गिरस मुनि के प्रभाव से एक पुत्र को प्राप्त करके

अथ तत्र सपत्नीसङ्घैः हते = तदनन्तर वहां (वह पुत्र) सपत्नियों द्वारा मारे जाने पर

तव मायया अवशः अमुह्यत् = आप की माया से दुःखी होकर मूर्च्छित हो गया।

भावार्थ—प्राचीन समय में शूरसेन के राज्य में पुत्र की इच्छा करने वाला चित्रकेतु नाम का एक राजा था। वह अङ्गिरस मुनि के प्रभाव से एक पुत्र को प्राप्त करके, बाद में वहाँ वह पुत्र सपत्नियों द्वारा मारे जाने पर आप की माया से दुःखी होकर मूर्च्छित हो गया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

विषयः = An object of sense, A wordly object, Scope, A thing, Range, Department, Province, Kingdom, A country etc etc. (Here: Kingdom) (As in शूरसेनविषये)

मुह् (मुह्यति/मुग्ध/मूढ) = To faint, To swoon, Become senseless (As in अमुह्यत्)

वश् Influenced by, Under the control of etc. (As in अवशः अमुह्यत्)

॥ ५ ॥

तं नारदस्तु सममङ्गिरसा दयालुः सम्प्राप्य तावदुपदर्श्य सुतस्य जीवम् ।
"कस्यास्मि पुत्र" इति तस्य गिरा विमोहं त्यक्त्वा त्वदर्चनविधौ नृपतिं न्ययुङ्क्त ॥

पदविभागः—तम्, नारदः, तु, समम्, अङ्गिरसा, दयालुः, सम्प्राप्य, तावत्, उपदर्श्य, सुतस्य, जीवम्, कस्य, अस्मि, पुत्रः, इति, तस्य, गिरा, विमोहम्, त्यक्त्वा, त्वदर्चनविधौ, नृपतिम्, न्ययुङ्क्त ।।

अन्वयः—दयालुः नारदः तु तावत् अङ्गिरसा समं तं (चित्रकेतुम्) संप्राप्य, सुतस्य जीवम् उपदर्श्य "कस्य पुत्रः अस्मि ?" इति तस्य गिरा विमोहं त्यक्त्वा त्वदर्चनविधौ (चित्रकेतुं) नृपतिं न्ययुङ्क्त ।

अन्वयार्थः

दयालुः नारदः तु = दयालु नारद मुनि ने तो

तावत् अङ्गिरसा समम् = उस समय अङ्गिरस मुनि के साथ

तं (चित्रकेतुं) संप्राप्य = उस (चित्रकेतु) के पास पहुँचकर

सुतस्य जीवम् उपदर्श्य = पुत्र के जीव को दिखाकर

"कस्य पुत्रः अस्मि ?" = "किसका पुत्र हूँ ?"

इति तस्य गिरा = इस प्रकार की उसकी वाणी से

विमोहं त्यक्त्वा = दुःख को त्याग करके

त्वदर्चनविधौ = आप की पूजा, भजन आदि की विधि को

नृपतिं चित्रकेतुम् न्ययुङ्क्त = राजा चित्रकेतु को बताया ।

भावार्थ—दयालु नारद मुनि ने तो उस समय अङ्गिरस मुनि के साथ उस (चित्रकेतु) के पास पहुँचकर उसके पुत्र के जीव को दिखाकर, "किस का पुत्र हूँ ?" इस प्रकार की उस की वाणी से प्रभावित होकर दुःख को त्याग कर आपकी पूजा, भजन आदि की विधि को राजा चित्रकेतु को बताया ।

Word-Explanation :

गिर् (As in इति तस्य गिरा) = Speech, Word, Language etc.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

स्तोत्रं च मन्त्रमपि नारदतोऽथ लब्ध्वा तोषाय शेषवपुषो ननु ते तपस्यन् ।
विद्याधराधिपतितां स हि सप्तरात्रे लब्ध्वाप्यकुण्ठमतिरन्वभजद्भवन्तम् ॥

पदविभागः—स्तोत्रम्, च, मन्त्रम्, अपि, नारदतः, अथ, लब्ध्वा, तोषाय, शेषवपुषः, ननु, ते, तपस्यन्, विद्याधराधिपतिताम्, सः, हि, सप्तरात्रे, लब्ध्वा, अपि, अकुण्ठमतिः, अन्वभजत्, भवन्तम् ॥

अन्वयः—अथ सः (चित्रकेतुः) हि नारदतः स्तोत्रं च मन्त्रम् अपि लब्ध्वा शेषवपुषः ते तोषाय ननु तपस्यन् सप्तरात्रे विद्याधराधिपतितां लब्ध्वा अपि अकुण्ठमतिः भवन्तम् अन्वभजत् ॥

अन्वयार्थः

अथ सः (चित्रकेतुः) हि = बाद में उस (चित्रकेतु) ने ही

नारदतः स्तोत्रं च मन्त्रम् अपि लब्ध्वा = नारदमहर्षि से स्तोत्र तथा मन्त्र भी प्राप्त करके

शेषवपुषः ते तोषाय ननु तपस्यन् = शेष रूपी (शेषनाग रूपी) आप को सन्तुष्ट करने के लिए ही तपस्या करके

सप्तरात्रे विद्याधराधिपतितां लब्ध्वा अपि = सात दिन- रात में विद्याधरों के अधिपति का स्थान प्राप्त होने पर भी

अकुण्ठमतिः भवन्तम् अन्वभजत् = अविचलित मन द्वारा आपका भजन किया ।

भावार्थ—बाद में उस (चित्रकेतु) ने ही नारदमहर्षि से स्तोत्र तथा मन्त्र भी प्राप्त करके शेष (शेषनाग) रूपी आप को सन्तुष्ट करने के लिए ही तपस्या करके, सात दिन-रात में विद्याधरों के अधिपति का स्थान प्राप्त होने पर भी अविचलित मन द्वारा आपका भजन किया ।

Word-Explanation :

अकुण्ठ = Not blunted, Unobstructed, Vigorous, Fixed, Excessive. (As in अकुण्ठमतिः)

॥ ७ ॥

तस्मै मृणालधवलेन सहस्रशीर्ष्णा रूपेण वद्धनुतिसिद्धगणावृतेन ।
प्रादुर्भवन्नचिरतो नुतिभिः प्रसन्नो दत्वात्मतत्वमनुगृह्य तिरोदधाथ ॥

पदविभागः—तस्मै, मृणालधवलेन, सहस्रशीर्ष्णा, रूपेण, बद्धनुतिसिद्धगणावृतेन, प्रादुर्भवन्, अचिरतः, नुतिभिः, प्रसन्नः, दत्वा, आत्मतत्वम्, अनुगृह्य, तिरोदधाथ ॥

अन्वयः—मृणालधवलेन सहस्रशीर्ष्णा बद्धनुतिसिद्धगणावृतेन रूपेण अचिरतः प्रादुर्भवन् नुतिभिः प्रसन्नः आत्मतत्वं दत्वा अनुगृह्य तिरोदधाथ ।

अन्वयार्थः

मृणालधवलेन सहस्रशीर्ष्णा = कमलनाल जैसे सफेद (शुभ्र) एक हजार शीर्षयुक्त

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बद्धनुतिसिद्धगणावृतेन रूपेण = स्तुति करते सिद्धगणों से आवृत्त स्वरूप के द्वारा

अचिरतः प्रादुर्भवन् = तुरन्त प्रत्यक्ष होते हुए

नुतिभिः प्रसन्नः = स्तोत्रों से प्रसन्न होकर

आत्मतत्वं दत्वा अनुगृह्य तिरोदधाथ। = आत्मतत्त्व के उपदेश को देते हुए अनुग्रह करके अन्तर्धान हो गये।

भावार्थ—कमलनाल जैसे सफेद (शुभ्र) एक हजार शीर्षयुक्त स्तुति करते सिद्धगणों से आवृत्त स्वरूप के द्वारा तुरन्त प्रत्यक्ष होते हुए स्तोत्रों से प्रसन्न होकर, आत्मतत्व के उपदेश को देते हुए अनुग्रह करके अन्तर्धान हो गये।

Word-Explanation :

मृणालः =The fibrous root of a lotus. (As in मृणालधवलेन) (कमलककड़ी)

बद्ध= Cherished, Entertained, Combined, Bound etc. (Here: Entertained) (As in बद्धनुति)

प्रादुस् = visibly.

प्रादुर्भावः = Making Visible, Manifestation, Coming into existance etc. (As in प्रदुर्भवन्)

॥ ८ ॥

त्वद्भक्तमौलिरथ सोऽपि च लक्षलक्षम् वर्षाणि हर्षुलमना भुवनेषु कामम्।
सङ्गापयन् गुणगणं तव सुन्दरीभिः सङ्गातिरेकरहितो ललितं चचार॥

पदविभागः—त्वद्भक्तमौलिः, अथ, सः, अपि, च, लक्षलक्षम्, वर्षाणि, हर्षुलमनाः भुवनेषु, कामम्, सङ्गापयन्, गुणगणम्, तव, सुन्दरीभिः, सङ्गातिरेकरहितः, ललितम्, चचार।

अन्वयः—अथ त्वद्भक्तमौलिः सः (चित्रकेतुः) अपि च लक्षलक्षं वर्षाणि हर्षुलमनाः भुवनेषु तव गुणगणं सुन्दरीभि कामं सङ्गापयन्, सङ्गातिरेकरहितः ललितः चचार।

अन्वयार्थः

अथ त्वद्भक्तमौलिः सः (चित्रकेतुः) = बाद में आपके भक्तों में श्रेष्ठ वह (चित्रकेतु)

अपि च लक्षलक्षं वर्षाणि हर्षुलमनाः भुवनेषु = और भी लाखों वर्षों तक सन्तुष्ट मन से समस्त लोकों में

तव गुणगणं = आप का गुणगान करता हुआ

सुन्दरीभिः कमं सङ्गापयन् = सुन्दरियों द्वारा जी भरकर प्रशंसित होता हुआ

सङ्गातिरेकरहितः = सुख-भोगों से विरक्त होकर

ललितः चचार। = सुखपूर्वक रहा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—बाद में आपके भक्तों में श्रेष्ठ वह (चित्रकेतु) और भी लाखों वर्षों तक सन्तुष्ट मन से समस्त लोकों में आपका गुणगान करता हुआ सुन्दरियों द्वारा जी भरकर प्रशंसित होता हुआ सुख-भोगों से विरक्त होकर सुखपूर्वक रहा।

Word-Explanation :

मौलि = Head, Best, Foremost. (As in त्वद्भक्तमौलिः)

॥ ९ ॥

अत्यन्तसङ्गविलयाय भवत्प्रणुन्नो नूनं स रूप्यगिरिमाप्य महत्समाजे।
निःशङ्कमङ्ककृतवल्लभमङ्गजारिं तं शङ्करं परिहसन्नुमयाऽभिशेपे ॥

पदविभागः—अत्यन्तसङ्गविलयाय, भवत्प्रणुन्नः, नूनम्, सः, रूप्यगिरिम्, आप्य, महत्समाजे, निःशङ्कम्, अङ्ककृतवल्लभम्, अङ्गजारिम्, तम्, शङ्करम्, परिहसन्, उमया, अभिशेपे ॥

अन्वयः—अत्यन्तसङ्गविलयाय भवत्प्रणुन्नः नूनं सः रूप्यगिरिम् आप्य, महत्समाजे, निःशङ्कम् अङ्ककृतवल्लभम् अङ्गजारिं तं शंकरं परिहसन् उमया अभिशेपे ॥

अन्वयार्थः

अत्यन्तसङ्गविलयाय = विषय-वासना का त्याग करने के लिए

भवत्प्रणुन्नः नूनं सः = निश्चित रूप से आप से प्रेरित वह (चित्रकेतु)

रूप्यगिरिम् आप्य = कैलास पर्वत पर जाकर

महत्समाजे = महान् लोगों के समाज में

निःशङ्कम् अङ्ककृतवल्लभम् = निःसंकोच पत्नी को गोद में रखे

अङ्गजारिं तं शंकरम् = कामदेव के शत्रु उस शंकर का

परिहसन् उमया अभिशेपे = परिहास करके उमा (पार्वती) द्वारा शाप को प्राप्त हुआ।

भावार्थ—विषय-वासना का त्याग करने के लिए निश्चित रूप से आपसे प्रेरित होकर वह (चित्रकेतु) कैलास पर्वत पर जाकर, महान् लोगों के समाज में निःसंकोच पत्नी को गोद में रखे कामदेव के शत्रु उस शंकर का परिहास करके उमा (पार्वती) द्वारा शाप को प्राप्त हुआ।

Word-Explanation :

विल् (विलति, वेलयति, विलयते) =To throw, To break. (As in अत्यन्तसङ्गविलयाय)

प्रणुन्न = Driven, Set in Motion (प्रेरित) (As in भवत्प्रणुन्न)

रूप्य = Beautiful, Lovely (Here:Kailash Mountain) (As in रूप्यगिरिम् आप्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वल्लभ = Beloved. (As in अङ्ककृतवल्लभम्)

॥ १० ॥

निस्सम्भ्रमस्त्वयमयाचितशापमोक्षो वृत्रासुरत्वमुपगम्य सुरेन्द्रयोधी ।
भक्त्यात्मतत्वकथनैः समरे विचित्रं शत्रोरपि भ्रममपास्य गतः पदं ते ॥

पदविभागः—निस्सभ्रमः, तु, अयम्, अयाचितशापमोक्षः, वृत्रासुरत्वम्, उपगम्य, सुरेन्द्रयोधी, भक्त्या, आत्मतत्वकथनैः, समरे, विचित्रम्, शत्रोः, अपि भ्रमम्, अपास्य, गतः, पदम्, ते ॥

अन्वयः—अयं (चित्रकेतुः) तु निस्सभ्रमः अयाचितशापमोक्षः वृत्रासुरत्वम् उपगम्य सुरेन्द्रयोधी भक्त्या आत्मतत्वकथनैः समरे शत्रोः अपि भ्रमम् अपास्य ते पदं गतः, विचित्रम् ॥

अन्वयार्थः

अयं (चित्रकेतुः) तु निस्सभ्रमः = यह (चित्रकेतु) तो संकोचरहित

अयाचितशापमोक्षः = शाप के विमोचन के लिए याचना न करता हुआ ।

वृत्रासुरत्वम् उपगम्य = वृत्रासुर बनकर

सुरेन्द्रयोधी भक्त्या = इन्द्र के साथ युद्ध करते समय, भक्ति के कारण

आत्मतत्वकथनैः समरे = आत्मतत्त्वोपदेशों द्वारा युद्ध में

शत्रोः अपि भ्रमम् अपास्य = शत्रु का भी भ्रम (अज्ञान) दूर कराकर

ते पदं गतः, विचित्रम् । = आपके धाम (वैकुण्ठ) को पहुँचा, आश्चर्य !

भावार्थ—इस वृत्तान्त (कथा) को तुम्हें तथा मुझे जो प्रातःकाल में गाता है वह यह अत्यन्त श्रेयस् को प्राप्त करने वाला होगा । इस प्रकार उसको कहकर उसके साथ स्वस्थान (वैकुण्ठ) को गये । हे, गुरुवायुपुराधीश, विष्णो ! आप मेरी रक्षा करें ।

Word-Explanation :

वृत्तम् = An event, History, Account etc. (As in एतत् वृत्तम्)

धिष्ण्यम् =A seat, An abode, House, Place, Site etc. (As in धिष्ण्यं गतः)

भूयस् = More, Numerous, Abundant (As in भूयसे श्रेयसे)

श्रेयस् = Superior, Virtue, Bliss, Moral or religious Merit, Rightous deeds etc. (As in भूयसे श्रेयसे)

॥ इति षड्विंशतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२७

अमृतमथने कूर्मवितारवर्णनम्

[प्रहर्षिणीछन्दः]

॥ १ ॥

दुर्वासाः सुरवनिताप्तदिव्यमाल्यं शक्राय स्वयमुपदाय, तत्र भूयः ।
नागेन्द्रप्रतिमृदिते शशाप शक्रं, का क्षान्तिस्त्वादितरदेवतांशजानाम् ॥

पदविभागः—दुर्वासाः, सुरवनिताप्तदिव्यमाल्यम्, शक्राय, स्वयम्, उपदाय, तत्र, भूयः, नागेन्द्रप्रतिमृदिते, शशाप, शक्रम्, का, क्षान्तिः, त्वात्, इतरदेवतांशजानाम् ।

अन्वयः—दुर्वासाः सुरवनिताप्तदिव्यमाल्यं शक्राय स्वयम् उपदाय तत्र भूयः नागेन्द्रप्रतिमृदिते शक्रं शशाप । त्वात् इतरदेवतांशजानां का क्षान्ति ?

अन्वयार्थः

दुर्वासाः सुरवनिताप्तदिव्यमाल्यम् = दुर्वासा महर्षि देवस्त्रियों से प्राप्त दिव्य माला को

शक्राय स्वयम् उपदाय = इन्द्र को देखकर (स्वयम्)

तत्र भूयः नागेन्द्रप्रतिमृदिते = वहाँ उस (माला) के श्रेष्ठ हाथी (ऐरावत) द्वारा पैर से दबाकर चूर-चूर होने से,

शक्रं शशाप । = इन्द्र को शाप दिया ।

त्वात् इतरदेवतांशजानां का क्षान्ति ? = आपके अतिरिक्त अन्य देवताओं के अंश से जन्म लेने वालों को क्षमा के बारे मे क्या पता है ?

भावार्थ—दुर्वासा महर्षि देवस्त्रियों से प्राप्त दिव्य माला को इन्द्र को देकर, (स्वयम्) वहाँ उस (माला) के श्रेष्ठ हाथी (ऐरावत) द्वारा पैर से दबाकर चूर-चूर होने से, इन्द्र को शाप दिया । आपके अतिरिक्त अन्य देवताओं के अंश से जन्म लेने वालों को क्षमा के बारे में क्या ज्ञान है ?

Word-Explanation :

प्रतिः = A Present, A gift. उपहार, तोफा (As in नागेन्द्रप्रतिमृदिते)

मृद् (मृद्रति, मृदित) = To squeeze, Press, Rub, To trample or tread upon, Crush to pieces. (As in प्रतिमृदिते)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाग = An elephant, A Shark, A cruel or tyrannical person, Number seven, A snake etc. etc. (Here elephant) (As in नागेन्द्रप्रतिमृदिते)

क्षान्ति = Patience, Forbearance, Forgiveness. (As in का क्षान्ति)

(Incidentally क्षान्तु: means father who is supposed to be patient and full of forgiveness)

॥ २ ॥

शापेन प्रथितजरेऽथ निर्जरेन्द्रे देवेष्वप्यसुरजितेषु निष्प्रभेषु ।
शर्वाद्याः कमलजमेत्य सर्वदेवाः निर्वाणप्रभव, समं भवन्तमापुः ॥

पदविभागः—शापेन, प्रथितजरे, अथ, निर्जरेन्द्रे, देवेषु, अपि. असुरजितेषु, निष्प्रभेषु, शर्वाद्याः, कमलजम्, एत्य, सर्वदेवाः, निर्वाणप्रभव, समम्, भवन्तम्, आपुः ॥

अन्वयः—अथ निर्जरेन्द्रे शापेन प्रथितजरे देवेषु अपि असुरजितेषु निष्प्रभेषु शर्वाद्याः सर्वदेवाः कमलजम् एत्य समं निर्वाणप्रभवम् भवन्तम् आपुः ॥

अन्वयार्थः

अथ निर्जरेन्द्रे शापेन प्रथितजरे = बाद में जरा से न बाधित इन्द्र के शाप द्वारा जरा से बाधित होने पर

देवेषु अपि असुरजितेषु = देवों पर भी असुरों की जीत होने से

निष्प्रभेषु शर्वाद्याः सर्वदेवाः = निष्प्रभ होने पर शिव आदि समस्त देवगण

कमलजम् एत्य समम् निर्वाणप्रभवम् = कमल से जन्मे ब्रह्मा के समीप जाकर सब मिलकर, सुख के उत्पत्तिस्थान

भवन्तम् आपुः = आपके समीप आये ।

भावार्थ—बाद में जरा से न बाधित इन्द्र के शाप द्वारा जरा से बाधित होने पर देवों पर भी असुरों की जीत होने से निष्प्रभ होने पर शिव आदि समस्त देवगण कमल से जनित ब्रह्म के समीप जाकर, सब मिलकर, सुख के उत्पत्तिस्थान आपके समीप आये ।

Word-Explanation :

जरत् = Old, Aged, Infirm. (As in प्रथिजरे)

निर्वाणम् = Final beautitude, Eternal emancipation. (As in निर्वाणप्रभवः)

प्रभवः = Source, Origin, Birth place, An epithet for Vishnu ।

॥ ३ ॥

ब्रह्माद्यैः स्तुतमहिमा चिरं तदानीं प्रादुष्षन् वरद, पुरः परेण धाम्ना ।
"हे देवा, दितिजकुलैर्विधाय सन्धिं पीयूषं परिमथते"ति पर्यशास्त्वम् ॥

Funding by MKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—ब्रह्माद्यैः, स्तुतमहिमा, चिरम्, तदानीम्, प्रादुष्षन्, वरद, पुरः, परेण, धाम्ना, हे, देवाः, दितिजकुलैः, विधाय, सन्धिम्, पीयूषम्, परिमथते, इति, पर्यशाः, त्वम् ॥

अन्वयः—वरद, ब्रह्माद्यैः चिरं स्तुतमहिमा त्वं तदानीं परेण पुरः धाम्ना प्रादुष्षन् "हे देवाः, (यूयं) दितिजकुलैः सन्धि विधाय पीयूषं परिमथत" इति पर्यशाः ।

अन्वयार्थः

वरद, ब्रह्माद्यैः चिरं स्तुतमहिमा = हे वरद ! ब्रह्मा आदि के द्वारा बहुत समय तक स्तुति करके

त्वं तदानीं परेण पुरः = आप तब उनके सम्मुख

धाम्ना प्रादुष्षन् = शोभा के साथ आविर्भूत होकर

"हे देवाः, (यूयं) दितिजकुलैः सन्धिं विधाय पीयूषम् परिमथत" = "हे देवगण ! (आप लोग) असुरों से सन्धि करके अमृत का मन्थन करके प्राप्त करो"

इति पर्यशाः = इस प्रकार उपदेश दिया ।

भावार्थ—हे वरद ! ब्रह्मा आदि के द्वारा बहुत समय तक स्तुति करके, आप तब उनके सम्मुख शोभा के साथ आविर्भूत होकर, "हे देवगण ! (आप लोग) असुरों के साथ सन्धि करके अमृत का मन्थन करके प्राप्त करो" इस प्रकार उपदेश दिया ।

Word-Explanation :

पीयूषम्/पीयूषः = Nectar, Ambrosia. Amrit, The milk of a cow during first seven days of calving. (Here-Nectar) (As in पीयूषं परिमथत)

पर = Other, Different (As in परेण पुरः)

प्रादुष्षन् = Manifestation (As in धाम्ना प्रादुष्षन्)

धामन् = Majestic lustre, Light, Splendour etc. (As in धाम्ना प्रादुष्षन्)

॥ ४ ॥

सन्धानं कृतवति दानवैः सुरौघे मन्थानं नयति मदेन मन्दराद्रिम् ।
भ्रष्टेऽस्मिन् बदरमिवोद्वहन् खगेन्द्रे सद्यस्त्वं विनिहितवान् पयः पयोधौ ॥

पदविभागः—सन्धानम्, कृतवति, दानवैः, सुरोघे, मन्थानम्, नयति, मदेन, मन्दराद्रिम्, भ्रष्टे, अस्मिन्, बदरम्, इव, उद्वहन्, खगेन्द्रे, सद्यः, त्वम्, विनिहितवान्, पयः पयोधौ ॥

अन्वयः—सुरौघे दानवैः (सह) सन्धानं कृतवति, मन्थानं मन्दराद्रिं मदेन नयति (सति) अस्मिन् भ्रष्टे सद्यः त्वं बदरम् इव खगेन्द्रे उद्वहन् पयः पयोधौ विनिहितवान् ॥

अन्वयार्थः

सुरौघे दानवैः (सह) सन्धानं कृतवति = देवगण असुरों के साथ सन्धि करके

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्थानं मन्दराद्रिंमदेन नयति (सति) = मन्थन करने के लिए मन्दगिरि को मद से लाते समय (अहंकार से लाते समय)

अस्मिन् भ्रष्टे = उनके (देवगण के) गिरने पर

सद्यः त्वं = उसी समय आपने

खगेन्द्रे बदरम् इव उद्वहन् = गरुड़ के ऊपर बेर के फल के समान उस (पर्वत) को लेकर

पयः पयोधौ विनिहितवान् = क्षीर सागर में स्थापित किया।

भावार्थ—देवगण असुरों के साथ सन्धि करके, मन्थन करने के लिए मन्दगिरि को गर्व से लाते समय, उनके (देवगण के) गिरने पर उसी समय आपने गरुड़ के ऊपर बेर के फल के समान उस (पर्वत) को लेकर क्षीर सागर में स्थापित किया।

Word-Explanation :

बदरम् = Fruit of Jujube tree (बेर) (As in सद्यः त्वं बदरम् इव)

भ्रष्ट = Fallen, Fallen from, Dropped down. (As in अस्मिन् भ्रष्टे)

मथिन् = A churning stick. (As in मन्थानम्)

॥ ५ ॥

आधाय द्रुतमथ वासुकिं वरत्रां पाथोधौ विनिहितसर्वबीजजाले।
प्रारब्धे मथनविधौ सुरासुरैस्तैर्व्याजात्त्वं भुजगमुखेऽकरोः सुरारीन्॥

पदविभागः—आधाय, द्रुतम, वासुकिम्, वरत्राम्, पाथोधौ, विनिहितसर्वबीजजाले, प्रारब्धे, मथनविधौ, सुरासुरैः, तैः, व्याजात्, त्वम्, भुजगमुखे, अकरोः, सुरारीन्।

अन्वयः—अथ तैः सुरासुरैः द्रुतं वासुकिं वरत्राम् आधाय, विनिहितसर्वबीजजाले पाथोधौ मथनविधौ प्रारब्धे त्वं व्याजात् सुरारीन् भुजमुखे अकरोः।

अन्वयार्थः

अथ तैः सुरासुरैः = बाद में उन देव तथा असुरों के द्वारा

द्रुतं वासुकिं वरत्राम् आधाय = तुरन्त वासुकि को रस्सी बनाकर

विनिहितसर्वबीजजाले पाथोधौ = समस्त औषधियों को डालकर समुद्र में

मथनविधौ प्रारब्धे = मन्थन-क्रिया आरम्भ करने पर

त्वं व्याजात् सुरारीन् = आपने बहाने से असुरों को

भुजगमुखे अकरोः = सर्प के मुख के भाग में करवाया।

भावार्थ—बाद में उन देव तथा असुरों के द्वारा तुरन्त वासुकि को रस्सी बनाकर समस्त औषधियों को डालकर समुद्र में मन्थन-क्रिया आरम्भ करने पर आपने बहाने से असुरों को सर्प के मुख के भाग में करवाया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

वरत्रा = A strap (As in वासुकिं वरत्राम्)

पाथम् = Water (As in पाथोधौ)

पाथोधम् = Ocean.

भुजगः = Serpant.

॥ ६ ॥

क्षुब्धाद्रौ क्षुभितजलोदरे तदानीम् दुग्धाब्धौ गुरुतरभारतो निमग्ने ।
देवेषु व्यथिततमेषु तत्प्रियैषी प्राणैषीः कमठतनुं कठोरपृष्ठाम् ॥

पदविभागः—क्षुब्धाद्रौ, क्षुभितजलोदरे, तदानीम्, दुग्धाब्धौ, गुरुतरभारतः, निमग्ने, देवेषु, व्यथिततमेषु, तत्प्रियैषी, प्राणैषीः, कमठतनुम्, कठोरपृष्ठाम् ॥

अन्वयः—क्षुभितजलोदरे क्षीराब्धे तदानीं क्षुब्धाद्रौ गुरुतरभारतः निमग्ने देवेषु व्यथिततमेषु तत्प्रियैषी त्वं कठोर-पृष्ठां कमठतनुं प्राणैषीः ।

अन्वयार्थः

क्षुभितजलोदरे क्षीराब्धे = उथल-पुथल होते क्षीर-सागर में

तदानीं क्षुब्धाद्रौ गुरुतरभारतः = तब इधर-उधर हिलते मन्दरपर्वत के भार से

निमग्ने = नीचे डूबते समय

देवेषु व्यथिततमेषु = देवों के दुःखी होने से

तत्प्रियैषी त्वम् = उनके सुख के इच्छुक आपने

कठोरपृष्ठां कमठतनुम् प्राणैषीः । = शक्तियुक्त पीठ वाले कूर्म (कछुए) का रूप स्वीकार किया ।

भावार्थ—उथल-पुथल होते क्षीर-सागर में उस समय इधर-उधर हिलते मन्दरपर्वत के भार (वजन) से नीचे डूबते समय, देवों को दुःखी होने से, उनके सुख के इच्छुक आपने शक्तियुक्त पीठ वाले कछुए (कूर्म) का रूप स्वीकार किया ।

Word-Explanation :

क्षुब्ध = Agitated, Shaken. (As in क्षुब्धाद्रौ)

क्षुभ् = Shaken, Agitated. (क्षोभति, क्षुभ्यति) (क्षुब्ध, क्षुम्नाति, क्षुभित) (As in क्षुभितजलोदरे)

व्यथित = Afflicted, Distressed, Pained, Alarmed, Agitated, Troubled etc. (As in व्यथिततमेषु)

कमठः = A Tortoise (As in कमठतनुम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

वज्रातिस्थिरतरकर्परेण विष्णो विस्तारात् परिगतलक्षयोजनेन।
अम्भोधेः कुहरगतेन वर्ष्मणा त्वम् निर्मग्नं क्षितिधरनाथमुन्निनेथ।।

पदविभागः—वज्रातिस्थिरतरकर्परेण, विष्णो, विस्तारात्, परिगतलक्षयोजनेन, अम्भोधेः, कुहरगतेन, वर्ष्मणा, त्वम्, निर्मग्नम्, क्षितिधरनाथम्, उन्निनेथ।

अन्वयः—विष्णो, त्वं वज्रातिस्थिरतरकर्परेण विस्तारात् परिगतलक्षयोजनेन, अम्भोधेः कुहरगतेन वर्ष्मणा निर्मग्नं क्षितिधरनाथम् उन्निनेथ॥

अन्वयार्थः

विष्णो, त्वम् वज्रातिस्थिरतरकर्परेण = हे विष्णो ! आपने वज्र से भी अधिक शक्तिशाली आवरण द्वारा

विस्तारात् परिगतलक्षयोजनेन = विस्तार से लक्ष योजन से अधिक

अम्भोधेः कुहरगतेन वर्ष्मणा = समुद्र के नीचे पहुँचे शरीर से

निर्मग्नं क्षितिधरनाथम् उन्निनेथ। = डूबते श्रेष्ठ पर्वत को ऊपर उठाया।

भावार्थ—हे विष्णो ! आपने वज्र से भी अधिक शक्तिशाली आवरण द्वारा विस्तार से लक्ष योजन से अधिक, समुद्र के नीचे पहुँचे शरीर से डूबते श्रेष्ठ पर्वत को ऊपर उठाया।

Word-Explanation :

कुहरं = A cavity, Hollow (As in कुहरगतेन)

कर्परः = An iron saucepan, A kind of weapon, The Skull (Here: The Skull covering the back of a Tortoise) (As in वज्रातिस्थिरतरकर्परेण)

॥ ८ ॥

उन्मग्ने झटिति तदा धराधरेन्द्रे निर्मेथुर्दृढ़मिह सम्मदेन सर्वे।
आविश्य द्वितयगणेऽपि सर्पराजे वैवश्यं परिशमयन्नवीवृधस्तान्॥

पदविभागः—उन्मग्ने, झटिति, तदा, धराधरेन्द्रे, निर्मेथुः, दृढम्, इह, सम्मदेन, सर्वे, आविश्य, द्वितयगणे, अपि, सर्पराजे, वैवश्यम्, परिशमयन्, अवीवृधः तान्॥

अन्वयः—तदा धराधरेन्द्रे झटिति उन्मग्ने, इह सर्वे सम्मदेन दृढं निर्मेथुः। (त्वं) द्वितयगणे, सर्पराजे अपि आविश्य, वैवश्यं परिशमयन् तान् अवीवृधः॥

अन्वयार्थः

तदा धरधरेन्द्रे झटिति उन्मग्ने = उस समय पर्वत श्रेष्ठ के तुरन्त ऊपर उठने पर

इह सर्वे सम्मदेन दृढं निर्मेथुः। = इधर सब लोग सन्तुष्ट होकर जोर से मन्थन करने लगे।

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(त्वं) द्वितयगणे, सर्पराजे अपि आविश्य = (आप) ने दोनों गणों तथा सर्पराज वासुकि में भी प्रवेश करके,

वैवश्यं परिशमयन् = थकावट दूर करके,

तान् अवीवृधः । = उनको उत्साहित किया ।

भावार्थ—उस समय पर्वत श्रेष्ठ के तुरन्त ऊपर उठने से इधर सब लोग सन्तुष्ट होकर जोर से मन्थन करने लगे । (आप) ने दोनों गणों तथा सर्पराज वासुकि में प्रवेश करके, थकावट दूर करके, उनको उत्साहित किया ।

Word-Explanation :

झटिति = Quickly

मद् (मद्यति, मत्त) - = Intoxicated, To revel, Rejoiced, Gladden, Delight etc. (As in सम्मेदन दृढं निर्मेथुः)

द्वितय/द्वितयी = Double, Two-fold, Consisting of or divided into two. (As in द्वितयगणे)

॥ ९ ॥

उद्दामभ्रमणजवोन्नमद्गिरीन्द्रन्यस्तैकस्थिरतरहस्तपङ्कजं त्वाम् ।
अभ्रान्ते विधिगिरिशादयः प्रमोदादुद्भ्रान्ता नुनुवुरुपात्तपुष्पवर्षाः ॥

पदविभागः—उद्दामभ्रमणजवोन्नमद्गिरीन्द्रन्यस्तैकस्थिरतरहस्तपङ्कजम्, त्वाम्, अभ्रान्ते, विधिगिरिशादयः, प्रमोदात्, उद्भ्रान्ताः, नुनुवुः, उपात्तपुष्पवर्षाः ॥

अन्वयः—उद्दामभ्रमणजवोन्नमद्गिरीन्द्रन्यसैकस्थिरतरहस्तपङ्कजम्, त्वाम् अभ्रान्ते विधिगिरिशादयः प्रमोदात् उद्भ्रान्ताः उपात्तपुष्पवर्षाः नुनुवुः ॥

अन्वयार्थः

उद्दामभ्रमणजवोन्नमद्गिरीन्द्रन्यसैकस्थिरतरहस्तपङ्कजम् = तेजी से घूमने के कारण ऊपर को आते मन्दरपर्वत पर कमल जैसे एक हाथ को रखते हुए

त्वाम् अभ्रान्ते विधिगिरिशादयः = आपकी आकाश में ब्रह्मा, शिव, आदि ने

प्रमोदात् उद्भ्रान्ताः = प्रसन्नतापूर्वक किंकर्तव्यविमूढ (विवश) होकर

उपात्तपुष्पवर्षाः नुनुवुः । = पुष्प-वृष्टि करके स्तुति की ।

भावार्थ—तेजी से घूमने के कारण ऊपर को आते मन्दरपर्वत पर कमल जैसे एक हाथ को रखते हुए आपकी आकाश में ब्रह्मा, शिव आदि ने प्रसन्नतापूर्वक विवश होकर, पुष्पवृष्टि करके स्तुति की ।

Word-Explanation :

उद्दाम = Unbound, Unchecked, free, Strong etc. (As in उद्दामभ्रमण—)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जव Swift. (As in उद्दामभ्रमणजवोन्नमद्गिरीन्द्र-) =

भ्रान्त = Perplexed, Confused, Moving to & fro. (As in उद्भ्रान्त)

उद् = A Prefix to nouns and verbs to mean superiority.

(उदभ्रान्त = Highly Perplexed)

॥ १० ॥

दैत्यौघे भुजगमुखानिलेन तप्ते तेनैव त्रिदशकुलेऽपि किञ्चिदार्त्ते ।
कारुण्यात्तव किल देव, वारिवाहाः प्रावर्षन्नमरगणान् न दैत्यसङ्घान् ॥

पदविभागः—दैत्यौघे, भुजगमुखानिलेन, तप्ते, तेन, एव, त्रिदशकुले, अपि, किञ्चित, आर्त्ते, कारुण्यात्, तव, किल, देव, वारिवाहाः, प्रावर्षन्, अमरगणान्, न, दैत्यसङ्घान् ॥

अन्वयः—दैत्यौघे भुजगमुखानिलेन तप्ते (सति) तेन एव त्रिदशकुले अपि किञ्चित् आर्त्ते, देव, तव कारुण्यात् किल वारिवाहाः अमरगणान् प्रावर्षन् दैत्यसङ्घान् न ।

अन्वयार्थः

दैत्यौघे भुजगमुखानिलेन तप्ते (सति) = दैत्यों के समूह में सर्प के मुख से निकले विष-वायु से जलते समय

तेन एव त्रिदशकुले अपि किञ्चित् आर्त्ते = उसी से ही देवगणों में भी कुछ असर होने से

देव, तव कारुण्यात् किल वारिवाहाः अमरगणान् प्रावर्षन् = हे देव ! आपकी कृपा से ही मेघ देवगणों में बरसे ।

दैत्यसङ्घान् न । = दैत्य (असुर)-गणों में नहीं

भावार्थ—दैत्यों (असुरों) के गण (में) सर्प के मुख से निकले विष-वायु से जलते समय, उसी से ही देवगणों पर भी कुछ असर पड़ने पर, हे देव ! आपकी कृपा से ही मेघ देवगणों में बरसे, दैत्य-गणों में नहीं ।

Word-Explanation :

अनिलः = Wind, God of wind etc. (As in मुखानिलेन तप्ते)

आर्त्त = Afflicted, Stuck by, Suffering from (As in त्रिदशकुले किञ्चित् आर्त्ते)

त्रिदशकुले = Deva's Group

वरिवाहः/वरिवाहनः = Cloud. (As in वारिवाहाः अमरगणान्)

॥ ११ ॥

उद्भ्राम्यद्बहुतिमिनक्रचक्रवाले तत्राब्धौ चिरमथितेऽपि निर्विकारे ।
एकस्त्वं करयुगकृष्टसर्पराजः संराजन् पवनपुरेश, पाहि रोगात् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—उद्भ्राम्यद्बहुतिमिनक्रचक्रवाले, तत्र, अब्धौ, चिरमथिते, अपि, निर्विकारे, एकः, त्वम्, करयुगकृष्टसर्पराजः संराजन्, पवनपुरेश, पाहि, रोगात् ॥

अन्वयः—उद्भ्राम्यद्बहुतिमिनक्रचक्रवाले तत्र अब्धौ, चिरमथितें अपि निर्विकारे एकः करयुगकृष्टसर्पराजः संराजन् त्वं, पवनपुरेश, रोगात् (मां) पाहि ।

अन्वयार्थः

उद्भ्राम्यद्बहुतिमिनक्रचक्रवाले तत्र अब्धौ = उथल-पुथल करके घूमते तिमिंगिलों तथा घड़ियालों से भरे उस समुद्र में

चिरमथिते अपि निर्विकारे = बहुत मन्थन करने पर भी कोई भी विकार नहीं होने पर

एकः करयुगकृष्टसर्पराजः = अकेले दोनों हाथों से सर्पराज (वासुकी) को खींचकर मन्थन करते

संराजन् पवनपुरेश त्वं रोगात् (मां) पाहि । = शोभायमान हे गुरुवायुपराधीश ! आप रोग से मेरी रक्षा करें ।

भावार्थ—उथल-पुथल करके घूमते तिमिंगिलों तथा घड़ियालों से भरे उस समुद्र में बहुत समय मन्थन करने पर भी कोई भी विकार न होने से, अकेले दोनों हाथों से सर्पराज को खींचकर मन्थन करते शोभायमान आप, गुरुवायुपराधीश, रोग से मेरी रक्षा करें ।

Word-Explanation :

तिमि = A kind of whale or fish of an enormous size (As in बहुतिमिनक्रचक्रवाले)

नक्रः = A crocodile. (As in तिमिनक्रचक्रवाले)

चक्रवालम्/चक्रवाडम्/चक्रवालः/चक्रवालः = A ring, A circle, A collection, Group, Mass, Multitude (Here: Multitude) (बहुतिमिनक्रचक्रवाले)

कर्षणम् = Drawing, Pulling, Dragging etc. (As in करयुगेकृष्ट)

राज् (राजति/राजिते/राजित) = To shine, To appear splendid or Beautiful. (As in संराजन् त्वं पवनपुरेश)

॥ इति सप्तविंशतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२८

लक्ष्मीस्वयंवरवर्णनं अमृतोत्पत्तिवर्णनञ्च

[वसन्तमालिकाछन्दः]

॥ १ ॥

गरलं तरलानलं पुरस्ताज्जलधेर्द्विजगाल कालकूटम्।
अमरस्तुतिवादमोदनिघ्नो गिरिशस्तन्निपपौ भवत्प्रियार्थम्॥

पदविभागः—गरलम्, तरलानलम्, पुरस्तात्, जलधेः, उद्विजगाल, कालकूटम्, अमरस्तुतिवादमोदनिघ्नः, गिरिशः, तत्, निपपौ, भवत्प्रियार्थम्॥

अन्वयः—पुरस्तात्, जलधेः तरलानलं कालकूटं गरलम् उद्विजगाल। गिरिशः अमरस्तुतिवादमोदनिघ्नः तत् (कालकूटं गरलं) भवत्प्रियार्थं निपपौ।

अन्वयार्थः

पुरस्तात् उदधेः तरलानलम् = सब से पहले समुद्र से निकलती अग्नि-ज्वाला के साथ

कालकूटं गरलम् उद्विजगाल। = कालकूट विष निकला।

गिरिशः अमरस्तुतिवादमोदनिघ्नः। = शिवजी ने देवों की स्तुति से सन्तुष्ट होकर

तत् (कालकूटं गरलं) भवत्प्रियार्थम् निपपौ। = उस (कालकूट विष) को आपकी प्रीति के लिए पिया।

भावार्थ—सबसे पहले समुद्र से निकलती अग्नि-ज्वाला के साथ कालकूट विष निकला। शिवजी ने देवों की स्तुति से सन्तुष्ट होकर उस कालकूट विष को आपकी प्रीति के लिए पिया।

Word-Explanation :

तरल = Trembling, Shaking, Unsteady. (As in तरलानलम्)

गरलः/गरलम् = Poison in general, The Venom of a snake. (As in कालकूटं गरलम्)

निघ्न = Dependent, Subservient, Obedient, Docile. (As in अमरस्तुतिवादमोदनिघ्नः)

कालकूटः/कालकूटम् = A deadly poison (As in कालकूटं गरलम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation; Chandigarh.

॥ २ ॥

विमथस्तु सुरासुरेषु जाता सुरभिस्तामृषिषु न्यधास्त्रिधामन् ।
हयरत्नमभूदथेभरत्नं द्युतरुश्चाप्सरसः सुरेषु तानि ॥

पदविभागः—विमथस्तु, सुरासुरेषु, जाता, सुरभिः, ताम्, ऋषिषु, न्यधाः, त्रिधामन्, हयरत्नम्, अभूत्, अथ, इभरत्नम्, द्युतरुः, च, अप्सरसः, सुरेषु, तानि ।

अन्वयः—सुरासुरेषु विमथत्सु सुरभिः जाता । त्रिधामन्, (त्वं) ताम् ऋषिषु न्यधाः । अथ हयरत्नम्, इभरत्नं, द्युतरुः अभूत् । अप्सरसः च (अभुवन्) । त्वं तानि सुरेषु (न्यधाः) ।

अन्वयार्थः

सुरासुरेषु विमथत्सु = देव तथा असुरगणों के द्वारा मन्थन करते समय

सुरभिः जाता । = कामधेनु उत्पन्न हुई ।

त्रिधामन्, (त्वं) ताम् ऋषिषु न्यधाः = हे तीनों लोकों के नाथ ! (आपने) उसको ऋषियों को दे दिया ।

अथ हयरत्नं, इभरत्नं, द्युतरुः अभूत् । = बाद में श्रेष्ठ घोड़े (उच्चैश्रवस्), श्रेष्ठ हाथी (ऐरावत), कल्पतरु प्रकट हुए ।

अप्सरसः च (अभुवन्) । = अप्सरा स्त्रियां भी प्रकट हुईं ।

(त्वं) तानि सुरेषु (न्यधाः) = (आपने) उनको देवों को प्रदान किया ।

भावार्थ—देव तथा असुरगणों के द्वारा मन्थन करते समय कामधेनु उत्पन्न हुई । हे तीनों लोकों के नाथ (आपने) उसको ऋषियों को प्रदान किया । बाद में श्रेष्ठ घोड़े (उच्चैश्रवस्), श्रेष्ठ हाथी (ऐरावत्), कल्पवृक्ष प्रकट हुए । अप्सरा स्त्रियां भी प्रकट हुईं । (आपने) उन सबको देवों को प्रदान किया ।

Word-Explanation :

इभः = Elephant (As in हयरत्नमभूदथेभरत्नम्)

हयः = Horse (As in -do-)

द्युतरुः - कल्पवृक्ष

द्यु = Sky

तरुः = Tree.

॥ ३ ॥

जगदीश, भवत्परा तदानीं कमनीया कमला बभूव देवी ।
अमलामवलोक्य यां विलोलः सकलोऽपि स्पृहयाम्बभूव लोकः ॥

पदविभागः—जगदीश, भवत्परा, तदानीम्, कमनीया, कमला, बभूव, देवी, अमलाम्, अवलोक्य, याम्, विलोलः, सकलः, अपि, स्पृहयाम्, वभूव, लोकः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—जगदीश, तदानीं भवत्परा कमनीया देवी कमला बभूव । सकलः अपि लोकः अमलां याम् अवलोक्य विलोलः स्पृहयां बभूव ॥

अन्वयार्थः

जगदीश, तदानीम् = हे जगदीश ! तब (उस समय)

भवत्परा कमनीया देवी कमला बभूव । = आपमें प्रेम करती सुन्दरी देवी लक्ष्मी उत्पन्न हुईं ।

सकलः अपि लोकः अमलां यां अवलोक्य = समस्त लोक जिस निर्मल देवी को देखकर,

विलोलः स्पृहयां बभूव । = विचलित होकर सन्तुलन खोकर आशावान् हो गये ।

भावार्थ—हे जगदीश ! उस समय आपमें प्रेम करती सुन्दरी, देवी लक्ष्मी, उत्पन्न हुईं [प्रकट हुईं] । समस्त लोक जिस निर्मल को देखकर विचलित होकर सन्तुलन खोकर आशावान् हो गये ।

Word-Explanation :

स्पृह् (स्पृहयते/स्पृहयति) = To wish, Long for, Desire, Yearn, Envy etc. (As in स्पृहयां बभूव)

विलोल = Shaken, Unsteady, Trembling. (As in विलोलः स्पृहयां बभूव)

॥ ४ ॥

त्वयि दत्तहृदे तदैव देव्यै त्रिदशेन्द्रो मणिपीठिकां व्यतारीत् ।
सकलोपहृताभिषेचनीयैरृषयस्तां श्रुतिगीर्भिरभ्यषिञ्चन् ॥

पदविभागः—त्वयि, दत्तहृदे, तदा, एव, देव्यै, त्रिदशेन्द्रः, मणिपीठिकाम्, व्यतारीत्, सकलोपहृताभिषेचनीयैः, ऋषयः, ताम्, श्रुतिगीर्भिः, अभ्यषिञ्चन् ॥

अन्वयः—त्रिदशेन्द्रः तदा एव त्वयि दत्तहृदे देव्यै मणिपीठिकां व्यतारीत् । ऋषयः सकलोपहृताभिषेचनीयैः श्रुतिगीर्भिः ताम् अभ्यषिञ्चन् ।

अन्वयार्थः

त्रिदशेन्द्रः तदा एव = देवेन्द्र ने उस समय ही

त्वयि दत्तहृदे देव्यै = आप में दत्तचित्त देवी के लिए

मणिपीठिकां व्यतारीत् । = रत्नसिंहासन दिया ।

ऋषयः सकलोपहृताभिषेचनीयैः = ऋषिगणों ने सब लोगों द्वारा लाये अभिषेक के पदार्थों द्वारा,

श्रुतिगीर्भिः ताम् अभ्यषिञ्चन् । = वेदोच्चारण के साथ उन (लक्ष्मी जी) का अभिषेक किया ।

भावार्थ—देवेन्द्र ने उसी समय आपमें दत्तचित्त देवी के लिए रत्नसिंहासन दिया । ऋषिगणों ने सब लोगों द्वारा लाये अभिषेक के पदार्थों (साधनों) द्वारा, वेदोच्चारण के साथ उनका अभिषेक किया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

पीठिका = A seat, A pedestal base, (As in मणिपीठिकां व्यतारीत्)

हृद् = Mind, Heart. (As in त्वयि दत्तहृदे)

[This word has no forms for the first five inflections and is optionally substituted for हृदय after accusative dual.]

॥ ५ ॥

अभिषेकजलानुपातिमुग्धत्वदपाङ्गैरवभूषिताङ्गवल्लीम् ।
मणिकुण्डलपीतचेलहारप्रमुखैस्तामसमरादयोऽन्वभूषन् ॥

पदविभागः—अभिषेकजलनुपातिमुग्धत्वदपाङ्गैः, अवभूषिताङ्गवल्लीम्, मणिकुण्डलपीतचेलहारप्रमुखैः, ताम्, अमरादयः अन्वभूषन् ॥

अन्वयः—अमरादयः, अभिषेकजलानुपातिमुग्धत्वदपाङ्गैः अवभूषिताङ्गवल्लीम् तां मणिकुण्डलपीतचेलहारप्रमुखैः अन्वभूषन् ॥

अन्वयार्थः

अमरादयः अभिषेकजलानुपातिमुग्धत्वदपाङ्गैः = देव आदि ने जल से अभिषेक करने के बाद गिरते आपके कटाक्ष से

अवभूषिताङ्गवल्लीं ताम् = आभूषण द्वारा अलंकृत उस देवी को

मणिकुण्डलपीतचेलहारप्रमुखैः = रत्न से सुसज्जित कुण्डल, पीले वस्त्र, हार आदि द्वारा

अन्वभूषन् = फिर से अलंकृत किया ।

भावार्थ—देव आदि ने जल से अभिषेक करने के बाद गिरते आपके कटाक्ष से आभूषण द्वारा अलंकृत उस देवी को रत्न से सुसज्जित कुण्डल, पीले वस्त्र, हार आदि द्वारा फिर से अलंकृत किया ।

Word-Explanation :

अपाङ्गः/अपाङ्गकः = The outer corner of the eye or an angle of the eye, Also Cupid the God of love. (As in मुग्धत्वदपाङ्गैः)

॥ ६ ॥

वरणस्रजमात्तभृङ्गनादां दधती सा कुचकुम्भमन्दयाना ।
पदशिञ्जितमञ्जुनूपुरा त्वां कलितव्रीडविलासमाससाद ॥

पदविभागः—वरणस्रजम्, आत्तभृङ्गनादाम्, दधती, सा, कुचकुम्भमन्दयाना, पदशिञ्जितमञ्जुनूपुरा, त्वाम्, कलितव्रीडविलासम्, आससाद ॥

अन्वयः—आत्तभृङ्गनादाम् वरणस्रजं दधती कुचकुम्भमन्दयाना पदशिञ्जितमञ्जुनूपुरा सा कलितव्रीडविलासं त्वाम् आससाद ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

आत्तभृङ्गनादाम् वरणस्त्रजाम् = भंवरों को आकर्षित करती तथा भंवरों के नाद से युक्त वरमाला को

दधती कुचकुम्भमन्दयाना = धारण किये हुए स्तनों के भार से मन्द मन्द चलती

पदशिञ्जितमञ्जुनूपुरा सा = पैरों से ध्वनित सुन्दर नूपुर से वह

कलितव्रीडविलासम् = लज्जा की भावना को प्रकट करती हुई

त्वाम् आससाद। = आपके समीप पहुँची।

भावार्थ—भंवरों को आकर्षित करती उनके नाद से युक्त वरमाला को धारण किये हुए स्तनों के भार से मन्द मन्द चलती हुई, पैरों से ध्वनित सुन्दर नूपुर के साथ वह लज्जा की भावना को प्रकट करती हुई आप के समीप आ पहुँची।

Word-Explanation :

आत्त = Attracted, Accepted, Taken etc. (As in आत्तभृङ्गनादाम्)

भृङ्गः = A large Black Bee, A kind of wasp. (As in -do-)

स्त्रज् = A chaplet, A Wreath or a garland of flowers, A garlang in general. (As in वरणस्त्रज—)

कल् (कलित/कलति) = Hold, Carry, Weild, Seized etc. (Here: Carry) (As in कलितव्रीडविलासम्)

विलासः = Pastime, Sport, Play, Dalliance, Affectation, Graceful movement etc. (Here: Dalliance/Graceful movement) (As in कलितव्रीडविलासम्)

व्रीडः/व्रीडा = Modesty, Bashfulness, Shame etc. (As in कलितव्रीडविलासम्)

मञ्जु = Lovely, Beautiful (As in शिञ्जितमञ्जुनूपुरा)

शिञ्जित = Tinkling, Jingling (of anklets) (As in - do)

॥ ७ ॥

गिरिशद्रुहिणादिसर्वदेवान् गुणभाजोऽप्यविमुक्तदोषलेशान्।
अवमृश्य सदैव सर्वरम्ये निहिता त्वय्यनयाऽपि दिव्यमाला॥

पदविभागः—गिरिशद्रुहिणादिसर्वदेवान्, गुणभाजः, अपि, अविमुक्तदोषलेशान्, अवमृश्य, सदा, एव, सर्वरम्ये, निहिता, त्वयि, अनया, अपि, दिव्यमाला॥

अन्वयः—अनया गिरिशद्रुहिणादिसर्वदेवान् गुणभाजः अपि, अविमुक्तदोषलेशान् अवमृश्य, सदा एव सर्वरम्ये त्वयि अपि दिव्यमाला निहिता।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अनया गिरिशद्रुहिणादिसर्वदेवान् गुणभाजः अपि = उस (लक्ष्मी जी) द्वारा शिव, ब्रह्मा आदि समस्त देवताओं को गुणवान गुणों से युक्त देखने पर भी

अविमुक्तदोषलेशान् अवमृश्य सदा एव सर्वरम्ये = दोषों से पूर्ण रूप से विमुक्त न देखकर सर्वदा मनोहर

त्वयि अपि दिव्यमाला निहिता। = आप के गले में ही वरमाला डाली गयी।

भावार्थ—उस (लक्ष्मी जी) द्वारा शिव, ब्रह्मा आदि सब देवों को सर्वगुणसम्पन्न देखने पर भी दोषों से पूर्ण रूप से विमुक्त न देखकर सर्वदा मनोहर आप के गले में ही वरमाला डाली गयी।

Word-Explanation :

भाज = ("भाज" is usually added at the end of a compound word like गुणभाज etc.)Having, Enjoying, Possessing, etc. (As in गुणभाजः अपि)

निहित = Placed, Laid, Lodged, Deposited etc. (As in दिव्यमाला निहिता)

॥ ८ ॥

उरसा तरसा ममानिथैनां भुवनानां जननीमनन्यभावाम्।
त्वदुरोविलसत्तदीक्षणश्रीपरिवृष्ट्या परिपुष्टमास विश्वम्॥

पदविभागः—उरसा, तरसा, ममानिथ, एनाम्, भुवनानाम्, जननीम्, अनन्यभावाम्, त्वदुरोविलसत्तदीक्षणश्रीपरिवृष्ट्या, परिपुष्टम्, आस, विश्वम्॥

अन्वयः—अनन्यभावाम् एनां भुवनानां जननीं तरसा उरसा ममानिथ। त्वदुरोविलसत्तदीक्षणश्रीपरिवृष्ट्या विश्वं परिपुष्टम् आस।

अन्वयार्थः

अनन्यभावाम् एनाम् = मात्र आपको प्रेम करती उस

भुवनानां जननीं तरसा = लोकों की माता को तुरन्त

उरसा ममानिथ। = वक्षःस्थल (छाती) में रखकर (आपने) सम्मानित किया।

त्वदुरोविलसत्तदीक्षणश्रीपरिवृष्ट्या = आपके वक्षःस्थल में विराजमान उस देवी की मंगल कटाक्षवर्षा द्वारा

विश्वं परिपुष्टम् आस। = विश्व समस्त सम्पत्तियों से समृद्ध हो गया।

भावार्थ—मात्र आपको प्रेम करती उस लोकों की माता को तुरन्त वक्षःस्थल (छाती) में रखकर (आपने) सम्मानित किया। आपके वक्षःस्थल में विराजमान उस देवी की मंगल कटाक्षवर्षा द्वारा विश्व समस्त संपत्तियों से समृद्ध हो गया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

ईक्षणम् = Seeing, Beholding, A look, sight etc. (As in तदीक्षणश्रीपरिवृष्ट्या)

उरस्/उरः = The breast, Bosom. (As in उरसा ममानिथ/त्वदुरोविलसत्—)

तरस् (उरसा तरसा) = तुरन्त

पुष्ट = Wealth, Richness, Property, Nourished, Magnificence etc. (As in परिपुष्टम् आस)

॥ ९ ॥

अतिमोहनविभ्रमा तदानीं मदयन्ती खलु वारुणी निरागात् ।
तमसः पदवीमदास्त्वमेनामतिसम्माननया महासुरेभ्यः ॥

पदविभागः—अतिमोहनविभ्रमा, तदानीम्, मदयन्ती, खलु, वारुणी, निरागात्, तमसः, पदवीम्, अदाः, त्वम्, एनाम्, अतिसम्माननया, महासुरेभ्यः ॥

अन्वयः—तदानीम् अतिमोहनविभ्रमा मदयन्ती वारुणी निरागात् खलु । तमसः पदवीम् एनाम् अतिसम्माननया महासुरेभ्यः त्वम् अदाः ॥

अन्वयार्थः

तदानीम् अतिमोहनविभ्रमा = उस समय अत्यन्त मोह करने वाली

मदयन्ती वारुणी = मद उत्पन्न करती वारुणी नामक मद्य

निगरात् खलु । = निकली ।

तमसः पदवीम् एनाम् = तामस गुण-प्रधान इसको

अतिसम्माननया महासुरेभ्यः त्वम् अदाः । = बहुत सम्मानपूर्वक असुरश्रेष्ठों को आपने प्रदान किया ।

भावार्थ—उस समय अत्यन्त मोह करने वाली मद उत्पन्न करती वारुणी नामक मद्य निकली । तामस गुण-प्रधान इसको आपने बहुत सम्मानपूर्वक असुरश्रेष्ठों को प्रदान किया ।

Word-Explanation :

मदः = Intoxication, Drunkenness, Inebriety. (As in मदयन्ती)

वारुणी = Any spirituous liquor, An epithet for Varuna. (As in मदयन्ती वारुणी)

विभ्रमा = Roaming about, Confusion, Perturbation. (As in अतिमोहनविभ्रमा)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ १० ॥

तरुणाम्बुदसुन्दरस्तदा त्वं ननु धन्वन्तरिरुत्थितोऽम्बुराशेः ।
अमृतं कलशे वहन् कराभ्यामखिलार्त्तिं हर मारुतालयेश ॥

पदविभागः—तरुणाम्बुदसुन्दरः, तदा, त्वम्, ननु, धन्वन्तरिः, उत्थितः, अम्बुराशेः, अमृतम्, कलशे, वहन्, कराभ्याम्, अखिलार्त्तिम्, हर, मारुतालयेश ॥

अन्वयः—तदा तरुणाम्बुदसुन्दरः त्वं ननु कराभ्यां कलशे अमृतं वहन् अम्बुराशेः धन्वन्तरिः उत्थितः । मारुतालयेश, (त्वम्) अखिलार्त्तिम् हर ।

अन्वयार्थः

तदा तरुणाम्बुदसुन्दरः = तब नये बादल जैसे सुन्दर

त्वं ननु कराभ्यां कलशे = आप ही दोनों हाथों में कलश में

अमृतं वहन् अम्बुराशेः = अमृत को लेकर समुद्र से

धन्वन्तिरः उत्थितः । = धन्वन्तरि (के रूप में) ऊपर आये ।

मारुतालयेश, (त्वम्) अखिलर्त्तिं हर । = हे गुरुवायुपुराधीश ! (आप) मेरे समस्त दुःखों को दूर करें ।

भावार्थ—तब नये बादल (हलके बादल) जैसे सुन्दर, आप ही, दोनों हाथों द्वारा कलश (पात्र) में अमृत को लेकर समुद्र से धन्वन्तरि (के रूप में) ऊपर आये । हे गुरुवायुपुराधीश, (आप) समस्त दुःखों को दूर करें ।

Word-Explanation :

अम्बुदः = A cloud (As in तरुणाम्बुदसुन्दरः)

कलशः = A Pitcher, Water Pot, A Jar etc. (As in कलशे अमृतं वहन्)

॥ इति अष्टाविंशतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-२९

विष्णुमायाप्रादुर्भाववर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

उद्गच्छतस्तव करादमृतं हरत्सु दैत्येषु तानशरणाननुनीय देवान् ।
सद्यस्तिरोदधिथ देव भवत्प्रभावादुद्यत्स्वयूथ्यकलहा दितिजा बभूवुः ॥

पदविभागः—उद्गच्छतः, तव, करात्, अमृतम्, हरत्सु, दैत्येषु, तान्, अशरणान्, अनुनीय, देवान्, सद्यः, तिरोधिथ, देव, भवत्प्रभावात्, उद्यत्स्वयूथ्यकलहाः, दितिजाः, बभूवुः ॥

अन्वयः—उद्गच्छतः तव करात् दैत्येषु अमृतं हरत्सु (सत्सु), अशरणान् तान् देवान् अनुनीय, देव त्वम् सद्य तिरोधिथ । दितिजाः भवत्प्रेरणात् उद्यत्स्वयूथ्यकलहाः बभूवुः ॥

अन्वयार्थः

उद्गच्छतः तव करात् दैत्येषु = ऊपर आये आप के हाथ से असुरगण द्वारा

अमृतं हरत्सु (सत्सु) , अशरणान् = अमृत का हरण कर लेने पर, अन्य शरण रहित

तान् देवान् अनुनीय, = उन देवों को आश्वासन् देकर

देव, (त्वम्) सद्य तिरोधिथ । = देव (आप) उसी समय तिरोधान हो गये ।

दितिजाः भवत्प्रेरणात् = असुरगण आपकी प्रेरणा से

उद्यत्स्वयूथ्यकलहाः वभूवुः । = अपने समूह के अन्दर ही कलह करने को तैयार हो गये ।

भावार्थ—ऊपर आये आप के हाथ से असुरगण द्वारा अमृत का हरण कर लेने पर, शरण उन देवों को आश्वासन दे करके हे देव ! (आप) तिरोधान हो गये । असुरगण, आपकी प्रेरणा द्वारा अपने समूह के अन्दर ही कलह करने को उद्यत हो गये ।

Word-Explanation :

यूथं = A Herd, Flock, Multitude, (As in उद्यत्स्वयूथ्यकलहाः)

अनुनयः = Conciliation, Propitiation (As in तान् देवान् अनुनीय)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

श्यामं रुचापि वयसापि तनुं तदानीं प्राप्तोऽसि तुङ्गकुचमण्डलभङ्गुरां त्वम् ।
पीयुषकुम्भकलहं परिमुच्य सर्वे तृष्णाकुलाः प्रतिययुस्त्वदुरोजकुम्भे ॥

पदविभागः—श्यामम्, रुचा, अपि, वयसा, अपि, तनुम्, तदानीम्, प्राप्तः, असि, तुङ्गकुचमण्डलभङ्गुराम्, त्वम्, पीयुषकुम्भकलहम्, परिमुच्य, सर्वे, तृष्णाकुलाः, प्रतिययुः, त्वदुरोजकुम्भे ॥

अन्वयः—तदानीं तं रुचा अपि वयसा अपि श्यामा, तुङ्गकुचमण्डलभङ्गुरां तनुं प्राप्तः, असि । सर्वे (असुराः) पीयुषकुम्भकलहं परिमुच्य त्वदुरोजकुम्भे तृष्णाकुलाः प्रतिययुः ॥

अन्वयार्थः

तदानीं त्वं रुचा अपि वयसा अपि श्यामा = उस समय आपने कान्ति से तथा आयु से श्यामा (मध्य यौवन आयु) होकर

तुङ्गकुचमण्डलभङ्गुराम् = ऊपर उठे सुडौल स्तनों से युक्त

तनुं प्राप्तः असि । = शरीर को प्राप्त किया ।

सर्वे (असुराः) पीयूषकुम्भकलहं परिमुच्य = सब असुरगण अमृत कलश के कलह को छोड़कर

त्वदुरोजकुम्भे तृष्णाकुलाः प्रतिययुः । = आपके स्तन रूपी कुम्भ में तृष्णाकुल होकर (आपके) समीप आये ।

भावार्थ—उस समय आपने कान्ति से तथा आयु से श्यामा (मध्य यौवन आयु) बनकर ऊपर उठे सुडौल स्तनों से युक्त शरीर को प्राप्त किया । सब असुरगण अमृत कलश के कलह को छोड़कर आपके स्तन रूपी कुम्भ के प्रति तृष्णाकुल बनकर (आपके) समीप आये ।

Word-Explanation :

रुच्, रुचा = Splendour, Lustre, Loveliness, Light etc. (As in रुचा अपि)

तुङ्ग = Elevated, High, Lofty etc. (As in तुङ्गकुचमण्डल—)

तृष्णा = Thirst, Desire, Strong desire etc. (As in तृष्णाकुलाः प्रतिययुः)

भृङ्गुर = Brittle, Apt to break, Crooked, Curved etc. (As in भृङ्गुरां तनुं प्राप्तः)

उरस्/उरः - छाति (As in त्वदुरकुम्भे)

॥ ३ ॥

"का त्वं मृगाक्षि विभजस्व सुधामिमा" मित्यारूढ़रागविवशानभियाचतोऽमून् ।
"विश्वस्यते मयि कथं कुलटाऽस्मि दैत्या" इत्यालपन्नपि सुविश्वसितानतानीः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—का, त्वम्, मृगाक्षि, विभजस्व, सुधाम्, इमाम्, इति, आरूढरागविवशान्, अभियाजतः, अमून्, विश्वस्यते, मयि, कथम्, कुलटा, अस्मि, दैत्याः, इति, आलपन्, अपि, सुविश्वसितान्, अतानीः ॥

अन्वयः—"मृगाक्षि, का त्वम् ?" "इमाम् सुधां विभजस्व ।" इति अभियाजतः आरूढरागविवशान् अमून्, "दैत्याः, मयि कथं विश्वस्यते ?" "(अहं) कुलटा अस्मि ।" इति आलपन् अपि सुविश्वसितान् अतानीः ॥

अन्वयार्थः

"मृगाक्षि का त्वम् ?" = "हे मृगनयनी ! आप कौन हैं ?"

"इमाम् सुधां विभजस्व ।" = "इस अमृत का विभाजन करो ।"

इति अभियाजतः = इस प्रकार माँगते

आरूढरागविवशान् अमून् = बढ़ते काम से विवश उनको,

"दैत्याः मयि कथं विश्वस्यते ?" = "दैत्य लोग मुझ पर कैसे विश्वास करेंगे ?"

"(अहं) कुलटा अस्मि ।" = "मैं कुलटा हूँ (पतिव्रता स्त्री नहीं हूँ) ।"

इति आलपन् अपि सुविश्वसितान् अतानीः । = इस प्रकार कहकर ही (उनको) विश्वास करने पर मज़बूर किया ।

भावार्थ—"हे मृगनयनी, आप कौन हैं ?" "इस अमृत का विभाजन करो" । इस प्रकार माँगते बढ़ते काम से विवश उनको, "दैत्यगण मुझ पर कैसे विश्वास करेंगे ? मैं कुलटा हूँ" । इस प्रकार कहते ही (उनको) विश्वास करने पर मज़बूर किया ।

Word-Explanation :

आरूढ = Mounted, Ascended (As in आरूढरागविवशान्)

रागः = Love, Passion, Amorous feeling etc. (As in-do-)

आलपनम् = Speaking to, Conversation. (As in इति आलपन्)

कुलटा = Unchaste woman. (As in कुलटा अस्मि)

॥ ४ ॥

मोदात् सुधाकलशमेषु ददत्सु सा त्वं, दुश्चेष्टितं मम सहध्वमिति ब्रुवाणा ।
पङ्क्तिप्रभेदविनिवेशितदेवदैत्या लीलाविलासगतिभिः समदाः सुधां ताम् ॥

पदविभागः—मोदात्, सुधाकलशम्, एषु, ददत्सु, सा, त्वम्, दुश्चेष्टितम्, मम, सहध्वम्, इति, ब्रुवाणा, पङ्क्तिप्रभेदविनिवेशितदेवदैत्याः, लीलाविलासगतिभिः, समदाः, सुधाम्, ताम् ॥

अन्वयः—तेषु मोदात् सुधाकलशं ददत्सु (सत्सु), सा त्वं "मम दुश्चेष्टितं सहध्वम्" इति ब्रुवाणा पङ्क्तिप्रभेदनिवेशितदेवदैत्याः तां सुधां लीलाविलासगतिभिः समदाः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

तेषु मोदात् सुधाकलशं ददत्सु (सत्सु) , सा त्वम् = उन (असुरगण) में प्रसन्नता से अमृत-कलश को देने (पर) उन आपने

"मम दुश्चेष्टितं सहध्वम्" इति ब्रुवाणा = "मेरे दुर्व्यवहार को सहन करें," इस प्रकार कहते हुए

पङ्क्तिप्रभेदनिवेशितदेवदैत्याः = देव तथा दैत्यों को पंक्ति में बैठाकर

तां सुधां लीलाविलासगतिभिः समदाः = उस अमृत को मन्द-मन्द सुन्दर गति से चलकर परोसा।

भावार्थ—उन (असुरगण) में प्रसन्नता से अमृत-कलश को देने से, उन आपने "मेरे दुर्व्यवहार को सहन करे" इस प्रकार कहते हुए देव तथा दैत्यों को पंक्ति में बैठा कर उस अमृत को मन्द-मन्द सुन्दर गति से चलकर परोसा।

Word-Explanation :

भेदनम् = Splitting, Breaking, Dividing, Separating, Distinguishing etc. (As in पङ्क्तिप्रभेदनिवेशित—)

निवेशनम् = Depositing, Delivering, A house, A nest etc. (Here: Depositing)

पङ्क्ति = A line, Row, A group etc. (As in पङ्क्तिप्रभेद—)

॥ ५ ॥

अस्मास्वियं प्रणयिनीत्यसुरेषु तेषु जोषं स्थितेष्वथ समाप्य सुधां सुरेषु।
त्वं भक्तलोकवशगो निजरूपमेत्य स्वर्भानुमर्धपरिपीतसुधं व्यलावीः॥

पदविभागः—अस्मासु, इयम्, प्रणयिनी, इति, असुरेषु, तेषु, जोषम्, स्थितेषु, अथ, समाप्य, सुधाम्, सुरेषु, त्वम्, भक्तलोकवशगः, निजरूपम्, एत्य, स्वर्भानुम्, अर्धपरिपीतसुधम्, व्यलावीः॥

अन्वयः—तेषु असुरेषु "इयम् अस्मासु प्रणयिनी" इति जोषं स्थितेषु (सत्सु) अथ भक्तलोकवशगः त्वं सुधां सुरेषु समाप्य अर्धपरिपीतसुधं स्वर्भानुं निजरूपम् एत्य व्यलावीः॥

अन्वयार्थः

तेषु असुरेषु "इयम् अस्मासु प्रणयिनी" इति जोषं स्थितेषु (सत्सु) = उन असुरों के "यह हम लोगों से प्रेम रखती है" इस प्रकार तृप्त रहने से,

अथ भक्तलोकवशगः त्वम् = बाद में भक्त लोगों के अधीन आपने

सुधां सुरेषु समाप्य = अमृत को देवों में समाप्त करके

अर्धपरिपीतसुधंस्वर्भानुम् = (अमृत को) आधे पीये राहु को

निजरूपम् एत्य व्यलावीः। = अपना रूप धारण करके काटा।

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—उन असुरों के "यह हम लोगों से प्रेम रखती है" इस प्रकार तृप्त रहने से, बाद में भक्त लोगों के अधीन आपने, अमृत को देवों में समाप्त करके (अमृत को) आधे पीये राहु को अपना रूप धारण करके काटा।

Word-Explanation :

जोषः = Satisfied, Happiness, Silence etc. (As in इति जोषं स्थितेषु)

वश = Influenced by, Obedient, Compliant, Humbled, Subject to etc. (As in भक्तलोकवशगः)

॥ ६ ॥

त्वत्तः सुधाहरणयोग्यफलं परेषु दत्वा गते त्वयि सुरैः खलु ते व्यगृह्णन्।
घोरेऽथ मूर्च्छति रणे, बलिदैत्यमायाव्यामोहिते सुरगणे, त्वमिहाविरासीः॥

पदविभागः—त्वत्तः, सुधाहरणयोग्यफलम्, परेषु, दत्वा, गते, त्वयि, सुरैः, खलु, ते, व्यगृह्णन्, घोरे, अथ, मूर्च्छति, रणे, बलिदैत्यमायाव्यामोहिते, सुरगणे, त्वम्, इह, आविरासीः॥

अन्वयः—त्वत्तः सुधाहरणयोग्यफलं परेषु दत्वा, त्वयि गते (सति), ते खलु सुरैः व्यगृह्णन् अथ रणे घोरे मूर्च्छति (सति), सुरगणे बलिदैत्यमायाव्यामोहिते (सति) इह त्वम् आविरासीः॥

अन्वयार्थः

त्वत्तः सुधाहरणयोग्यफलम् = (धन्वन्तरि रूपी) आप से अमृत को छीन लेने का युक्त फल

परेषु दत्वा = अन्य (असुरों) को देकर

त्वयि गते (सति) = आपके जाने पर

ते खलु सुरैः = वे तो देवों से

व्यगृह्णन् = युद्ध करने लगे

अथ रणे घोरे मूर्च्छति (सति) = बाद में घोर युद्ध होने पर,

सुरगणे बलिदैत्यमायाव्यामोहिते (सति) = देवों के गण में बलि नामक असुर द्वारा माया प्रयोग करके (सब देवगण के) बेहोश होने पर

इह त्वम् आविरासीः। = यहाँ आप प्रकट हुए।

भावार्थ—(धन्वन्तरि रूपी) आप से अमृत को छीन लेने का युक्त फल अन्य (असुरों) को देकर आपके जाने पर वे (असुर) तो देवों से युद्ध करने लगे, बाद में घोर युद्ध होने पर देवगणों में बलि नामक असुर द्वारा माया का प्रयोग करके देवताओं के बेहोश होने पर आप उस समय प्रकट हुए।

॥ ७ ॥

त्वं कालनेमिमथ मालिमुखान् जघन्थ शक्रो जघान बलिजम्भवलान् सपाकान्।
शुष्कार्द्रदुष्करवधे नमुचौ च लूने वेनेव भारदगिरा न्यरुणो रणं तम्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—त्वम्, कालनेमिम्, अथ, मालिमुखान्, जघन्थ, शक्रः, जघान, बलिजन्भवलान्, सपाकान्, शुष्कार्द्रदुष्करवधे, नमुचौ, च, लूने, फेनेन, नारदगिरा, न्यरुणः, रणम्, तम् ॥

अन्वयः—तं कालनेमिम् अथ मालिमुखान् जघन्थ । शक्रः सपाकान् बलिजम्भवलान् जघान । शुष्कार्द्रदुष्करवधे नमुचौ च फेनेन लूने (सति) तं रणं (त्वं) नारदगिरा न्यरुणः ॥

अन्वयार्थः

त्वं कालनेमिम् अथ मालिमुखान् जघन्थ । = आप ने कालनेमि का, बाद में मालि आदि का वध किया ।

शक्रः, सपाकान् बलिजम्भवलान् जघान । = इन्द्र ने सपाक, बलि, जम्भ, बल आदि का वध किया ।

शुष्कार्द्रदुष्करवधे नमुचौ च = सूखे या गीले पदार्थों से मारे न जाने वाले नमुचि को भी

फेनेन लूने (सति) तं रणम् = फेन (झाग) से काटने के बाद उस युद्ध को

(त्वं) नारदगिरा न्यरुणः = (आप ने) नारदमुनि के कहने पर रोक दिया ।

भावार्थ—आप ने कालनेमि का, बाद में मालि आदि का वध किया । इन्द्र ने सपाक, बलि, जम्भ, बल आदि का वध किया । सूखे या गीले पदार्थों से मारे न जाने वाले नमुचि को भी फेन (झाग) से काटने के बाद उस युद्ध को (आप ने) नारद मुनि के वचनानुसार रोक दिया ।

Word-Explanation :

शुष्क = Dry (As शुष्कार्द्र—)

आर्द्र = Wet, Moist, Damp (As in शुष्कार्द्र)

॥ ८ ॥

योषावपुर्दनुजमोहनमाहितं ते श्रुत्वा विलोकनकुतूहलवान् महेशः ।
भूतैः समं गिरिजया च गतः पदं ते स्तुत्वाब्रवीदभिमतं, त्वमथो तिरोधाः ॥

पदविभागः—योषावपुः, दनुजमोहनम्, आहितम्, ते, श्रुत्वा, विलोकनकुतूहलवान्, महेशः, भूतैः, समम्, गिरिजया, च, गतः, पदम्, ते, स्तुत्वा, अब्रवीत्, अभिमतम्, त्वम्, अथो, तिरोधाः ।

अन्वयः—दनुजमोहनम् आहितं ते योषवपुः श्रुत्वा महेशः, विलोकनकुतूहलवान् भूतैः गिरिजया समं ते पदं गतः । स्तुत्वा अभिमतम् अब्रवीत् । त्वम् अथो तिरोधाः ।

अन्वयार्थः

दनुजमोहनम् आहितम् = असुरों को मोहित करने के लिए धारण किये गये

ते योषावपुः श्रुत्वा महेशः = आपके स्त्री रूप के विषय में सुनकर शिवजी

विलोकनकुतूहलवान् = (उसको) देखने में उत्सुक होकर

भूतैः, गिरिजया समं ते पदं गतः = भूतगण और पार्वती के साथ आपके धाम (वैकुण्ठ) में गये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तुत्वा अभिमतम् अब्रवीत्। = स्तुति करके अपनी इच्छा को व्यक्त किया।

त्वम् अथो तिरोधाः। = आप उसके बाद तिरोधान हो गये।

भावार्थ—असुरों को मोहित करने के लिए धारण किये गये आपके स्त्री रूप के विषय में सुनकर शिवजी (उसको) देखने में उत्सुक होकर, भूतगण तथा पार्वती के साथ आप के धाम (वैकुण्ठ) में गये। (आपकी) स्तुति करके अपनी इच्छा को व्यक्त किया। आप उस के बाद तिरोधान हो गये।

Word-Explanation :

आहित (धनुजमोहनम् आहितम्) = Set, Performed, Entertained, Done etc.

योषा/योषिन्/योषिता = A woman, A young woman in general. (As in योषावपुः)

अभिमतम् (अभिमतम् अब्रवीत्) = Desire, Wish.

॥ ९ ॥

आरामसीमनि च कन्दुकघातलीलालोलायमाननयनां कमनीं मनोज्ञाम्।
त्वामेष वीक्ष्य विगलद्वसनां मनोभूवेगादनङ्गरिपुरङ्ग, समालिलिङ्ग॥

पदविभागः—आरामसीमनि, च, कन्दुकघातलीलालोलायमाननयनाम्, कमनीम्, मनोज्ञाम्, त्वाम्, एष, वीक्ष्य, विगलद्वसनाम्, मनोभूवेगात्, अनङ्गरिपुः, अङ्ग, समालिलिङ्ग।

अन्वयः—आरामसीमनि च, कन्दुकघातलीलालोलायमाननयनां मनोज्ञां कमनीं त्वाम् एषः (महेशः) वीक्ष्य, अनङ्गरिपुः अङ्ग विगलद्वसनां मनोभूवेगात् समालिलिङ्ग।

अन्वयार्थः

आरामसीमनि च = और उद्यान की सीमा में

कन्दुकघातलीलालोलायमाननयनाम् = गेंद को मारने वाले खेल सदृश आँखों को घुमाती

मनोज्ञां कमनीं त्वाम् = मन को हरती सुन्दरी स्वरूप आपको

एषः (महेशः) वीक्ष्य = इन (शिवजी) ने देखकर

अनङ्गरिपुः = कामदेव के वैरी (शिवजी) ने

अङ्ग, विगलद्वसनां मनोभूवेगात् समालिलिङ्ग = आश्चर्य! गिरते हुए वस्त्र वाले स्त्री स्वरूप को कामवेग से वशीभूत होकर आलिङ्गन किया।

भावार्थ—और उद्यान की सीमा में गेंद को मारने वाले खेल सदृश आँखों को घुमाती मनको हरती सुन्दरी स्वरूप आप को, इन (शिवजी) ने देखकर कामदेव के वैरी (शिवजी) गिरते हुए वस्त्र वाले स्त्री स्वरूप को (आपको देखकर) कामवेग वशीभूत होकर आलिङ्गन किया।

Word-Explanation :

सीमन् = Boundary, (As in आरामसीमनि)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आरामः = Garden, Groove etc.

लोल = Rolling, Moving to & fro, Shaking (As in लोलायमान)

विगलित = Disappeared, Gone away, Fallen down etc. (As in विगलद्वसनां)

वसनम् = A house, A garment, Dress, Cloth etc. (As - do-)

॥ १० ॥

भूयोऽपि विद्रुतवतीमुपधाव्य देवो वीर्यप्रमोक्षविकसत्परमार्थबोधः ।
त्वन्मानितस्तव महत्वमुवाच देव्यै तत्तादृशस्त्वमव वातनिकेतनाथ ॥

पदविभागः—भूयः, अपि, विद्रुतवतीम्, उपधाव्य, देवः, वीर्यप्रमोक्षविकसत्परमार्थबोधः, त्वन्मानितः, तव, महत्वम्, उवाच, देव्यै, तत्तादृशः, त्वम्, अव, वातनिकेतनाथ ॥

अन्वयः—भूयः अपि विद्रुतवतीं उपधाव्य देवः वीर्यप्रमोक्षविकसत्परमार्थबोधः त्वन्मानितः तव महत्वं देव्यै उवाच । वातनिकेतनाथ, तत्तादृशः त्वं (मां) अव ।

अन्वयार्थः

भूयः अपि विद्रुतवतीम् = फिर भी भागती मोहिनी का

देवः उपधाव्य = शिवजी ने पीछा करके

वीर्यप्रमोक्षविकसत्परमार्थबोधः = वीर्य स्खलन द्वारा परमार्थ का बोध कर

त्वन्मानितः तव महत्वम् = आप द्वारा सम्मानित, आपके महत्त्व को

देव्यै उवाच । = देवी (पार्वती) से कहा ।

वातनिकेतनाथ, तत्तादृशः त्वम् = हे गुरुवायुपुराधीश ! उस तरह के आप

(माम्) अव । = मेरी रक्षा करें ।

भावार्थ—फिर भी भागती उस (मोहिनी) का शिवजी ने पीछा करके वीर्य स्खलन द्वारा परमार्थ का ज्ञान प्राप्त होने पर आप द्वारा सम्मानित, आपके महत्त्व को देवी (पार्वती) से कहा । हे गुरुवायुपुराधीश ! उस तरह के आप मेरी रक्षा करें ।

Word-Explanation :

प्रमोक्षः = Dropping

॥ इति ऊनत्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३०

वामनावतारवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

शक्रेण सम्यति हतोऽति बलिर्महात्मा शुक्रेण जीविततनुः क्रतुवर्धितोष्मा ।
विक्रान्तिमान् भयनिलीनसुरां त्रिलोकीं चक्रे वशे, स तव चक्रमुखादभीतः ॥

पदविभागः—शक्रेण, सम्यति, हतः, अपि, बलिः, महात्मा, शुक्रेण, जीविततनुः, क्रतुवर्धितोष्मा, विक्रान्तिमान्, भयनिलीनसुराम्, त्रिलोकीम्, चक्रे, वशे, स, तव, चक्रमुखात्, अभीतः ॥

अन्वयः—शक्रेण सम्यति हतः अपि बलिः शुक्रेण जीविततनुः महात्मा सः बलिः क्रतुवर्धितोष्मा विक्रान्तिमान्, तव चक्रात् अभीतः भयनिलीनसुरां त्रिलोकीं वशे चक्रे ।

अन्वयार्थः

शक्रेण सम्यति हतः अपि = इन्द्र द्वारा युद्ध में मारे जाने पर भी

शुक्रेण जीविततनुः = शुक्राचार्य द्वारा जीवन प्राप्त

महात्मा सः बलिः = महात्मा उस बलि ने

क्रतुवर्धितोष्मा = यज्ञ द्वारा बढ़ी हुई शक्ति से

विक्रान्तिमान्, तव = शक्तिमान् होकर आपके

चक्रमुखात् अभीतः = (सुदर्शन) चक्र से भय रहित होकर,

भयनिलीनसुरां त्रिलोकीं वशे चक्रे । = भयभीत देवों तथा तीनों लोकों को अपने वश में करके शासन किया ।

भावार्थ—इन्द्र द्वारा युद्ध में मारे जाने पर भी शुक्राचार्य से जीवन प्राप्त महात्मा उस बलि ने यज्ञ द्वारा बढ़ी हुई शक्ति के प्रभाव से शक्तिमान् होकर आपके (सुदर्शन) चक्र से भय रहित होकर, भयभीत देवों तथा तीनों लोकों को अपने वश में करके शासन किया ।

Word-Explanation :

निलीन= Melted, Destroyed, Hidden, Changed, Perished. (As in भयनिलीनसुराम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

पुत्रार्तिदर्शनवशाददितिर्विषण्णा तं काश्यपं निजपतिं शरणं प्रपन्ना ।
त्वत्पूजनं तदुदितं हि पयोव्रताख्यं सा द्वादशाहमचरत्त्वयि भक्तिपूर्णा ॥

पदविभागः—पुत्रार्तिदर्शनवशात्, अदितिः, विषण्ण, तम्, काश्यपम्, निजपतिम्, शरणम्, प्रपन्ना, त्वत्पूजनम्, तदुदितम्, हि, पयोव्रताख्यम्, सा, द्वादशाहम्, अचरत्, त्वयि, भक्तिपूर्णा ॥

अन्वयः—अदितिः पुत्रार्तिदर्शनवशात् विषण्ण, निजपतिं तं काश्यपं शरणं प्रपन्ना । तदुदितं पयोव्रताख्यं हि त्वत्पूजनं सा त्वयि भक्तिपूर्णा द्वादशाहम् अचरत् ।

अन्वयार्थः

अदितिः पुत्रार्तिदर्शनवशात् विषण्णा = अदिति (देवों की माता) पुत्रों के कष्टों को देखने के कारण दुःखी, होकर

निजपतिं तं काश्यपं शरणं प्रपन्ना । = अपने पति उस काश्यप (मुनि) के शरण में आयी ।

तदुदितं पयोव्रताख्यं हि त्वत्पूजनम् = उनके द्वारा कहे गये "पयोव्रत" नाम के व्रत से ही आपकी पूजा कर

सा त्वयि भक्तिपूर्णा = उस (अदिति) ने आपकी भक्ति में

द्वादशाहम् अचरत् । = बारह दिनों के व्रत का आचरण किया ।

भावार्थ—अदिति (देवों की माता) पुत्रों के कष्टों को देखने के कारण दुःखी होकर अपने पति उस काश्यप (मुनि) के शरण में आयी । उनके द्वारा कहे गये "पयोव्रत" नाम के व्रत से ही आपकी पूजा कर उस (अदिति) ने आपकी भक्ति में बारह दिनों के व्रत का आचरण किया ।

Word-Explanation :

विषण्ण = Dejected, Cast down, Sad, Sorrowful, Spiritless etc. (As in पुत्रार्तिदर्शनवशात् विषण्ण)

प्रपन्न = Arriving at, Reaching, Going to, Resorting to, Betaking Oneself to etc. (As in काश्यपं शरणं प्रपन्ना)

उदित = Spoken, Risen etc. (Here: Spoken) (तदुदितं पयोव्रताख्यम्)

॥ ३ ॥

तस्यावधौ त्वयि निलीनमतेरमुष्याः श्यामश्चतुर्भुजवपुः स्वयमाविरासीः ।
नम्रां च तामिह भवत्तनयो भवेयं गोप्यं मदीक्षणमिति प्रलपन्नयासीः ॥

पदविभागः—तस्य, अवधौ, त्वयि, निलीनमतेः, अमुष्याः, श्यामः, चतुर्भुजवपुः, स्वयम्, आविरासीः, नम्राम्, च, ताम्, इह, भवत्तनयः, भवेयम्, गोप्यम्, मदीक्षणम्, इति, प्रलपन्, अयासीः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—तस्य अवधौ त्वयि निलीनमतेः अमुष्याः (पुरः) श्यामः चतर्भुजवपुः त्वं स्वयं आविरासीः । इह नम्रां तां च "(अहं) भवत्तनयः भवेयम्" । मदीक्षणं गोप्यम् । इति प्रलपन् अयासीः ॥

अन्वयार्थः

तस्य अवधौ त्वयि निलीनमतेः = उस अवधि में आप में तल्लीन मन वाली

अमुष्याः (पुरः) श्यामः चतुर्भुजवपुः त्वं स्वयम् आविरासीः । = इस (अदिति) के सामने, श्याम रंग, तथा चार हाथों से युक्त आप स्वयं प्रत्यक्ष हो गये ।

इह नम्रां तां च "(अहं) भवत्तनयः भवेयम्" । = इधर (इस समय) नमस्कार करती उसको "मैं आपका पुत्र बनूँगा" ।

मदीक्षणं गोप्यम् । इति = मेरे दर्शन गुप्त हैं । इस प्रकार

प्रलपन् अयासीः । = कहकर तिरोधान हो गये ।

भावार्थ—उस अवधि में आप में तल्लीन मन वाली इस (अदिति) के सम्मुख, श्याम रंग तथा चार हाथों से युक्त आप स्वयं प्रत्यक्ष हो गये । इधर (इस समय) नमस्कार करती उससे "मैं आपका पुत्र बनूँगा" । मेरे दर्शन गुप्त हैं । इस प्रकार कहकर तिरोधान हो गये ।

Word-Explanation :

ईक्षा = Sight, Viewing. (As in मदीक्षणम्)

नम्र = Bowing (As in नम्राम्)

॥ ४ ॥

त्वं काश्यपे तपसि सन्निदधत् तदानीं प्राप्तोऽसि गर्भमदितेः प्रणुतो विधात्रा ।
प्रासूत च प्रकटवैष्णवदिव्यरूपं सा द्वादशीश्रवणपुण्यदिने भवन्तम् ॥

पदविभागः—त्वम्, काश्यपे, तपसि, सन्निदधत्, तदानीम्, प्राप्तः, असि, गर्भम्, अदितेः, प्रणुतः, विधात्रा, प्रासूत, च, प्रकटवैष्णवदिव्यरूपम्, सा, द्वादशीश्रवणपुण्यदिने, भवन्तम् ॥

अन्वयः—तदानीं त्वं काश्यपे तपसि सन्निदधत् अदितेः गर्भं प्राप्तः असि । विधात्रा (त्वाम्) प्रणुतः । सा (अदिति) प्रकटवैष्णवदिव्यरूपं भवन्तं द्वादशीश्रवणपुण्यदिने प्रासूत च ।

अन्वयार्थः

तदानीं त्वं काश्यपे तपसि सन्निदधत् = उस समय आप तपस्या करते काश्यप मुनि में सन्निधान होकर

अदितेः गर्भं प्राप्तः असि । = अदिति के गर्भ में पहुँचे ।

विधात्रा (त्वाम्) प्रणुतः । = ब्रह्मा जी ने (आपको) प्रणाम किया ।

सा (अदिति) प्रकटवैष्णवदिव्यरूपं भवन्तम् = उस (अदिति) ने दिव्य वैष्णव रूप को प्रकट करते आपको

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वादशीश्रवणपुण्यदिने प्रासूत च। = द्वादशी तथा श्रवण नक्षत्र वाले पुण्य दिन में जन्म दिया।

भावार्थ—उस समय आप तपस्या करते काश्यप मुनि के सन्निधान (समावेश) होकर अदिति के गर्भ में पहुँचे। ब्रह्मा जी ने (आपको) प्रणाम किया। उस (अदिति) ने दिव्य वैष्णव रूप को प्रकट करते आपको द्वादशी तथा श्रवण नक्षत्र वाले पुण्य दिन में जन्म दिया।

॥ ५ ॥

पुण्याश्रमं तमभिवर्षति पुष्पवर्षैर्हर्षाकुले सुरकुले कृततूर्यघोषे।
बध्वाञ्जलिं जयजयेति नुतः पितृभ्यां त्वं तत्क्षणे पटुतमं वटुरूपमाधाः॥

पदविभागः—पुण्याश्रमम्, तम्, अभिवर्षति, पुष्पवर्षैः, हर्षाकुले, सुरकुले, कृततूर्यघोषे, बध्वा,अञ्जलिम्, जय, जय, इति नुतः, पितृभ्याम्, त्वम्, तत्क्षणे, पटुतमम्, वटुरूपम्, आधाः।

अन्वयः—सुरकुले हर्षाकुले कृततूर्यघोषे पुष्पवर्षैः तं पुण्याश्रमम् अभिवर्षयति, अञ्जलिं बध्वा "जय जय" इति पितृभ्यां नुतः त्वं तत्क्षणे पटुतमं वटुरूपम् आधाः॥

अन्वयार्थः

सुरकुले हर्षाकुले कृततूर्यघोषे = देवगण द्वारा हर्ष से भरकर तूर्य (वाद्य) को बजाकर

पुष्पवर्षैः तं पुण्याश्रमम् = पुष्प वर्षा के द्वारा उस पुण्य आश्रम को आच्छादित

अभिवर्षयति अञ्जलिं वध्वा "जय जय" इति = करके हाथों को जोड़कर "जय हो जय हो" इस प्रकार (तथा)

पितृभ्यां नुतः त्वम् = माता-पिता द्वारा संस्तुत आप ने

तत्क्षणे पटुतमं वटुरूपम् आधाः = उसी समय अतिश्रेष्ठ ब्रह्मचारी का रूप स्वीकार किया।

भावार्थ—देवगण द्वारा हर्ष से भरकर तूर्य (वाद्य) को बजाकर पुष्प वर्षा से उस पुण्य आश्रम को आच्छादित करके हाथों को जोड़कर "जय हो जय हो" इस प्रकार (तथा) माता-पिता द्वारा संस्तुत आप ने उसी समय अतिश्रेष्ठ ब्रह्मचारी का रूप स्वीकार किया।

Word-Explanation :

तूर्यः =A kind of musical instrument. (As in तूर्यघोषे)

पटु or **पटी** = Clever, Skilled, Proficient, Dexterous. (As in पटुतमं वटुरूपम्)

वटु = A Boy, A Lad, A Bramacharin.

॥ ६ ॥

तावत् प्रजापतिमुखैरुपनीयमौञ्जीदण्डाजिनाक्षवलयादिभिरर्च्यमानः
देदीप्यमानवपुरीश, कृताग्निकार्यस्त्वं प्रास्थिथा बलिगृहं प्रकृताश्वमेधम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—तावत्, प्रजापतिमुखैः, उपनीयमौञ्जीदण्डाजिनाक्षवलयादिभिः, अर्च्यमानः, देदीप्यमानवपुः, ईश, कृताग्निकार्यः, त्वम्, प्रास्थिथाः, बलिगृहम्, पकृताश्वमेधम् ॥

अन्वयः—ईश, तावत् प्रजापतिमुखैः उपनीयमौञ्जीदण्डाजिनाक्षवलयादिभिः, अर्च्यमानः त्वं देदीप्यमानवपुः कृताग्निकार्यः प्रकृताश्वमेधं बलिगृहं प्रस्थिथाः ॥

अन्वयार्थः

ईश, तावत् प्रजापतिमुखैः उपनीयमौञ्जीदण्डाजिनाक्षबलयादिभिः = हे ईश ! उस समय प्रजापति (काश्यप मुनि) आदि द्वारा उपनयन कर, मौञ्जी, दण्ड, कृष्णाजिन, अक्षमाला आदि से

अर्च्यमानः त्वं देदीप्यमानवपुः = अलंकृत आपने प्रकाशमान् स्वरूप

कृताग्निकार्यः = अग्निकार्य (समिधादान आदि) करके

प्रकृताश्वमेधं बलिगृहं प्रस्थिथाः = अश्वमेध यज्ञ करते बलि के गृह को प्रस्थान किया ।

भावार्थ—हे ईश ! उस समय प्रजापति (काश्यप मुनि) आदि द्वारा उपनयन कर, मौञ्जी, दण्ड, कृष्णाजिन, अक्षमाला आदि से अलंकृत आपने प्रकाशमान् स्वरूप अग्निकार्य (समिधादान) आदि करके, अश्वमेध यज्ञ करते बलि के गृह को प्रस्थान किया ।

Word-Explanation :

देदीप्यमान = Shining, Blazing, Resplendent. (As in देदीप्यमानवपुः)

अक्षमाला/अक्षसूत्रम् = A Rosary, String of beads. (As in अक्षमालावलयादिभिः)

अजिनम् = The hairy skin of a Tiger, Lion, Elephant especially of a Black Antelope (used as seat/garment) (As in अजिनाक्षमाल—)

मौञ्जी = The gridle of a Brahmna made of a triple string of Munja Grass. (As in मौञ्जीदण्डाजिना—)

॥ ७ ॥

गात्रेण भाविमहिमोचितगौरवं प्राग्व्यावृण्वतेव धरणीं चलयन्नयासीः ।
छत्रं परोष्मतिरणार्थमिवादधानो दण्डं च दानवजनेष्विव सन्निधातुम् ॥

पदविभागः—गात्रेण, भाविमहिमोचितगौरवम्, प्राग्व्यावृण्वता, इव, धरणीम्, चलयन्, अयासीः, छत्रम्, परोष्मतिरणार्थम्, इव, अदधान, दण्डम्, च, दानवजनेषु, इव, सन्निधातुम् ॥

अन्वयः—भाविमहिमोचितगौरवं प्राग्व्यावृण्वता इव गात्रेण धरणीं चलयन् परोष्मतिरणार्थम् इव छत्रम्, दानवजनेषु सन्निधातुम् इव दण्डं च आदधानः त्वम् अयासीः ॥

अन्वयार्थः

भाविमहिमोचितगौरवम् = आने वाले दिनों में होने वाली महिमा के अनुसार गौरव को

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राग्व्यावृण्वता इव = पूर्व ही बतलाते हुए जैसे

गात्रेण धरणीं चलयन् = शरीर से भूमि को हिलाकर

परोष्मतिरणार्थम् इव छत्रम् = शत्रुओं की ऊष्मा को रोकते जैसे छाते को

दानवजनेषु सन्निधातुं इव = असुरों पर प्रयोग करते हुए

दण्डं च आदधानः = और दण्ड धारण करके

त्वम् अयासीः । = आपने प्रस्थान किया ।

भावार्थ—आने वाले दिनों में होने वाली महिमा के अनुसार गौरव को पूर्व में ही बतलाते हुए जैसे शरीर से भूमि को हिलाकर, शत्रुओं की ऊष्मा को रोकते जैसे छाते को, असुरों पर प्रयोग करते हुए और दण्ड लेकर आप ने प्रस्थान किया ।

Word-Explanation :

प्राक् = Before, At first (As in प्रग्व्यावृण्वता इव)

ऊष्मन् =Heat, (As in परोष्मतिरणार्थम्)

तिरधा = To cover, To over power (As in परोष्मतिरणार्थम्)

दध् (दधते) = To hold, To Possess (As in आदधानः)

॥ ८ ॥

तां नर्मदोत्तरतटे हयमेधशालामासेदुषि त्वयि रुचा तव रुद्धनेत्रैः ।
भास्वान् किमेष दहनो नु सनत्कुमारो योगी नु कोऽयमिति शुक्रमुखैः शशङ्के ॥

पदविभागः—ताम्, नर्मदोत्तरतटे, हयमेधशालाम्, आसेदुषि, त्वयि, रुचा, तव, रुद्धनेत्रैः, भास्वान्, किम्, एषः, दहनः, नु, सनत्कुमारः, योगी, नु, कः, अयम्, इति, शुक्रमुखैः, शशङ्के ॥

अन्वयः—त्वयि नर्मदोत्तरतटे तां हयमेधशालाम् आसेतुषि (सति), तव रुचा रुद्धनेत्रैः शुक्रमुखैः, एषः भास्वान् किं नु ? (किम्) एषः दहनः नु ? (किम्) योगी सनत्कुमारः नु ? इति शशङ्के ।

अन्वयार्थः

त्वयि नर्मदोत्तरतटे = आपके नर्मदा के उत्तर तट पर

तां हयमेधशालाम् आसेदुषि (सति) = उस अश्वमेध यज्ञशाला में पहुँचने पर

तव रुचा रुद्धनेत्रैः शुक्रमुखैः = आपकी प्रभा से आँखें बंद होने पर शुक्राचार्य आदि

एषः भास्वान् किं नु ? = क्या यह सूरज तो नहीं ?

(किम्) दहनः नु ? = क्या अग्नि तो नहीं ?

(किम्) योगी सनत्कुमारः नु ? = क्या सनत्कुमार योगी तो नहीं ?

इति शशङ्के । = इस प्रकार शंका करने लगे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—आपके नर्मदा के उत्तर तट पर उस अश्वमेध यज्ञशाला में पहुँचने पर आपकी प्रभा से आँखें बन्द होने पर शुक्राचार्य आदि, क्या यह सूरज तो नहीं ? क्या अग्नि तो नहीं ? क्या सनत्कुमार योगी तो नहीं ? इस प्रकार शंका करने लगे ।

Word-Explanation :

रुच् (रोचते, रोचित) = To Shine, Look splendid. (As in रुचा रुद्धनेत्रैः)

रुद्ध = Obstructed, Impeded, Hemmed (As in रुद्धनेत्रैः)

भास्वत्- = Bright, The Sun (As in भास्वान् किं नु ?)

"नु" = A particle to emphasise having interrogative force implying doubt.

॥ ९ ॥

आनीतमाशु भृगुभिर्महसाभिभूतैस्त्वां, रम्यरूपमसुरः पुलकावृताङ्गः ।
भक्त्या समेत्य सुकृती परिणिज्य पादौ तत्तोयमन्वधृत मूर्धनि तीर्थतीर्थम् ॥

पदविभागः—आनीतम्, आशु, भृगुभिः, महसा, अभिभूतैः, त्वाम्, रम्यरूपम्, असुरः, पुलकावृताङ्गः, भक्त्या, समेत्य, सुकृती, परिणिज्य, पादौ, तत्, तोयम्, अन्वधृत, मूर्धनि, तीर्थतीर्थम् ।।

अन्वयः—महसा अभिभूतैः, भृगुभिः आशु आनीतं रम्यरूपं त्वां, सुकृती असुरः पुलकावृताङ्गः भक्त्या समेत्य, पादौ परिणिज्य तीर्थतीर्थं तत् तोयं (स्वस्य) मूर्धनि अन्वधृत ।

अन्वयार्थः

महसा अभिभूतैः भृगुभिः = तेज (प्रभा) से आकर्षित होकर भृगु आदि द्वारा

आशु आनीतं रम्यरूपं त्वाम् = तुरन्त आये आकर्षकस्वरूप आपको

सुकृती असुरः पुलकावृताङ्गः = शुद्धात्मा असुर पुलकांगित होकर

भक्त्या समेत्य पादौ परिणिज्य = भक्ति से समीप आकर पैरों को धोकर

तीर्थतीर्थं तत् तोयम् = महातीर्थ उस जल को

(स्वस्य) मूर्धनि अन्वधृत । = (अपने) सिर पर रखा गया ।

भावार्थ—तेज (प्रभा) से आकर्षित होकर भृगु आदि द्वारा तुरन्त आये आकर्षकस्वरूप आपको भाग्यवान् असुर पुलकांगित होकर, भक्ति से समीप आकर पैरों को धोकर, श्रेष्ठ तीर्थ (उस) जल को (अपने) सिर पर रखा गया ।

Word-Explanation :

सुकृतिः = Kindness, Virtue

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ १० ॥

प्रह्लादवंशजतया क्रतुभिर्द्विजेषु विश्वासतो नु तदिदं दितिजोऽपि लेभे ।
यत्ते पदाम्बु गिरिशस्य शिरोभिलाल्यं स त्वं विभो, गुरुपुरालय पालयेथाः ॥

पदविभागः—प्रह्लादवंशजतया, क्रतुभिः, द्विजेषु, विश्वासतः, नु, तत्, इदम्, दितिजः, अपि, लेभे, यत्, ते, पदाम्बु, गिरिशस्य, शिरोभिलाल्यम्, सः, त्वम्, विभो, गुरुपुरालय, पालयेथाः ॥

अन्वयः—प्रह्लादवंशजया (नु), क्रतुभिः (नु), द्विजेषु विश्वसितः नु, दितिजः अपि गिरिशस्य शिरोभिलाल्यम् ते यत् पादाम्बु तत् इदं (बलिं) लेभे । विभो, गुरुपुरालय सः त्वं (मां) पालयेथाः ।

अन्वयार्थः

प्रह्लादवंशजया (नु) क्रतुभिः (नु) = (क्या) प्रह्लाद के वंश में जन्म लेने के कारण, (क्या) अनेक यज्ञ करने के कारण,

द्विजेषु विश्वसितः (नु) = क्या ब्राह्मणों में विश्वास करने के कारण,

दितिजः अपि = असुर होने पर भी (बलि के)

गिरिशस्य शिरोभिलाल्यम् = गिरीश शंकर के सिर पर लेकर सत्कार करने वाले

ते यत् पादाम्बु = आपके चरणों का जो जल

तत् इदं लेभे । = वह इस प्रकार (बलि को) मिला ।

विभो, गुरुपुरालय सः त्वं (मां) पालयेथाः । = हे विभो ! हे गुरुवायुपुराधीश ! उस प्रकार के आप मेरी रक्षा करें ।

भावार्थ—(क्या) प्रह्लाद के वंश में जन्म लेने के कारण, (क्या) अनेक यज्ञ करने के कारण, क्या ब्राह्मणों में विश्वास करने के कारण, बलि के असुर होने पर भी गिरीश शंकर जी के सिर पर लेकर सत्कार करते आप के चरणों का जो जल वह इस प्रकार (बलि को) मिला । हे विभो ! हे गुरुवायुपुराधीश ! उस प्रकार के आप मेरी रक्षा करें ।

॥ इति त्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३१

बलिविध्वंसनम्

[मन्दाक्रान्ताछन्दः]

॥ १ ॥

प्रीत्या दैत्यस्तव तनुमहःप्रेक्षणात् सर्वथापि
त्वामाराध्यन्नजित, रचयन्नञ्जलिं सञ्जगाद।
"मत्तः किं ते समभिलषितं विप्रसूनो वद त्वम्,
वित्तं, भक्तं भवनमवनीं वापि सर्वं प्रदास्ये" ॥

पदविभागः—प्रीत्या, दैत्यः, तव, तनुमहः प्रेक्षणात्, सर्वथा, अपि, त्वाम्, अराध्यन्, अजित, रचयन्, अञ्जलिम्, सञ्जगाद, मत्तः, किम्, ते, समभिलषितम्, विप्रसूनो, वद, त्वम्, वित्तम्, भक्तम्, भवनम्, अवनीम्, वा, अपि, सर्वम्, प्रदास्ये ॥

अन्वयः—अजित, दैत्यैः तव तनुमहः प्रेक्षणात् प्रीत्या सर्वथापि त्वाम् आराध्यन् अञ्जलिं रचयन् सञ्जगाद । "मत्तः ते समभिलषितं किम् ?" विप्रसूनो त्वं वद । वित्तं, भक्तं, भवनम्, अवनीं वा अपि सर्वं प्रदास्ये ।

अन्वयार्थः

अजित, दैत्यैः तव तनुमहः प्रेक्षणात् = अजेय, बलि ने आपके स्वरूप की प्रभा को देखकर,

प्रीत्या सर्वथापि त्वाम् आराध्यन् अञ्जलिं रचयन् सञ्जगाद। = प्रेमपूर्वक सभी प्रकार से आपका आराधन करके हाथ जोड़कर कहा ।

"मत्तः ते समभिलषितं किम् ?" = "मुझसे आप क्या चाहते हैं ?"

विप्रसूनो, त्वं वद। वित्तं, भक्तं, भवनं, अवनीं वा अपि सर्वं प्रदास्ये। = हे विप्रकुमार ! आप कहें । धन, भोजन, भूमि जो कुछ भी हो सब दूँगा ।

भावार्थ—अजेय, बलि ने आपके स्वरूप की प्रभा को देखकर, प्रेमपूर्वक सभी प्रकार से आपका आराधन करके, हाथ जोड़कर कहा । "मुझसे आप क्या चाहते हैं ?" हे विप्रकुमार ! आप कहें । धन, भोजन, भूमि जो कुछ भी हो सब दूँगा ।

Word-Explanation :

महः = Light, Lustre

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भक्त = Food

रच् (रचयति, रचित, रचयते) = To arrange, Make ready, Prepare. (As in अञ्जलिं रचयन्)

॥ २ ॥

तामक्षीणां बलिगिरमुपाकर्ण्य कारुण्यपूर्णो-
प्यस्योत्सेकं शमयितुमना दैत्यवंशं प्रशंसन् ।

भूमिं पादत्रयपरिमितां प्रार्थयामासिथ त्वम्
सर्वं देहीति तु निगदिते कस्य हास्यं न वा स्यात् ॥

पदविभागः—ताम्, अक्षीणाम्, बलिगिरम्, उपाकर्ण्य, कारुण्यपूर्णः, अपि, अस्य, उत्सेहम्, शमयितुमनाः, दैत्यवंशम्, प्रशंसन्, भूमिम्, पादत्रयपरिमिताम्, प्रार्थयामासिथ, त्वम्, सर्वम्, देहि, तु, निगदिते, कस्य, हास्यम्, न, वा, स्यात् ।

अन्वयः—अक्षीणां तां बलिगिरम् उपाकर्ण्य त्वं कारुण्यपूर्णः अपि अस्य उत्सेकं शमयितुमनाः दैत्यवंशं प्रशंसन् पादत्रयपरिमितां भूमिं प्रार्थयामासिथ । "सर्वं देहि" इति निगदिते तु कस्य वा हास्यं न स्यात् ?

अन्वयार्थः

अक्षीणां तां बलिगिरम् उपाकर्ण्य = बलि की अहंकारयुक्त (उसकी) बात सुनकर

त्वं कारुण्यपूर्णः अपि अस्य उत्सेकं शमयितुमनाः = आप ने कृपापूर्ण होकर भी उसके अहंकार को शान्त करने की इच्छा से

दैत्यवंशं प्रशंसन् पादत्रयपरिमितां भूमिं प्रार्थयामासिथ । = असुर वंश की प्रशंसा करके तीन पैर की सीमित भूमि की प्रार्थना की ।

"सर्वं देहि" इति निगदिते तु कस्य वा हास्यं न स्यात् ? = "सब कुछ दे दो" इस प्रकार कहने से किसकी हँसी नहीं होती ?

भावार्थ—बलि की अहंकारयुक्त बात सुनकर, आपने कृपापूर्ण होकर भी, उसके अहंकार को शान्त करने की इच्छा से, असुर-वंश की प्रशंसा करके तीन पैर की सीमित भूमि की प्रार्थना की । "सब कुछ दे दो" इस प्रकार कहने से किस की हँसी नहीं होती ?

Word-Explanation :

उत्सेकः = Pouring, Sprinkling, Pride, Haughtiness, Insolence, etc. (Here: Pride) (As in उस्य उत्सेकं शमयितुमनाः)

अक्षीण - Powerful, Not thin

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

विश्वेशं मां त्रिपदमिह किं याचसे बालिशस्त्वम्
सर्वां भूमिं वृणु, किममुनेत्यालपत्त्वां स दृप्यन् ।
यस्माद्दर्पात् त्रिपदपरिपूर्त्यक्षमः क्षेपवादान्
बन्धं चासावगमदतदर्होऽपि गाढ़ोपशान्त्यै ॥

पदविभागः—विश्वेशम्, माम्, त्रिपदम्, इह, किम्, याचसे, बालिशः, त्वम्, सर्वाम्, भूमिम्, वृणु, किम्, अमुना, इति, आलपत्, त्वाम्, सः, दृप्यन्, यस्मात्, दर्पात्, त्रिपदपरिपूर्त्यक्षमः, क्षेपवादान्, बन्धम्, च, असौ, अगमत्, अतदर्हः, अपि, गाढोपशान्त्यै ।

अन्वयः—"विश्वेशं माम् इह किं त्रिपदं याचसे ? त्वं बालिशः । सर्वां भूमिं वृणु । अमुना किम् ?" इति सः त्वां दृप्यन् आलपत् । यस्मात् दर्पात् असौ त्रिपदपरिपूर्त्यक्षमः क्षेपवादान् बन्धं च अतदर्हः अपि गाढोपशान्त्यै अगमत् ॥

अन्वयार्थः

विश्वेशं माम् इह किं त्रिपदं याचसे ? = विश्व के ईश्वर मुझसे इस प्रकार क्यों तीन पद की याचना करते हैं ?

त्वं बालिशः । सर्वां भूमिं वृणु । = आप बच्चों जैसी बात करते हो । समस्त भूप्रदेश माँगो ।

अमुना किम् ? = इससे क्या मिलेगा ?

इति सः त्वां, दृप्यन् आलपत् । = इस प्रकार उसने आपको अहंकार से कहा ।

यस्मात् दर्पात् असौ = जिस अहंकार से वह

त्रिपदपरिपूर्त्यक्षमः = तीन पद की भी पूर्ति करने में असमर्थ

क्षेपवादान् बन्धं च = अपवाद तथा बन्धन स्वरूप

अतदर्हः अपि गाढोपशान्त्यै अगमत् । = उसके लिए अधिकारी न होने पर भी अहंकार की शान्ति के लिए (उसे) भुगतना पड़ा ।

भावार्थ—"विश्व के ईश्वर मुझसे इस प्रकार क्यों तीन पद की याचना करते हो ? आप बच्चों जैसी बात करते हो । समस्त भूमि माँगों । इतने से क्या मिलेगा ?" इस प्रकार उसने आपको अहंकार से कहा । जिस अहंकार से वह तीन पद की भी पूर्ति करने में असमर्थ अपवाद तथा बन्धन स्वरूप उसके लिए अधिकारी न होने पर भी, अहंकार की शान्ति करने के लिए उसे भुगतना पड़ा ।

Word-Explanation :

क्षेपः = Disrespect, Abuse.

दृप्य = To be proud, Arrogant

बालिशः = Childish, Silly

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ४ ॥

"पादत्रय्या यदि न मुदितो विष्टपैर्नापि तुष्ये"-
दित्युक्तेऽस्मिन् वरद, भवते दातुकामेऽथ तोयम्।
दैत्याचार्यस्तव खलु परीक्षार्थिनः प्रेरणात्तम्
"मा मा देयं हरिरय" मिति व्यक्तमेवाबभाषे ॥

पदविभागः—पादत्रय्या, यदि, न, मुदितो, विष्टपैः, न, अपि, तुष्येत्, इति, उक्ते, अस्मिन्, वरद, भवते, दातुकामः, अथ, तोयम्, दैत्याचार्यः, तव, खलु, परीक्षार्थिनः, प्रेरणात्तम्, मा, मा, देयम्, हरिः, अयम्, इति, व्यक्तम्, एव, आबभाषे ॥

अन्वयः—"पादत्रय्या यदि न मुदितः विष्टपैः अपि न तुष्येत्" । इति उक्ते अस्मिन् भवते अथ तोयं दातुकामे (सति), वरद, परीक्षार्थिनः तव खलु प्रेरणात्, दैत्याचार्यः तं "मा मा देयं, अयं हरिः" इति व्यक्तम् एव आबभाषे ।

अन्वयार्थः

"पादत्रय्या यदि न मुदितः विष्टपैः अपि न तुष्येत्" । = "तीन चरणों (की परिमित भूमि) से यदि सन्तुष्ट नहीं होते तो समस्त लोक मिलने पर भी सन्तुष्ट नहीं होता" ।

इति उक्ते अस्मिन् भवते = इस प्रकार कहते हुए आपके लिए उसके द्वारा

अथ तोयं दातुकामे (सति) = देने की इच्छा से जल लेने पर,

वरद, परीक्षार्थिनः तव खलु प्रेरणात् = हे वरद ! परीक्षा करने के इच्छुक आपकी प्रेरणा से ही

दैत्याचार्यः तं "मा मा देयं, अयं हरिः" इति = असुरों के आचार्य (शुक्राचार्य) ने उसको "मत दो, मत दो, यह हरि है" इस प्रकार

व्यक्तम् एव आबभाषे । = स्पष्ट रूप से कहा ।

भावार्थ—"तीन चरणों (की सीमित भूमि) से यदि सन्तुष्ट नहीं होते तो समस्त लोक मिलने पर भी सन्तुष्ट नहीं होता" । इस प्रकार कहते हुए आपके लिए उसके द्वारा देने की इच्छा से जल लेने पर, हे वरद ! परीक्षा करने के इच्छुक आपकी प्रेरणा से ही, असुरों के आचार्य (शुक्राचार्य) ने उसको "मत दो, मत दो यह हरि है" इस प्रकार स्पष्ट कहा ।

Word-Explanation :

विष्टपः/विष्टपम् = A world. (As in विष्टपैः न तुष्येत्)

तुष्(तुष्यति, तुष्ट) = To be pleased, To be satisfied.

॥ ५ ॥

"याचत्येवं यदि स भगवान् पूर्णकामोऽस्मि सोऽहम्
दास्याम्येव" स्थिरमिति वदन् काव्यशास्त्रोऽपि दैत्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विन्ध्यावल्या निजदयितया दत्तपाद्याय तुभ्यम्
चित्रं, चित्रं सकलमपि स प्रार्पयत्तोयपूर्वम् ॥

पदविभागः—याचति, एवम्, यदि, सः, भगवान्, पूर्णकामः, अस्मि, सः, अहम्, दास्यामि, एव, स्थिरम्, इति, वदन्, काव्यशप्तः, अपि, दैत्यः, विन्ध्यावल्या, निजदयितया, दत्तपाद्याय, तुभ्यम्, चित्रम्, चित्रम्, सकलम्, अपि, सः, प्रार्पयत्, तोयपूर्वम् ॥

अन्वयः—"सः भगवान् एवं यदि याचति, सः अहं पूर्णकामः अस्मि" । "दास्यामि एव" । इति स्थिरं वदन् सः दैत्यः काव्यशप्तः अपि, निजदयितया विन्ध्यावल्या दत्तपाद्याय तुभ्यम् तोयपूर्वं सकलम् अपि प्रार्पयत् । चित्रं, चित्रम् ॥

अन्वयार्थः

"सः भगवान् एवं यदि याचति, सः अहं पूर्णकामः अस्मि।" = "वह भगवान् है, इस प्रकार यदि माँगता है तो, उस प्रकार का मैं भाग्यवान् हूँ।"

"दास्यामि एव।" = "मैं दूँगा ही"।

इति स्थिरं वदन सः दैत्यः = इस प्रकार दृढ़ता से कहकर उस असुर

काव्यशप्तः अपि, = शुक्राचार्य द्वारा शाप देने पर भी

निजदयितया विन्ध्यावल्या दत्तपाद्याय तुभ्यम् = अपनी पत्नी विन्ध्यावली द्वारा दिये पाद्य को आप को देकर

तोयपूर्वं सकलम् अपि प्रार्पयत्। चित्रं चित्रम्। = जलपूर्वक अञ्जलि से सब कुछ अर्पण किया। अहो आश्चर्य, आश्चर्य।

भावार्थ—"वह भगवान् है, इस प्रकार यदि माँगता है तो, उस प्रकार का मैं पूर्ण रूप से सन्तुष्ट हूँ। मैं दूँगा ही"। इस प्रकार दृढ़ता से कहकर उस असुर, शुक्राचार्य द्वारा शाप देने पर भी, अपनी पत्नी विन्ध्यावली द्वारा दिये पाद्य को देकर, जलपूर्वक अञ्जलि से सब कुछ अर्पण किया। अहो आश्चर्य ! आश्चर्य !

Word-Explanation :

काव्यः = Sukra, Perceptor of the Asuras. (As in काव्यशप्तः अपि)

दयिता = Beloved, Wife, Lover etc. (As in निजदयितया)

॥ ६ ॥

निस्सन्देहं दितिकुलपतौ त्वय्यशेषार्पणं तद्-
व्यातन्वाने मुमुचुरृषयः सामराः पुष्पवर्षम्।
दिव्यं रूपं तव च तदिदं पश्यतां विश्वभाजा-
मुच्चैरुच्चैरवृधदवधीकृत्य विश्वाण्डभाण्डम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—निस्सन्देहम्, दितिकुलपतौ, त्वयि, अशेषार्पणम्, तत्, व्यातन्वाने, मुमुचुः, ऋषयः, सामराः, पुष्पवर्षम्, दिव्यम्, रूपम्, तव, च, तत्, इदम्, पश्यताम्, विश्वभाजाम्, उच्चैः, उच्चैः, अवृधत्, अवधीकृत्य, विश्वाण्डभाण्डम् ॥

अन्वयः—दितिकुलपतौ निस्सन्देहं त्वयि तत् अशेषार्पणं व्यातन्वाने (सति) समाराः, ऋषयः पुष्पवर्षं मुमुचुः च। ततः तत् इदं रूपं दिव्यं विश्वभाजां पश्यतां, विश्वाण्डभाण्डम् अवधीकृत्य, उच्चैः उच्चैः अवृधत्।

अन्वयार्थः

दितिकुलपतौ निस्सन्देहम् = दितिकुल के पति (बलि) के सन्देह न करते हुए

त्वयि तत् अशेषार्पणं = आपको वह सम्पूर्ण अर्पण

व्यातन्वाने (सति) = करने (पर)

समराः, ऋषयः पुष्पवर्षं मुमुचुः च। = देवगण तथा ऋषिगण ने पुष्पवर्षा की।

तव तत् इदं रूपं दिव्यं = आपका वह इस प्रकार का दिव्य स्वरूप

विश्वभाजां पश्यताम् = जगत् के लोगों द्वारा दृष्टिगोचर होता हुआ

विश्वाण्डभाण्डम् अवधीकृत्य = ब्रह्माण्ड को पार करके

उच्चैः उच्चैः अवृधत्। = ऊपर-ऊपर बढ़ता गया।

भावार्थ—दितिकुल के पति (बलि) के सन्देह न करते हुए आपको वह सम्पूर्ण अर्पण करने पर, देवगण तथा ऋषिगण ने पुष्पवर्षा की। आपका वह इस प्रकार का दिव्य स्वरूप जगत् के लोगों द्वारा दृष्टिगोचर होता हुआ ब्रह्माण्ड को पार करके ऊपर-ऊपर बढ़ता गया।

॥ ७ ॥

त्वत्पादाग्रं निजपदगतं पुण्डरीकोद्भवोऽसौ
कुण्डीतोयैरसिचदपुनाद्यज्जलं विश्वलोकान्।
हर्षोत्कर्षात् सुबहु ननृते खेचरैरुत्सवेऽस्मिन्
भेरीं निघ्नन् भुवनमचरज्जाम्बवान् भक्तिशाली ॥

पदविभागः—त्वत्पादाग्रम्, निजपदगतम्, पुण्डरीकोद्भवः, असौ, कुण्डीतोयैः, असिचत्, अपुनात्, यत्, जलम्, विश्वलोकान्, हर्षोत्कर्षात्, सुबहु, ननृते, खेचरैः, उत्सवे, अस्मिन्, भेरीम्, निघ्नन्, भुवनम्, अचरत्, जाम्बवान्, भक्तिशाली।

अन्वयः—असौ पुण्डरीकोद्भवः निजपदगतं त्वत्पादाग्रं कुण्डीतोयैः असिचत्। यत् जलं विश्वलोकान् अपुनात्। हर्षोत्कर्षात् खेचरैः सुबहु ननृते। अस्मिन् उत्सवे भक्तिशालीजाम्बवान् भेरीं निघ्नन् भुवनम् अचरत्।

अन्वयार्थः

असौ पुण्डरीकोद्भवः = उन कमल से जन्मे ब्रह्माजी ने

निजपदगतं त्वत्पादाग्रम् = अपने लोक में पहुँचे आपके पादाग्र का

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुण्डीतोयैः असिचत्। = जल-पात्र से अभिषेक किया।

यत् जलं विश्वलोकान् अपुनात्। = जो जल विश्व में रहने वालों को पवित्र करता है।

हर्षोत्कर्षात् खेचरैः = बढ़े हुए हर्ष से आकाश में संचरण करने वालों द्वारा

सुबहु ननृते। = अत्यधिक नृत्य किया गया।

अस्मिन् उत्सवे भक्तिशाली जाम्बवान् भेरीं निघ्नन् = इस उत्सव में भक्तिमान् जाम्बवान ने भेरी बजाकर

भुवनम् अचरत्। = लोक में संचार किया।

भावार्थ—उन कमल से जन्मे ब्रह्माजी ने अपने लोक में पहुँचे आपके पादाग्र का जल-पात्र से अभिषेक किया। जो जल विश्व में रहने वालों को पवित्र करता है। बढ़े हुए हर्ष से आकाश में संचरण करने वालों द्वारा अत्यधिक नृत्य किया गया। इस उत्सव में भक्तिमान् जाम्बवान ने भेरी बजाकर पृथ्वी पर संचार किया।

Word-Explanation :

खचरः/खेचरः = Travellers in the Sky.

॥ ८ ॥

तावद्दैत्यास्त्वनुमतिमृते भर्तुरारब्धयुद्धा
देवोपेतैर्भवदनुचरैः संगता भंगमापन्।
"कालात्मायं वसति पुरतो यद्वशात् प्राग्जिताः स्मः
किं वो युद्धै" रिति बलिगिरा तेऽथ पातालमापुः ॥

पदविभागः—तावत्, दैत्याः, तु, अनुमतिम्, ऋते, भर्तुः, आरब्धयुद्धाः, देव, उपेतैः, भवदनुचरैः, संगताः, भङ्गम्, आपन्, कालात्मा, अयम्, वसति, पुरतः, यद्वशात्, प्राक्, जिताः, स्मः, किम्, वः, युद्धैः, इति, बलिगिरा, ते, अथ, पातालम्, आपुः।

अन्वयः—देव, तावत् दैत्याः तु भर्तुः अनुमतिम् ऋते आरब्ध युद्धाः उपेतैः भवदनुचरैः सङ्गताः भङ्गम् आपन्। "कालात्मा अयं पुरतः वसति। यद्वशात् प्राक् जिताः स्मः। वः युद्धैः किम्?" इति बलि गिरा ते अथ पातालम् आपुः॥

अन्वयार्थः

देव, तावत्, दैत्याः तु भर्तुः अनुमतिम् ऋते आरब्धयुद्धाः = हे देव! तब असुरगण द्वारा तो राजा (बलि) की अनुमति न लेकर युद्ध आरम्भ कर देने पर

उपेतैः भवदनुचरैः = उधर आये आपके सेवकों द्वारा

सङ्गताः भङ्गम् आपन्। = लड़कर हार जाने पर

"कालात्मा अयं पुरतः वसति। यद्वशात् प्राक् जिताः स्मः। वः युद्धैः किम्?" = "काल रूपी आत्मा हमारे सामने स्थित है। उनके कारण ही पूर्व में हम जीते। आप लोगों के इस युद्धों से क्या लाभ?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति बलि गिरा ते अथ पातालम् आपुः । = इस प्रकार बलि के कहने से, वे बाद में पाताल को गये ।

भावार्थ—हे देव ! तब असुरगण द्वारा तो राजा (बलि) की अनुमति न लेकर युद्ध आरम्भ कर देने पर, उधर आये आपके सेवकों द्वारा लड़कर हार जाने पर "काल रूपी आत्मा हमारे सामने स्थित है । उनके कारण ही पूर्व में हम जीते । आप लोगों के इन युद्धों से क्या लाभ ?" इस प्रकार बलि के कहने के बाद में पाताल को गये ।

Word-Explanation :

भंगः = Failure, Disappointment

॥ ९ ॥

पाशैर्बद्धं पतगपतिना दैत्यमुच्चैरवादी-
"स्तार्त्तीयीकं दिश मम पदं, किं न विश्वेश्वरोऽसि" ।

"पादं मूर्ध्नि प्रणय भगवन्नि"त्यकम्पं वदन्तम्
प्रह्लादस्तं स्वयमुपगतो मानयन्नस्तवीत्त्वाम् ॥

पदविभागः—पाशैः, बद्धम्, पतगपतिना, दैत्यम्, उच्चैः, अवादीः, तार्त्तीयीकम्, दिश, मम, पदम्, किम्, न, विश्वेश्वरः, असि, पादम्, मूर्ध्नि, प्रणय, भगवन्, इति, अकम्पम्, वदन्तम्, प्रह्लादः, तम्, स्वयम्, उपगतः, मानयन्, अस्तवीत्, त्वाम् ॥

अन्वयः—पतगपतिना पाशैः बद्धं दैत्यम् उच्चैः अवादी । "तार्त्तीयीकं पदं मम दिश, विश्वेश्वरः किं न असि ।" "भगवन् पादं मूर्ध्नि प्रणय ।" इति अकम्पं वदन्तं तं मानयन् प्रह्लादः स्वयम् उपागतः त्वाम् अस्तवीत् ।

अन्वयार्थः

पतगपतिना पाशैः बद्धम् = पतगपति (गरुड़) द्वारा बन्धनों से बन्धित

दैत्यम् उच्चैः अवादीः । = असुर को जोर से बोले ।

"तार्त्तीयीकं पदं मम दिश विश्वेश्वरः किं न असि ।" = "तीसरा पद रखने का स्थान मुझे दिखाओ तुम तो पूरे विश्व के नाथ हो । है न" ।

"भगवन् पादं मूर्ध्नि प्रणय" । = "हे भगवन् ! पाद को मेरे सिर पर रखें" ।

इति अकम्पं वदन्तं तं मानयन् प्रह्लादः स्वयम् उपागतः त्वाम् अस्तवीत् । = इस प्रकार निडर कहते उसका सम्मान करके स्वयं प्रह्लाद ने आकर आपकी स्तुति की ।

भावार्थ—पतगपति गरुड़ द्वारा पाशों से बन्धित असुर को (आप) जोर से बोले । तीसरा पद रखने का स्थान मुझे दिखाओ, तुम समस्त विश्व के नाथ हो, क्या नहीं हो ? "हे भगवन् ! चरण को मेरे सिर पर रखें" । इस प्रकार निडर कहते उसका सम्मान करने के लिए प्रह्लाद ने स्वयं आकर आपकी स्तुति की ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ १० ॥

"दर्पोच्छित्यै विहितमखिलं दैत्य सिद्धोसिपुण्यै-
र्लोकस्तेस्तु त्रिदिवविजयी वासवत्वं च पश्चात् ।
मत्सायूज्यं भज च पुन"रित्यन्वगृहणा बलिं तम्
विप्रैः सन्तानितमखवरः पाहि वातालयेश ॥

पदविभागः—दर्पोच्छित्यै, विहितम्, अखिलम्, दैत्य, सिद्ध, असि, पुण्यैः, लोकः, ते, अस्तु, त्रिदिवविजयी, वासवत्वम्, च, पश्चात्, मत्सायूज्यम्, भज, च, पुनः, इति, अन्वगृहणाः, बलिम्, तम्, विप्रैः, सन्तानितमखवरः, पाहि, वातालयेश ।

अन्वयः—"विहितम् अखिलं दर्पोच्छित्यै दैत्य पुण्यैः सिद्धः असि । त्रिदिवविजयी लोकः ते अस्तु । पश्चात् वासवत्वं च । पुनः मत्सायूज्यं च भज ।" इति तं बलिम् अन्वगृहणा, वातालयेश, विप्रैः सन्तानितमखवरः (त्वं) (मां) पाहि ।

अन्वयार्थः

विहितम् अखिलं दर्पोच्छित्यै । = जो कुछ हुआ वह सब अहंकार को दूर करने के लिए था ।

दैत्य, पुण्यैः सिद्धः असि । = हे असुरश्रेष्ठ ! पुण्य द्वारा तुम्हें सिद्धियां प्राप्त हैं ।

त्रिदिवविजयी लोकः ते अस्तु । = तुम्हें स्वर्ग से भी श्रेष्ठ लोक मिले ।

पश्चात् वासवत्वं च = और उसके बाद इन्द्र पदवी ।

पुनः मत्सायूज्यं च भज । = बाद में मेरा सान्निध्य भी मिले ।

इति तं बलिम् अन्वगृहणा, वातालयेश, = इस प्रकार उस बलि पर अनुग्रह करके, हे गुरुवायुपुराधीश !

विप्रैः सन्तानितमखवरः (त्वं) (मां) पाहि ॥ = ब्राह्मणों द्वारा यज्ञ को पूरा कराया, (आप) मेरी रक्षा करें ॥

भावार्थ—"जो कुछ हुआ वह सब अहंकार को दूर करने के लिए था । हे असुरश्रेष्ठ ! पुण्य द्वारा तुम्हें सिद्धियां प्राप्त हैं । तुम्हें स्वर्ग से भी श्रेष्ठ लोक मिले (सुतल नामक लोक) । और उसके बाद इन्द्र पदवी । बाद में मेरा सान्निध्य भी प्राप्त हो ।" इस प्रकार उस बलि पर अनुग्रह करके, हे गुरुवायुपुराधीश ! आपने ब्राह्मणों द्वारा यज्ञ को पूरा कराया, (आप) मेरी रक्षा करें ।

॥ इति एकत्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३२

मत्स्यावतारवर्णनम्

[उपजातिछन्दः]

॥ १ ॥

पुरा हयग्रीवमहासुरेण षष्ठान्तरान्तोद्यदकाण्डकल्पे ।
निद्रोन्मुखब्रह्ममुखाद्धृतेषु वेदेष्वधित्सः किल मत्स्यरूपम् ॥

पदविभागः—पुरा, हयग्रीवमहासुरेण, षष्ठान्तरन्तोद्यदकाण्डकल्पे, निद्रोन्मुखब्रह्ममुखात्, हृतेषु, वेदेषु, अधित्सः, किल, मत्स्यरूपम् ॥

अन्वयः—पुरा हयग्रीवमहासुरेण षष्ठान्तरान्तोद्यदकाण्डकल्पे, निद्रोन्मुखब्रह्ममुखात् वेदेषु हृतेषु (त्वं) मत्स्यरूपम् अधित्सः किल ।

अन्वयार्थः

पुरा हयग्रीवमहासुरेण = पूर्व में हयग्रीव (नामक) महासुर द्वारा

षष्ठान्तरान्तोद्यतकाण्डकल्पे = छठे मन्वन्तर के अन्त में आये प्रलय में

निद्रोन्मुखब्रह्ममुखात् = निद्रा लेने का प्रयास करते ब्रह्माजी के मुख से

वेदेषु हृतेषु = वेदों की चोरी करने पर

(त्वं) मत्स्यरूपम् अधित्सः किल । = (आपने) निश्चित रूप से मत्स्य का रूप धारण किया ।

भावार्थ—पूर्व में हयग्रीव (नामक) महासुर द्वारा छठे मन्वन्तर के अन्त में आये प्रलय में निद्रा करने का प्रयत्न करते ब्रह्माजी के मुख से वेदों की चोरी करने पर (आपने) निश्चित रूप से मत्स्य का रूप स्वीकार किया ।

Word-Explanation :

उदयः = Rising, Going upwards. (As in उद्यतकाण्डकल्पे)

उन्मुख = Looking up, On the point of, Prepared for. (As in निद्रोन्मुखब्रह्ममुखात्)

॥ २ ॥

सत्यव्रतस्य द्रमिलाधिभर्तुर्नदीजले तर्पयतस्तदानीम् ।
कराञ्जलौ सञ्ज्वलिताकृतिस्त्वमदृश्यथाः कश्चन बालमीनः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—सत्यव्रतस्य, द्रमिलाधिभर्तुः, नदीजले, तर्पयतः, तदानीम्, कराञ्जलौ, सञ्ज्वलिताकृतिः, त्वम्, अदृश्यथाः, कश्चन, बालमीनः ॥

अन्वयः—त्वम्, नदीजले तर्पयतः द्रमिलाधिभर्तुः कराञ्जलौ तदानीं सञ्ज्वलिताकृतिः कश्चन बालमीनः अदृश्यथाः ।

अन्वयार्थः

त्वम्, नदीजले तर्पयतः = आपने नदी जल में तर्पण करते

द्रमिलाधिभर्तुः = द्रविड (द्रमिल) प्रदेश के राजा के

कराञ्जलौ तदानीम् = हाथों में उस समय

सञ्ज्वलिताकृतिः कश्चन बालमीनः अदृश्यथाः । = प्रकाशमान् एक छोटी मछली के रूप में दर्शन दिया ।

भावार्थ—आपने नदी में तर्पण करते द्रविड (द्रमिल) प्रदेश के राजा के हाथों में उस समय प्रकाशमान् एक छोटी मछली के रूप में दर्शन दिया ।

Word-Explanation :

अञ्जलिः = A cavity formed by folding and joining the open hands together, The hollow of the hands. (As in कराञ्जलौ)

भर्तुः = Lord, King, Husband etc.

॥ ३ ॥

क्षिप्तं जले त्वां चकितं विलोक्य निन्येऽम्बुपात्रेण मुनिः स्वगेहम् ।
स्वल्पैरहोभिः कलशीं च कूपम् वापीं सरश्चानशिषे विभो त्वम् ॥

पदविभागः—क्षिप्तम्, जले, त्वाम्, चकितम्, विलोक्य, निन्ये, अम्बुपात्रेण, मुनिः, स्वगेहम्, स्वल्पैः, अहोभिः, कलशीम्, च, कूपम्, वापीम्, सरः, च, आनशिषे, विभो, त्वम् ॥

अन्वयः—मुनिः जले क्षिप्तं चकितं त्वां विलोक्य (त्वां) अम्बुपात्रेण स्वगेहं निन्ये । विभो, त्वं स्वल्पैः अहोभिः कलशीं, कूपं, वापीं, सरः च आनशिषे ।

अन्वयार्थ

मुनिः जले क्षिप्तम् = नदी में फेंकने से

चकितं त्वां विलाक्य = डरे हुए आपको मुनि ने देखकर

(त्वाम्) अम्बुपात्रेण स्वगेहं निन्ये । = (आपको) जलपात्र में रखकर अपने घर ले गये ।

विभो, त्वं स्वल्पैः अहोभिः कलशीं कूपं वापीं सरः च आनशिषे । = हे विभो ! आप कुछ ही दिनों में कलश से कूप, कूप से तड़ाग, तालाब से सरोवर आदि में रहे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—नदी में फेंकने से डरे हुए आपको मुनि ने देखकर (आपको) जलपात्र में रखकर अपने घर ले गये। हे विभो ! आपने कुछ दिनों में कलश से कुआँ, कुआँ से झील, झील से सरोवर आदि में बढ़ते हुए निवास किया।

Word-Explanation :

चकित Shaking, Trembling, Frightened etc. (As in चकितं त्वां विलोक्य)=

अहन् = A day (including Day & night) (As in स्वल्पैः अहोभिः)

सरस् = A lake, A Large sheet of water (As in सरः च आनशिषे)

कूपः = Well (As in कलशीं कूपं)

वापी = Any large oblong or circular reservoir of water. (As in कूपं वापीं)

॥ ४ ॥

योगप्रभावाद् भवदाज्ञयैव नीतस्ततस्त्वं मुनिना पयोधिम्।
पृष्टोऽमुना कल्पदिदृक्षुमें सप्ताहमास्वेति वदन्नयासीः ॥

पदविभागः—योगप्रभावात्, भवदाज्ञया, एव, नीतः, ततः, त्वम्, मुनिना, पयोधिम्, पृष्टः, अमुना, कल्पदिदृक्षुम्, एनम्, सप्ताहम्, आस्व, इति, वदन्, अयासीः ॥

अन्वयः—ततः भवदाज्ञया एव मुनिना योगप्रभावात् पयोधिं नीतः त्वम् अमुना पृष्टः कल्पदिदृक्षुम् एनं "सप्ताहम् आस्व" इति वदन् अयासीः ॥

अन्वयार्थः

ततः भवदाज्ञया, एव मुनिना = बाद में आपके आज्ञानुसार ही मुनि द्वारा

योगप्रभावात् पयोधिं नीतः = योग शक्ति से समुद्र में लाये गये

त्वम् अमुना पृष्टः, = आप उस (सत्यव्रत) के पूछने पर

कल्पदिदृक्षुम् एनम् = प्रलय को देखने के इच्छुक उसको

"सप्ताहम् आस्व" इति = "सात दिन प्रतीक्षा करो" इस प्रकार

वदन् अयासीः = कहकर तिरोधान हो गये।

भावार्थ—बाद में आपके आज्ञानुसार ही मुनि द्वारा योग शक्ति से समुद्र में लाये गये आप उस (सत्यव्रत) के पूछने पर, प्रलय को देखने के इच्छुक उसको "सात दिन प्रतीक्षा करो" इस प्रकार कहकर तिरोधान हो गये।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

कल्प = End of the world, Universal destruction. A day of Brahma or 1000 yugas or 432 Million years of Mortals. (As in कल्पदिदृक्षुमेनम्)

दिदृक्षु = Desirous of seeing. (As in कल्पदिदृक्षुमेनम्)

पयोधिः/पयोनिधिः= Ocean. (As in पयोधिं नीतः)

॥ ५ ॥

प्राप्ते त्वदुक्तेऽहनि वारिधारापरिप्लुते भूमितले मुनीन्द्रः
सप्तऋषिभिः सार्धमपारवारिण्युद्घूर्णमानः शरणं ययौ त्वाम् ॥

पदविभागः—प्राप्ते, त्वदुक्ते, अहनि, वारिधारापरिप्लुते, भूमितले, मुनीन्द्र, सप्तऋषिभिः, सार्धम्, अपारवारिणि, उद्घूर्णमानः, शरणम्, ययौ, त्वाम् ॥

अन्वयः—त्वदुक्ते अहनि प्राप्ते, भूमितले वारिधारापरिप्लुते (सति) मुनीन्द्रः सप्तऋषिभिः सार्धम् अपारवारिणि उद्घूर्णमानः त्वां शरणं ययौ ।

अन्वयार्थः

त्वदुक्ते अहनि प्राप्ते = आपके द्वारा कहे गये, दिन आने पर

भूमितले वारिधारापरिप्लुते (सति) = समस्त भूमि जल में मग्न होने पर

मुनीन्द्रः सप्तऋषिभिः सार्धम् = (सत्यव्रतराजर्षि) मुनिश्रेष्ठ सप्तऋषियों के साथ

अपारवारिणि उद्घूर्णमानः = पार (किनारे) रहित जल में भ्रमण करते हुए

त्वां शरणं ययौ । = आपकी शरण में आये ।

भावार्थ—आपके द्वारा कहे गये दिन आने पर समस्त भूमि पानी में मग्न होने पर मुनिश्रेष्ठ (सत्यव्रतराजर्षि), सप्तऋषियों के साथ किनारे रहित (बगैर किनारे के) जल में भ्रमण करते हुए आपकी शरण में आये ।

Word-Explanation :

परिप्लुत = Flooded, Shaking, Trembling, Oscillating, Undulating. (As in परिप्लुते भूमितले)

तलः/तलम् = Surface. (As in परिप्लुते भूमितले)

भूमितलः = Surface of the earth.

उद्घूर्ण = Shaking, Moving to & fro. (As in उद्घूर्णमानः)

अपार = Shoreless, Limitless, Immense, Inexhaustible. (As in अपारवारिणि)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

धरां त्वदादेशकरीमवाप्तां नौरूपिणीमारुरुहुस्तदा ते ।
तत्कम्पकम्प्रेषु च तेषु भूयस्त्वमम्बुधेराविरभूर्महीयान् ॥

पदविभागः—धराम्, त्वदादेशकरीम्, अवाप्ताम्, नौरूपिणीम्, आरुरुहुः, तदा, ते, तत्कम्पकम्प्रेषु, च, तेषु, भूयः, त्वम्, अम्बुधेः, आविरभूः, महीयान् ॥

अन्वयः—तदा ते त्वदादेशकरीं नौरूपिणीम् अवाप्तां धरां तत्कम्पकम्प्रेषु च भूयः त्वं महीयान् अम्बुधेः आविरभूः ॥

अन्वयार्थः

तदा ते त्वदादेशकरीम् नौरूपिणीम् अवाप्ताम् = उस समय वे (सत्यव्रत तथा सप्तऋषिगण) आपके आदेशानुसार नाव स्वरूप

धरां आरुरुहुः । = भूमि पर चढ़े ।

तेषु तत्कम्पकम्प्रेषु च भूयः त्वं महीयान् = उनके हिलती नाव पर भयभीत रहने से फिर आप बड़े (मत्स्य के) रूप में

अम्बुधेः आविरभूः । = समुद्र से निकले ।

भावार्थ—उस समय वे (सत्यव्रत तथा सप्तऋषिगण) आपके आदेशानुसार नाव स्वरूप भूमि पर चढ़े । उनके हिलती नाव पर भयभीत होने से, फिर आप बड़े (मत्स्य के) रूप में समुद्र से निकले ।

Word-Explanation :

कम्प = Shaking, Moving, Tremour (As in कम्पकम्प्रेषु)

कम्प्र = Shaking, Moving, Tremour (As in कम्पकम्प्रेषु)

महीयस् = Greater, Larger, More Powerful, Weighty, Stronger, Mightier. (As in भूयः त्वं महीयान)

॥ ७ ॥

झषाकृतिं योजनलक्षदीर्घाम् दधानमुच्चैस्तरतेजसं त्वाम् ।
निरीक्ष्य तुष्टा मुनयस्त्वदुक्त्या त्वत्तुङ्गशृङ्गे तरणिं बबन्धुः ॥

पदविभागः—झषाकृतिम्, योजनलक्षदीर्घम्, दधानम्, उच्चैस्तरतेजसम्, त्वाम्, निरीक्ष्य, तुष्टा, मुनयः, त्वदुक्त्या, त्वत्तुङ्गशृङ्गे, तरणिम्, बबन्धुः ॥

अन्वयः—मुनयः योजनलक्षदीर्घं झषाकृतिं दधानम्, उच्चैस्तरतेजसं त्वां निरीक्ष्य तुष्टाः । त्वदुक्त्या त्वत्तुङ्गशृङ्गे तरणिं बबन्धुः ।

अन्वयार्थः

मुनयः योजनलक्षदीर्घम् झषाकृतिं दधानम् = मुनिगण ने लक्षयोजन फैली लंबी मछली का रूप धारण किये

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उच्चैस्तरतेजसं त्वां निरीक्ष्य तुष्टाः । = महान् तेजस्वी आपको देखकर सन्तुष्टि प्राप्ति की ।

त्वदुक्त्या त्वत्तुङ्गशृङ्गे = आपके आदेशानुसार आपके सींग पर

तरणिं बबन्धुः । = नाव को बांधा ।

भावार्थ—मुनिगण ने लक्षयोजन फैली लम्बी मछली का रूप धारण किये महान् तेजस्वी आपको देखकर सन्तुष्टि प्राप्ति की । आपकी आज्ञानुसार आपके सींग पर नाव को बांधा ।

Word-Explanation :

तुङ्ग = Lofty, High, Tall (As in त्वत्तुङ्गशृङ्गे)

झषः = A fish in general, A large fish (As in झषाकृतिं दधानम्)

तरणी = A raft, A float, A Boat. (As in तरणिं बबन्धुः)

शृङ्गम् = A Horn, The top of a mountain. (As in तुङ्गशृङ्गे)

॥ ८ ॥

आकृष्टनौको मुनिमण्डलाय प्रदर्शयन् विश्वजगद्विभागान् ।
संस्तूयमानो नृवरेण तेन ज्ञानं परं चोपदिशन्नचारीः ॥

पदविभागः—आकृष्टनौकः, मुनिमण्डलाय, प्रदर्शयन्, विश्वजगद्विभागान्, सम्स्तूयमानः, नृवरेण, तेन, ज्ञानम्, परम्, च, उपदिशन्, अचारीः ॥

अन्वयः—(त्वं) आकृष्टनौकः मुनिमण्डलाय विश्वजगद्विभागान् प्रदर्शयन् तेन नृवरेण सम्स्तूयमानः, परं ज्ञानम् उपदिशन् च अचारीः ॥

अन्वयार्थः

(त्वं) आकृष्टनौकः = (आप) नौका को खींचकर

मुनिमण्डलाय विश्वजगद्विभागान् प्रदर्शयन् = मुनिमण्डल को समस्त विश्व के भागों को दिखाकर

तेन नृवरेण सम्स्तूयमानः, = उस राजा (सत्यव्रत) के द्वारा स्तुति प्राप्त करके और (उसे)

परं ज्ञानम् उपदिशन् च अचारीः = आत्मज्ञान का उपदेश करके चले गये ।

भावार्थ—(आप) नौका को खींचकर, मुनिगणों को समस्त विश्व के भागों को दिखाकर, उस राजा (सत्यव्रत) द्वारा स्तुति प्राप्त करके और आत्मज्ञान का उपदेश करके चले गये ।

Word-Explanation :

कृष्ट- = Drawn, Pulled, Dragged etc. (As in आकृष्टनौकः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

कल्पावधौ सप्तमुनीन् पुरोवत् प्रस्थाप्य सत्यव्रतभूमिपं तम् ।
वैवस्वताख्यं मनुमादधानः क्रोधाद्धयग्रीवमभिद्रुतोऽभूः ॥

पदविभागः—कल्पावधौ, सप्तमुनीन्, पुरोवत्, प्रस्थाप्य, सत्यव्रतभूमिपम्, तम्, वैवस्वताख्यम्, मनुम्, आदधानः, क्रोधात्, हयग्रीवम्, अभिद्रुतः, अभूः ॥

अन्वयः—(त्वम्) कल्पावदौ सप्तमुनीन् पुरोवत् प्रस्थाप्य, तं सत्यव्रतभूमिपं वैवस्वताख्यं मनुम् आदधानः, क्रोधात् हयग्रीवम् अभिद्रुतः अभूः ॥

अन्वयार्थः

(त्वम्) कल्पावधौ सप्तमुनीन् = (आप) कल्प के अन्त में सप्तर्षियों को

पुरोवत् प्रस्थाप्य = पहले जैसे स्थापित करके,

तं सत्यव्रतभूमिपम् = उस सत्यव्रत राजा को

वैवस्वताख्यं मनुम् आदधानः, = वैवस्वत मनु बनाकर स्थापित करके,

क्रोधात् हयग्रीवम् = क्रोध से हयग्रीव के ऊपर

अभिद्रुतः अभूः = कूदे ।

भावार्थ—(आप) कल्प के अन्त में सप्तर्षियों को पहले जैसे स्थापित करके, उस सत्यव्रत राजा को वैवस्वत मनु बनाकर स्थापित करके, क्रोध से हयग्रीव के ऊपर कूदे ।

Word-Explanation :

अवधि = Boundary, Limit, End, Termination, Conclusion. (As in कल्पावधौ)

॥ १० ॥

स्वतुङ्गश्रृङ्गक्षतवक्षसं तं निपात्य दैत्यं निगमान् गृहीत्वा ।
विरिञ्चये प्रीतहृदे ददानः प्रभञ्जनागारपते प्रपायाः ॥

पदविभागः—स्वतुङ्गश्रृङ्गक्षतवक्षसम्, तम्, निपात्य, दैत्यम्, निगमान्, गृहीत्वा, विरिञ्चये, प्रीतहृदे, ददानः, प्रपञ्जनागारपते, प्रपायाः ।

अन्वयः—स्वतुङ्गश्रृङ्गक्षतवक्षसं तं दैत्यं निपात्य, निगमान् गृहीत्वा, प्रीतहृदे विरिञ्चये ददानः प्रभञ्जनागारपते (मां) प्रपायाः ।

अन्वयार्थः

स्वतुङ्गश्रृङ्गक्षतवक्षसम् = ऊपर उठते अपनी सींग द्वारा छाती को फाड़कर

तं दैत्यं निपात्य = उस असुर (हयग्रीव) को मार गिराकर

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निगमान् गृहीत्वा = वेदों को ग्रहण करके

प्रीतहृदे विरिञ्चये = सन्तुष्ट मन के ब्रह्मा को

ददानः प्रभञ्जनागारपते, = देने वाले हे गुरुवायुपुराधीश !

(मां) प्रपायाः । = मेरी रक्षा करें ।

भावार्थ—ऊपर उठते अपने सींग द्वारा छाती को फाड़कर (भेद करके) उस असुर (हयग्रीव) को मार गिराकर, वेदों को ग्रहण करके सन्तुष्ट मन से ब्रह्मा को प्रदान करने वाले, हे गुरुवायुपुराधीश ! मेरी रक्षा करें ।

Word-Explanation :

क्षत = Wounded, Hurt, Broken, Injured. (As in क्षतवक्षसम्)

निगमः = Vedas. (As in निगमान् गृहीत्वा)

प्रभञ्जनम् = Wind, Breaking into pieces etc. (Here: Wind) (As in प्रभञ्जनागारपते)

आगारम् = A house, Dwelling. (As in प्रभञ्जनागारपते)

॥ इति द्वात्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३३

अम्बरीषोपाख्यानम्

[वसन्ततिलकछन्दः]

॥ १ ॥

वैवस्वताख्यमनुपुत्रनभागजातनाभागनामकनरेन्द्रसुतोऽम्बरीषः ।
सप्तार्णवावृतमहीदयितोऽपि रेमे त्वत्सङ्गिषु त्वयि च मग्नमनाः सदैव ॥

पदविभागः—वैवस्वताख्यमनुपुत्रनभागजातनाभागनामकनरेन्द्रसुतोऽम्बरीषः, सप्तार्णवावृतमहीदयितः, अपि, रेमे, त्वत्सङ्गिषु, त्वयि, च, मग्नमनाः, सदा, एव ॥

अन्वयः—वैवस्वताख्यमनुपुत्रनभागजातनाभागनामकनरेन्द्रसुतः अम्बरीषः, सप्तार्णवावृतमहीदयितः अपि, सदा एव त्वत्सङ्गिषु, त्वयि च, मग्नमनाः रेमे ।

अन्वयार्थः

वैवस्वताख्यमनुपुत्रनभागजातनाभागनामकनरेन्द्रसुतः अम्बरीषः = वैवस्वत नामक मनु के पुत्र नभाग के पुत्र नाभाग नामक राजा के पुत्र अम्बरीष ने

सप्तार्णवावृतमहीदयितः अपि = सात समुद्रों से आवृत समस्त भूमि के पति होने पर भी

सदा एव त्वत्सङ्गिषु, त्वयि च, मग्नमनाः रेमे । = सदा ही आप में भक्ति रखने वालों के साथ तथा आप में भी, मन लगाकर दिन बिताये ।

भावार्थ—वैवस्वत नामक मनु के पुत्र नभाग के पुत्र नाभाग नामक राजा के पुत्र अम्बरीष, ने सात समुद्रों से आवृत समस्त भूमि के पति (राजा) होने पर भी, सदा ही आप में भक्ति रखने वालों के साथ, तथा आप में भी, मन लगाकर दिन बिताये ।

Word-Explanation :

अर्णवः = The Sea, Ocean (As in सप्तार्णवावृत—)

आवृत = Surrounded (As in सप्तार्णवृत—)

मही = Earth. (As in महीदयितः अपि)

दयितः = Husband

महीदयितः = King.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

त्वत्प्रीतये सकलमेव वितन्वतोऽस्य भक्तैव देव, नचिरादभृथाः प्रसादम् ।
येनास्य याचनमृतेप्यभिरक्षणार्थम् चक्रं भवान् प्रविततार सहस्रधारम् ।।

पदविभागः—त्वत्प्रीतये, सकलम्, एव, वितन्वतः, अस्य, भक्त्या, एव, देव, नचिरात्, अभृथाः, प्रसादम्, येन, अस्य, याचनम्, ऋते, अपि, अभिरक्षणार्थम्, चक्रम्, भवान्, प्रविततार, सहस्रधारम् ॥

अन्वयः—सकलम् एव त्वत्प्रीतये वितन्वतः अस्या भक्त्या एव देव, (त्वं) नचिरात् प्रसादम् अभृथाः । येन अस्य याचनम् ऋते अपि अभिरक्षणार्थं सहस्रधारं चक्रं भवान् प्रविततार ।

अन्वयार्थः

सकलम् एव त्वत्प्रीतये = सब कुछ ही आपकी प्रीति के लिए

वितन्वतः अस्या भक्त्या एव = करने वाले उसकी भक्ति द्वारा ही

देव, (त्वं) नचिरात् प्रसादम् अभृथाः । = हे देव ! (आप) समय नष्ट न करके तुरन्त सन्तुष्ट हुए ।

येन अस्य याचनम् ऋते अपि = जिसके कारण उसके न माँगने पर भी

अभिरक्षणार्थं सहसधारं चक्रम् भवान प्रविततार । = रक्षा के लिए हजार धार वाले (सुदर्शन) चक्र को आपने प्रदान किया ।

भावार्थ—सब कुछ ही आपकी प्रीति के लिए करने वाले उसकी भक्ति द्वारा ही हे देव ! (आप) समय नष्ट न करके तुरन्त सन्तुष्ट हुए । जिसके कारण उसके न माँगने पर भी, रक्षा के लिए हजार धार वाले (सुदर्शन) चक्र को आपने प्रदान किया ।

Word-Explanation :

चिरम्, चिर = Long, Lasting, A Longtime.

अचिरात् = Without wasting time, Early.

॥ ३ ॥

स द्वादशीव्रतमथो भवदर्चनार्थं वर्षं दधौ मधुवने यमुनोपकण्ठे ।
पत्न्या समं सुमनसा महतीं वितन्वन् पूजां द्विजेषु विसृजन् पशुषष्टिकोटिम् ।।

पदविभागः—सः, द्वादशीव्रतम्, अथ, भवदर्चनार्थम्, वर्षम्, दधौ, मधुवने, यमुनोपकण्ठे, पत्न्या, समम्, सुमनसा, महतीम्, वितन्वन्, पूजाम्, द्विजेषु, विसृजन्, पशुषष्टिकोटिम् ॥

अन्वयः—अथ सः भवदर्चनार्थं यमुनोपकण्डे मधुवने सुमनसा पत्न्या समं महतीं पूजां वितन्वन्, द्विजेषु पशुषष्टिकोटिं विसृजन् वर्षं द्वादशीव्रतं दधौ ॥

अन्वयार्थः

अथ सः भवदर्चनार्थम् = बाद में उसने आपकी सेवा के लिए

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यमुनोपकण्ठे मधुवने सुमनसा पत्न्या समम् = यमुना के समीप स्थित मधुवन में पत्नी सुमनसा के साथ

महतीं पूजां वितन्वन् = विस्तृत पूजा करके

द्विजेषु पशुषष्टिकोटिं विसृजन् = ब्राह्मणों को साठ करोड़ पशुओं का दान करके

वर्षं द्वादशीव्रतं दधौ। = एक वर्ष का द्वादशीव्रत धारण किया।

भावार्थ—बाद में उसने आपकी पूजा सेवा करने के लिए यमुना नदी के समीप स्थित मधुवन में पत्नी सुमनसा के साथ विस्तृत पूजा करके ब्राह्मणों को साठ करोड़ पशुओं का दान करके एक वर्ष का द्वादशीव्रत धारण किया।

Word-Explanation :

व्रतः, व्रतम् = A religious act of devotion or austerity, Vowed observance. (As in द्वादशीव्रतम्)

॥ ४ ॥

तत्राथ पारणदिने भवदर्चनान्ते दुर्वाससास्य मुनिना भवनं प्रपेदे।
भोक्तुं वृतश्च स नृपेण परार्तिशीलो मन्दं जगाम यमुनां नियमान् विधास्यन्॥

पदविभागः—तत्र, अथ, पारणदिने, भवदर्चनान्ते, दुर्वाससा, अस्य, मुनिना, भवनम्, प्रपेदे, भोक्तुम्, वृतः, च, सः, नृपेण, परार्तिशीलः, मन्दम्, जगाम्, यमुनाम्, नियमान्, विधास्यन्॥

अन्वयः—अथ पारणदिने भवदर्चनान्ते दुर्वाससा मुनिना तत्र अस्य भवनं प्रपेदे। नृपेण सः भोक्तुं वृतः च। परार्थिशीलः नियमान् विधास्यन् यमुनां (नदीं) मन्दं जगाम।

अन्वयार्थः

अथ पारणदिने भवदर्चनान्ते दुर्वाससा मुनिना तत्र = तदनन्तर पारण दिन में आपकी पूजा की समाप्ति पर मुनि दुर्वासा वहां उस

अस्य भवनं प्रपेदे। = (अम्बरीष) के घर पहुँचे।

नृपेण सः भोक्तुं वृतः च। = और राजा (अम्बरीष) ने उनको भोजन के लिए न्यौता दिया।

परार्थिशीलः नियमान् विधास्यन् = दूसरों को दुखी करने के स्वभाववश (मुनि) नियम आदि करने के लिए

यमुनां मन्दं जगाम। = यमुना (नदी) की ओर शनैः शनैः गये।

भावार्थ—तदनन्तर पारण (व्रत के पश्चात् के भोजन) दिन में आपकी पूजा की समाप्ति पर दुर्वासा मुनि वहाँ उस (अम्बरीष) के घर पहुँचे और राजा (अम्बरीष) ने उनको भोजन के लिए न्यौता दिया। दूसरों को दुःखी कराने के स्वभाववश वे (मुनि) नियम आदि करने के लिए यमुना (नदी) की ओर शनैः शनैः गये।

Digitized by K. Sharma

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

वृत = Chosen, Selected, Agreed to, Assented to, Served etc. (As in भोक्तुं वृतः च)

नियमः = Any voluntary or self-imposed religious observance. (As in नियमान् विधास्यन्)

॥ ५ ॥

राज्ञाऽथ पारणमुहूर्तसमाप्तिखेदाद्वारैव पारणमकारि भवत्परेण।
प्राप्तो मुनिस्तदथ दिव्यदृशा विजानन् क्षिप्यन् क्रुधोद्धृतजटो विततान कृत्याम् ॥

पदविभागः—राज्ञा, अथ, पारणमुहूर्तसमाप्तिखेदात्, वारा, एव, पारणम्, अकारि, भवत्परेण, प्राप्ते, मुनिः, तत्, अथ, दिव्यदृशा, विजानन्, क्षिप्यन्, क्रुधा, उद्धृतजटः, विततान, कृत्याम् ॥

अन्वयः—अथ राज्ञा पारणमुहूर्तसमाप्तिखेदात्भवत्परेण वारा एव पारणम् अकारि । अथ प्राप्तः मुनिः तत् दिव्यदृशा विजानन्, क्षिप्यन् क्रुधा उद्धृतजटः कृत्यां विततान ।

अन्वयार्थः

अथ राज्ञा पारणमुहूर्तसमाप्तिखेदात् भवत्परेण = तदनन्तर पारण-मुहूर्त समाप्ति के भय से आप में तत्पर राजा द्वारा

वारा एव पारणम् अकारि । = केवल जल से पारण समाप्त किया ।

अथ प्राप्तः मुनिः तत् दिव्यदृशा विजानन् = तब आये हुए मुनि ने इसको दिव्य-दृष्टि द्वारा जानकर

क्षिप्यन् क्रुधा उद्धृतजटः कृत्यां विततान । = क्रोध से जटा उतारकर फेंककर "कृत्या" को उत्पन्न किया ।

भावार्थ—तदनन्तर पारण-मुहूर्त समाप्ति के भय से आप में तत्पर राजा द्वारा केवल जल से पारण समाप्त कर दिया । तब आये हुए मुनि ने इसको दिव्य-दृष्टि द्वारा जानकर क्रोध से जटा उतारकर फेंककर "कृत्या" (नाम की स्त्री रूपी अग्नि) को उत्पन्न किया ।

Word-Explanation :

क्षिप् (क्षिप्यति, क्षिपति, क्षिप्त) - = To throw, To slander, Revile, To draw back, To repeat etc. (As in क्षिप्यन् क्रुधा—)

पारणा = Eating after a fast, Concluding a fast. (As in पारणमुहूर्त-समाप्ति—)

उद्धृत = Seized, Grasped.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

कृत्यां च तामसिधरां भुवनं दहन्तीमग्रेऽभिवीक्ष्य नृपतिर्नपदाच्चकम्पे ।
त्वद्भक्तबाधमभिवीक्ष्य सुदर्शनं ते कृत्यानलं शलभयन्मुनिमन्वधावीत् ॥

पदविभागः—कृत्याम्, च, ताम्, असिधराम्, भुवनम्, दहन्तीम्, अग्रे, अभिवीक्ष्य, नृपतिः, न, पदात्, चकम्पे, त्वद्भक्तबाधम्, अभिवीक्ष्य, सुदर्शनम्, ते, कृत्यानलम्, शलभयन्, मुनिम्, अन्वधावीत् ॥

अन्वयः—भुवनां दहन्मीम् तां कृत्यां च असिधरां अग्रे अभिवीक्ष्य नृपतिः पदात् न चकम्पे । ते सुदर्शनं त्वद्भक्तबाधम् अभिवीक्ष्य, कृत्यानलं शलभयन् मुनिम् अन्वधावीत् ॥

अन्वयार्थः

भुवनां दहन्तीम् तां कृत्यां च असिधराम् = पृथ्वी को जलाने वाली खड्ग धारण किये उस कृत्या को

अग्रे अभिवीक्ष्य नृपतिः = सामने देखकर राजा (अम्बरीष)

पदात् न चकम्पे । = अपने स्थान से नहीं हिले ।

ते सुदर्शनं त्वद्भक्तबाधम् अभिवीक्ष्य, = आपके सुदर्शन चक्र ने आपके भक्त के ऊपर आती बाधा को देखकर,

कृत्यानलं शलभयन् = कृत्यानल (कृत्या अग्नि) को आग में पतंग जलने के समान कराकर,

मुनिम् अन्वधावीत् । = मुनि (दुर्वासा) के पीछे दौड़ाया ।

भावार्थ—पृथ्वी को जलाने वाली खड्ग धारण किये उस कृत्या को सामने देखकर राजा (अम्बरीष) अपने स्थान से नहीं हिले । आपके सुदर्शन चक्र ने, आपके भक्त के ऊपर आये कष्ट को देखकर कृत्या अग्नि को, आग में गिरे पतंग के समान कराकर, मुनि (दुर्वासा) के पीछे दौड़ा ।

Word-Explanation :

असिः = A Sword (As in असिधरां)

॥ ७ ॥

धावन्नशेषभुवनेषु भिया स पश्यन् विश्वत्र चक्रमपि ते, गतवान् विरिञ्चम् ।
कः कालचक्रमतिलङ्घयतीत्यपास्तः शर्वं ययौ, स च भवन्तमवन्दतैव ॥

पदविभागः—धावन्, अशेषभुवनेषु, भिया, सः, पश्यन्, विश्वत्र, चक्रम्, अपि, ते, गतवान्, विरिञ्चम्, कः, कालचक्रम्, अतिलङ्घयति, इति, अपास्तः, शर्वम्, ययौ, सः, च, भवन्तम्, अवन्दत, एव ॥

अन्वयः—सः भिया अशेषभुवनेषु धावन् विश्वत्र ते चक्रम् अपि पश्यन्, विरिञ्चं गतवान् । "कः कालचक्रम् अतिलङ्घयति" इति अपास्तः । शर्वं ययौ सः च भवन्तम् एव अवन्दत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

सः भिया अशेषभुवनेषु धावन्, विश्वत्र ते चक्रम् अपि पश्यन् = वह (मुनि) डर से समस्त लोकों में दौड़कर, सब जगह आपके चक्र को भी देखकर,

विरिञ्चिम् गतवान्। = ब्रह्मा जी के पास गया।

"कः कालचक्रम् अतिलङ्घयति" = "कौन कालचक्र को पार कर सकता है ?"

इति अपास्तः। = इस प्रकार कहकर विमुख हो गये

शर्वं ययौ सः च भवन्तम् एव अवन्दत। = शिव जी के पास जाने पर उन्होंने आपको ही नमस्कार किया।

भावार्थ—वह (मुनि) डर से समस्त लोकों में दौड़कर, सब जगह आपके चक्र को भी देखकर ब्रह्मा जी के पास गया। "कौन कालचक्र को पार कर सकता है ?" वे इस प्रकार कहकर विमुख हो गये। शिवजी के पास जाने पर उन्होंने भी आप को ही नमस्कार किया।

Word-Explanation :

लङ्घ् = (लङ्घयति, लङ्घित, लिलङ्घिषति, लिलङ्घिषते) = To prevent, To oppose, To outshine To offend, To insult, To violate, To disobey, To disregard etc. (As in कालचक्रम् अतिलङ्घयति)

अपसरणम् = Departure, Retreat etc. (As in इति अपास्त)

॥ ८ ॥

भूयो भवन्निलयमेत्य मुनिं नमन्तं प्रोचे भवा "नहमृषे, ननु भक्तदासः,
ज्ञानं तपश्च विनयान्वितमेव मान्यं याह्यम्बरीषपदमेव भजे"ति भूमन्।।

पदविभागः—भूयः, भवन्निलयम्, एत्य, मुनिम्, नमन्तम्, प्रोचे, भवान्, अहम्, ऋषे, ननु, भक्तदासः, ज्ञानम्, तपः, च, विनयान्वितम्, एव, मान्यम्, याहि, अम्बरीषपदम्, एव, भज, इति, भूमन्।

अन्वयः—भूमन् भूयः भवन्निलयम् एत्य नमन्तं मुनिं, भवान् प्रोचे। "ऋषे, अहं भक्तदासः ननु ? ज्ञानं तपः च विनयान्वितम् एव मान्यम्। याहि अम्बरीषपदम् एव भज," इति।

अन्वयार्थः

भूमन्, भूयः भवन्निलयम् एत्य नमन्तं मुनिम् = हे सर्वव्यापी, बाद में आपके धाम (वैकुण्ठ) में आकर प्रणाम करते मुनि को

भवान् प्रोचे। = आपने कहा।

"ऋषे, अहं भक्तदासः ननु ? = "हे ऋषि ! मैं निश्चित रूप से भक्तों का दास हूँ

ज्ञानं तपः च विनयान्वितम् एव मान्यम्। = ज्ञान तथा तप विनय के साथ ही शोभा देते हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

याहि अम्बरीषपदम् एव भज," इति। = जाओ, अम्बरीष के चरणों की ही शरण लो," इस प्रकार (कहा)।

भावार्थ—हे सर्वव्यापी ! बाद में आपके धाम (वैकुण्ठ) में आकर प्रणाम करते मुनि को आपने कहा। "हे ऋषि ! मै निश्चित रूप से भक्तों का दास हूँ ? ज्ञान तथा तप विनय के साथ ही शोभा देते हैं। जाओ, अम्बरीष के चरणों की ही शरण लो" इस प्रकार (कहा)।

Word-Explanation :

विनयः = Humility, Decorum, Polite conduct, Decency, Modesty, A Trader, Merchant. (As in विनयान्वितम्)

॥ ९ ॥

तावत् समेत्य मुनिना स गृहीतपादो राजाऽपसृत्य भवदस्त्रमसावनौषीत्।
चक्रे गते मुनिरदादखिलाशिषोऽस्मै त्वद्भक्तिमागसि कृतेऽपि कृपां च शंसन्॥

पदविभागः—तावत्, समेत्य, मुनिना, सः, गृहीतपादः, राजा, अपसृत्य, भवदस्त्रम्, असौ, अनौषीत्, चक्रे, गते, मुनिः, अदात्, अखिलाशिषः, अस्मै, त्वद्भक्तिम्, आगसि, कृते, अपि, कृपाम्, च, शंसन्॥

अन्वयः—मुनिना तावत् समेत्य गृहीतपादः सः राजा अपसृत्य असौ भवदस्त्रम् अनौषीत्। चक्र गते (सति) मुनिः त्वद्भक्तिम् आगसि कृते अपि कृपां च शंसन् अस्मै अखिलाशिषः अदात्।

अन्वयार्थः

मुनिना तावत् समेत्य गृहीतपादः = मुनि के द्वारा तब आकर चरणों को पकड़ने पर

सः राजा अपसृत्य = उस राजा ने पीछे हटकर

असौ भवदस्त्रम् अनौषीत् = उस आपके अस्त्र की स्तुति की।

चक्र गते (सति) मुनिः = चक्र के जाने पर मुनि द्वारा

त्वद्भक्तिम् आगसि कृते अपि कृपां च शंसन् = आपके प्रति भक्ति को तुच्छ करने पर भी कृपा चाहने पर

अस्मै अखिलाशिषः अदात्। = (आपने) उस (अम्बरीष) को सब प्रकार के आशीर्वाद प्रदान किये।

भावार्थ—मुनि के द्वारा तब आकर चरणों को पकड़ने पर उस राजा ने पीछे हटकर उस आपके अस्त्र की स्तुति की। चक्र के जाने पर मुनि द्वारा आपके प्रति भक्ति का तिरस्कार करने पर पुनः कृपा चाहने पर आपने उस (अम्बरीष) को सब प्रकार के आशीर्वाद प्रदान किये।

॥ १० ॥

राजा प्रतीक्ष्य मुनिमेकसमामनाश्वान् सम्भोज्य साधु तमृषिं विसृजन् प्रसन्नम्।
भुक्त्वा स्वयं त्वयि ततोऽपि दृढं रतोभूत् सायुज्यमाप च स मां पवनेश पायाः॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—राजा, प्रतीक्ष्य, मुनिम्, एकसमाम्, अनाश्वान्, सम्भोज्य, साधु, तम्, ऋषिम्, विसृजन्, प्रसन्नम्, भुक्त्वा स्वयम्, त्वयि, ततः, अपि, दृढम्, रतः, अभूत्, सायुज्यम्, आप, च, सः, माम्, पवनेश, पायाः ॥

अन्वयः—राजा मुनिं प्रतीक्ष्य एक समाम् अनाश्वान् तम् ऋषिं साधु सम्भोज्य प्रसन्नं विसृजन् स्वयं भुक्त्वा त्वयि ततः अपि दृढं रतः अभूत् । सायुज्यम् आप च । पवनेश, सः (त्वं) मां पायाः ॥

अन्वयार्थः

राजा मुनिं प्रतीक्ष्य = राजा ने मुनि की प्रतीक्षा करके,

एक समाम् अनाश्वान् = एक वर्ष तक कुछ भी भोजन न करके,

तम् ऋषिं साधु सम्भोज्य प्रसन्नं विसृजन् = उस ऋषि को पूर्ण रूप से भोजन कराकर सन्तुष्ट रूप से प्रस्थान कराकर

स्वयं भुक्त्वा = स्वयं भोजन करके

त्वयि ततः अपि दृढं रतः अभूत्। = आपकी भक्ति में पूर्व से भी अधिक अनुरक्त हो गया ।

सायुज्यम् आप च। = और सायुज्य पदवी भी प्राप्त की ।

पवनेशः सः (त्वं) मां पायाः। = हे गुरुवायुपुराधीश ! उस तरह के आप मेरी रक्षा करें ।

भावार्थ—राजा ने मुनि की प्रतीक्षा करके, एक वर्ष तक कुछ भी न खाकर, उस ऋषि को अच्छी तरह भोजन कराकर सन्तुष्ट रूप से प्रस्थान कराकर स्वयं भोजन करके आपकी भक्ति में पूर्व से भी अधिक अनुरक्त हो गया और सायुज्य पदवी भी प्राप्त की । हे गुरुवायुपुराधीश ! उस तरह के आप मेरी रक्षा करें ।

Word-Explanation :

समा = A Year

सायुज्यम् = Absorption, Intimate union (one of the four stages of Mukti suchas सालोक्य, समीप्य, सारूप्य, सायुज्य)

॥ इति त्रयस्त्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३४

श्रीरामचरितवर्णनम्

[स्रग्धरछन्दः]

॥ १ ॥

गीर्वाणैरर्थ्यमानो दशमुखनिधनं कोसलेष्वृष्यश्रृङ्गे
पुत्रीयामिष्टिमिष्ट्वा ददुषि दशरथक्ष्माभृते पायसाग्रयम् ।
तद्भुक्त्या तत्पुरन्ध्रीष्वपि तिसृषु समं जातगर्भासु जातो
रामस्त्वं लक्ष्मणेन स्वयमथ भरतेनापि शत्रुघ्ननाम्ना ॥

पदविभागः—गीर्वाणैः, अर्थ्यमानः, दशमुखनिधनम्, कोसलेषु, ऋष्यश्रृङ्गे, पुत्रीयाम्, इष्टिम्, इष्ट्वा, ददुषि, दशरथ-क्ष्माभृते, पायसाग्रयम्, तद्भुक्त्या, तत्पुरन्ध्रीषु, अपि, तिसृषु, समम्, जातगर्भासु, जातः, रामः, त्वम्, लक्ष्मणेन, स्वयम्, अथ, भरतेन, अपि, शत्रुघ्ननाम्ना ॥

अन्वयः—त्वं गीर्वाणैः दशमुखनिधनम् अर्थ्यमानः कोसलेषु ऋश्यश्रृङ्गे पुत्रीयाम् इष्टिम् इष्ट्वा, दशरथक्ष्माभृते पायसाग्रयम् ददुषि (सति) तद्भुक्त्या तत्पुरन्ध्रीषु तिसृषु अपि समं जातगर्भासु अथ लक्ष्मणेन, भरतेन, शत्रुघ्ननाम्ना अपि स्वयं रामः जातः ।

अन्वयार्थः

त्वं गीर्वाणि दशमुखनिधनम् अर्थ्यमानः = देवगण के द्वारा दशमुख रावण का वध करने के लिए आग्रह करने पर आपने

कोसलेषु ऋश्यश्रृङ्गे पुत्रीयां इष्टिम् इष्ट्वा = कोसल में (अयोध्या में) महर्षि ऋष्यश्रृंग द्वारा पुत्रकामेष्टि यज्ञ करके

दशरथक्ष्माभृते पायसाग्रयम् ददुषि (सति) = दशरथ महाराज को अग्नि द्वारा खीर देने पर

तद्भुक्त्या तत्पुरन्ध्रीषु तिसृषु अपि समं जातगर्भासु = उसका सेवन करके उनकी तीनों पत्नियों को एक ही समय में गर्भ होने पर

अथ लक्ष्मणेन, भरतेन, शत्रुघ्ननाम्ना अपि स्वयं रामः जातः । = बाद में लक्ष्मण, भरत, शत्रुघ्न के साथ स्वयं राम के रूप में जन्म लिया ।

भावार्थ—देवगणों के द्वारा दशमुख रावण का वध करने के लिए आग्रह करने पर अपने कोसल (अयोध्या) में महर्षि ऋष्यश्रृंग द्वारा पुत्रकामेष्टि यज्ञ करके दशरथ महराज को अग्नि द्वारा खीर देने पर उसका सेवन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करके उनकी तीनों पत्नियों को एक ही समय में गर्भ होने पर बाद में लक्ष्मण, भरत, शत्रुघ्न के साथ स्वयं राम के रूप में जन्म लिया।

Word-Explanation :

अग्रिय = Formost

पुरन्धी/पुरन्ध्रि = An elderly married woman.

इष्टापूर्तः = Performing sacrifices,

इष्टिः = Wish.

॥ २ ॥

कोदण्डी कौशिकस्य क्रतुवरमवितुं, लक्ष्मणेनानुयातो
यातोऽभूस्तातवाचा, मुनिकथितमनुद्वन्द्वशान्ताध्वखेदः।
नृणां त्राणाय बाणैर्मुनिवचनबलात्ताटकां पाटयित्वा
लब्ध्वास्मादस्त्रजालं मुनिवनमगमो देव, सिद्धाश्रमाख्यम्॥

पदविभागः—कोदण्डी, कौशिकस्य, क्रतुवरम्, अवितुम्, लक्ष्मणेन, अनुयातः, यातः, अभूः, तातवाचा, मुनिकथितमनुद्वन्द्वशान्ताध्वखेदः, नृणाम्, त्राणाय, बाणै, मुनिवचनवलात्, ताटकाम्, पाटयित्वा, लब्ध्वा, अस्मात्, अस्त्रजालम्, मुनिवनम्, अगमः, देव, सिद्धाश्रमाख्यम्॥

अन्वयः—देव (त्वं) तातवाचा कौशिकस्य क्रतुवरम् अवितुं कोदण्डी लक्ष्मणेन अनुयातः यातः अभूः। मुनिकथितमनुद्वन्द्वशान्ताध्वखेदः नृणां त्राणाय मुनिवचनबलात् बाणै ताटकां पाटयित्वा, अस्मात् अस्त्रजालं लब्ध्वा सिद्धाश्रमाख्यं मुनिवनम् अगमः॥

अन्वयार्थः

देव, (त्वं) तातवाचा कौशिकस्य क्रतुवरम् अवितुं कोदण्डी लक्ष्मणेन अनुयातः यातः अभूः। = हे देव! (आप) पिता के आज्ञानुसार कौशिक (विश्वामित्र) के श्रेष्ठ यज्ञ की रक्षा के लिए धनुष धारण करके लक्ष्मण को साथ लेकर गये।

मुनिकथितमनुद्वन्द्वशान्ताध्वखेदः नृणां त्राणाय मुनिवचनबलात् बाणै ताटकां पाटयित्वा, = मुनि के द्वारा कहे गये दो मन्त्रों की शक्ति से कष्टों से निवृत्त होकर, मनुष्यों की रक्षा करने के लिए मुनि के वचनानुसार बाणों द्वारा ताड़का का वध करके,

अस्मात् अस्त्रजालं लब्ध्वा सिद्धाश्रमाख्यं मुनिवनम् अगमः। = उस (ऋषि) से अस्त्रों को स्वीकार करके सिद्धाश्रम नामक मुनि के वन में गये।

भावार्थ—हे देव! (आप) पिता के आज्ञानुसार कौशिक (विश्वामित्र) के श्रेष्ठ यज्ञ की रक्षा के लिए धनुष धारण करके लक्ष्मण को साथ लेकर गये। मुनि द्वारा दिये उपदेश मन्त्रों की शक्ति से कष्टों से निवृत्त होकर, मनुष्यों की रक्षा करने के लिए मुनि के वचनानुसार बाणों द्वारा ताड़का का वध करके, उस (मुनि) से अस्त्रों को स्वीकार करके सिद्धाश्रम नामक (विश्वामित्र) मुनि के वन में गये।

Digitized by K.S.M.E.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

अनु = According to, As indicated. (As in मुनिकथितमनु)

जालम् = A collection, An assemblage. (As in अस्त्रजालम्)

अव् (अवति/अवित/ऊत) -= To defend, To Protect. (As in क्रतुवरमवितुम्)

अध्वन् = Travel, Journey (As in अध्वखेदः)

॥ ३ ॥

मारीचं द्रावयित्वा मखशिरसि शरैरन्यरक्षांसि निघ्नन्
कल्यां कुर्वन्नहल्यां पथि पदरजसा प्राप्य वैदेहगेहम् ।
भिन्दानश्चान्द्रचूढं धनुरवनिसुतामिन्दिरामेवलब्ध्वा
राज्यं प्रातिष्ठथास्त्वं त्रिभिरपि च समं भ्रातृवीरैः सदारैः ॥

पदविभागः—मारीचम्, द्रावयित्वा, मखशिरसि, शरैः, अन्यरक्षांसि, निघ्नन्, कल्याम्, कुर्वन्, अहल्याम्, पथि, पदरजसा, प्राप्य, वैदेहगेहम्, भिन्दानः, चन्द्रचूढ़म्, धनुः, अवनिसुताम्, इन्दिराम्, एव, लब्ध्वा, राज्यम्, प्रतिष्ठथाः, त्वम्, त्रिभिः, अपि, च समम्, भ्रातृवीरैः, सदारैः ।

भावार्थ—उस के बाद क्रुद्ध हेहयराजा (कार्तवीर्यार्जुन) के पुत्रों द्वारा पिता (जमदग्नि) का वध करने पर रेणुका (माता) को अनेक प्रकार से छाती को पीटती हुई देखकर, घोर प्रतिज्ञा लेकर आपने ध्यान द्वारा प्राप्त रथ तथा अस्त्रों से, सब दिशाओं के ब्राह्मणद्रोही क्षत्रियों का कुल्हाड़ी से वध करके, धरती को क्षत्रियहीन कर दिया ।

Word-Explanation :

विशिख = Crestless (Also arrow) (As in विशिखयन्)

विप्र = A Brahmin (As in विप्रद्रुहः)

द्रोहः= Potting against, Seeaking to hurt or injure (As in विप्रद्रुहः)

अमर्ष = Not enduring or bearing, Intolerent (As in अमर्षितहेहयात्मजगणैः)

॥ १० ॥

तातोज्जीवनकृन्नृपालककुलं त्रिःसप्तकृत्वो जयन्
सन्तर्प्याथ समन्तपञ्चकमहारक्तह्रदौघे पितृन् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यज्ञे क्ष्मामपि काश्यपादिषु दिशन् साल्वेन युद्धयन् पुनः
"कृष्णोऽमुं निहनिष्यतीति" शमितो युद्धात् कुमारैर्भवान् ॥

पदविभागः—तातोज्जीवनकृत्, नृपालककुलम्, त्रिःसप्तकृत्वाः, जयन्, सन्तर्प्य, अथ, समन्तपञ्चकमहारक्तह्रदौघे, पितृन्, यज्ञे, क्ष्माम्, अपि, काश्यपादिषु दिशन्, साल्वेन, युद्धयन्, पुनः, कृष्णः, अमुम्, निहनिष्यति, इति, शमितः, कुमारैः, भवान् ॥

अन्वयः—भवान् तातोज्जीवनकृत् नृपकुलं त्रिःसप्तकृत्वः जयन् अथ समन्तपञ्चकमहारक्तह्रदौघे पितृन् सन्तर्प्य यज्ञे क्ष्माम् अपि काश्यपादिषु दिशन् साल्वेन, युद्धयन्, पुनः, "कृष्णः, अमुं निहनिष्यति" इति कुमारैः युद्धात् शमितः ।

अन्वयार्थः

भवान् तातोज्जीवनकृत् नृपकुलम् त्रिःसप्तकृत्वः जयन् = आपने पिताजी को पुनर्जीवित करके राजाओं के समूह को इक्कीस बार जीत कर,

अथ समन्तपञ्चकमहारक्तह्रदौघे पितृन् सन्तर्प्य = बाद में समन्तपञ्चकमहारक्त तालाब में पितरों को तर्पण देकर

यज्ञे क्ष्मां अपि काश्यपादिषु दिशन् = यज्ञ में भूमि को भी काश्यप आदि मुनियों को देकर

साल्वेन युद्धयन्, पुनः = साल्व से युद्ध करने के बाद

"कृष्णः अमुं निहनिष्यति" इति = "कृष्ण इस का वध करेंगे" इस प्रकार

कुमारैः युद्धात् शमितः । = सनत्कुमार आदि के कहने पर युद्ध समाप्त किया

भावार्थ—आपने पिताजी को पुनर्जीवित करके राजाओं के समूह को इक्कीस बार जीतकर, बाद में समन्तपञ्चक-महारक्त, तालाब में पितरों को तर्पण देकर यज्ञ में भूमि को भी काश्यप आदि मुनियों को देकर, साल्व से युद्ध करने के बाद "कृष्ण इस का वध करेंगे" इस प्रकार सनत्कुमार आदि के कहने पर युद्ध समाप्त किया ।

Word-Explanation :

ह्रद् = A deep lake, A large and deep lake or pool of water, (As in महारक्तह्रदौघे)

क्ष्मा = Earth (As in क्ष्माम् अपि—-)

जीवन (जीवनी) = Giving lite (As in उज्जीवनकृत्)

॥ ११ ॥

न्यस्यास्त्राणि महेन्द्रभूभृति तपस्तन्वन् पुनर्मज्जिताम्
गोकर्णावधि सागरेण धरणीं दृष्ट्वार्थितस्तापसैः ।

Funding by IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ध्यातेष्वासधृतानलास्त्रचकितं सिन्धुं स्रुवक्षेपणा-
दुत्सार्योद्धृतकेरलो भृगुपते, वातेश संरक्षमाम् ॥

पदविभागः—न्यस्य, अस्त्राणि, महेन्द्रभूभृति, तपः, तन्वन्, पुनः, मज्जिताम्, गोकर्णावधि, सागरेण, धरणीम्, दृष्ट्वा, अर्थितः, तापसैः, ध्यातेष्वासधृतानलास्त्रचकितम्, सिन्धुम्, स्रुवक्षेपणात्, उत्सार्य, उद्धृतकेरलः, भृगुपते, वातेश, संरक्ष, माम् ।

अन्वयः—भृगुपते, वातेश, अस्त्राणि न्यस्य महेन्द्र भूभृति तपः तन्वन्, पुनः गोकर्णाधि सागरेण मज्जितां धरणीं दृष्ट्वा तापसैः अर्थितः ध्यातेष्वासधृतानलास्त्रचकितम् सिन्धुं स्रुवक्षेपणात् उत्सार्य उद्धृतकेरलः । (सः) (त्वं) माम् संरक्ष ।

अन्वयार्थः

भृगुपते, वातेश, (त्वम्) = हे भृगुपते ! गुरवायुपुराधीश ! (आप)

अस्त्राणि न्यस्य महेन्द्रभूभृति = अस्त्रों को त्याग कर महेन्द्र पर्वत में

तपः तन्वन्, पुनः, = तप करने के बाद

गोकर्णावधि सागरेण मज्जितां धरणीं दृष्ट्वा, = गोकर्ण पर्यन्त सागर में मग्न धरती को देखकर,

तापसैः अर्थितः = तपस्या करते मुनियों द्वारा प्रार्थना करने पर

ध्यातेष्वासधृतानलास्त्रचकितं सिन्धुम् = ध्यान करके लाये धनुष में लगाये आग्नेयास्त्र से डरे समुद्र को

स्रुवक्षेपणात् उत्सार्य उद्धृतकेरलः । = स्रुव फेंककर दूर करके केरल को ऊपर उठाया ।

(सः त्वं) माम् संरक्ष । = वह (उस तरह के) (आप) मेरी रक्षा करें ।

भावार्थ—हे भृगुपते, गुरुवायुपुराधीश ! (आपने) अस्त्रों को त्याग कर महेन्द्रपर्वत में तप करने के बाद गोकर्ण पर्यन्त सागर में मग्न धरती हो देखकर, तपस्या करते मुनियों द्वारा प्रार्थना करने पर ध्यान करके लाये धनुष में चढ़ाये आग्नेयास्त्र से डरे समुद्र को स्रुव फेंक कर दूर करके केरल को ऊपर उठाया । वह (उस तरह के) (आप) मेरी रक्षा करें ।

Word-Explanation :

न्यससन् = Removing, Depositing, Laying down, Giving up, Delivering. (As in अस्त्राणि न्यस्य)

मज्जनम् = Sinking, Immersion, Plunging, Drowning, Sinking under water. (As in सागरेण मज्जिताम्)

इषु =Arrow (As in ध्यातेष्वासधृतानलास्त्र-)

इषुआस = A Bow. (As in ध्यातेष्वासधृतानलास्त्र—)

चकित = Shaking, Trembling (As in—अनलास्त्रचकित)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रुवः/स्रुवा = A Sacrificial ladle. (As in स्रुवक्षेपणात्)

सिन्धु = The sea, Ocean (As in सिन्धुं स्रुवक्षेपणात्)

भूभृति = A Mountain. (As in महेन्द्रभूभृति)

उत्सारणम् =Removing, Driving out of the way. (As in उत्सार्य उद्धृतकेरल)

उद्धृत= Drawn up, Elevated, Raised, Expected. (As in उद्धृतकेरल)

ध्यातेष्वासधृतानलास्त्रचकित (पदविभागः)ध्यात, इषुआस, धृत, अनलास्त्र, चकित ।

॥ इति षट्त्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३७

कृष्णावतारप्रसंगवर्णनम्

[शार्दूलविक्रीडितछन्दः]

॥ १ ॥

सान्द्रनन्दतनो हरे, ननु पुरा दैवासुरे सङ्गरे
त्वत्कृत्ता अपि कर्मशेषवशतो ये ते न याता गतिम् ।
तेषां भूतलजन्मनां दितिभुवां भारेण दूरार्दिता
भूमिः प्राप विरिञ्चमाश्रितपदं देवैः पुरैवागतैः ॥

पदविभागः—सान्द्रानन्दतनो, हरे, ननु, पुरा, दैवासुरे, सङ्गरे, त्वत्कृत्ता, अपि, कर्मशेषवशतः, ये, ते, न, याता, गतिम्, तेषाम्, भूतलजन्मनाम्, दितिभुवाम्, भारेण, दूरार्दिता, भूमिः, प्राप, विरिञ्चम्, आश्रितपदम्, देवैः, पुरा, एव, आगतैः ।

अन्वयः—ननु सान्द्रानन्दतनो पुरा हरे दैवासुरेसङ्गरे त्वत्कृत्ताः अपि कर्मशेषवशतः ये ते गतिं न याताः, भूतलजन्मनां तेषां दितिभुवां भारेण दूरार्दिता भूमिः पुरा एव आगतैः देवैः आश्रितपदं विरिञ्चं प्राप ।

अन्वयार्थः

ननु सान्द्रानन्दतनो हरे, = हे सान्द्रानन्दरूपी भगवन् ! (परमानन्दरूपी)

पुरा दैवासुरेसङ्गरे = पूर्व में हुए देवासुर-युद्ध में

त्वत्कृत्ताः अपि कर्मशेषवशतः ये ते गतिं न याताः = आप के द्वारा वध करने पर भी कर्म शेष रहने के कारण जो वे आप के धाम नहीं गये,

भूतलजन्मनां तेषां दितिभुवाम् = धरती पर जन्म लेने वाले उन असुरों के

भारेण दूरार्दिता भूमिः = भार से पीड़ित भूमि

पुरा एव आगतैः देवैः = पूर्व में ही आये देवों द्वारा

आश्रितपदं विरिञ्चं प्राप = आश्रित स्थान ब्रह्मा के पास पहुंची ।

भावार्थ—हे सान्द्रनन्दरूपी भगवन् ! पूर्व में हुए देवासुर-युद्ध में आप के द्वारा वध करने पर भी कर्म शेष (बाकी) रहने के कारण जो वे आपके धाम नहीं गये, धरती पर जन्म लेने वाले उन दितिसुतों (असुरों) के भार से पीड़ित भमि, पूर्व में आये देवों द्वारा आश्रित पद ब्रह्मा के पास पहुंची ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

अर्द (अर्दति/अर्दित) =Afflict, Hurt, Torment, Kill (As in दूरार्दिता भूमिः)

कर्तनम्- Cutting, Lopping off (As in त्वत्कृत्ताः अपि)

सङ्गरम् = War, Battle (As in दैवासुरेसङ्गरे)

ननु = Surely, Certainly, "O" "Oh" "Pray" etc.

॥ २ ॥

हा हा दुर्जन भूरिभारमथितां पाथोनिधौ पातुका-
मेतां पालय, हन्त मे विवशतां सम्पृच्छ देवानिमान् ।
इत्यादिप्रचुरप्रलापविवशामालोक्य धाता महीम्
देवानां वदनानि वीक्ष्य परितो दध्यौ भवन्तं हरे ॥

पदविभागः—हा, हा, दुर्जन भूरिबारमथिताम्, पाथोनिधौ, पातुकाम्, एताम्, पालय, हन्त, मे, विवशताम्, सम्पृच्छ, देवान्, इमान्, इत्यादि, प्रचुरप्रलापविवशाम्, आलोक्य, धाता, महीम्, देवानाम्, वदनानि, वीक्ष्य, परितः, दध्यौ, भवन्तम्, हरे ।

अन्वयः—"हा, हा, दुर्जनभूरिभारमथितां पाथोनिधौ पातुकाम् एतां पालय । हन्त, मे विवशताम् इमान् देवान् सम्पृच्छ ।" इत्यादि प्रचुरप्रलापविवशां महीं धाता आलोक्य, परितः देवानां वदनानि वीक्ष्य, हरे, भवन्तं दध्यौ ॥

अन्वयार्थः

हा, हा, दुर्जनभूरिभारमथिताम् = "हाय, खेद है कि दुर्जनों की अत्यधिकता के कारण उनके भार से पीड़ित

पाथोनिधौ पातुकाम् एतां पालय । = समुद्र में गिरने वाली इसकी रक्षा करो ।

हन्त, मे विवशतां इमान् देवान् सम्पृच्छ ।" = हाय, मेरी विवशता को इन देवों से पूछो ।"

इत्यादि प्रचुरप्रलापविवशां महीं धाता आलोक्य, = इस प्रकार के बहुत प्रकार से प्रलाप करती विवश धरती को ब्रह्मा ने देखकर

परितः देवानां वदनानि वीक्ष्य, हरे, भवन्तं दध्यौ । = चारों ओर के देवों के मुखों को देखकर, हे हरे ! आप का ध्यान किया ।

भावार्थ—हाय खेद है कि दुर्जनों के अधिकता के कारण उन के भार से पीड़ित समुद्र में गिरने वाली इसकी रक्षा करो । हाय, मेरी विवशता को इन देवों से पूछो । इस प्रकार के बहुत प्रकार से प्रलाप करती विवश धरती को ब्रह्मा ने देखकर, चारों ओर के देवों के मुखों को देखकर हे, हरे ! आप का ध्यान किया ।

Word-Explanation :

मथित = Churned, To grind down, Afflict (As in (भूमिभारमथिताम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पाथम्- Water, पाथोनिधि,= Ocean (As in पाथोनिधौ)

धातृ (विलोक्या धाता महीम्) = The Creator, Brahma

प्रचुर = Much, Ample, Abundant

प्रलाप= An incoherent talk, A nonsensical talk.

॥ ३ ॥

ऊचे चाम्बुजभूरमू "नयि सुराः सत्यं धरित्र्या वचो
नन्वस्या भवतां च रक्षणविधौ दक्षो हि लक्ष्मीपतिः.
सर्वे शर्वपुरःसरा वयमितो गत्वा पयोवारिधिम्
नत्वा तं स्तुमहे जवा" दिति ययुः साकं तवाकेतनम् ॥

पदविभागः—ऊचे, च, अम्बुजभूः, अमून्, अयि, सुराः, सत्यम्, धरित्र्याः, वचः, ननुः, अस्याः, भवताम्, च, रक्षणविधौ, दक्षः, हि, लक्ष्मीपतिः, सर्वे, शर्वपुरःसरा, वयम्, इतः, गत्वा, पयोवारिधिम्, नत्वा, तम्, स्तुमहे, जवात्, इति, ययुः, साकम्, तव, आकेतनम् ॥

अन्वयः—अम्बुजभूः अमून् ऊचे च । "अयि सुराः धरित्र्याः वचः सत्यम् । ननु अस्याः भवतां च रक्षणविधौ दक्षः लक्ष्मीपतिः हि । शर्वपुरःसराः सर्वे वयम् इतः पयोवारिधिं गत्वा, जवात् तं नत्वा स्तुमहे ।" इति साकं तव आकेतनं ययुः ॥

अन्वयार्थः

अम्बुजभूः अमून् ऊचे च । = और ब्रह्मा ने इनको कहां ।

"अयि सुराः धरित्र्याः वचः सत्यम् । = हे, देवगण ! भूमि के वचन में सत्य है ।

ननु, अस्याः भवतां च रक्षणविधौ दक्षः लक्ष्मीपतिः हि । = निश्चित रूप से उसकी तथा आप लोगों की रक्षा करने में समर्थ विष्णु ही हैं ।

शर्वपुरःसराः सर्वे वयम् = शिवजी को आगे कग्के हम सब

इतः पयोवारिधिं गत्वा = यहाँ से क्षीरसार में जाकर

जवात् तं नत्वा स्तुमहे ।" = शीघ्र उनको प्रणाम करके स्तुति करें ।

इति साकं तव आकेतनं ययुः । = इस प्रकार सब आपके धाम को गये ।

भावार्थ—और ब्रह्मा ने इनको कहा । "हे देवगण, भूमि के वचन में सत्य है । निश्चित रूप से उसकी तथा आप लोगों की रक्षा करने में समर्थ विष्णु ही हैं । शिवजी को आगे करके हम सब इधर से क्षीरसागर में जाकर शीघ्र उनको प्रणाम करके, स्तुति करें ।" इस प्रकार सब एक साथ आपके धाम को गये ।

Word-Explanation :

पयस् = Milk (water also) (As in पयोवारिधिं गत्वा)

शर्वः= Shiva, अम्बुजभूः-Brahma

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साकम्= With, Together, Simultaneously, जव =Swift, Expeditious
आकेतनम्/ केतनम्= A house, An abode.

॥ ४ ॥

ते मुग्धानिलशालि दुग्धजलधेस्तीरं गताः सङ्गता
यावत् त्वत्पदचिन्तनैकमनसस्तावत् स पाथोजभूः ।
त्वद्वाचं हृदये निशम्य सकलानानन्दयन्नूचिवा-
नाख्यातः परमात्मना, स्वयमहं वाक्यं तदाकर्ण्यताम् ॥

पदविभागः—ते, मुग्धानिलशालि, दुग्धजलधेः, तीरम्, गताः, सङ्गताः यावत्, त्वत्पदचिन्तनैकमनसः, तावत्, सः, पाथोजभूः, त्वद्वाचम्, हृदये, निशम्य, सकलान्, आनन्दयन्, ऊचिवान्, आख्यातः परमात्मना, स्वयम्, अहम्, वाक्यम्, तत्, आकर्ण्यताम् ।

अन्वयः—ते दुग्धजलधेः मुग्धानिलशालि तीरं गताः त्वत्पदचिन्तनैकमनसः यावत् सङ्गताः तावत् सः पाथोजभूः त्वद्वाचं हृदये निशम्य, सकलान् आनन्दयन् ऊचिवान् । "परमात्मना स्वयम् अहम् आख्यातः । तद्वाक्यम् आकर्ण्यताम् ॥

अन्वयार्थः

ते दुग्धजलधेः मुग्धानिलशालितीरं गताः = उन्होंने मन्दमारुत से युक्त क्षीरसागर के तट पर जाकर के

त्वत्पदचिन्तनैकमनसः यावत् सङ्गताः = जब आप के चरणों को एकाग्रचित्त से एकत्रित होकर स्मरण करते हुए

तावत् सः पाथोजभूः त्वद्वाचं हृदये निशम्य, = तब उन ब्रह्मा ने आपके वचनों को हृदय में धारण करके

सकलान् आनन्दयन् ऊचिवान् । = सब को प्रसन्न कराकर कहा ।

"परमात्मना स्वयम् अहम् आख्यातः । तद्वाक्यम् आकर्ण्यताम्" = परमात्मा (विष्णु भगवान्) ने स्वयं मुझसे कहा । उस वाक्य को सुन लें ॥"

भावार्थ—उन्होंने मन्दमारुत से युक्त क्षीरसागर के तट पर जाकर जब आप के चरणों को एकत्रित मन से, एक होकर स्मरण करते हुए तब उन ब्रह्मा ने आपके वचनों को हृदय में धारण करके सब को प्रसन्न कराकर कहा "परमात्मा (विष्णु भगवान्) ने स्वयं मुझ से कहा । उस वाक्य को सुन लें ।

Word-Explanation :

अनिलः = Wind निशमनम् = Seeing, Beholding (As in हृदये निशम्य)

पाथोजभूः = Brahma (Born out of lotus flower)

सङ्गत = Joined, United, Assembled, Collected etc. (As in एकमनसः यावत् सङ्गताः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ५ ॥

जाने दीनदशमहं दिविषदां भूमेश्च भीमैर्नृपै-
स्तत्क्षेपाय भवामि यादवकुले सोऽहं समग्रात्मना ।

देवा वृष्णिकुले भवन्तु कलया देवाङ्गनाश्चावनौ
मत्सेवार्थमिति त्वदीयवचनं पाथोजभूरुचिवान् ॥

पदविभागः—जाने, दीनदशाम्, अहम्, दिविषदाम्, भूमेः, च, भीमैः, नृपैः, तत्क्षेपाय, भवामि, यादवकुले, सः, अहम्, समग्रात्मना, देवाः, वृष्णिकुले, भवन्तु, कलया, देवाङ्गनाः, च, अवनौ, मत्सेवार्थम्, इति, त्वदीयवचनम्, पाथोजभूः, ऊचिवान् ॥

अन्वयः—पाथोजभूः इति त्वदीयवचनम् ऊचिवान् । दिविषदां, भूमेः च भीमैः नृपैः दीनदशाम् अहं जाने । सः अहं तत्क्षेपाय यादवकुले समग्रात्मनाः भवामि । देवाः देवाङ्गनाः च मत्सेवार्थम् अवनौ वृष्णिकुले कलया भवन्तु ।"

अन्वयार्थः

पाथोजभूः इति त्वदीयवचनम् ऊचिवान् । = ब्रह्माजी ने इस प्रकार आप की कही बातों को कहा ।

"दिविषदां, भूमेः च भीमैः नृपैः दीनदशाम् अहं जाने । = देवों तथा भूमि की क्रूर (असुर) राजाओं के कारण प्राप्त दीनदशा को मैं जानता हूं ।

सः अहं तत्क्षेपाय यादवकुले समग्रात्मना भवामि । = वह मैं उनका वध करने के लिए यादवकुल में पूर्णकला से युक्त होकर जन्म लूंगा ।

देवाः देवाङ्गनाः च मत्सेवार्थम् अवनौ वृष्णिकुले कलया भवन्तु । = देवता तथा देवस्त्रियां मेरी सेवा के लिए भूमि पर वृष्णिकुल में अंश रूप से जन्म लें ।

भावार्थ—ब्रह्मा जी ने इस प्रकार आपकी कही बातों को कहा । देवों तथा भूमि की क्रूर (असुर-) राजाओं के कारण प्राप्त दीनदशा को मैं जानता हूं । वह मैं उनका वध करने के लिए यादवकुल में पूर्णकला से युक्त होकर जन्म लूंगा । देवता तथा देवस्त्रियां मेरी सेवा के लिए भूमि पर वृष्णिकुल में अपने-अपने अंश लेकर जन्म लें ।

Word-Explanation :

भीम = Fearful, Terrific. (As in भीमैः नृपैः)

क्षेपणम् = Throwing, Striking down. (As in तत्क्षेपाय यादवकुले—)

॥ ६ ॥

श्रुत्वा कर्णरसायनं तव वचः सर्वेषु निर्वापित-
स्वान्तेष्वीश, गतेषु तावककृपापीयूषतृप्तात्मसु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विख्याते मथुरापुरे किल भवत्सान्निध्यपुण्योत्तरे
धन्यां देवकनन्दनामुदवहद्राजा स शूरात्मजः ॥

पदविभागः—श्रुत्वा, कर्णरसायनम्, तव, वचः, सर्वेषु, निर्वापितस्वान्तेषु, ईश, गतेषु, तावक, कृपापीयूषतृप्तात्मसु, विख्याते, मथुरापुरे, किल, भवत्सान्निध्यपुण्योत्तरे, धन्याम्, देवकनन्दनाम्, उदवहत्, राजा, सः, शूरात्मजः ॥

अन्वयः—ईश, कर्णरसायनं तव वचः श्रुत्वा निर्वापितस्वान्तेषु तावककृपापीयूषतृप्तात्मसु सर्वेषु गतेषु (सत्सु), भवत्सान्निध्यपुण्योत्तरे विख्याते मथुरापुरे, शूरात्मजः सः राजा धन्यां देवकनन्दनाम् उदवहत् किल ।

अन्वयार्थः

ईश, कर्णरसायनं तव वचः श्रुत्वा, निर्वापितस्वान्तेषु = हे ईश ! कानों के रसायन (औषधि) जैसी आपकी बातें सुनकर अपने अपने स्थानों में

तावककृपापीयूषतृप्तात्मसु = आप की कृपा रूपी अमृत से तृप्त होकर

सर्वेषु गतेषु (सत्सु) = सब लोगों के जाने के बाद

भवत्सान्निध्यपुण्योत्तरे विख्याते = आपके सान्निध्य से पुण्यप्राप्त विख्यात

मथुरापुरे, शूरात्मजः सः राजा = मथुरापुरी में, शूर के पुत्र उस राजा ने

धन्यां देवकनन्दनाम् = देवक की भाग्यशाली पुत्री से

उदवहत् किल । = विवाह किया ।

भावार्थ—हे ईश ! कानों के रसायन (औषधि) आपकी बातें सुनकर अपने अपने स्थानों में आपकी कृपा रूपी अमृत से तृप्त होकर, सब लोगों के जाने के बाद, आपके सान्निध्य से पुण्य-प्राप्त विख्यात मथुरापुरी में शूर के पुत्र उस राजा ने देवक की भाग्यशाली पुत्री से विवाह किया ।

Word-Explanation :

निर्वापणम् = Pouring out, Scattering, Sowing etc.(As in निर्वापणस्वान्तेषु)

पीयूष/पीयूषम् = Nectar, Amrit (As in कृपापीयूषतृप्तात्मसु)

सान्निध्यम् = Vicinity, Proximity, Presence. (As in सान्निध्यपुण्योत्तरे)

॥ ७ ॥

उद्वाहावसितौ तदीयसहजः कंसोऽथ सम्मानय-
न्नेतौ सूततया गतः पथि रथे व्योमोत्थया त्वद्गिरा ।
अस्यास्त्वामतिदुष्टमष्टमसुतो हन्तेति हन्तेरितः
सन्त्रासात् स तु हन्तुमन्तिकगतां तन्वीं कृपाणीमधात् ॥

पदविभागः—उद्वाहावसतौ, तदीयसहजः, कंसः, अथ, सम्मानयन्, एतौ, सूततया, गतः, पथि, रथे, व्योमोत्थता, त्वद्गिरा, अस्याः त्वाम्, अतिदुष्टम्, अष्टमसुतः हन्ताः इति, हन्त, ईरितः, सन्त्रासात्, सः, तु हन्तुम्, अन्तिकगताम्, तन्वीम्, कृपाणीम्, अधात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—उद्वाहावसितौ अथ तदीयसहजः कंसः एतौ सम्मानयन् सूततया गतः। पथि रथे "अतिदुष्टं त्वाम् अस्याः अष्टमसुतः हन्ता" इति व्योमोत्थया त्वद्गिरा हन्त ईरितः सः तु सन्त्रासात् अन्तिकगतां तन्वीं हन्तुं कृपाणीं अधात्॥

अन्वयार्थः

उद्वाहावसितौ अथ तदीयसहजः कंसः एतौ सम्मानयन् = विवाह की समाप्ति के बाद उसके भाई कंस ने इन दोनों का सम्मान करते हुए

सूततया गतः। = स्वयं सारथी बनकर साथ गया।

पथि रथे "अतिदुष्टं त्वाम् अस्याः = मार्ग में रथ में "अतिदुष्ट तुमको इसका

अष्टमसुतः हन्ता" इति व्योमोत्थया त्वद्गिरा हन्त ईरितः सः तु सन्त्रासात् अन्तिकगतां तन्वीं हन्तुं कृपाणीं अधात्। = आठवां पुत्र मारेगा" इस प्रकार आकाशवाणी द्वारा आपके वचन से, हाय, उस (कंस) ने तो भय से काँपते हुए समीप स्थित कोमलांगी (देवकी) को वध करने के लिए तलवार उठायी।

भावार्थ—विवाह की समाप्ति के बाद उसके भाई कंस ने इन दोनों का सम्मान करते हुए स्वयं सारथी बनकर साथ गया। मार्ग में रथ में "अतिदुष्ट तुमको इस का आठवां पुत्र मारेगा। इस प्रकार आकाशवाणी द्वारा आप के वचन से, हाय, भय से काँपते हुए उस (कंस) ने तो समीप स्थित कोमलांगी (देवकी) का वध करने के लिये तलवार उठायी।

Word-Explanation :

अवसित = Finished, Ended, Completed. (As in उद्वहावसितौ)

सम्मानः = Respect, Honour. (As in सम्मानयन्)

सूतः = A charioteer. (As in सूततया गतः)

उत्थित = Risen, Rising (As in व्योमोत्थया)

त्रासित = Frightened (As in सन्त्रासात्)

कृपाणः = A sword (As in कृपाणीम् अधात्)

ईर् (ईर्ते, ईर्ण, ईरित) = To rise, Shaken, To throw, To spring from etc.

तन्वी = Thin, Emaciated, Slender, Slim

व्योमन् = Sky (As in व्योमोत्थया)

॥ ८ ॥

गृह्णानश्चिकुरेषु तां खलमतिः शौरेश्चिरं सान्त्वनै-
र्नोमुञ्चन् पुनरात्मजार्पणमिति प्रीतोऽथ यातो गृहान्।

Indira Gandhi National Centre for the Arts

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आद्यं त्वत्सहजं तथार्पितमपि स्नेहेन नाहन्नसौ
दुष्टानामपि देव पुष्टकरुणा दृष्टा हि धीरेकदा ॥

पदविभागः—गृह्णानः, चिकुरेषु, ताम्, खलमतिः, शौरेः, चिरम्, सान्त्वनैः, नोमुञ्चन्, पुनः आत्मजार्पणगिरा, प्रीतः, अथ, यातः, गृहान्, आद्यम्, त्वत्सहजम्, तथा, अर्पितम्, अपि, स्नेहेन, न अहन्, असौ, दुष्टानाम्, अपि, देव, पुष्टकरुणा, दृष्टा हि, धीः, एकदा ।

अन्वयः—त्वाम् चिकुरेषु गृह्णानः खलमतिः शौरेः चिरं सान्वनैः नोमुञ्चन्, पुनः आत्मजार्पणगिरा अथ प्रीतः गृहान् यातः । तथा अर्पितम् अपि आद्यं त्वत्सहजम् असौ स्नेहेन न अहन् । देव दुष्टानाम् अपि एकदा पुष्टकरुणा धीः दृष्टा हि ।

अन्वयार्थः

ताम्, चिकुरेषु गृह्णानः खलमतिः शौरेः चिरं सान्त्वनैः नोमुञ्चन् = उसको चोटी (सिर के बालों) से पकड़े दुष्ट बुद्धि के शौरी (वसुदेव) के बहुत समय तक सान्तवना देने पर भी नहीं छोड़ने पर

पुनः आत्मजार्पणगिरा अथ प्रीतः गृहान् यातः । = बाद में, पुत्रों को समर्पित करूंगा इस प्रकार कहने पर, उससे प्रसन्न होकर घर गया ।

तथा अर्पितम् अपि आद्यं त्वत्सहजम् असौ स्नेहेन न अहन् । = उस प्रकार समर्पण करने पर भी आपके प्रथम भाई को इस (कंस) ने स्नेह वश वध नहीं किया ।

देव, दुष्टानाम् अपि एकदा पुष्टकरुणा धीः दृष्टा हि । = हे देव, दुष्टजनों में कभी-कभी कारुण्य-भरा मन देखा ही जाता है ।

भावार्थ—उसको चोटी (सिर के बालों) से पकड़े दुष्टबुद्धि के, शौरी (वसुदेव) द्वारा बहुत समय तक सान्त्वना करने पर भी नहीं छोड़ने पर बाद में, पुत्रों को (उसको) समर्पित करने के वचन से, उस (वचन) से प्रसन्न होकर घर गया । उस प्रकार (पुत्रों को) समर्पण करने पर भी आप के प्रथम भाई को इस (कंस) ने प्यार से नहीं मारा । हे देव ! दुष्टजनों में भी कभी-कभी कारुण्य भरा मन देखा ही जाता है ।

Word-Explanation :

धीः = Mind, (As in पुष्टकरुणा धीः)

खलः -= A wicked or Mischievous person. (As in खलमतिः)

हन् = Killing, Slaying (As in अहन्)

चिकुरः = Hair (As in गृह्णानश्चिकुरेषु)

॥ ९ ॥

तावत् त्वन्मनसैवनारदमुनिः प्रोचे स भोजेश्वरम्
यूयं नन्वसुराः, सुराश्च यदवो, जानासि किं न प्रभो ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मायावी स हरिर्भवद्वधकृते भावी सुरप्रार्थना-
दित्याकर्ण्य यदूनदूधुनदसौ शौरेश्च सूनूनहन् ॥

पदविभागः—तावत्, त्वन्मनसा, एव, नारदमुनिः, प्रोचे, सः, भोजेश्वरम्, यूयम्, ननु, असुराः, सुराः, च, यदवः, जानासि, किम्, न, प्रभो, मायावी, सः, हरिः, भवद्वधकृते, भावी, सुरप्रार्थनात्, इति, आकर्ण्य, यदून्, अदूधुनत्, असौ, शौरेः, च, सूनून्, अहन् ।

अन्वयः—तावत् त्वन्मनसा एव सः नारदमुनिः भोजेश्वरं प्रोचे । "यूयम् असुराः, यदवः सुराः च ननु । प्रभो किं न जानासि ? "मायावी सः हरिः सुरप्रार्थनात् भवद्वधकृते भावी ।" इति आकर्ण्य असौ यदून् अदूधुनत् । शौरेः सूनून् अहन् च ।

अन्वयार्थः

तावत् त्वन्मनसा एव = तब आपके मन को जानकर ही

सः नारदमुनिः भोजेश्वरं प्रोचे । = नारदमुनि ने भोजराज (कंस) से कहा ।

"यूयम् असुराः, = "आप लोग असुर से जन्मे हैं, और

यदवः सराः च ननु । = यादव तो देवों से ही जन्मे हैं । (इसको)

प्रभो किं न जानासि ? = हे प्रभो ! क्यों नहीं जानते हो ?

मायावी सः हरिः सुरप्रार्थनात् = वह मायावी विष्णु देवों की प्रार्थना से प्रसन्न होकर

भवद्वधकृते भावी ।" = आप का वध करने के लिए अवतार लेने वाले हैं ।"

इति आकर्ण्य असौ यदून् = ऐसा सुनकर उस (कंस) ने यादवों का

अदूधुनत् । = जीना कठिन कर दिया ।

शौरेः सूनून् अहन् च । = और शौरी (वसुदेव) के पुत्रों का भी वध किया ।

भावार्थ—तब आपके मन को जानकर ही, नारदमुनि ने भोजराज (कंस) से कहा । "आप लोग असुर से जन्मे हैं, यादव तो देवों से जन्मे हैं, हे प्रभो ! क्यों नहीं (इसको) जानते हो ? वह मायावी विष्णु देवों की प्रार्थना से प्रसन्न होकर आपका वध करने के लिए अवतार लेने वाले हैं ।" इस को सुनकर उस (कंस) ने यादवों का जीना कठिन कर दिया तथा शौरी (वसुदेव) के पुत्रों का वध भी किया ।

Word-Explanation :

धु/धू(धुनोति, धुनुते, धुते, धूनोति etc)=To shake, To agitate, Cause to more or tremble, To treat roughly etc. (As in **अदूधुनत्**)

॥ १० ॥

प्राप्ते सप्तमगर्भतामहिपतौ त्वत्प्रेरणान्मायया
नीते माधव, रोहिणीं, त्वमपि भोः सच्चित्सुखैकात्मकः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवक्या जठरं विवेशिथ विभो, सम्स्तूयमानः सुरैः
स त्वं कृष्ण, विधूय रोगपटलीं भक्तिं परां देहि मे ॥

पदविभागः—प्राप्ते, सप्तमगर्भताम्, अहिपतौः, त्वत्प्रेरणात्, मायया, नीते, माधव, रोहिणीम्, त्वम्, अपि, भोः, सच्चित्सुखैकात्मकः, देवक्याः जठरम्, विवेशिथ, विभो, सम्स्तूयमानः सुरैः, सः, त्वम्, कृष्ण, विधूय, रोगपटलीम्, भक्तिम्, पराम्, देहि, मे ।

अन्वय—अहिपतौ सप्तमगर्भतां प्राप्ते (सति) माधव, त्वत्प्रेरणात् मायया रोहिणीं नीते (सति) भोः विभो सच्चित्सुखैकात्मकः त्वम् अपि देवक्याः जठरं विवेशिथ । कृष्ण, सुरैः सम्स्तूयमानः सः त्वं रोगपटलीं विधूय मे परां भक्तिं देहि ।

अन्वयार्थः

अहिपतौ सप्तमगर्भतां प्राप्ते (सति) माधव, त्वत्प्रेरणात् मायया रोहिणीं नीते (च सति) = नागों के पति (आदिशेष) के सातवें गर्भ में पहुंचने पर हे माधव ! आपकी प्रेरणा से माया द्वारा रोहिणी के गर्भ में ले जाने पर

भोः विभो सच्चित्सुखैकात्मकः त्वम् अपि देवक्याः जठरम् विवेशिथ । = हे, भगवन् ! सच्चिदानन्द स्वरूपी, आप ने भी देवकी के गर्भ में प्रवेश किया ।

कृष्ण, सुरैः सम्स्तूयमानः सः त्वं रोगपटलीं विधूय मे परां भक्तिं देहि । = हे कृष्ण ! देवों द्वारा स्तुति प्राप्त करते हुए उस तरह के आप समस्त रोगों का निवारण करके मुझे उच्चकोटि की भक्ति प्रदान करें ।

भावार्थ—नागों के प्रति (आदिशेष) के सातवें गर्भ में पहुंचने पर हे माधव, आपकी प्रेरणा से माया द्वारा (उसको) रोहिणी के गर्भ में ले जाने पर, हे भगवन् ! सच्चिदानन्द स्वरूपी, आपने भी देवकी के गर्भ में प्रवेश किया । हे कृष्ण, देवों द्वारा स्तुति- प्राप्त करते हुए उस तरह के आप समस्त रोगों का निवारण करके मुझे उच्चकोटि की भक्ति प्रदान करें ।

Word-Explanation :

अहि = Snake (As in अहिपतौ)

पटलम् = A heap, Multitude, Mass, (As in रोगपटलीम्)

॥ इति सप्तत्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३८

श्रीकृष्णावतारवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

आनन्दरूप, भगवन्नयि, तेऽवतारे प्राप्ते प्रदीप्तभवदङ्गनिरीयमाणैः ।
कान्तिव्रजैरिव घनाघनमण्डलैर्द्यामावृण्वती विरुरुचे किल वर्षवेला ॥

पदविभागः—आनन्दरूप, भगवन्, अयि, ते, अवतारे, प्राप्ते, प्रदीप्तभवदङ्गनिरीयमाणैः, कान्तिव्रजैः, इव, घनाघनमण्डलैः, द्याम्, आवृण्वती, विरुरुचे, किल, वर्षवेला ।

अन्वयः—अयि आनन्दरूप, भगवन्, ते अवतारे प्राप्ते सति प्रदीप्त भवदङ्गनिरीयमाणैः कान्तिव्रजैः, इव, घनाघनमण्डलैः द्याम् आवृण्वती वर्षवेला विरुरुचे किल ।

अन्वयार्थः

अयि, आनन्दरूप, भगवन् = हे, आनन्दरूपी, भगवन् !

ते अवतारे प्राप्ते सति = आपके अवतार का समय प्राप्त होने पर

प्रदीप्त भवदङ्गनिरीयमाणैः कान्तिव्रजैः इव = तेजोमय आपके शरीर से निकले प्रकाश के समान

घनाघनमण्डलैः द्याम् = घने बादलों के समूह के द्वारा आकाश को घेर कर

आवृण्वती वर्षवेला विरुरुचे किल । = वर्षाकाल शोभायमान हुआ ।

भावार्थ—हे, आनन्दरूपी, भगवन् ! आपके अवतार का समय प्राप्त होने पर तेजोमय आप के शरीर से निकले प्रकाश के समान घने बादलों के समूह के द्वारा आकाश को घेर कर वर्षाकाल (वर्षा का समय) शोभायमान हुआ ।

Word-Explanation :

ईर् (ईर्य, ईर्णे, ईरयति, ईरित) = To display, To pronounce, To repeat etc. (As in निरीयमाणैः)

व्रजः = Multitude, Collection, An abode, A cloud etc. (As in कान्तिव्रजैरिव)

आवरणम् = Covering, Enclosing. (As in आवृण्वती)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

आशासु शीतलतरासु पयोदतोयैराशासिताप्तिविवशेषु च सज्जनेषु ।
नैशाकरोदयविधौ निशि मध्यमायां क्लेशापहस्त्रिजगतां त्वमिहाविरासीः ॥

पदविभागः—आशासु, शीतलतरासु, पयोदतोयैः, आशासिताप्तिविवशेषु, च, सज्जनेषु, नैशाकरोदयविधौ, निशि, मध्यमायाम्, क्लेशापहः, त्रिजगताम्, त्वम्, इह, आविरासीः ॥

अन्वयः—पयोदतोयैः आशासु शीतलतरासु, सज्जनेषु आशासिताप्तिविवशेषु च, मध्यमायां निशि, नैशाकरोदय-विधौ, त्रिजगतां क्लेशापहः त्वम् इह आविरासीः ॥

अन्वयार्थः

पयोदतोयैः आशासु शीतलतरासु = वर्षा के जल से दिशायें शीतल होने पर तथा

सज्जनेषु आशासताप्तिविवशेषु च = सज्जनों द्वारा आशा प्राप्ति हेतु विवश, होने पर

मध्यमायां निशि = मध्य रात्रि में

नैशाकरोदयविधौ = चन्द्रमा उदय होने पर

त्रिजगतां क्लेशापहः = तीनों लोगों के दुःखों को दूर करने वाले

त्वम् इह आविरासीः । = आप के इधर (इस लोक में) अवतार लिया ।

भावार्थ—वर्षा के जल से दिशायें शीतल होने पर तथा सज्जनों द्वारा आशा प्राप्ति हेतु विवश होने पर मध्य रात्रि में चन्द्रमा के उदय होने पर, तीनों लोगों के दुःखों को दूर करने वाले आपने इधर (इस लोक में) अवतार लिया ।

Word-Explanation :

नैशाकरः/निशाकरः = The moon

॥ ३ ॥

बाल्यस्पृशापि वपुषा दधुषा विभूतीरुद्यत्किरीटकटकाङ्गदहारभासा ।
शङ्खारिवारिजगदापरिभासितेन मेघासितेन परिलेसिथ सूतिगेहे ॥ ३ ॥

पदविभागः—बाल्यस्पृशा, अपि, वपुषा, दधुषा, विभूतीः, उद्यत्किरीटकटकाङ्गदाहारभासा, शङ्खारिवारिजगदापरिभा-सितेन, मेघासितेन, परिलेसिथ, सूतिगेहे ।

अन्वयः—बाल्यस्पृशा अपि विभूतीः दधुषा, उद्यत्किरीटकटकाङ्गदहारभासा, शङ्खारिवारिजगदापरिभासितेन, मेघा-सितेन वपुषा त्वं सूतिगेहे परिलेसिथ ॥

अन्वयार्थः

बाल्यस्पृशा अपि = बाल स्वरूप होने पर भी

विभूतीः दधूषा = ऐश्वर्यों से भरपूर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्यत्किरीटकटकाङ्गदहारभासा = किरीट, मेखला, अङ्गद हार आदि के फैलते प्रकाश से,

शङ्खारिवारिजगदापरिभासितेन = शंख, चक्र, गदा, पद्म आदि से शोभित,

मेघासितेन वपुषा त्वं = मेघ जैसे श्यामल शरीर से आप

सूतिगेहे परिलेसिथ। = प्रसव गृह (प्रसूतिगृह) में प्रकाशमान् हुए।

भावार्थ—बाल स्वरूप होने पर भी ऐश्वर्यों से भरपूर, किरीट, मेखला, अङ्गद, हार, आदि के फैलते प्रकाश से, शंख, चक्र, गदा, पद्म आदि से शोभित, मेघ जैसे श्यामल शरीर से, आप प्रसूतिगृह में प्रकाशमान् हुए।

Word-Explanation :

स्पृश्(स्पृशति/स्पृष्ट) = To touch, To act upon, To come into contact, To attain etc. (As in बाल्यस्पृशा अपि)

विभूतिः = Power, Might, Dignity, Greatness. (As in विभूतिः वपुषा)

कटकः/कटकम् = A Bracelet. किरीटः/किरीटम्) = A diadem, Crown.

अङ्गदम्= An ornament, A bracelet worn on the upper arm.

अरिः = Wheel (here Sudarshan Chakra)

असित = Not white, Black, Dark blue

॥ ४ ॥

वक्षःस्थलीसुखनिलीनविलासिलक्ष्मीमन्दाक्षलक्षितकटाक्षविमोक्षभेदैः।
तन्मन्दिरस्य खलकंसकृतामलक्ष्मीमुन्मार्जयन्निव विरेजिथ वासुदेव॥

पदविभागः—वक्षःस्थलीसुखनिलीनविलासिलक्ष्मीमन्दाक्षलक्षितकटाक्षविमोक्षभेदैः, तन्मन्दिरस्य, खलकंसकृताम्, अलक्ष्मीम्, उन्मार्जयन् इव, विरेजिथ, वासुदेव।

अन्वयः—वासुदेव, त्वं वक्षःस्थलीसुखनिलीनविलासिलक्ष्मीमन्दाक्षलक्षितकटाक्षविमोक्षभेदैः तन्मन्दिरस्य खलकंसकृताम् अलक्ष्मीम् उन्मार्जयन् इव विरेजिथ।

अन्वयार्थः

वासुदेव, त्वम् = हे वासुदेव ! आप

वक्षःस्थलीसुखनिलीनविलासिलक्ष्मीमन्दाक्षलक्षितकटाक्षविमोक्षभेदैः = वक्षःस्थल (छाती) पर सुख से लीन रहती लक्ष्मी देवी के आँखों के कटाक्ष के भेदों से

तन्मन्दिरस्य खलकंसकृताम् अलक्ष्मीम् उन्मार्जयन् इव विरेजिथ। = उस घर में कंस द्वारा किये गये दुष्कृत्यों को पोंछते हुए के समान विराजमान हुए।

भावार्थ—हे वासुदेव ! आप, वक्षःस्थल (छाती) पर सुख से लीन रहती लक्ष्मी देवी के आँखों के कटाक्ष के भेदों (तरीकों) से उस घर में कंस द्वारा किये गये दुष्कृत्यों को पोंछते हुए के समान, विराजमान हुए।

Digitized by IGNCA-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

विलासित = Playful, Beauty, Elegance, Graceful (As in विलासितलक्ष्मी)

विमोक्ष = Release, Discharge, Liberation (As in कटाक्षविमोक्ष—)

मार्जनम् = Cleaning, Wiping, Rubbing off etc. (As in उन्मार्जयन्निव—)

॥ ५ ॥

शौरिस्तु धीरमुनिमण्डलचेतसोऽपि दूरस्थितं वपुरुदीक्ष्य निजेक्षणाभ्याम् ।
आनन्दबाष्पपुलकोद्गमगद्गदार्द्रस्तुष्टाव दृष्टिमकरन्दरसं भवन्तम् ॥

पदविभागः—शौरिः, तु, धीरमुनिमण्डलचेतसः, अपि, दूरस्थितं, वपुः, उदीक्ष्य, निजेक्षणाभ्याम्, आनन्दबाष्पपुलकोद्गमगद्गदार्द्रः, तुष्टाव, दृष्टिमकरन्दरसम् भवन्तम् ॥

अन्वयः—शौरिः तु धीरमुनिमण्डलचेतसः अपि दूरस्थितं वपुः निजेक्षणाभ्याम् उदीक्ष्य, आनन्दबाष्पपुलकोद्गमगद्गदार्द्रः दृष्टिमकरन्दरसं भवन्तं तुष्टाव ।

अन्वयार्थः

शौरिः तु धीरमुनिमण्डलचेतसः अपि दूरस्थितं वपुः = वसुदेव तो श्रेष्ठ मुनियों के मन से भी दूर रहते (आपके) शरीर को

निजेक्षणाभ्याम् उदीक्ष्य = अपनी दोनों आँखों से देखकर,

आनन्दबाष्पपुलकोद्गमगद्गदार्द्रः = आनन्द से रोमाञ्चित होकर, कुछ भी न बोल पाते हुए गदगद होते हुए

दृष्टिमकरन्दरसं भवन्तं तुष्टाव । = आँखों के लिए मधु के रस के समान आपकी स्तुति करने लगे ।

भावार्थ—वसुदेव तो श्रेष्ठ मुनियों के मन से भी दूर रहते (आपके) शरीर को अपनी दोनों आँखों से देखकर, आनन्द से रोमाञ्चित होकर कुछ भी न बोल पाते हुए गदगद होते हुए आँखों के लिए मधु के रस के समान आपकी स्तुति करने लगे ।

Word-Explanation :

चेतस् (मुनिमण्डलचेतसः–) = The Mind, Sense, Consciousness

पुलक = Thrill, Erection of the hairs of the body. (रोमांच) (As in पुलकोद्गम—)

मकरन्दः = The honey of flowers. (As in दृष्टिमकरन्दरसम्)

॥ ६ ॥

देव, प्रसीद परपूरुष, तापवल्लीनिर्ल्लूनिदात्रसमनेत्रकलाविलासिन् ।
खेदानपाकुरु कृपागुरुभिः कटाक्षैरित्यादि तेन मुदितेन चिरं नुतोऽभूः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—देव, प्रसीद, परपूरुष, तापवल्लीनिर्ल्लूनिदात्रसमनेत्रकलाविलासिन्, खेदान्, अपाकुरु, कृपागुरुभिः, कटाक्षैः, इत्यादि, तेन, मुदितेन, चिरम्, नुतः, अभूः ॥

अन्वयः—"परपूरुष, देव, प्रसीद । तापवल्लीनिर्ल्लूनिदात्रसमनेत्रकलाविलासिन्, कृपागुरुभिः कटाक्षैः खेदान् अपाकुरु ।" इत्यादि मुदितेन तेन त्वं चिरं नुतः अभूः ।

अन्वयार्थः

"परपूरुष, देव प्रसीद । = "हे परब्रह्म ! हे देव ! दया करो ।

तापवल्लीनिर्ल्लूनिदात्रसमनेत्रकलाविलासिन् = दुःख रूपी लताओं को काटती तलवार जैसे नेत्रों से शोभायमान्,

कृपागुरुभिः कटाक्षैः खेदान् अपाकुरु ।" = अत्यन्त कृपा से पूर्ण दृष्टि द्वारा (मेरे) दुःखों को दूर करो ।"

इत्यादि मुदितेन तेन त्वम् चिरं नुतः अभूः । = इस प्रकार प्रसन्न मन से उन (वसुदेव) ने चिरकाल तक आपकी स्तुति की ।

भावार्थ—"हे परब्रह्म ! हे देव ! दया करो । दुःख रूपी लताओं को काटती तलवार जैसे नेत्रों से शोभायमान् (देव) अत्यन्त कृपा से पूर्ण दृष्टि द्वारा (मेरे) दुःखों को दूर करो ।" इस प्रकार प्रसन्न मन से उन (वसुदेव) ने चिरकाल तक आपकी स्तुति की ।

Word-Explanation :

लून = Cut, Lopped, Severed. (As in निल्लूनिदात्र—)

॥ ७ ॥

मात्रा च नेत्र सलिलास्तृतगात्रवल्या स्तोत्रैरभिष्टुतगुणः करुणालयस्त्वम् ।
प्राचीनजन्मयुगलं प्रतिबोध्य ताभ्यां मातुर्गिरा दधिथ मानुषबालवेषम् ॥

पदविभागः—मात्रा, च, नेत्रसलिलास्तृतगात्रवल्या, स्तोत्रैः, अभिष्टुतगुणः, करुणालयः, त्वम्, प्राचीनजन्मयुगलम्, प्रतिबोध्य, ताभ्याम्, मातुः, दधिथ, मानुषबालवेषम् ।

अन्वयः—मात्रा च नेत्रसलिलास्तृतगात्रवल्या स्तोत्रैः अभिष्टुतगुणः करुणालयः त्वं, ताभ्यां प्राचीनजन्मयुगलं प्रतिबोध्य, मातुः गिरा मानुषवेषं दधिथ ।

अन्वयार्थः

मात्रा च नेत्रसलिलास्तृतगात्रवल्या = और माता (देवकी) के द्वारा आँखों के हर्षाश्रुओं से नहलाकर

स्तोत्रैः अभिष्टुतगुणः = स्तोत्रों से सन्तुष्ट

करुणालयः त्वम् = करुणासमुद्र आप ने

ताभ्यां = उन दोनों को

प्राचीनजन्मयुगलं प्रतिबोध्य = पूर्व के दो जन्मों को समझाकर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मातुः गिरा = माता के वचनानुसार

मानुषवेषं दधिथ। = मनुष्य शिशु का रूप धारण किया।

भावार्थ—और माता (देवकी) के द्वारा आँखों के हर्षाश्रुओं से नहलाकर स्तोत्रों से सन्तुष्ट करुणासमुद्र आप ने उन दोनों को, पूर्व के दो जन्मों (के वृतान्त) को समझाकर, माता के वचनानुसार मनुष्य शिशु का रूप धारण किया।

Word-Explanation :

सलम्/सलिलम् = Water (As in सलिलास्तृतगात्र—)

स्तृ (स्तृणोति, स्तृत, स्तृणुते) = To envelope, To cover, To overspread etc. (As in आस्तृत - सलिलास्तृत)

युगलम् = A pair, A couple (As in प्राचीनजन्मयुगलं)

अभिष्टवः = Praise (As in अभिष्टुतगुणः)

॥ ८ ॥

त्वत्प्रेरितस्तदनु नन्दतनूजया ते व्यत्यासमारचयितुं स हि शूरसूनुः।
त्वां हस्तयोरधृत चित्तविधार्यमार्यैरम्भोरुहस्थकलहम्सकिशोररम्यम्।।

पदविभागः—त्वत्प्रेरितः, तदनु, नन्दतनूजया, ते, व्यत्यासम्, आरचयितुम्, सः, हि, शूरसूनुः, त्वाम्, हस्तयोः, अधृत, चित्तविधार्यम्, आर्यैः, अम्भोरुहस्थकलहंसकिशोररम्यम्।

अन्वयः—तदनु सः हि शूरसूनुः त्वप्रेरितः नन्दतनूजया ते व्यत्यासम् आरचयितुम्, आर्यैः चित्तविधार्यं त्वां हस्तयोः अम्भोरुहस्थकलहम्सकिशोररम्यम् अधृत॥

अन्वयार्थः

तदनु सः हि शूरसूनुः त्वत्प्रेरितः = बाद में उस शूरसेन के पुत्र ने तो आपकी प्रेरणा से

नन्दतनूजया ते व्यत्यासम् आरचयितुम् = नन्द की पुत्री से आपको अदला-बदली करने के लिए

आर्यैः चित्तविधार्थं त्वाम् = श्रेष्ठ जनों द्वारा मन से ही धारण किये जाने वाले आपको

हस्तयोः अम्भोरुहहस्थकलहम्सकिशोररम्यम् अधृत। = दोनों हाथों द्वारा कमल पुष्प में स्थित सुन्दर कलहंस शिशु के समान उठाया।

भावार्थ—बाद में उस शूर (सेन) के पुत्र (वसुदेव) ने तो आपकी प्रेरणा से नन्द की पुत्री से आपको अदला-बदली करने के लिए श्रेष्ठजनों द्वारा मन से ही ध्यान किये जाने वाले आपको दोनों हाथों द्वारा, कमल पुष्प में स्थित सुन्दर कलहंस शिशु के समान उठाया।

Word-Explanation :

रुह् (रुहति) - = Spring up, Germinate. (As in अम्भोरुहस्थ)

सूनुः = A son (As in शूरसूनुः) (सूनु = is Daughter)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलहंसः = A Gander, A swan (As in कलहंसकिशोररम्यम्)

॥ ९ ॥

जाता तदा पशुपसद्मनि योगनिद्रा निद्राविमुद्रितमथाकृत पौरलोकम् ।
त्वत्प्रेरणात् किमिह चित्रमचेतनैर्यत् द्वारैः स्वयं व्यघटि सङ्घटितैः सुगाढ़म् ॥

पदविभागः—जाता, तदा, पशुपसद्मनि, योगनिद्रा, निद्राविमुद्रितम्, अथ, अकृत, पौरलोकम्, त्वत्प्रेरणात्, किम्, इह, चित्रम्, अचेतनैः, यत्, द्वारैः, स्वयम्, व्यघटि, सङ्घटितैः, सुगाढम् ।

अन्वयः—अथ तदा त्वत्प्रेरणात् पशुपसद्मनि जाता योगनिद्रा, पौरलोकं निद्राविमुद्रितम् अकृत । इह किं चित्रम् । यत् सुगाढं सङ्घटितैः अचेतनैः द्वारैः स्वयं व्यघटि ।

अन्वयार्थः

अथ तदा त्वत्प्रेरणात् = तब उस समय आपकी प्रेरणा से

पशुपसद्मनि जाता योगनिद्रा = पशुपालने वाले (नन्द) के घर में जन्मी योगनिद्रा ने

पौरलोकं निद्राविमुद्रितम् अकृत । = पुरवासियों को निद्रा में लीन किया ।

इहं किं चित्रम् ? = इस में क्या आश्चर्य

यत् सुगाढ़म् सङ्घटितैः अचेतनैः द्वारैः स्वयं व्यघटि । = अच्छी तरह से बन्द किये हुए अचेतन द्वार अपने आप खुले ।

भावार्थ—तब उस समय आपकी प्रेरणा से गाय पालने वाले (नन्द) के घर में जन्मी योगनिद्रा ने पुरवासियों को निद्रा में लीन किया । इस में क्या आश्चर्य क्योंकि अच्छी तरह से बन्द किए हुए अचेतन द्वार अपने आप खुले ।

Word-Explanation :

मुद्रितम् = Sealed, Closed, Shut, Printed etc. (As in निद्रविमुद्रितम्)

चित्रम् = Surprising, Wonderful (As in इह किं चित्रम् ?)

पशुपः = Cowherd

घट् (घटते, घटित) = To happen, To take place, To be possible etc. (As in व्यघटि)

॥ १० ॥

शेषेण भूरिफणवारितवारिणाऽथ स्वैरं प्रदर्शितपथो मणिदीपितेन ।
त्वां धारयन् स खलु धन्यतमः प्रतस्थे सोऽयं त्वमीश मम नाशय रोगवेगान् ॥

पदविभागः—शेषेण, भूरिफणवारितवारिणा, अथ, स्वैरम्, प्रदर्शितपथः, मणिदीपितेन, त्वाम्, धारयन्, सः, खलु, धन्यतमः, प्रतस्थे, सः, अयम्, त्वम्, ईश, मम, नाशय, रोगवेगान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अथ भूरिफणिवारितवारिणा मणदीपेन शेषेन स्वैरं प्रदर्शितपथः त्वां धारयन् सः धन्यतमः खलु प्रतस्थे। ईश, सः अयं त्वं मे रोगवेगान् नाशय।

अन्वयार्थः

अथ भूरिफणवारितवारिणा = तब अनेक फणों से वर्षा को रोकते हुए

मणिदीपेन शेषेन = नागमणि से शेषनाग द्वारा प्रकाश कर

स्वैरं प्रदर्शितपथः = सरलता से प्रदर्शित मार्ग से

त्वां धारयन् सः धन्यतमः खलु प्रतस्थे। = आपको लेकर उस भाग्यशाली (वसुदेव) ने प्रस्थान किया।

ईश, सः अयं त्वं मे रोगवेगान् नाशय। = हे ईश ! इस प्रकार वे आप मेरे रोगों की तीव्रता का शमन करें।

भावार्थ—तब अनेक फणों से वर्षा को रोकते हुए, शेषनाग द्वारा नागमणि से प्रकाश कर सरलता से प्रदर्शित मार्ग द्वारा, आपको लेकर उस भाग्यशाली (वसुदेव) ने प्रस्थान किया। हे ईश ! इस प्रकार वह आप मेरे रोगों की तीव्रता का शमन करें।

Word-Explanation :

भूरि (As in भूरिफणवारित—) = Much, Abundant, Numerous, Copious

वारित (As in फणवारितवारिणा) = Warded off, Prevented.

फणः/फणा (As in फणवारित—) = The expanded hood of a snake.

स्वैर (As in स्वैरं प्रदर्शितपथः) = Unrestrained, Uncontrolled.

॥ इति अष्टत्रिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-३९

योगमायाप्रादुर्भावः

[पृथ्वीछन्दः]

॥ १ ॥

भवन्तमयमुद्वहन् यदुकुलोद्वहो निस्सरन्
ददर्श गगनोच्चलज्जलभरां कलिन्दात्मजाम् ।
अहो, सलिलसञ्चयः स पुनरैन्द्रजालोदितो
जलौघ इव तत्क्षणात् प्रपदमेयतामाययौ ॥

पदविभागः—भवन्तम्, अयम्, उद्वहन्, यदुकुलोद्वहः, निस्सरन्, ददर्श, गगनोच्चलज्जलभराम्, कलिन्दात्मजाम्, अहो, सलिलसञ्चयः, सः, पुनः, ऐन्द्रजालादितः, जलौघः, इव, तत्क्षणात्, प्रपदमेयताम्, आययौ ॥

अन्वयः—अयं यदुकुलोद्वहः, भवन्तम् उद्वहन् निस्सरन्, कलिन्दात्मजां गगनोच्चलज्जलभरां ददर्श, सः सलिलसञ्चयः पुनः ऐन्द्रजालोदितः जलौघः इव तत्क्षणात् प्रपदमेयताम् आययौ । अहो ।

अन्वयार्थः

अयं यदुकुलोद्वहः = यह यदुकुल (के यश) को ऊंचा करते राजा (वसुदेव) ने (यदुकुल को ऊपर उठाने वाला)

भवन्तम् उद्वहन् निस्सरन् = आप को ऊपर उठाते हुए चलते हुए

कलिन्दात्मजां गगनोच्चलज्जलभरां ददर्श, = कलिन्द की पुत्री (यमुना) पर ऊपर तक जल को देखकर

सः सलिलसञ्चयः पुनः = वह स्तर से अधिक जल, बाद में

ऐन्द्रजालोदितः जलौघः इव = इन्द्रजाल से बना बाढ़ जैसा

तत्क्षणात् प्रपदमेयताम् आययौ । अहो । = तत्क्षण केवल पैर तक का हो गया । अहो ! आश्चर्य है ।

भावार्थ—यह यदुकुल (के यश) को ऊंचा करते राजा (वसुदेव) ने आप को ऊपर उठाते हुए चलते हुए कलिन्द की पुत्री (यमुना) पर ऊपर तक जल को देखा, वह स्तर से अधिक जल, बाद में इन्द्रजाल से बना बाढ़ जैसा तत्क्षण केवल पैर तक सीमित हो गया । अहो आश्चर्य है ।

Word-Explanation :

उद्वहः (वहः) = Carrying, Bearing.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सलिलम्/सलम् = Water

आत्मजा = Daughter

औघः = Flood.

॥ २ ॥

प्रसुप्तपशुपालिकां निभृतमारुदद्बालिका-
मपावृतकवाटिकां पशुपवाटिकामाविशन् ।
भवन्तमयमर्पयन् प्रसवतल्पके तत्पदा-
द्वहन् कपटकन्यकां स्वपुरमागतो वेगतः ॥

पदविभागः—प्रसुप्तपशुपालिकाम्, निभृतम्, आरुदद्बालिकाम्, अपावृतकपाटिकाम्, पशुपवाटिकामाविशन्, भवन्तम्, अयम्, अर्पयन्, प्रसवतल्पके, तत्पदात्, वहन्, कपटकन्यकाम्, स्वपुरम्, आगतः, वेगतः ॥

अन्वयः—प्रसुप्तपशुपालिकां निभृतम्, आरुदद्बालिकाम् अपावृतवाटिकां पशुपवाटिकाम् आविशन्, अयम् (वसुदेवः), भवन्तं प्रसवपल्पके अर्पयन्, तत्पदात् कपटकन्यकां (मायां) वहन् वेगतः स्वपुरम् आगतः ।

अन्वयार्थः

प्रसुप्तपशुपालिकां निभृतम् आरुदद्बालिकाम् = गोप स्त्री के सोते समय, मन्दस्वर में रोती हुई बालिका वाले

अपावृतकवाटिकां पशुपवाटिकाम् = खुले द्वारों के गोप के घर में

आविशन् अयम् (वसुदेवः) = प्रवेश करके यह (वसुदेव)

भवन्तं प्रसवतल्पके अर्पयन् = आपको प्रसवतल्प (कटिया) में रखकर

तत्पदात् कपटकन्यकां वहन् = उधर से माया (योगनिद्रा) को लेकर

वेगतः स्वपुरम् आगतः = शीघ्र अपने पुर (मथुरा) आया ।

भावार्थ—गोपस्त्री के सोते समय, मन्दस्वर में रोती हुई बालिका वाले खुले द्वारों के गोप के घर में प्रवेश करके वह (वसुदेव), आपको प्रसवतल्प (कटिया) में रखकर उधर से माया (योगनिद्रा) को लेकर शीघ्र अपने पुर (मथुरा) आया ।

Word-Explanation :

निभृत = Concealed, Unobserved (As in निभृतम् आरुदद्बालिकाम्)

अपावरणम्/अपावृत्तिः = Opening, (As in अपावृत कवाटिकाम्)

तल्प = A couch, Bed, Sofa (As in प्रसवतल्पके)

कवाटम्/कपाटम्/कवाटः/कपाटः = Door, A leaf or Panel of a door (As in अपावृत कवाटिकाम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

ततस्वदनुजारवक्षपितनिद्रवेगद्रवद्-
भटोत्करनिवेदितप्रसववार्तयैवार्तिमान् ।
विमुक्तचिकुरोत्करस्त्वरितमापतन् भोजरा-
डतुष्ट इव दृष्टवान् भगिनिकाकरे कन्यकाम् ॥

पदविभागः—ततः, त्वदनुजारवक्षपितनिद्रवेगद्रवद्भटोत्करनिवेदितप्रसववार्तया, एव, आर्तिमान्, विमुक्तचिकुरोत्करः, त्वरितम्, आपतन्, भोजराड्, अतुष्टः, इव, दृष्टवान्, भगिनिकाकरे, कन्यकाम् ॥

अन्वयः—ततः त्वदनुजारवक्षपितनिद्रवेगद्रवद्भटोत्करनिवेदित प्रसववार्तया एव आर्तिमान्, विमुक्तचिकुरोत्करः त्वरितम् आपतन् भोजराड् अतुष्टः इव भगिनिकाकरे कन्यकां दृष्टवान् ॥

अन्वयार्थः

ततः त्वदनुजारवक्षपितनिद्रवेगद्रवद्भटोत्करनिवेदितप्रसववार्तया एव = उसके बाद आपकी अनुजा (बहिन) की रोने की आवाज़ से जागे सेवकगण द्वारा बताई गयी प्रसव वार्ता से ही

आर्तिमान् विमुक्तचिकुरोत्करः = दुःखी खुले घने बालों वाले

त्वरितम् आपतन् भोजराड् = शीघ्र आते हुए भोजराज (कंस) ने

अतुष्टः इव भगिनिकाकरे = असंतुष्ट के समान बहिन के हाथ में

कन्यकां दृष्टवान्। = कन्या को देखा।

भावार्थ—उसके बाद आपकी अनुजा (बहिन) की रोने की आवाज़ (शब्द) से जागे सेवकगण द्वारा बताये गये प्रसव-समाचार से ही खिन्न खुले घने बालों वाले शीघ्र आते हुए भोजराज (कंस) ने असंतुष्ट के समान बहिन के हाथ में कन्या को देखा।

Word-Explanation :

रव = A cry, Shriek, Scream. (As in अनुजारवक्षपित—)

क्षप् (क्षपति/ क्षपते, क्षपित) = To miss, To throw, To cast. (As in रवक्षपित-)

द्रव =Melt away, Dropping, Dripping etc. (As in निद्रवेगद्रवद्भटोत्कर-)

अकरः (भटोत्कर/चिकुरोत्कर) = A heap, Multitude.

॥ ४ ॥

ध्रुवं कपटशालिनो मधुहरस्य माया भवे-
दसाविति किशोरिकां भगिनिकाकरालिङ्गिताम् ।
द्विपो नलिनिकान्तरादिव मृणालिकामाक्षिप-
न्नयं त्वदनुजामजामुपलपट्टके पिष्टवान् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—ध्रुवम्, कपटशालिनो, मधुहरस्य, माया, भवेत, असौ, इति, किशोरिकाम्, भगिनिकाकरालिङ्गिताम्, द्विपः, नलिनिकान्तरात्, मृणालिकाम्, इव, आक्षिपन्, अयम्, त्वदनुजाम्, अजाम्, उपलपट्टके, पिष्टवान् ।

अन्वयः—"असौ ध्रुवं कपटशालिनः मधुहरस्य माया भवेत्" इति अयं (कंसः) भगिनिकरालिङ्गितां किशोरिकां द्विपः नलिनिकान्तरात् मृणालिकाम् इव आक्षिपन् अजां त्वदनुजाम् उपलपट्टके पिष्टवान् ।

अन्वयार्थः

"असौ ध्रुवं कपटशालिनः मधुहरस्य माया भवेत्" । = "यह निश्चितरूप से कपटशाली मधु का वध करने वाले विष्णु की माया होगी" ।

इति अयं (कंसः) भगिनिकरालिङ्गितां किशोरिकाम् = इस प्रकार उस (कंस) ने बहिन के हाथों में पकड़ी हुई कन्या को,

द्विपः नलिनिकान्तरात् मृणालिकाम् इव आक्षिपन् = कमल के तडाग से कमलिनी को फेंकने वाले हाथी के समान

अजां त्वदनुजाम् = जन्म रहित आपकी बहिन को

उपलपट्टके पिष्टवान् = पत्थर के ऊपर मारा ।

भावार्थ—"यह निश्चितरूप से कपटशाली मधु का वध करने वाले विष्णु की माया होगी" । इस प्रकार उस (कंस) ने बहिन के हाथों में पकड़ी हुई कन्या को, कमल के तडाग से कमलिनी को फेंकने वाले हाथी के समान जन्मरहित आपकी बहिन को पत्थर के ऊपर मारा ।

Word-Explanation :

ध्रुव = Fixed, Immovable, Stable, Firm.

द्विपः = Elephant, नलिनः = Water, नलिनी = Lotus

कान्त = Spring, Beloved etc., पिष्ट = Ground, Crushed

मृणालिका/मृणाली = A lotus stalk or fibre (कमलककड़ी)

उपलः = Stone, Rock (As in उपल)

पट्टः/पट्टम् = Slab (As in उपलपट्टके)

॥ ५ ॥

ततो भवदुपासको झटिति मृत्युपाशादिव
प्रमुच्य तरसैव, सा समधिरूढरूपान्तरा ।
अधस्तलमजग्मुषी विकसदष्टबाहुस्फुर-
न्महायुधमहो गता किल विहायसा दिद्युते ॥

पदविभागः—ततः, भवदुपासकः, झटिति, मृत्युपाशात्, इव, प्रमुच्य, तरसा, एव, सा, समधिरूढरूपान्तरा, अधस्तलम्, अजग्मुषी, विकसदष्टबाहुस्फुरन्महायुधम्, अहो, गता, किल, विहायसा, दिद्युते ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—ततः भवदुपासकः झटिति मृत्युपाशात् इव, सा प्रमुच्य तरसा एव समधिरूढरूपान्तरा अधस्तलम् अजग्मुषी, विकसदष्टबाहुस्फुरन्महायुधं विहायसा किल गता दिद्युते, अहो ।

अन्वयार्थः

ततः भवदुपासकः झटिति मृत्युपाशात् इव = उसके बाद आपके भक्त जैसे मृत्यु के पाश से तुरन्त (मुक्ति प्राप्त होते हैं उसी प्रकार)

सा प्रमुच्य तरसा एव = वह (देवी) निकल कर तुरन्त ही

समधिरूढरूपान्तरा अधस्तलम् अजग्मुषी = अन्य रूप धारण करके, नीचे की ओर न आती हुई

विकसदष्टबाहुस्फुरन्महायुधम् = आठ हाथों में विशेष अस्त्रों को धारण करके

विहायसा किलगता दिद्युते, अहो । = आकाश में प्रकाशित हुई । अहो आश्चर्य !

भावार्थ—उसके बाद आपके भक्त (जैसे) मृत्यु के पाश से तुरन्त (मुक्ति पाते हैं उसी प्रकार) वह (देवी) मुक्त होकर तुरन्त ही दूसरे रूप को धारण करके, नीचे की ओर न आकर, आठ हाथों में दिव्य अस्त्रों को धारण करके, आकाश में प्रकाशित हुई । अहो आश्चर्य ।

Word-Explanation :

झटिति = Quickly, अधिरूढ़ = Mounted, Ascended, Increased. (As in समधिरूढरूपान्तरा)

स्फुर् (स्फुरति, स्फुरित) = To spring forward, To shake, To vibrate, To Throb, To Manifest, To Display etc. (As in स्फुरन्महायुधम्)

विहायस् = The Sky, Atmosphere (As in विहायसा किल गता)

॥ ६ ॥

"नृशंसतर कंस ते किमु मया विनिष्पिष्टया
बभूव भवदन्तकः क्वचन, चिन्त्यतां ते हितम् ।"
इति त्वदनुजा विभो खलमुदीर्य तं जग्मुषी
मरुद्गणपणायिता भुवि च मन्दिराण्येयुषी ॥

पदविभागः—नृशंसतर, कम्स, ते, किमु, मया, विनिष्पिष्टया, बभूव, भवदन्तकः, क्वचन, चिन्त्यं, ते, हितम्, इति, त्वदनुजा, विभो, खलम्, उदीर्य, तम्, जग्मुषी, मरुद्गणपणायिता, भुवि, च, मन्दिराणि, एयुषी ।

अन्वयः—"नृशंसतर कम्स, ते मया विनिष्पिष्टया किमु ? भवदन्तकः क्वचन बभूव । ते हितं चिन्त्यताम् ।" इति विभो, त्वदनुजा तं खलम् उदीर्य जग्मुषी । मरुद्गणपणायिता भुवि मन्दिराणि एयुषी च ।

अन्वयार्थः

"नृशंसतर कम्स, ते मया विनिष्पिष्टया किमु ? = "हे दुष्ट कंस ! मुझे मारने से तुझे क्या लाभ ?

भवदन्तकः क्वचन वभूव । = तुम्हारा वध करने वाले ने कहीं जन्म ले लिया है ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ते हितं चिन्त्यताम्।" = तुम अपने हित के बारे में सोचो।"

इति विभो त्वदनुजा तं खलम् उदीर्य जग्मुषी = हे प्रभो ! इस प्रकार आपकी बहन उस दुष्ट को कहकर गयी।

मरुद्गणपणायिता भुवि मन्दिराणि एयुषी च। = और वायु देवों से स्तुति पाती हुई पृथ्वी पर मन्दिरों में विराजमान हो गयीं।

भावार्थ—"हे दुष्ट कंस ! मुझे मारने से क्या तुझे लाभ ? तुम्हारा वध करने वाले ने कहीं जन्म ले लिया है। तुम अपने हित के बारे में सोचो"। हे प्रभो ! इस प्रकार आपकी बहन उस दुष्ट को कहकर गयी और वायु आदि देवों द्वारा स्तुति पाती हुई पृथ्वी पर मन्दिरों में विराजमान हो गयीं।

Word-Explanation :

खलः = A Mischiveous person, Wicked person

पण् (पणते, पणित) = = To Praise, To honour (As in पणायित)

नृशंस = Wicked, cruel, Mischievious (As in नृशंसतर कंस)

॥ ७ ॥

प्रगे पुनरगात्मजावचनमीरिता भूभुजा
प्रलम्बबकपूतनाप्रमुखदानवा मानिनः।
भवन्निधनकाम्यया जगति बभ्रमुर्निर्भयाः
कुमारकविमारकाः, किमिव दुष्करं निष्कृपैः॥

पदविभागः—प्रगे, पुनः, अगात्मजावचनम्, ईरिता, भूभुजा, प्रलम्बबकपूतनाप्रमुखदानवाः, मानिनः, मवन्निधनकाम्यया, जगति, बभ्रमुः, निर्भयाः, कुमारकविमारकाः किमिव, दुष्करम्, निष्कृपैः॥

अन्वयः—पुनः प्रगे अगात्मजावचनं भूभुजा ईरिताः, मानिनः प्रलम्बबकपूतनाप्रमुखदानवाः, भवन्निधनकाम्यया कुमारकविमारकाः निर्भयाः जगति बभ्रमुः। निष्कृपैः किमिव दुष्करम् ?

अन्वयार्थः

पुनः प्रगे अगात्मजावचनम् भूभुजा ईरिताः, = तदनन्तर प्रातःकाल पर्वत की पुत्री (देवी) द्वारा कहे गये वचनों से उद्विग्न

मानिनः प्रलम्बबकपूतनाप्रमुखदानवाः = दुरभिमानी प्रलंब, बक, पूतना आदि असुर प्रमुख

भवन्निधनकाम्यया = आपका वध करने की इच्छा से

कुमारकविमारकाः निर्भयाः जगति बभ्रमुः। = शिशुओं की हत्या करके निर्भय होकर जगत् में घूमते रहे।

निष्कृपैः किमिव दुष्करम् = करुणा रहित लोगों के लिए यह क्या कठिन है ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—तदनन्तर प्रातःकाल पर्वत की पुत्री (देवी) द्वारा कहे गये वचनों से उद्विग्न दुरभिमानी लोग प्रलम्ब, बक, पूतना आदि असुर प्रमुख आप का वध करने की इच्छा से शिशुओं की हत्या करके निर्भय होकर जगत् में घूमते रहे। करुणा रहित लोगों के लिए यह क्या कठिन है। अर्थात् ऐसे कृत्य करते हुए उनका हृदय जरा भी नहीं पसीजता है।

Word-Explanation :

अग = Mountain

अगात्मजा = Daughter of the Mountain

भूभुज् = The King (As in भूभुजः)

॥ ८ ॥

ततः पशुपमन्दिरे त्वयि मुकुन्द, नन्दप्रिया-
प्रसूतिशयनेशये रुवति किञ्चिदञ्चत्पदे।
विबुध्य वनिताजनैस्तनयसम्भवे घोषिते
मुदा किमु वदाम्यहो सकलमाकुलं गोकुलम्॥

पदविभागः—ततः, पशुपमन्दिरे, त्वयि, मुकुन्द, नन्दप्रियाप्रसूतिशयनेशये, रुवति किञ्चित्, अञ्चत्पदे, विबुध्य, वनिताजनैः, तनयसम्भवे, घोषिते, मुदा, किमु, वदामि, अहो, सकलम्, आकुलम्, गोकुलम्।

अन्वयः—मुकुन्द, ततः त्वयि पशुपमन्दिरे, नन्दप्रियाप्रसूतिशयनेशये किञ्चित् अञ्चत्पदे रुवति वनिताजनैः विबुध्य तनयसम्भवे घोषिते (सति) अहो, किमु वदामि, सकलं गोकुलं मुदा आकुलम्।

अन्वयार्थः

मुकुन्द, ततः त्वयि पशुपमन्दिरे = हे मुकुन्द ! बाद में आपके द्वारा नन्दगोप के घर में

नन्दप्रियाप्रसूतिशयनेशये = नन्द की पत्नी (यशोदा) के प्रसव तल्प में

किञ्चित् अञ्चत्पदे रुवति = पैरों को हल्के-हल्के हिलाकर शब्द करने पर (रोने पर)

वनिताजनैः विबुध्य = स्त्रियों के जानने पर

तनयसम्भवे घोषिते (सति) = पुत्र जन्म को घोषित करने से,

अहो, किमु वदामि, = आश्चर्य क्या कहूँ,

सकलं गोकुलं मुदा आकुलम् = समस्त गोकुल प्रसन्न हो गया।

भावार्थ—हे मुकुन्द ! बाद में आपके द्वारा नन्दगोप के घर में, नन्द की पत्नी (यशोदा) के प्रसवतल्प में पैरों को हल्के-हल्के हिलाकर रोने पर, स्त्रियों के जानने पर पुत्र-जन्म को घोषित करने से, आश्चर्य क्या कहूँ, समस्त गोकुल प्रसन्न हो गया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

अहो खलु यशोदया नवकलायचेतोहरम्
भवन्तमलमन्तिके प्रथममापिबन्त्या दृशा ।
पुनः स्तनभरं निजं सपदि पाययन्त्या मुदा
मनोहरतनुस्पृशा जगति पुण्यवन्तो जिताः ॥

पदविभागः—अहो, खलु, यशोदया, नवकलायचेतोहरम्, भवन्तम्, अलम्, अन्तिके, प्रथमम्, आपिबन्त्या, दृशा, पुनः, स्तनभरं, निजं, सपदि, पाययन्त्या, मुदा, मनोहरतनुस्पृशा, जगति, पुण्यवन्तः जिताः ॥

अन्वयः—अहो खलु नवकलायचेतोहरं भवन्तं प्रथमम् अन्तिके दृशा अलम् आपिवन्त्या पुनः सपदि मुदा निजं स्तनभरं पाययन्त्या मनोहरतनुस्पृशा, यशोदया जगति पुण्यवन्तः जिताः ।

अन्वयार्थः

अहो खलु नवकलायचेतोहरम् भवन्तम् = अहो ! नये कलायपुष्प के समान मन को लुभाने वाले आपको

प्रथमम् अन्तिके दृशा = प्रथम बार समीप आँखों से

अलम् आपिवन्त्या, = जी भर पीकर

पुनः सपदि मुदा = फिर तुरन्त प्रसन्नता से

निजं स्तनभरं पाययन्त्या, = अपना दूध पिलाकर

मनोहरतनुस्पृशा यशोदया = सुन्दर शरीर का लालन करके यशोदा

जगति पुण्यवन्तः जिताः = जगत में श्रेष्ठ भक्तों को जीत ली ।

भावार्थ—अहो ! नये कलायपुष्प के जैसे मन को लुभाने वाले आपको प्रथम बार समीप में आँखों से खूब पीकर, फिर तुरन्त सन्तोष से अपना दूध पिलाकर, सुन्दर शरीर को लालन करके, यशोदा जगत में श्रेष्ठ भक्तों को जीत ली ।

Word-Explanation :

चेतस् = Mind, Heart, Soul. अन्तिक = Near, Proximate

सपदि = Instantly, In a moment, Immediately.

॥ १० ॥

भवत्कुशलकाम्यया स खलु नन्दगोपस्तदा
प्रमोदभरसङ्कुलो द्विजकुलाय किं नाददात् ।
तथैव पशुपालकाः किमु न मङ्गलं तेनिरे
जगत्त्रितयमङ्गल, त्वमिह माहि मामामयात् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—भवत्कुशलकाम्यया, सः, खलु, नन्दगोपः, तदा, प्रमोदभरसङ्कुलः, द्विजकुलाय, किम्, न, अददात्, तथा, एव, पशुपालकाः, किमु, न, मङ्गलम्, तेनिरे, जगत्रितयमङ्गल, त्वम्, इह, पाहि, माम्, आमयात् ।

अन्वयः—सः नन्दगोपः खलु तदा प्रमोदभरसङ्कुलः, भवत्कुशलकाम्यया द्विजकुलाय किं न अददात् ? तथा एव पशुपालकाः किमु मङ्गलं न तेनिरे ? जगत्रितयमङ्गल त्वम् इह माम् आमयात् पाहि ।

अन्वयार्थः

सः नन्दगोपः खलु = उस नन्दगोप ने तो

तदा प्रमोदभरसङ्कुलः = उस समय आनन्दित होकर

भवत्कुशलकाम्यया = आपकी कुशलता के लिए

द्विजकुलाय किं न अददात् ? = ब्राह्मणों को क्या-क्या नहीं दिया ?

तथा एव पशुपालकाः = उसी प्रकार गोपों ने

किमु मङ्गलं न तेनिरे ? = क्या-क्या मंगल काम नहीं किये !

जगत्रितयमङ्गल त्वम् इह माम् आमयात् पाहि । = तीनों लोकों को मंगल प्रदान करने वाले आप इधर रोग से मेरी रक्षा करें ।

भावार्थ—उस नन्दगोप ने तो उस समय आनन्दित होकर आपकी कुशलता के लिए ब्राह्मण को क्या-क्या नहीं दिया ? उसी प्रकार गोपों ने क्या-क्या मंगल-कार्य नहीं किये ? तीनों लोकों को मंगल प्रदान करने वाले आप इधर रोग से मेरी रक्षा करें ।

Word-Explanation :

प्रमोदः= Joy, Delight, Rejoicing, Pleasure (As in प्रमोदभरसङ्कुलः)

॥ इति ऊनचत्वारिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-४०

पूतनामोक्षवर्णनम्

द्रुतविलम्बितछन्दः

॥ १ ॥

तदनु नन्दममन्दशुभास्पदम् नृपपुरीं करदानकृते गतम् ।
समवलोक्य जगाद भवत्पिता विदितकंससहायजनोद्यमः ॥

पदविभागः—तदनु, नन्दम्, अमन्दशुभास्पदम्, नृपपुरीम्, करदानकृते, गतम्, समवलोक्य, जगाद, भवत्पिता, विदितकंससहायजनोद्यमः ॥

अन्वयः—तदनु भवत्पिता करदानकृते नृपपुरीं गतम् अमन्दशुभास्पदं नन्दं समवलोक्य, विदितकंससहायजनोद्यमः जगाद ।

अन्वयार्थः

तदनु भवत्पिता = तदनन्तर आपके पिता (वसुदेव)

करदानकृते नृपपुरीं गतम् = कर देने के लिए राजधानी (मथुरा) गये उन्होंने

अमन्दशुभास्पदं नन्दं समवलोक्य = अत्यन्त सद्गुणों के परमपद नन्द (गोप) को देखकर

विदितकंससहायजनोद्यमः = कंस के सहायकों के परिश्रम को

जगाद । = बताया ।

भावार्थ—तदनन्तर आपके पिता (वसुदेव) कर देने के लिए राजधानी (मथुरा) गये अत्यन्त सद्गुणों के परमपद नन्द को देखकर, कंस के सहायक-जनों द्वारा किये गये परिश्रम (शिशुओं का वध का कार्यक्रम) के बारे में बताया ।

Word-Explanation :

अमन्द = Not dull, Active, Intelligent, Much, Great, Not little, Excessive etc. (As in अमन्दशुभास्पदम्)

आस्पदम् = A place, Site, Seat, Room, An abode. (As in अमन्दशुभास्पदम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुभ = Bright, Auspicious, Lucky, Happy, Fortunate, Beautiful, Virtuous, Eminent, Good etc. (As in अमन्दशुभास्पदम्)

॥ २ ॥

"अयि सखे, तव बालकजन्म मां सुखयतेऽद्य निजात्मजजन्मवत् ।"
इति भवत्पितृतां व्रजनायके समधिरोप्य शशंस तमादरात् ॥

पदविभागः—अयि, सखे, तव, बालकजन्म, माम्, सुखयते, अद्य, निजात्मजजन्मवत्, इति, भवत्पितृताम्, व्रजनायके, समधिरोप्य, शशंस, तम्, आदरात् ॥

अन्वयः—भवत्पिता (वसुदेवः) "अयि सखे, तव बालकजन्म निजात्मजजन्मवत् अद्य मां सुखयते" इति भवत्पितृतां व्रजनायके समधिरोप्य आदरात् तं शशंस ।

अन्वयार्थः

भवत्पिता (वसुदेवः) = आपके पिता (वसुदेव) ने

"अयि सखे, तव बालकजन्म निजात्मजजन्मवत् अद्य माम् सुखयते" = "हे मित्र ! आपके पुत्र का जन्म पर आज मुझे अपने पुत्र जन्म जैसा सुख देता है ।"

इति भवत्पितृतां व्रजनायके समधिरोप्य = इस प्रकार आपके पितृत्व को व्रजनायक नन्दगोप पर थोप कर

आदरात् तं शशंस । = आदर से उनसे कहे ।

भावार्थ—आपके पिता (वसुदेव) "हे मित्र ! आपके पुत्र का जन्म पर आज मुझे अपने पुत्र के जन्म जैसा सुख देता है" इस प्रकार आपके पितृत्व को ब्रजनायक (नन्दगोप) पर थोप कर, आदर से उनसे कहा ।

Word-Explanation :

अद्य = Now, Today

रोप = Planting, The act of raising or setting up. (As in समधिरोप)

Note: स, अधि are upasargas. Even when we add upasargas the meaning will be same. (धातुलीनमुपसर्ग इवार्थम् - 'माघः')

॥ ३ ॥

इह च सन्त्यनिमित्तशतानि ते कटकसीम्नि ततो लघु गम्यताम् ।
इति च तद्वचसा व्रजनायको भवदपायभिया द्रुतमाययौ ॥

पदविभागः—इह, च, सन्ति, अनिमित्तशतानि, ते, कटकसीम्नि, ततः, लघु, गम्यताम्, इति, च, तद्वचसा, व्रजनायकः, भवदपायभिया, द्रुतम्, आययौ ।

अन्वयः—"इह ते कटकसीम्नि च अनिमित्तशतानि सन्ति । ततः लघु गम्यताम् ।" इति तद्वचसा च व्रजनायकः (नन्दगोपः) भवदपायभिया द्रुतम् आययौ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

"इह ते कटकसीम्नि च = "और इधर आपके निवास पर

अनिमित्तशतानि सन्ति। = अनेक दुसम्भव हैं।

ततः लघु गम्यताम्।" = इसलिए तुरन्त जायें।"

इति तद्वचसा च व्रजनायकः (नन्दगोपः) = इस प्रकार के उस (वसुदेव) की बातों से व्रजनायक (नन्दगोप)

भवदपायभिया = आपको होने वाले अपायों के भय से

द्रुतम् आयसौ। = शीघ्र लौटे।

भावार्थ—"और इधर तथा आपके घर पर अनेक दुःसम्भव (बुरे शकुन) हैं। इसलिए तुरन्त जायें।" इस प्रकार के उस (वासुदेव) की बातों से व्रजनायक (नन्दगोप) आपको होने वाले अपायों के भय से शीघ्र लौट आये।

Word-Explanation :

कटकः/ कटकम् = A Bracelet, Table Land, An Army, A house or dwelling, A wheel etc. (Here = A House) (As in कटकसीम्नि)

सीमन् = A Boundary. (As in कटकसीम्नि)

॥ ४ ॥

अवसरे खलु तत्र च काचन व्रजपदे मधुराकृतिरङ्गना।
तरलषड्पदलालितकुन्तला कपटपोतक, ते निकटं गता॥

पदविभागः—अवसरे, खलु, तत्र, च, काचन, व्रजपदे, मधुराकृतिः, अङ्गना, तरलषड्पदलालितकुन्तला, कपटपोतक, ते, निकटम्, गता।

अन्वयः—तत्र अवसरे च खलु व्रजपदे मधुराकृतिः तरलषड्पदलालितकुन्तला काचन अङ्गना कपटपोतक ते निकटं गता।

अन्वयार्थः

तत्र अवसरे च खलु व्रजपदे = और उस समय व्रज में

मधुराकृतिः = सुन्दर आकृति की

तरलषड्पदलालितकुन्तला = भ्रमर के समान घूमती हिलते बालों वाली

काचन अङ्गना = कोई स्त्री

कपटपोतक, ते निकटं गता। = हे बालस्वरूप ! आपके समीप आई।

भावार्थ—और उस समय व्रज में सुन्दर आकृति की, भ्रमर के समान घूमती हिलते बालों वाली कोई स्त्री, हे बालस्वरूप ! आपके समीप आई।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Word-Explanation :

अङ्गना = A woman in general, A beautiful woman. (As in काचन अङ्गना)

तरल = Waving, Trembling, Shaking (As in तरलषड्पदलालित—)

कुन्तल = The hair of the head, A lock of hair (As in लालितकुन्तला)

लालनम् = Fondling, Careasing, Coaxing. (As in षड्पदलालितकुन्तला)

षट्पदः = A Bee (As in षट्पदलालितकुन्तला)

॥ ५ ॥

सपदि सा हतबालकचेतना निशिचरान्वयजा किल पूतना।
व्रजवधूष्विह केयमिति क्षणम् विमृशतीषु भवन्तमुपाददे ॥

पदविभागः—सपदि, सा, हतबालकचेतना, निशिचरान्वयजा, किल, पूतना, व्रजवधूषु, इह, का, इयम्, इति, क्षणम्, विमृतशीषु, भवन्तम्, उपाददे।

अन्वयः—हतबालकचेतना निशिचरान्वयजा सा पूतना, व्रजवधुषु "इयम् इह का ?" इति क्षणं विमृशतीषु (सत्सु) सपदि भवन्तम् उपाददे किल।

अन्वयार्थः

हतबालकचेतना निशिचरान्वयजा सा पूतना, = बच्चों का वध करने वाली असुरकुल में जन्मी वह पूतना,

व्रजवधूषु "इयम् इह का ?" = गोपस्त्रियों के "यह यहाँ कौन है ?"

इति क्षणं विमृशतीषु (सत्सु) = इस प्रकार क्षण भर सोचते समय (उसने)

सपदि भवन्तम् = शीघ्र आपको

उपाददे किल। = उठाया।

भावार्थ—बालकों का वध करने वाली असुरकुल में जन्मी वह पूतना, गोपस्त्रियों के "यह यहाँ कौन है ?" इस प्रकार क्षण भर सोचते समय (उसने) शीघ्र आपको उठाया।

Word-Explanation :

अन्वयः/अन्ववायः = Race, Family, Lineage (As in निशिचरान्वयजा)

चेतन/चेतनी = Animate. Living, Life, Vitality (As in हतबालकचेतना)

॥ ६ ॥

ललितभावविलासहतात्मभिर्युवतिभिः प्रतिरोद्धुमपारिता।
स्तनमसौ भवनान्तनिषदुषी प्रददुषी भवते कपटात्मने ॥

Punjab Digital Library, Chandigarh

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—ललितभावविलासहृतात्मभिः, युवतिभिः, प्रतिरोद्धुम्, अपारिता, स्तनम्, असौ, भवनान्तनिषेदुषी, प्रददुषी, भवते, कपटात्मने ।

अन्वयः—असौ (पूतना) ललितभावविलासहृतात्मभिः युवतिभिः प्रतिरोद्धुम् अपारिता भवनान्तनिषेदुषी कपटात्मने भवते स्तनं प्रददुषी ।

अन्वयार्थः

असौ (पूतना) = उस पूतना ने

ललितभावविलासहृतात्मभिः युवतिभिः = ललित भावों तथा आचरणों से (गोप) स्त्रियों को अपना बनाती हुई उनके

प्रतिरोद्धुम् अपारिता = द्वारा न रोकी जाती हुई

भवनान्तनिषेदुषी = घर के अन्दर बैठकर

कपटात्मने भवते = बालस्वरूप आपको

स्तनं प्रददुषी । = (स्तन का) दूध पिलाया ।

भावार्थ—उस पूतना ने ललित भावों तथा आचरणों से (गोप) स्त्रियों को अपना बनाती हुई उनके द्वारा न रोकी जाती हुई, घर के अन्दर बैठकर बालस्वरूप आपको (स्तन का) दूध पिलाया ।

Word-Explanation :

ललित- = Pleasing, Playing, Charming (As in ललितभाव—)

॥ ७ ॥

समधिरुह्य तदङ्कमशङ्कितस्त्वमथ बालकलोपनरोषितः ।
महदिवाम्रफलं कुचमण्डलं प्रतिचुचूषिथ दुर्विषदूषितम् ॥

पदविभागः—समधिरुह्य, तदङ्कम्, अशङ्कितः, त्वम्, अथ, बालकलोपनरोषितः महत्, इव, आम्रफलम्, कुचमण्डलम्, प्रतिचुचूविथ, दुर्विषदूषितम् ॥

अन्वयः—अथ त्वं बालकलोपनरोषितः अशङ्कितः तदङ्कं समधिरुह्य दुर्विषदूषितं कुचमण्डलं महत् आम्रफलम् इव प्रतिचुचूषिथ ॥

अन्वयार्थः

अथ त्वं बालकलोपनरोषितः = तब आपने बालकों की हत्या से क्रुद्ध होकर

अशङ्कितः = कुछ भी चिन्ता न करके

तदङ्कम् समधिरुह्य = उस की गोदी पर चढ़कर

दुर्विषदूषितं कुचमण्डलम् = उग्र विष से दूषित स्तन को

महत् आम्रफलम् इव = बड़े आम के फल के समान

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिचुचूषिथ। = चूस लिया।

भावार्थ—तब आपने बालकों की हत्या से क्रुद्ध होकर कुछ भी शंका न करके, उस की गोदी पर चढ़कर उग्र विष से दूषित स्तन को बड़े आम के फल के समान चूस लिया।

Word-Explanation :

लोपनम् = Violation, Transgression, Omission, Dropping etc. (As in बालकलोपनरोषितः)

॥ ८ ॥

असुभिरेव समंधयति त्वयि स्तनमसौ स्तनितोपमनिस्वना।
निरपतद् भयदायि निजं वपुः प्रतिगता प्रविसार्य भुजावुभौ ॥

पदविभागः—असुभिः, एव, समम्, धयति, स्तनम्, असौ, स्तनितोपमनिस्वना, निरपतत्, भयदायि, निजम्, वपुः, प्रतिगता, प्रविसार्य, भुजौ, उभौ ॥

अन्वयः—त्वयि असुभिः समम् एव स्तनंधयति (सति) असौ स्तनितोपमनिस्वना भयदायि निजं वपुः प्रतिगता उभौ भुजौ प्रविसार्य निरपतत्।

अन्वयार्थः

त्वयि असुभिः समम्, एव = आपके द्वारा प्राणों के साथ ही

स्तनंधयति (सति) = दूध पीने पर

असौ स्तनितोपमनिस्वना = वह गरजते मेघ जैसे शब्द करती हुई

भयदायि निजं वपुः प्रतिगता = भयंकर (पूतना) अपने असली रूप को लेकर

उभौ भुजौ प्रविसार्य = दोनों हाथों को फैलाकर

निरपतत् = गिर गई।

भावार्थ—आपके द्वारा प्राणों के साथ ही दूध पीने पर वह गरजते मेघ जैसे शब्द करती हुई भयंकर (पूतना) अपने असली रूप को लेकर दोनों हाथों को फैलाकर गिर गई।

Word-Explanation :

असुः = Breath, Life. (As in असुभिः समम् एव)

धय = (usually at the end of a compound word as in स्तनंधय) = Drinking, Sucking (As in स्तनंधयति)

स्तनित = Thundering, The rattling of thunder, Rumbling of thunder clouds. (As in स्तनितोपमनिस्वना)

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वन्(स्वनति) = To sound, To make noise. (निस्वना-"नि"is an upasarg) (As in स्तनितोपमनिस्वना)।

॥ ९ ॥

भयदघोषणभीषणविग्रहश्रवणदर्शनमोहितवल्लवे।
व्रजपदे तदुरःस्थलखेलनं ननु भवन्तमगृहणत गोपिकाः ॥

पदविभागः—भदयघोषणभीषणविग्रहश्रवणदर्शनमोहितवल्लवे, व्रजपदे, तदुरःस्थलखेलनम्, ननु, भवन्तम्, अगृहणत, गोपिकाः ॥

अन्वयः—व्रजपदे भयदघोषणभीषणविग्रहश्रवणदर्शनमोहितवल्लवे, तदुरःस्थलखेलनं भवन्तं गोपिकाः ननु अगृहणत।

अन्वयार्थः

व्रजपदे = व्रज भूमि पर

भयदघोषणभीषणविग्रहश्रवणदर्शनमोहितवल्लवे = भयंकर शब्द को सुनकर तथा भीषण (घोर) शरीर को देखकर गोपगणों के भयभीत होने पर

तदुरःस्थलखेलनं भवन्तम् = उस (पूतना) के वक्षःस्थल पर खेलते आपको

गोपिकाः ननु अगृहणत। = गोपिकाओं ने उठाया।

भावार्थ—व्रज भूमि पर भयंकर शब्द सुनकर तथा भीषण शरीर को देखकर गोपगणों के भयभीत होने पर उस (पूतना) के वक्षःस्थल (छाती) पर खेलते आपको गोपियों ने उठाया।

Word-Explanation :

भीषण = Horrible, Terrific, Dreadful (As in भीषणविग्रह—)

मोहित = Stupified, Perplexed, Bewildered (Also-Infatuated, Facinated etc.) (Here-Stupified) (As in श्रवणदर्शनमोहित)

वल्लवः/बल्लवः = A cowherd (As in मोहितवल्लवे)

॥ १० ॥

भुवनमङ्गल नामभिरेव ते युवतिभिर्बहुधा कृतरक्षणः।
त्वमयि वातनिकेतननाथ मामगदयन् कुरु तावकसेवकम् ॥

पदविभागः—भुवनमङ्गल, नामभिः, एव, ते, युवतिभिः, बहुधा, कृतरक्षणः, त्वम्, अयि, वातनिकेतननाथ, माम्, अगदयन्, कुरु, तावकसेवकम् ॥

अन्वयः—अयि, भुवनमङ्गल, वातनिकेतननाथ, ते नामभिः एव युवतिभिः बहुधा कृतरक्षणः त्वं माम् अगदयन् तावकसेवकं कुरु।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अयि, भुवनमङ्गल, = हे लोकों का मंगल करने वाले,

वातनिकेतननाथ, = गुरुवायुपुराधीश !

ते नामभिः एव = आपके नामों से ही

युवतिभिः बहुधा = स्त्रियों द्वारा अनेक प्रकार से (अपनी)

कृतरक्षणः = रक्षा की गयी

त्वम् माम् अगदयन् = आप मुझे रोगों से मुक्त कराकर

तावकसेवकं कुरु । = अपना सेवक बनाओ

भावार्थ—हे, लोकों के मंगलकारी, गुरुवायुपुराधीश ! आप के नामों से ही स्त्रियों द्वारा अनेक प्रकार से (अपनी) रक्षा की गयी । आप मुझे रोगों से मुक्त कराकर अपना सेवक बनाओ ।

Meaning of certain frequently used words which have various meanings:

(१) "किल"

Verily, Indeed, assuredly, As they say, As is reported, Hope, expectation or probability, Dissatisfaction, Dislike, Contempt, Cause, Reason, For he said so etc.

(२) "खलु"

A particle implying the following:

Certainly, Surely, Verily, Indeed, Entreaty, Concilliation "Pray", Inquiry, Prohibition, Reason, खलु is also sometimes used as an explative; sometimes used only to add grace to the sentence.

(३) ननु

A particle implying the following:

Inquiry or interrogation, Surely, Certainly, Indeed, Is it not indeed?, Ofcourse. It is used as a vocative meaning "O" "Oh". It is used in propitiatory expression in the sense "Pray" "Be Pleased". It is used sometimes as a corrective word like the English word "Why" or "I say". In argumentative discussions frequently used to head an objection or advance a contrary proposition generally followed by उच्यते).

॥ इति चत्वारिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-४१

पूतनाशरीरदाहवर्णनं, गोपीनां बाललालनवर्णनञ्च

[उपजातिछन्दः]

॥ १ ॥

व्रजेश्वरः शौरिवचो निशम्य समाव्रजन्नध्वनि भीतचेताः ।
निष्पिष्टनिःशेषतरुं निरीक्ष्य कंचित् पदार्थं शरणं गतस्त्वाम् ॥

पदविभागः—व्रजेश्वरः, शौरिवचः, निशम्यः समाव्रजन्, अध्वनि, भीतचेताः, निष्पिष्टनिःशेषतरुम्, निरीक्ष्य, कंचित्, पदार्थम्, शरणम्, गतः, त्वाम् ॥

अन्वयः—शौरिवचः निशम्य व्रजेश्वरः भीतचेताः समाव्रजन् अध्वनि निष्पिष्टनिःशेषतरुं कंचित् पदार्थं निरीक्ष्य त्वां शरणं गतः ॥

अन्वयार्थः

शौरिवचः निशम्य व्रजेश्वरः = वसुदेव की बातें सुनकर व्रज के स्वामी (नन्दगोप)

भीतचेताः समाव्रजन् अध्वनि = भयभीत मन से लौटते समय मार्ग में

निष्पिष्टनिःशेषतरुं कंचित् पदार्थं निरीक्ष्य = कट कर गिरे पेड़ों में कुछ पदार्थ को देखकर

त्वां शरणं गतः । = आप की शरण में आया ।

भावार्थ—वसुदेव की बातें सुनकर व्रज के स्वामी (नन्दगोप) भयभीत मन से लौटते समय मार्ग में कट कर गिरे पेड़ों में कुछ पदार्थ को देखकर आप की शरण में आया ।

Words-Explanation :

व्रज् (व्रजति)= To go, Walk, To approach, Visit (as in समाव्रजन्)

अध्वन् = A way, Road, Passage, Journey, Travel etc. (As in समाव्रजन् अध्वनि)

पिष्ट = Crushed, Powdered, Ground, Rubbed together, Squeezed etc. (As in निष्पिष्टनिःशेषतरुम्) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

निशम्य गोपीवचनादुदन्तं सर्वेऽपि गोपा भयविस्मयान्धाः ।
त्वत्पातितं घोरपिशाचदेहं देहुर्विदूरेऽथ कुठारकृत्तम् ॥

पदविभागः—निशम्य, गोपीवचनात्, उदन्तम्, सर्वे, अपि, गोपाः, भयविस्मयान्धाः, त्वत्पातितम्, घोरपिशाचदेहम्, देहुः, विदूरे, अथ, कुठारकृत्तम् ॥

अन्वयः—सर्वे अपि गोपाः गोपीवचनात् उदन्तं निशम्य भयविस्मयान्धाः त्वत्पातितं घोरपिशाचदेहम् अथ कुठारकृत्तं विदूरे देहुः ।

अन्वयार्थः

सर्वे अपि गोपाः = समस्त, गोपगण ने

गोपीवचनात् उदन्तं निशम्य = गोपियों की बातों से समाचार को सुनकर

भयविस्मयान्धाः = भय तथा आश्चर्य से अन्धे (जैसे) होकर

त्वत्पातितं घोरपिशाचदेहम् = आप द्वारा गिराये घोरपिशाच शरीर को

अथ कुठारकृत्तम् = बाद में कुल्हाड़ी से काटकर

विदूरे देहुः । = बहुत दूर जाकर जलाया ।

भावार्थ—समस्त गोपगण ने गोपियों की बातों से समाचार को सुनकर भय तथा आश्चर्य से अन्धे (जैसे) होकर, आप द्वारा गिराये गये घोरपिशाच शरीर को बाद में कुल्हाड़ी से काटकर बहुत दूर जाकर जलाया ।

Words-Explanation :

उदन्त = News, Intelligence Report, Account, History etc. (As in गोपीवचनात् उदन्तम्)

कुठारः/कुठारी = Axe (As in कुठारकृत्तम्)

॥ ३ ॥

त्वत्पीतपूतस्तनतच्छरीरात् समुच्चलन्नुच्चतरो हि धूमः ।
शङ्कामदादागरवः किमेष किं चान्दनो गौल्गुलवोऽथवेति ॥

पदविभागः—त्वत्पीतपूतस्तनतच्छरीरात्, समुच्चलन्, उच्चतरः, हि, धूमः, शङ्काम्, अदात्, आगरवः, किम्, एष, किम्, चान्दनः, गौलगुलवः, अथ, इति ॥

अन्वयः—त्वत्पीतपूतस्तनतच्छरीरात् समुच्चलन् उच्चतरः धूमः हि एषः आगरवः किम् ? किं चान्दनः अथवा गौलगुलवः ? इति शङ्काम् अदात् ।

अन्वयार्थः

त्वत्पीतपूतस्तनतच्छरीरात् = आप के द्वारा पीकर शुद्ध किये गये उस शरीर से

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुच्चलन् उच्चतरः धूमः हि = ऊपर निकलते घूमते धुएं ने

एषः आगरवः किम्? = क्या यह अगरु है?

किम् चान्दनः अथवा गौलगुलवः? = क्या चन्दन है अथवा गुलगुलु है?

इति शङ्काम् अदात्। = इस प्रकार शंका को पैदा किया।

भावार्थ—आप के द्वारा पीकर परिशुद्ध किये गये उस शरीर से ऊपर निकलते घूमते धुएं ने क्या यह अगरु है? क्या चन्दन है अथवा गुलगुलु है? इस प्रकार शंका को पैदा किया।

Words-Explanation :

पूत (त्वत्पीतस्तनतच्छरीरात्) = Purified, Washed, Cleaned.

उच्चलनम् = Moving away (as in समुच्चलन्)

अगरु = Agallochum (अगरु) (As in एषः आगरवः किम्)

॥ ४ ॥

"मदङ्गसङ्गस्य फलं न दूरे क्षणेन तावत् भवतामपि स्यात्।"
इत्युल्लपन् वल्लवतल्लजेभ्यस्त्वं पूतनामातनुथाः सुगन्धिम्॥

पदविभागः—मदङ्गसङ्गस्य, फलम्, न, दूरे, क्षणेन, तावत्, भवताम्, अपि, स्यात्, इति, उल्लपन्, वल्लवतल्लजेभ्यः, त्वम्, पूतनाम्, आतुनुथाः, सुगन्धिम्॥

अन्वयः—"मदङ्गसङ्गस्य फलं न दूरे, भवताम् अपि क्षणेन तावत् स्यात्।" इति वल्लवतल्लजेभ्यः उल्लपन् त्वं पूतनां सुगन्धिम् आतनुथाः॥

अन्वयार्थः

"मदङ्गसङ्गस्य फलम् = मेरे शरीर के साथ संबन्ध रखने का फल

न दूरे भवताम् अपि क्षणेन तावत् स्यात्।" = दूर नहीं, आप लोगों को भी शीघ्र वह (फल) मिलेगा।"

इति वल्लवतल्लजेभ्यः = इस प्रकार श्रेष्ठ गोपों को (से)

उल्लपन् त्वम् = बोलते (जैसे) आप ने

पूतनां सुगन्धिम् आतनुथाः। = पूतना को सुगन्धित कर दिया।

भावार्थ—मेरे शरीर के साथ संबन्ध रखने का फल दूर नहीं, आप लोगों को भी शीघ्र वह (फल) मिलेगा।" इस प्रकार श्रेष्ठ गोपों से बोलते (जैसे) आप ने पूतना को सुगन्धित कर दिया।

Words-Explanation :

वल्लवः/बल्लवः = Cowherd (Also A Cook, Bhima etc.)(As in वल्लवतल्लजेभ्यः)

तल्लजः (वल्लवतल्लजेभ्यः) = Excellent, Superiority etc.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(Note: This word is always used in Masculine even when used for feminine like = गोतल्लजः Excellent cow)

लपनम् = Talking, Speaking (As in उल्लपन्)

॥ ५ ॥

"चित्रं पिशाच्या न हतः कुमारश्चित्रं पुरैवाकथि शौरिणेदम् ।"
इति प्रशंसन् किल गोपलोको भवन्मुखालोकरसे न्यमाङ्क्षीत् ॥

पदविभागः—चित्रम्, पिशाच्या, न, हतः, कुमारः चित्रम्, पुरा, एव, अकथि, शौरिणा, इदम्, इति, प्रशंसन्, किल, गोपलोकः, मवन्मुखालोकरसे न्यमाङ्क्षीत् ॥

अन्वयः—चित्रं, कुमारः पिशाच्या न हतः । चित्रं, शौरिणा इदं पुरा एव अकथि । इति प्रशंसन् गोपलोकः भवन्मुखालोपरसे न्यमाङ्क्षीत् ।

अन्वयार्थः

चित्रं, कुमारः पिशाच्या न हतः । = आश्चर्य है, पिशाची के द्वारा बालक नहीं मारा गया ।

चित्रं, शौरिणा इदं पुरा एव अकथि । = आश्चर्य है, वसुदेव ने इसको पहले ही बताया ।

इति प्रशंसन् = इस प्रकार प्रशंसा करके

गोपलोकः भवन्मुखालोकरसे न्यमाङ्क्षीत् = गोपगण आप के मुख को देखने के रस (आनन्द) में मग्न हो गये ।

भावार्थ—आश्चर्य है, पिशाची के द्वारा बालक नहीं मारा गया । आश्चर्य है, वसुदेव ने इस को पहले ही बताया । इस प्रकार प्रशंसा करके गोपगण आप के मुख को देखकर उस रस (आनन्द) में मग्न हो गये ।

Words-Explanation :

चित्रम् (चित्रं, कुमारः पिशाच्या न हतः) = How strange, Oh, What a wonder etc.

कथ् (कथयति/कथित)= To tell, To communicate. (As in अकथि)

आलोकः/ आलोकनम् = Seeing, Beholding (As in मुखालोकरसे)

॥ ६ ॥

दिने दिनेऽथ प्रतिवृद्धलक्ष्मीरक्षीणमाङ्गल्यशतो व्रजोऽयम् ।
भवन्निवासादयि वासुदेव प्रमोदसान्द्रः परितो विरेजे ॥

पदविभागः—दिने, दिने, अथ, प्रतिवृद्ध, लक्ष्मीः अक्षीणमाङ्गल्यशतः, व्रजः, अयम्, भवन्निवासात्, अयि, वासुदेव, प्रमोदसान्द्रः परितः, विरेजे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अयि, वासुदेव, भवन्निवासात् अथ अयं व्रजः दिने दिने परिवृद्धलक्ष्मीः अक्षीणमाङ्गल्यशतः परितः प्रमोदसान्द्रः विरेजे ॥

अन्वयार्थः

अयि, वासुदेव = हे वासुदेव !

भवन्निवासात् अथ = आप के रहने के कारण बाद में

अयं व्रजः = यह व्रज भूमि

दिने दिने परिवृद्ध लक्ष्मीः अक्षीणमाङ्ल्यशतः = प्रतिदिन वर्धित ऐश्वर्य से, नष्ट न होने वाले अनेक कल्याणकारी पदार्थों द्वारा

परितः प्रमोदसान्द्रः विरेजे । = चारों दिशाओं में पूर्ण आनन्द के साथ सुशोभित हुई ।

भावार्थ—हे, वासुदेव ! आपके रहने के कारण बाद में यह व्रज भूमि प्रतिदिन वर्धित ऐश्वर्य से नष्ट न होने वाले अनेक कल्याणकारी पदार्थों द्वारा चारों दिशाओं में पूर्ण आनन्द के साथ सुशोभित हुई ।

Words-Explanation :

प्रमोद = Joy, Delight (As in प्रमोदसान्द्र)

सान्द्र = Close, Compact, Abundant, Pleasing, Agreable, Strong, Robust etc. (As in प्रमोदसान्द्र)

अक्षीण = Fat, Not thin, Strong, Big, Not worn away, Not expended etc. (As in अक्षीणमाङ्गल्यशतः)

॥ ७ ॥

गृहेषु ते कोमलरूपहासमिथःकथासङ्कुलिताः कमन्यः ।
वृत्तेषु कृत्येषु, भवन्निरीक्षासमागताः प्रत्यहमत्यनन्दन् ॥

पदविभागः—गृहेषु, ते, कोमलरुपहासमिथः कथासङ्कुलिता, कमन्यः, वृत्तेषु, कृत्येषु, भवन्निरीक्षासमागताः, प्रत्यहम्, अत्यनन्दन् ॥

अन्वयः—कमन्यः गृहेषु ते कोमलरूपहासमिथःकथासङ्कुलिताः कृत्येषु वृत्तेषु (सत्सु) भवन्निरीक्षासमागताः प्रत्यहम् अत्यनन्दन् ॥

अन्वयार्थः

कमन्यः गृहेषु ते कोमलरूपहासमिथःकथासङ्कुलिताः = (गोप) स्त्रियां घरों में आप के कोमल रूप, हँसी आदि के बारे में आपस में बात करने में व्यस्त

कृत्येषु वृत्तेषु (सत्सु) = कामों के समाप्त होने पर

भवन्निरीक्षासमागताः = आप को देखने के लिए आयीं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यहम् अत्यनन्दन्। = प्रतिदिन अत्यन्त आनन्दित हुईं।

भावार्थ—(गोप) स्त्रियां घरों में आप के कोमल रूप, हँसी आदि के बारे में बात करने में व्यस्त कार्यों के समाप्त होने पर आप को देखने के लिए आयीं प्रतिदिन अत्यन्त आनन्दित हुईं।

Words-Explanation :

कोमल- = Soft, Tender, Delicate (As in ते कोमलरूप—)

मिथत्- = Mutually, Reciprocally, To each other (As in रूपहासमिथः -कथा—)

सङ्कुल = Thronged with, Crowded or filled with (As in कथा-सङ्कुलिताः—)

॥ ८ ॥

अहो कुमारो मयि दत्तदृष्टिः स्मितं कृतं मां प्रति वत्सकेन।
एह्येहि मामित्युपसार्य पाणी त्वयीश, किं किं न कृतं वधूभिः ॥

पदविभागः—अहो, कुमारः मयि, दत्तदृष्टिः, स्मितम्, कृतम्, माम्, प्रति, वत्सकेन, एहि, एहि, माम्, इति, उपसार्य, पाणी, त्वयि, ईश, किम्, किम्, न, कृतम्, वधूभिः।

अन्वयः—अहो, कुमारः मयि दत्तदृष्टिः। वत्सकेन माम् प्रति स्मितं कृतम्। माम् एहि, (माम्) एहि, इति पाणी उपसार्य, ईश, त्वयि वधूभिः किं किं न कृतम्?

अन्वयार्थः

अहो, कुमारः मयि दत्तदृष्टिः। = अहो! बालक की दृष्टि तो मेरे ऊपर है

वत्सकेन, माम्, प्रति, स्मितं कृतम्। = बालक तो मुझे देखकर हंसा।

माम् एहि (माम्) एहि = मेरे पास आ जाओ, मेरे पास आ जाओ,

इति पाणी उपसार्य = इस प्रकार हाथों को फैलाकर

ईश, त्वयि वधूभिः = हे ईश! आप पर गोपियों ने

किं किं न कृतम्? = क्या क्या नहीं किया?

भावार्थ—अहो, बालक की दृष्टि तो मेरे ऊपर है, बालक तो मुझे देखकर हंसा। मेरे पास आओ, मेरे पास आओ, इस प्रकार हाथों को फैलाकर हे ईश! आप पर गोपियों ने क्या क्या नहीं किया?

Words-Explanation :

स्मित = Smile, Smiled

उपसरणम् = Going towards (As in पाणी उपसार्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

भवद्वपुःस्पर्शनकौतुकेन करात्करं गोपवधूजनेन।
नीतस्त्वमाताम्रसरोजमालाव्यालम्बिलोलम्बतुलामलासीः ॥

पदविभागः—भवद्वपुःस्पर्शनकौतुकेन, करात्, करम्, गोपवधूजनेन, नीतः, त्वम्, आताम्रसरोजमालाव्यालम्बिलोलम्बतुलाम्, अलासीः ॥

अन्वयः—भवद्वपुःस्पर्शनकौतुकेन गोपवधूजनेन करात् करं नीतः त्वम् आताम्रसरोजमालाव्यालम्बिलोलम्बतुलाम् अलासीः ॥

अन्वयार्थः

भवद्वपुःस्पर्शनकौतुकेन = आपके शरीर को स्पर्श करने की इच्छा से

गोपवधूजनेन = गोपस्त्रियों द्वारा

करात् करं नीतः त्वम् = (एक गोपस्त्री के) हाथ से (दूसरी के) हाथ में ले जाये जाते हुए आप

आताम्रसरोजमालाव्यालम्बिलोलम्बतुलाम् अलासीः । = ताम्बे के रंग के कमल के फूलों में बारी-बारी से जाते, उड़ते भ्रमर जैसे दिखायी दिये ।

भावार्थ—आप के शरीर को स्पर्श करने की इच्छा से गोपस्त्रियों द्वारा (एक गोपस्त्री के) हाथ से (दूसरी के) हाथ में ले जाये जाते हुए आप ताम्बे के रंग के कमल के फूलों में बारी-बारी से उड़ते और बैठते भ्रमर जैसे दिखायी दिये ।

Words-Explanation :

व्यालोल = Shaking about, Tremulous. (Incidentally लोला means Lakshmi, also Tongue)

॥ १० ॥

निपाययन्ती स्तनमङ्कगं त्वां विलोकयन्ती वदनं हसन्ती।
दशां यशोदा कतमां न भेजे स तादृशः पाहि हरे, गदान्माम् ॥

पदविभागः—निपाययन्ती, स्तनम्, अङ्कगम्, त्वाम्, विलोकयन्ती, वदनम्, हसन्ती, दशाम्, यशोदा, कतमाम्, न, भेजे, सः, तादृशः पाहि हरे, गदात्, माम् ॥

अन्वयः—त्वाम् अङ्कगं स्तनं निपाययन्ती (सति) वदनं विलोकयन्ती हसन्ती यशोदा, कतमां दशां न भेजे । हरे, तादृशः सः गदात् मां पाहि ।

अन्वयार्थः

त्वाम् अङ्कगं स्तनं निपाययन्ती (सति) = आप को गोद में बैठाकर दूध पिलाते समय

वदनं विलोकयन्ती हसन्ती यशोदा = (आपके) मुख को देखकर हँसती हुई यशोदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कतमां दशां न भेजे। = कौन-सी दशा को नहीं पहुंची।

हरे, तादृशः सः गदात् मां पाहि। = हे हरे ! उस तरह के आप रोगों से मेरी रक्षा करें।

भावार्थ—आप को गोद में बैठाकर दूध पिलाते समय (आप के) मुख को देखकर हंसती हुई यशोदा, कौन-सी दशा को नहीं पहुंची। हे हरे ? उस तरह के आप रोगों से मेरी रक्षा करें।

Words-Explanation :

अंक (स्तनमङ्कगं त्वाम्) = The lap.

गदः = Disease. (As in पाहि हरे गदान्माम्)

भज् (भजति/भजते) = To enjoy, To possess, To obtain, To Betake oneself to, To share etc. (As in कतमां न भेजे)

॥ इति एकचत्वारिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-४२

शकटासुरवधवर्णनम्

[वंशस्थछन्दः]

॥ १ ॥

कदापि जन्मर्क्षदिने तव प्रभो, निमन्त्रितज्ञातिवधूमहीसुरा।
महानसस्त्वां सविधे निधाय सा महानसादौ ववृते व्रजेश्वरी ॥

पदविभागः—कदापि, जन्मर्क्षदिने, तव, प्रभो, निमन्त्रितज्ञातिवधूमहीसुरा, महानसः, त्वाम्, सविधे, निधाय, सा, महानसादौ, ववृते, व्रजेश्वरी।

अन्वयः—प्रभो, तव कदापि जन्मर्क्षदिने निमन्त्रितज्ञातिवधूमहीसुरा सा व्रजेश्वरी (यशोदा) त्वां महानसः सविधे निधाय महानसादौ ववृते।

अन्वयार्थः

प्रभो, तव कदापि जन्मर्क्षदिने = हे प्रभो ! कभी आपके जन्मदिवस पर आमन्त्रित

निमन्त्रितज्ञातिवधूमहीसुरा = ज्ञातियों (सम्बन्धियों) स्त्रियों तथा ब्राह्मणों (की उपस्थिति में)

सा व्रजेश्वरी (यशोदा) त्वाम् = वह व्रजेश्वरी यशोदा आप को

महानसः सविधे निधाय = बड़ी गाड़ी के समीप लिटाकर

महानसादौ ववृते। = पाकशाला (रसोई) में काम करने लगी।

भावार्थ—हे प्रभो ! कभी आपके जन्मदिवस पर आमन्त्रित ज्ञातियों (सम्बन्धियों) स्त्रियों तथा ब्राह्मणों की उपस्थिति में वह व्रजेश्वरी (यशोदा) आप को बड़ी गाड़ी के समीप लिटाकर पाकशाला (रसोई) में काम करने लगी।

Words-Explanation :

ज्ञातिः = Paternal relations, Agnate relatives collectivelly (As in ज्ञातिवधूमहीसुरा)

अनस् = A cart (As in महानसः सविधे निधाय)

सविध = Near, Adjacent, Proximate. (As in महानसः सविधे)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

ततो भवत्राणनियुक्तबालकप्रभीतिसंक्रन्दनसङ्कुलारवैः ।
बिमिश्रमश्रावि भवत्समीपतः परिस्फुटद्दारुचटच्चटारवः ॥

पदविभागः—ततः, भवत्राणनियुक्तबालकप्रभीतिसंक्रन्दनसङ्कुलारवैः, विमिश्रम्, अश्रावि, भवत्समीपतः, परिस्फुट-द्दारुचटच्चटारवः ॥

अन्वयः—ततः भवत्राणानियुक्तबालकप्रतभीति सङ्क्रन्दन सङ्कुलारवैः विमिश्रम् परिस्फुटद्दारुचटच्चटारवः भव-त्समीपतः अश्रावि ।

अन्वयार्थः

ततः, भवत्राणनियुक्तबालकप्रभीतिसंक्रन्दनसंकुलारवैः विमिश्रम् - उसके बाद आप की देखरेख करने के लिए नियुक्त बालकों के भय से चिल्लाने की ध्वनि से मिश्रित

परिस्फुटद्दारुचटच्चटारवः भवत्समीपतः अश्रावि । - टूट कर गिरने वाली लकड़ी के "चट-चट" शब्द आप के समीप सुनने में आये ।

भावार्थ—उसके बाद आप की देख-रेख करने के लिए नियुक्त बालकों के भय से चिल्लाने के साथ मिले लकड़ी टूट कर गिरने की "चट-चट" शब्द आप के समीप में सुनने में आये ।

Words-Explanation :

क्रन्दनम् = Cry of distress or weeping. (As in संक्रन्दनसंकुलारवैः)
संकुल = Crowded with, Filled with, Full of etc. (As -in do-)
रवः = Cry, Shriek (As in आरवैः) (As in संक्रन्दनसंकुलारवैः)
स्फुट = Burst, Broken, Split. (As in परिस्फुटद्दारु—)
दारु = Devadaru Tree, Wood, Timber. (As -in do-)

॥ ३ ॥

तदस्तदाकर्णनसम्भ्रमश्रमप्रकम्पिवक्षोजभरा व्रजाङ्गनाः
भवन्तमन्तर्ददृशुः समन्ततो विनिष्पतद्दारुणदारुमध्यगम् ॥

पदविभागः—ततः, तदाकर्णनसम्भ्रमश्रमप्रकम्पिवक्षोजभराः, व्रजाङ्गनाः, भवन्तम्, अन्तः, ददृशुः, समन्ततः, विनिष्प-द्दारुणदारुमध्यगम् ।

अन्वयः—ततः, तदाकर्णनसम्भ्रमश्रमप्रकम्पिवक्षोजभराः व्रजाङ्गनाः अन्तः समन्ततः विनिष्पतद्दारुणदारुमध्यगं भवन्तं ददृशुः ॥

अन्वयार्थः

ततः, तदाकर्णनसम्भ्रमश्रमप्रकम्पिवक्षोजभराः व्रजाङ्गनाः - उसके बाद उस (शब्द) को सुनकर उत्कण्ठित होने के श्रम से हिलते स्तन भार से आयी गोपस्त्रियों ने

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्तः समन्ततः = अन्दर (घर के अन्दर) सब ओर से

विनिष्पतद्दारुणदारुमध्यगं भवन्तं ददृशुः = गिरती मोटी लकड़ियों के बीज आप को देखा।

भावार्थ—उसके बाद उस (शब्द) को सुनकर प्रकण्ठित होने के श्रम से हिलते स्तन भार से आयी गोपियों ने अन्दर (नन्दगोप के घर के अन्दर) सब ओर से गिरती मोटी लकड़ियों के बीच आप को देखा।

Words-Explanation :

निष्पतनम् = Rushing out, Issuing quickly (As in विनिष्पतद्दारुण—)

दारुण = Hard, Rough (As in दारुणदारुमध्यगम्)

वक्षोजः/ वक्षोरुह् - Female Breast (As in वक्षोजभराः)

॥ ४ ॥

शिशोरहो किं किमभूदिति द्रुतं प्रधाव्य नन्दः पशुपाश्च भूसुराः।
भवन्तमालोक्य यशोदया धृतं समाश्वसन्नश्रुजलार्द्रलोचनाः॥

पदविभागः—शिशोः, अहो, किम्, किम्, अभूत्, इति, द्रुतम्, प्रधाव्य, नन्दः, पशुपाः, च, भूसुराः, भवन्तम्, आलोक्य, यशोदया, धृतम्, समाश्वसन्, अश्रुजलार्द्रलोचनाः॥

अन्वयः—अहो, शिशोः किं किम् अभूत ? इति द्रुतं प्रधाव्य नन्दः, पशुपाः, भूसुराः च भवन्तं यशोदया धृतम् आलोक्य अश्रुजलार्द्रलोचनाः समाश्वसन्।

अन्वयार्थः

अहो, शिशोः किं किम् अभूत् ? इति द्रुतं प्रधाव्य नन्दः, पशुपाः भूसुराः च = हाय, बालक को क्या हुआ ? इस प्रकार तुरन्त दौड़कर नन्द, गोपगण और ब्राह्मण लोग

भवन्तं यशोदया धृतम् आलोक्य = यशोदा द्वारा पकड़े हुए आपको देखकर

अश्रुजलार्द्रलोचनाः = आँखों में पानी भरकर

समाश्वसन्। = शान्त हो गये।

भावार्थ—हाय ! बालक को क्या हुआ ? इस प्रकार तुरन्त दौड़कर नन्द, गोपगण और ब्राह्मण लोग को यशोदा द्वारा पकड़े हुए आपको देखकर, आँखों में पानी भरकर शान्त हो गये।

Words-Explanation :

धाव् (धावति, धावित) - = To run, To run towards. (As in प्रधाव्य नन्द—)

पशुपः = Cowherd (As in पशुपाः, भूसुराः च)

लोचनम् = The eye, अश्रु = Eye drop (As in अश्रुजलार्द्रलोचनाः)

आर्द्र = Moist, Wet

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ५ ॥

कस्को नु कौतस्कुत एष विस्मयो विशङ्कटं यच्छकटं विपाटितम् ।
न कारणं किञ्चिदिहेति ते स्थिताः स्वनासिकादत्तकरास्त्वदीक्षकाः ॥

पदविभागः—कस्कः, नु, कौतस्कुतः, एष, विस्मयः विशङ्कटम्, यत्, शकटम्, विपाटितम्, न कारणम्, किञ्चित्, इह, इति, ते स्थिताः, स्वनासिकादत्तकराः, त्वदीक्षकाः ॥

अन्वयार्थः—एषः विस्मयः कस्कः नु कौतस्कुतः ? विशङ्कटं शकटं विपाटितम् । यत् इह कारणं न किञ्चित् । इति स्वनासिकादत्तकराः ते त्वदीक्षकाः स्थिताः ॥

अन्वयार्थः

एषः विस्मयः कस्कः नु कौतस्कुतः ? = यह कैसा विस्मय (आश्चर्य) जनक है ? यह कैसे हुआ ?

विशङ्कटम् शकटं विपाटितम् । = यह बड़ी गाड़ी टूट गयी ।

यत् इह कारणं न किञ्चित् । = जिस के लिए इधर कोई कारण नहीं है ।

इति स्वनासिकादत्तकराः = इस प्रकार अपने नाक में हाथ रखकर

ते - वे लोग (नन्दगोप तथा गोपगण)

त्वदीक्षकाः स्थिताः । = आप को देखते हुए खड़े हो गये ।

भावार्थ—यह कैसा विस्मय (आश्चर्य) जनक है ? यह कैसे हुआ ? यह बड़ी गाड़ी टूट गयी जिस के लिए इधर कोई कारण नहीं है । इस प्रकार अपने नाक में हाथ रखकर वे लोग (नन्दगोप तथा गोपगण) आप को देखते हुए खड़े हो गये ।

Words-Explanation :

विशंकट/ विशंकटा/ विशंकटी = Great, Large, Strong, Powerful etc. (As in विशङ्कटं शकटम्)

शकटम् = A cart, Carriage. (As in विशङ्कटं शकटम्)

पाटनम् = Splitting, Breaking, Destroying (As in विपाटितम्)

॥ ६ ॥

कुमारकस्यास्य पयोधरार्थिनः प्ररोदने लोलपदाम्बुजाहतम् ।
मया मया दृष्टमनो विपर्यगादितीश, ते पालकबालका जगुः ॥

पदविभागः—कुमारकस्य, अस्य, पयोधरार्थिनः, प्ररोदने, लोलपदाम्बुजाहतम्, मया, मया, दृष्टम्, अनः, विपर्यगात्, इति, ईश, ते, पालकबालकाः, जगुः ॥

अन्वयः—ईश, ते पालकबालकाः पयोधरार्थिनः प्ररोदने अस्य कुमारस्य लोलपदाम्बुजाहतम् अनः विपर्यगात्, मया दृष्टं, मया (दृष्टं) इति जगुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

ईश, ते पालकबालकाः = हे ईशः (भगवन्) ! आपकी देखरेख (रक्षा) करने वाले बालकगण ने

पयोधरार्थिनः प्ररोदने = दूध पीने के इच्छुक रोते

अस्य कुमारस्य = इस शिशु के

लोलपदाम्बुजाहतम् अनः विपर्यगात्। = कमल जैसे पैरों के मारने पर गाड़ी टूट गयी।

इति मया दृष्टं मया (दृष्टं) जगुः। = इस प्रकार "मैंने देखा, मैंने देखा" कहा।

भावार्थ—हे ईश ! आपकी देखरेख करने वाले बालकगण ने दूध पीने के इच्छुक रोते इस शिशु के कमल जैसे पैरों के मारने पर गाड़ी टूट गई इस प्रकार "मैंने देखा, मैंने देखा" कहा।

Words-Explanation :

अनस् = A cart (As in अनः विपर्यगात्)

पयस् = Milk (As in पयोधरार्थिनः)

॥ ७ ॥

भिया तदा किञ्चिदजानतामिदं कुमारकाणामतिदुर्घटं वचः।
भवत्प्रभावाविदुरैरितीरितं मनागिवाशङ्क्यत दृष्टपूतनैः॥

पदविभागः—भिया, तदा, किञ्चित्, अजानताम्, इदम्, कुमारकाणाम्, अतिदुर्घटम्, वचः, भवत्प्रभावाविदुरैः, ईरितम्, मनाक्, इव, आशङ्क्यत, दृष्टपूतनैः॥

अन्वयः—तदा भिया किञ्चित् अजानतां कुमारकाणाम् इदं वचः अतिदुर्घटम् इति भवत्प्रभावाविदुरैः ईरितम्। दृष्टपूतनैः मनाक् इव आशङ्क्यत।

अन्वयार्थः

तदा भिया किञ्चित् = तब भय से कुछ भी न जानने वाले

अजानतां कुमारकाणाम् = बालकों के ये वचन

इदं वचः अतिदुर्घटम् = मानने योग्य नहीं है

इति भवत्प्रभावाविदुरैः ईरितम्। = इस प्रकार आपके प्रभाव को नहीं जानने वाले लोगों द्वारा कहा गया।

दृष्टपूतनैः मनाक् इव आशङ्क्यत। = पूतना (संहार) को देख चुके लोगों द्वारा इस प्रकार भी हो सकता है ऐसी शंका की गयी।

भावार्थ—तब भय से कुछ भी न जानने वाले बालकों के ये वचन मानने योग्य नहीं हैं। इस प्रकार आपके प्रभाव को नहीं जानने वाले लोगों द्वारा कहा गया। पूतना (संहार/मोक्ष) को देख चुके लोगों द्वारा इस प्रकार भी हो सकता है ऐसी शंका की गयी।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

घट् (घटते, घटित) = To happen, Take place. (As in अतिदुर्घटम्)

ईर् (ईर्ते, ईर्ण) = To Utter, Pronounce. (As in ईरितम्)

मनाक् = Little,

विद (वेद, विदित, वेत्ति) = To know, To understand, Discover. (As in आविदुरैः)

॥ ८ ॥

प्रवालताम्रं किमिदं पदं क्षतम् सरोजरम्यौ नु करौ विरोजितौ ।

इति प्रसर्पत्करुणातरङ्गितास्त्वदङ्गमापस्पृशुरङ्गनाजनाः ॥

पदविभागः—प्रवालताम्रम्, किम्, इदम्, पदम्, क्षतम्, सरोजरम्यौ, नु, करौ, विरोजितौ, इति, प्रसर्पत्करुणातरङ्गिताः, त्वदङ्गम्, आपस्पृशुः, अङ्गनाजनाः ॥

अन्वयः—प्रवालताम्रम् इदं पदं किं क्षतम् ? सरोजरम्यौ करौ विरोजितौ नु ? इति प्रसर्पत्करुणातरङ्गिताः त्वदङ्गम् अङ्गनाजनाः आपस्पृशुः ॥

अन्वयार्थः

प्रवालताम्रम् इदं पदं किं क्षतम् ? = नये कोंपल जैसे ताम्बे के रंग जैसे चरणों को क्या चोट लग गई !

सरोजरम्यौ करौ विरोजितौ नु ? = कमल जैसे हाथों में दर्द होता है क्या ?

इति प्रसर्पत्करुणातरङ्गिताः त्वदङ्गम् अङ्गनाजनाः आपस्पृशुः = इस प्रकार बहुत प्यार से (गोप) स्त्रियाँ आप के शरीर का स्पर्श करने लगीं ।

भावार्थ—नये कोंपल के समान (प्रवाल जैसे) ताम्बे के रंग जैसे चरणों को क्या चोट लग गयी ? कमल जैसे हाथों में दर्द होता है क्या ? इस प्रकार बहुत प्यार से (गोप) स्त्रियां आप के शरीर का स्पर्श करने लगीं ।

Words-Explanation :

प्रवालः प्रवालं/ प्रबालः प्रबालम् = New leaf of a plant, Sprout, Shoot, coral.

क्षत = Hurt, Injured, Wounded. (As in पदं किं क्षतम् ?)

प्रसर्पणम् = Moving forward, Running or streaming forth. (As in प्रसर्पत् करुणा—)

नु = A particle implying doubt or uncertainty

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

अये, सुतं देहि जगत्पतेः कृपातरङ्गपातात्परिपातमद्य मे ।
इति स्म संगृह्य पिता त्वदङ्गकं मुहुर्मुहुः श्लिष्यति जातकण्टकः ॥

पदविभागः—अये, सुतम्, देहि, जगत्पतेः, कृपातरङ्गपातात्, परिपातम्, अद्य, मे, इति, स्म, संगृह्य, पिता, त्वदङ्गकम्, मुहुः, मुहुः, श्लिष्यति, जातकण्टकः ॥

अन्वयः—"अये,जगत्पतेः कृपातरङ्गपातात् अद्य परिपातं सुतं मे देहि ।" इति संगृह्य पिता त्वदङ्गकं जातकण्टकः मुहुर्मुहुः श्लिष्यति स्म ।

अन्वयार्थः

अये, जगत्पतेः कृपातरङ्गपातात् अद्य = अरे ! जगत् के पति भगवान् की असीम कृपा से आज

परिपातं सुतं मे देहि । = रक्षित (मेरे) पुत्र को मुझे दे दो" ।

इति संगृह्य पिता = इस प्रकार पिता (नन्दगोप) (आपको) लेकर

त्वदङ्गकं जातकण्टकः मुहुर्मुहुः श्लिष्यति स्म । = रोमाञ्चित होकर आप के शरीर को बार बार आलिंगन करने लगे ।

भावार्थ—अरे ! जगत के पति भगवान् की असीम कृपा से आज सुरक्षित मेरे पुत्र को मुझे दो । इस प्रकार पिता (नन्दगोप) (आपको) लेकर रोमाञ्चित होकर आप के शरीर को बार बार आलिंगन करने लगे ।

Words-Explanation :

पात = Protected, Guarded, Preserved (As in परिपातम्)

अङ्गकम्- = The Body (As in त्वदङ्गम् जातकण्टकः)

कण्टकः - = Horripilation, Erection of hair (रोमांच) (As in जातकण्टकः)

श्लेष् (श्लिष्यति, श्लिष्ट) = To embrace (As in श्लिष्यति जातकण्टकः)

मुहुः = Again

॥ १० ॥

अनोनिलीनः किल हन्तुमागतः सुरारिरेवं भवता विहिंसितः ।
रजोऽपि नो दृष्टममुष्य तत् कथं स शुद्धसत्वे त्वयि लीनवान् ध्रुवम् ॥

पदविभागः—अनोनिलीनः, किल, हन्तुम्, आगतः सुरारिः, एवम्, भवता, विहिंसितः, रजः, अपि, नो, दृष्टम्, अमुष्य, तत्, कथम्, सः, शुद्धसत्वे, त्वयि, लीनवान्, ध्रुवम् ॥

अन्वयः—अनोनिलीनः हन्तुम् आगतः सुरारिः एवं भवता विहिंसितः किल । अमुष्य रजः अपि नो दृष्टम् । तत् कथम् ? ध्रुवं सः शुद्धसत्वे त्वयि लीनवान् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अनोनिलीनः हन्तुम् आगतः = गाड़ी के रूप में (आपका) वध करने आया

सुरारिः एवं भवता = असुर इस प्रकार आप के द्वारा

विहिंसितः किल। = मारा गया।

अमुष्य रजः अपि = उस की धूल भी

नो दृष्टम्। = देखने में नहीं आयी।

तत् कथम्? = यह कैसे?

ध्रुवं सः शुद्धसत्वे त्वयि लीनवान्। = अवश्य शुद्धसत्व स्वरूप आप में वह (असुर) लीन हो गया।

भावार्थ—गाड़ी के रूप में आपका वध करने आया असुर, इस प्रकार आप के द्वारा मारा गया। उस की धूल भी देखने में नहीं आयी। यह कैसे? अवश्य शुद्धसत्व स्वरूप आप में वह (असुर) लीन हो गया।

Words-Explanation :

अनस् = The cart, Carriage (As in अनोनिलीनः)

ध्रुवम् = Certainly, Surely (As in ध्रुवं सः—)

॥ ११ ॥

प्रपूजितैस्तत्र ततो द्विजातिभिर्विशेषतो लम्भितमङ्गलाशिषः।
व्रजं निजैर्बाल्यरसैर्विमोहयन् मरुत्पुराधीश, रुजां जहीहि मे॥

पदविभागः—प्रपूजितैः, तत्र, ततः, द्विजातिभिः, विशेषतः लम्भितमङ्गलाशिषः, व्रजम्, निजैः बाल्यरसैः विमोहयन्, मरुत्पुराधीश, रुजाम्, जहीहि मे॥

अन्वयः—ततः तत्र मरुत्पुराधीश, प्रपूजितैः द्विजातिभिः विशेषतः लम्भितमङ्गलाशिषः निजैः बाल्यरसैः व्रजं विमोहयन् त्वं मे रूजां जहीहि।

अन्वयार्थः

ततः तत्र मरुत्पुराधीश। = हे गुरुवायुपुराधीश! तब वहां (व्रज में)

प्रपूजितैः द्विजातिभिः = उत्कृष्ट ब्राह्मणों द्वारा

विशेषतः लम्भितमङ्गलाशिषः = विशेष आशीर्वाद प्राप्त करके (पूजा कराकर)

निजैः बाल्यरसैः = अपनी बाल-लीलाओं से

व्रजं विमोहयन् त्वम् = व्रज को मोहित करते हुए आप

में रुजां जहीहि। = मेरे रोगों को शान्त करें।

भावार्थ—हे गुरुवायुपुराधीश! तब वहाँ (व्रज में) उत्कृष्ट ब्राह्मणों द्वारा विशेष आशीर्वाद प्राप्त करके (पूजा कराकर) अपनी बाल लीलाओं से व्रज को मोहित करते हुए आप मेरे रोगों को शान्त करें।

Funding by NKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

रुज्, रुजा = Pain, Torment, Pang, Anguish, Sickness, Malady etc. (As in मे रुजां जहीहि)

लभनम् = The act of getting, Obtaining etc. (As in लम्भितमङ्गलाशिषः)

॥ इति द्विचत्वारिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-४३

तृणावर्तवधवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

त्वामेकदा गुरुमरुत्पुरनाथ, वोढुं गाढाधिरूढगरिमाणमपारयन्ती ।
माता निधाय शयने किमिदं बतेति ध्यायन्त्यचेष्टत गृहेषु निविष्टशङ्का ॥

पदविभागः—त्वाम्, एकदा, गुरुमरुत्पुरनाथ, वोढुम्, गाढाधिरूढगरिमाणम्, अपारयन्ती, माता, निधाय, शयने, किम्, इधम्, बत, इति, ध्यायन्ती, अचेष्टत, गृहेषु निविष्टशङ्का ॥

अन्वयः—गुरुमरुत्पुरनाथ, एकदा माता (यशोदा) गाढधिरूढगरिमाणं त्वां वोढुम् अपारयन्ती शयने निधाय "इदं किं वत" ? इति निविष्टशङ्का ध्यायन्ती गृहेषु अचेष्टत ।

अन्वयार्थः

गुरुमरुत्पुरनाथ, एकदा माता (यशोदा) = हे गुरुवायुपुराधीश, एक बार माता (यशोदा)

गाढाधिरूढगरिमाणं त्वाम् = बहुत भार होने के कारण आप को

वोढुम् अपारयन्ती = उठाने में असमर्थ होकर

शयने निधाय = विस्तर पर लिटाकर

"इदं किं बत ?" इति निविष्ट शङ्का । = यह क्या आश्चर्य है ।" इस प्रकार शङ्का करती हुई

ध्यायन्ती गृहेषु अचेष्टत । = (भगवान् का) ध्यान करके घर में कार्य करने लगी ।

भावार्थ—हे गुरुमरुत्पुराधीश ! एक बार माता (यशोदा), बहुत भार होने के कारण आपको उठाने में असमर्थ होकर बिस्तर पर लिटाकर "यह क्या आश्चर्य है ?" इस प्रकार शङ्का करती हुई (भगवान् का) ध्यान करके, घर में कार्य करने लगी ।

Words-Explanation :

गाढ = Dived, Plunged, Inhabited, Deep, Thick, (As in गाढाधिरूढगरिमाणम्)

अधिरूढ = Mounted, Increased, Ascended (As -in do-)

गरिमन् = Weight, Heaviness, Dignity (As -in do-)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपार (वोढुम अपारयन्ती) = Difficult to overcome, Difficult to be crossed etc.

बत = A particle expressing surprise, Sorrow, Regret etc.

॥ २ ॥

तावद्विदूरमुपकर्णितघोरघोषव्याजृम्भिपाम्सुपटलीपरिपूरिताशः ।
वात्यावपुः स किल दैत्यवरस्तृणावर्ताख्यो जहार जनमानसहारिणं त्वाम् ॥

पदविभागः—तावत्, विदूरम्, उपकर्णितघोरघोषव्याजृम्भिपाम्सुपटलीपरिपूरिताशः, वात्यावपुः, सः, किल, दैत्यवरः, तृणावर्ताख्यः, जहार, जनमानसहारिणम्, त्वाम् ।

अन्वयः—तावत् विदूरम् उपकणितघोरघोषव्याजृम्भिपाम्सुपटलीपरिपूरिताशः वात्यावपुः तृणावर्ताख्यः सः किल दैत्यवरः जनमानसहारिणं त्वां जहार ।

अन्वयार्थः

तावत् विदूरम् = तब दूर

उपकर्णितघोरघोषव्याजृम्भिपाम्सुपटलीपरिपूरिताशः = सुनने में आते घोर शब्द और सब जगह में व्याप्त धूल से

वात्यावपुः तृणावर्ताख्यः = आँधी के रूप में तृणावर्त नामक

सः किल दैत्यवरः = उस महा असुर ने

जनमानसहारिणं त्वाम् = लोगों के मन को चुरानेवाले आप का

जहार । = अपहरण किया ।

भावार्थ—तब दूर सुनने में आते घोर शब्द तथा सब दिशाओं में व्याप्त धूल से आँधी के रूप में तृणावर्त नामक उस महा असुर ने लोगों के मन को चुराने वाले आप का अपहरण किया ।

Words-Explanation :

जृम्भ् (जृम्भते, जृम्भित) = Yawn, Spread, Open, Increase, Extend or spread everywhere etc. (As in व्याजृम्भिपांसु—)

पटलम् (पाम्सुपटली—) = A cover, A heap, Multitude, Large quantity etc.

पाम्सुः/ पाम्शुः = Dust, Crumbling soil, A particle of dust,

आश= Eater, One who eats (As in-do-)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

उद्दामपाम्सुतिमिराहतदृष्टिपाते द्रष्टुं किमप्यकुशले पशुपाललोके ।
"हा बालकस्य कि" मिति त्वदुपान्तमाप्ता माता भवन्तमविलोक्य भृशं रुरोद ॥

पदविभागः—उद्दामपाम्सुतिमिराहतदृष्टिपाते, द्रष्टुम्, किमपि, अकुशले, पशुपाललोके, हा, बालकस्य, किम्, इति, त्वदुपान्तम्, आप्ता, माता, भवन्तम्, अविलोक्य, भृशम्, रुरोद ॥

अन्वयः—उद्दामपाम्सुतिमिराहतदृष्टिपाते पशुपाललोके किमपि द्रष्टुम् अकुशले (सति) "हा बालकस्य किम् ?" इति त्वदुपान्तम् आप्ता माता भवन्तम् अविलोक्य भृशं रुरोद ॥

अन्वयार्थः

उद्दामपाम्सुतिमिराहतदृष्टिपाते पशुपाललोके किमपि द्रष्टुम् अकुशले (सति) - उड़ती धूल से अंधेरा हो जाने पर व्रज में ग्वालों के कुछ भी देखने में असमर्थ होने पर

"हा बालकस्य किम् ?" इति = "हाय बालक को क्या हुआ" इस प्रकार (सोचकर)

त्वदुपान्तम् आप्ता माता = आपके बिछौने के समीप आयी माता

भवन्तम् अविलोक्य = आप को न देखकर

भृशं रुरोद = बहुत रोई ।

भावार्थ—उड़ती धूल से अन्धेरा हो जाने पर व्रज में ग्वालों के कुछ भी देखने में असमर्थ होने पर "हाय बालक को क्या हुआ" इस प्रकार (सोचकर) आप को लिटाये स्थान पर आयी माता, आपको न देखकर खूब रोई ।

Words-Explanation :

उद्दाम =Unchecked, Free, Unbound, Unrestrained (As in उद्दामपाम्सु)

आप्ता = Reached (As in आप्ता माता)

भृश् = Much, Strong,. Excessive, In a high degree etc. (As in भृशं रुरोद)

॥ ४ ॥

तावत् स दानववरोऽपि च दीनमूर्तिर्भावत्कभारपरिधारणलूनवेगः ।
सङ्कोचमाप, तदनु क्षतपाम्सुघोषे घोषे व्यतायत भवज्जननीनिनादः ॥

पदविभागः—तावत्, सः, दानववरः, अपि, च, दीनमूर्तिः, भावत्कभारपरिधारणलूनवेगः, सङ्कोचम्, आप, तदनु, क्षतपाम्सुघोषे, घोषे, व्यतायत, भावज्जननीनिनादः ॥

अन्वयः—तावत् सः दानववरः अपि च भावत्कभारपरिधारणलूनवेगः दीनमूर्तिः सङ्कोचम् आप । तदनु क्षतपाम्सुघोषे घोषे भवज्जननीनिनादः व्यतायत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

तावत् सः दानववरः अपि च = और तब वह महा असुर भी

भावत्कभारपरिधारणलूनवेगः = आप के भार से वेगहीन होकर

दीनमूर्तिः सङ्कोचम् आप। = दीन होकर सिमट गया।

तदनु क्षतपाम्सुघोषे = उस के बाद धूल तथा शब्द के कुछ शांत होने पर

घोषे = (गोपों के निवास स्थान) व्रज में

भवज्जननीनिनादः व्यतायत। = आपकी माता की पुकार ऊंची हुई।

भावार्थ—और तब वह महा असुर भी आप के भार से वेग हीन होकर दीन होकर सिमट गया। उस के बाद धूल तथा शब्द के कुछ शान्त होने पर गोपों के निवास स्थान व्रज में, आपकी माता की पुकार ऊँची हुई।

Words-Explanation :

घोषः =Noise, A place where cowherds stay. (As in क्षतपाम्सुघोषे घोषे)

लून = Cut, Lopped, Severed, Cut off, Destroyed, Nibbled etc. (As in लूनवेगः)

॥ ५ ॥

रोदोपकर्णनवशादुपगम्य गेहं क्रन्दत्सु नन्दमुखगोपकुलेषु दीनः।
त्वां दानवस्त्वखिलमुक्तिकरं मुमुक्षुस्त्वय्यप्रमुञ्चति, पपात वियत्प्रदेशात्॥

पदविभागः—रोदोपकर्णवशात्, उपगम्य, गेहम्, क्रन्दत्सु, नन्दमुखगोपकुलेषु, दीनः, त्वाम्, दानवः, तुः, अखिलमुक्तिकरम्, मुमुक्षुः, त्वयि, अप्रमुञ्चति, पपात, वियत्प्रदेशात्॥

अन्वयः—रोदोपकर्णनवशात् गेहम् उपगम्य नन्दमुखगोपकुलेषु क्रन्दत्सु (सत्सु) दीनः दानवः तु अखिलमुक्तिकरं त्वां मुमुक्षुः, त्वयि अप्रमुञ्चति, वियत्प्रदेशात् पपात।

अन्वयार्थः

रोदोपकर्णनवशात् गेहम् उपगम्य नन्दमुखगोपकुलेषु क्रन्दत्सु (सत्सु) = (यशोदा का) रोना सुनकर घर पर आये नन्द आदि गोपगण के रोने पर

दीनः दानवः तु = दीन असुर (तृणावर्त) तो

अखिलमुक्तिकरं त्वां मुमुक्षुः = सब को मुक्ति प्रदान करने वाले आप को मुक्त करने की इच्छा से, (आपको छोड़ने की इच्छा से)

त्वयि अप्रमुञ्चति = आपके न छोड़ने पर (आप के द्वारा मुक्ति न देने पर)

वियत्प्रदेशात् पपात = आकाश से गिरा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—(यशोदा का) रोना सुनकर घर पर आये नन्दगोप आदि गोपसमूह के रोने पर दीन असुर (तृणावर्त) तो, सब को मुक्ति प्रदान करने वाले आप को मुक्त करने (छोड़ने) की इच्छा से, आपके द्वारा (उसको नहीं छोड़ने से) मुक्ति नहीं देने से, आकाश से गिरा।

Words-Explanation :

वियत् = The sky

॥ ६ ॥

रोदाकुलस्तदनु गोपगणा वहिष्ठपाषाणपृष्ठभुवि देहमतिस्थविष्ठम्।
प्रैक्षन्त, हन्त, निपतन्तममुष्य वक्षस्यक्षीणमेव च भवन्तमलं हसन्तम्॥

पदविभागः—रोदाकुलः, तदनु, गोपगणाः, बहिष्ठपाषाणपृष्ठभुवि, देहम्, अतिस्थविष्ठम् प्रैक्षन्त, हन्त, निपतन्तम्, अमुष्य, वक्षसि, अक्षीणम्, एव, च भवन्तम्, अलम्, हसन्तम्।

अन्वयः—तदनु रोदाकुलाः गोपगणाः बहिष्ठपाषाणपृष्ठभुवि अतिस्थविष्ठं देहं निपतन्तं प्रैक्षन्त। अमुष्य वक्षसि च अक्षीणम् एव अलं हसन्तं भवन्तं (प्रैक्षन्त), हन्त !

अन्वयार्थः

तदनु रोदाकुलाः गोपगणाः = उस के बाद रोते गोपगणों ने

बहिष्ठपाषाणपृष्ठभुवि = बाहर स्थित पथरीली भूमि पर

अतिस्थविष्ठं देहं निपतन्तं = बहुत बड़े शरीर को गिरते हुए देखा।

अमुष्य वक्षसि च अक्षीणम् एव = और उसकी छाती पर सर्वथा ही कुशल

अलं हसन्तं भवन्तं (प्रैक्षन्त) , हन्त। = सुन्दर रूप से हँसते हुए आप को देखा क्या आश्चर्य है।

भावार्थ—उसके बाद रोते गोपगणों ने बाहर स्थित पथरीली भूमि पर बहुत बड़े शरीर को गिरते देखा और उसकी छाती पर सर्वथा ही कुशल सुन्दर रूप से हँसते हुए आप को भी देखा क्या आश्चर्य है।

Words-Explanation :

बहिस् - Out of, Outside, On the outside etc. (As in बहिष्ठपाषाणपृष्ठभुवि)

पाषाणः (As in-do-) - A stone, पाषाणी - Small stone

॥ ७ ॥

ग्रावप्रपातपरिपिष्टगरिष्ठदेहभ्रष्टासुदुष्टदनुजोपरि धृष्टहासम्।
आघ्नानमंबुजकरेण भवन्तमेत्य गोपा दधुर्गिरिवरादिव नीलरत्नम्॥

पदविभागः—ग्रावप्रपातपरिपिष्टगरिष्ठदेहभ्रष्टासुदुष्टदनुजोपरि, धृष्टहासम्, आघ्नानम्, अम्बुजकरेण, भवन्तम्, एत्य, गोपाः, दधुः, गिरिवरात्, इव, नीलरत्नम्॥

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—ग्रावप्रपातपरिपिष्टगरिष्ठदेहभ्रष्टासुदुष्टदनुजोपरि धृष्टहासम् अम्बुजकरेण आघ्नानं भवन्तं, गोपाः एत्य गिरिवरात् नीलरत्नम् इव दधुः ॥

अन्वयार्थः

ग्रावप्रपातपरिपिष्टगरिष्ठदेहभ्रष्टासुदुष्टदनुजोपरि = पत्थर के ऊपर टूट कर गिरे हुए बृहत् शरीर वाले मरे हुये दुष्ट असुर के ऊपर

धृष्टहासम् अम्बुजकरेण आघ्नानं भवन्तम् = अच्छी तरह हँसकर कमल रूपी हाथों से (असुर को) मारते हुए आपको

गोपाः एत्य गिरिवरात् नीलरत्नम् इव दधुः = गोपगण ने आकर बड़े पर्वत से नीलरत्न के समान उठाया।

भावार्थ—पत्थर के ऊपर टूटकर गिरे हुए बहुत बड़े शरीर वाले मरे हुए दुष्ट असुर के ऊपर अच्छी तरह हँस कर कमल रूपी हाथों से (असुर को) मारते हुए आपको, गोपगण ने आकर बड़े पर्वत से नीलरत्न के समान उठाया।

Words-Explanation :

धृष्ट = Bold, Confident, Abandoned, Shameless. (As in धृष्टहासम्)

॥ ८ ॥

एकैकमाशु परिगृह्य निकामनन्दन्नन्दादिगोपपरिरब्धविचुम्बिताङ्गम्।
आदातुकामपरिशङ्कितगोपनारीहस्ताम्बुजप्रपतितं प्रणुमो भवन्तम्॥

पदविभागः—एकैकम्, आशु, परिगृह्य, निकामनन्दन्नन्दादिगोपपरिरब्धविचुम्बिताङ्गम्, आदातुकामपरिशङ्कितगोपनारी हस्ताम्बुजप्रपतितम्, प्रणुमः भवन्तम् ॥

अन्वयः—एकैकम् आशु परिगृह्य निकामनन्दन्नन्दादिगोपपरिरब्धविचुम्बिताङ्गम् आदातुकामपरिशङ्कितगोपनारी हस्ताम्बुजप्रपतितं भवन्तं प्रणुमः।

अन्वयार्थः

एकैकम् आशु परिगृह्य = एक-एक करके शीघ्र उठाकर

निकामनन्दन्नन्दादिगोपपरिरब्धविचुम्बिताङ्गम् = बहुत सन्तुष्ट होते नन्दगोप आदि गोपों द्वारा आलिंगन तथा चुम्बन कर,

आदातुकामपरिशङ्कितगोपनारीहस्ताम्बुजप्रपतितम् = उठाने के लिए सोचती रहती गोपस्त्रियों के कर-कमलों में जाने वाले

भवन्तं प्रणुमः = आपको हम प्रणाम करते हैं।

भावार्थ—एक एक करके शीध्र उठाकर, बहुत सन्तुष्ट होते नन्दगोप आदि गोपों द्वारा आलिंगन तथा चुम्बन कर उठाने के लिए सोचती रहती गोपस्त्रियों के कर कमलों में जाने वाले आपको हम प्रणाम करते हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

निकाम = Plentiful, Copious, Abundant. (As in निकामनन्दन्नन्दादिगोप—)

आशु = Fast, Quickly (As in एकैकम् आशु)

॥ ९ ॥

भूयोपि किं नु कृणुमः प्रणतार्तिहारी गोविन्द एव परिपालयतात्सुतं नः ।
इत्यादि मातरपितृप्रमुखैस्तदानीं सम्प्रार्थितस्त्वदवनाय विभो त्वमेव ॥

पदविभागः—भूयः, अपि, किम्, नु, कृणुमः, प्रणतार्तिहारी, गोविन्द, एव, परिपालयतात्, सुतम्, नः, इत्यादि, मातरपितृप्रमुखैः, तदानीम्, सम्प्रार्थितः, त्वदवनाय, विभो, त्वम्, एव ॥

अन्वयः—"किं नु कृणुमः ? प्रणतार्तिहारी गोविन्दः एव नः सुतं भूयः अपि परिपालयतात् ।" इत्यादि, मातरपितृप्रमुखैः तदानीं विभो त्वदवनाय त्वाम् एव सम्प्रार्थितः ॥

अन्वयार्थः

किं नु कृणुमः ? = हम क्या करें ?

प्रणतार्तिहारी गोविन्दः एव नः सुतं भूयः अपि परिपालयतात् = सेवकों के दुःखों को दूर करने वाले गोविन्द ही बार बार हमारे पुत्र की रक्षा करें ।

इत्यादि मातरपितृप्रमुखैः = इस प्रकार माता पिता आदि लोगों ने

तदानीं, विभो, त्वदवनाय त्वाम् एव सम्प्रार्थितः = उस समय हे विभो ! आप की रक्षा करने के लिए आप से ही प्रार्थना की ।

भावार्थ—"हम क्या करें ? सेवकों के दुःखों को दूर करने वाले गोविन्द ही बार-बार हमारे पुत्र की भी रक्षा करें ॥" इस प्रकार माता-पिता आदि लोगों ने उस समय हे, विभो ! आप की रक्षा करने के लिए आप से ही प्रार्थना की ।

Words-Explanation :

आर्ति -Distress, pain (As in प्रणतार्तिहारी)

प्रणत Bending, Humble (As in-do-)

अव् (अवति/ अवित/ ऊत) - To protect, To defend. (as in सम्प्रार्थित स्वदवनाय)

॥ १० ॥

वातात्मकं दनुजमेवमयि प्रधून्वन् वातोद्भवान् मम गदान् किमु नो धुनोषि ?
किं वा करोमि पुनरप्यनिलालयेश, निश्शेषरोगशमनं मुहुरर्थये त्वाम् ॥

पदविभागः—वातात्मकम्, दनुजम्, एवम्, अयि, प्रधून्वन्, वातोद्भवान्, मम, गदान्, किमु, नो, धुनोषि, किम्, वा, करोमि, पुनरपि अनिलालयेश, निश्शेषरोगशमनम्, मुहुः, अर्थये, त्वाम् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अयि, अनिलालयेश, एवं वातात्मकं दनुजं प्रधून्वन् त्वं, वातोद्भवान् मम गदान् किमु नो धुनोषि ? किम् वा करोमि ? पुनरपि निश्शेषरोगशमनं त्वां मुहुः अर्थये ॥

अन्वयार्थः

अयि, अनिलालयेश, एवम् = हे, गुरुवायुपुराधीश इस प्रकार

वातात्मकं दनुजं प्रधून्वन् त्वम् = वातरूपी असुर का वध करने वाले आप

वातोद्भवान् मम गदान् = वात से जनित मेरे रोगों को

किमु नो धुनोषि ? = क्यों नहीं दूर करते हो ?

किम् वा करोमि ? = मैं क्या करुं ?

पुनरपि निश्शेषरोगशमनं = फिर से समस्त रोगों का निवारण करने के लिए

त्वां मुहुः अर्थये = फिर आप से आग्रह करता हूं ।

भावार्थ—हे, गुरुवायुपुराधीश ! इस प्रकार वातरूपी असुर का वध करने वाले आप, वात से जनित मेरे रोगों को क्यों नहीं दूर करते हो ? मैं क्या करूं ? फिर से समस्त रोगों का निवारण करने के लिए फिर आप से आग्रह करता हूं ।

Words-Explanation :

वात - Air, Wind. (As in वातात्मकं)

प्रधनम् - Destruetion (As in प्रधून्वन्)

दनुजः - A demon, Asura (As in वातात्मकं दनुजम्)

॥ इति त्रिचत्वारिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-४४

नामकरणवर्णनम्

[गीतिछन्दः]

॥ १ ॥

गूढं वसुदेवगिरा कर्तुं ते निष्क्रियस्य सम्स्कारान् ।
हृद्गतहोरातत्त्वो गर्गमुनिस्त्वद्गृहं विभो गतवान् ॥

पदविभागः—गूढ़म्, वसुदेवगिरा, कर्तुम्, ते, निष्क्रियस्य, सम्स्कारान्, हृद्गतहोरातत्त्वः, गर्गमुनिः, त्वद्गृहम्, विभो, गतवान् ॥

अन्वयः—विभो, हृद्गतहोरातत्त्वः गर्गमुनिः गूढं वसुदेवगिरा निष्क्रियस्य ते समस्कारान् कर्तुं त्वद्गृहं गतवान् ।

अन्वयार्थः

विभो, हृद्गतहोरातत्त्वः गर्गमुनिः = हे विभो ! होरातत्त्व (ज्योतिषशास्त्र) को हृदयस्थ करने वाले (पूर्ण पाण्डित्य प्राप्त) गर्गमुनि

गूढं वसुदेवगिरा = वसुदेव की बातों से रहस्य को जानकर

निष्क्रियस्य ते = जन्म-मरण रहित आप के

सम्स्कारान् कर्तुं = (नामकरण आदि) संस्कार करने के लिए

त्वद्गृहं गतवान् । - आप के घर आये ।

भावार्थ—हे विभो ! होरातत्त्व (ज्योतिषशास्त्र) को हृदयस्थ करने वाले (पूर्ण पाण्डित्य प्राप्त) गर्गमुनि, वसुदेव की बातों से रहस्य को जानकर निष्क्रिय परब्रह्म स्वरूप, जन्म मरण रहित, आपके (नामकरण आदि) संस्कार करने के लिए आपके घर आये ।

Words-Explanation :

होरा - The rising of a zodiacal sign, An Hour etc.

होरातत्व - Astrology.

गिरा - Speech, Language, Voice.(As in वसुदेवगिरा)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

नन्दोऽथ नन्दितात्मा वृन्दिष्टं मानयन्नमुं यमिनाम्।
मन्दस्मितार्द्रमूचे त्वत्सम्स्कारान् विधातुमुत्सुकधीः ॥

पदविभागः—नन्दः, अथ, नन्दितात्मा, वृन्दिष्टम्, मानयन्, अमुम्, यमिनाम्, मन्दस्मितार्द्रम्, ऊचे, त्वत्सम्स्कारान्, विधातुम्, उत्सुकधीः ॥

अन्वयः—"युवां चिरं ककुभात्मताम् अवाप्तौ, अथ हरिं निरीक्ष्य स्वं पदम् आप्नुतम्।" इति ईरितौ तौ भवदीक्षण-स्पृहांगतौ, व्रजान्ते ककुभौ बभूवतुः॥

अन्वयार्थः

"युवां चिरं ककुभात्मताम् अवाप्तौ, अथ हरिं निरीक्ष्य स्वं पदम् आप्नुतम्"। = "आप दोनों बहुत समय तक अर्जुन वृक्षों के स्वरूप को प्राप्त करो। बाद में भगवान् हरि का दर्शन करके अपने स्थान को प्राप्त करो।"

इति ईरितौ तौ = इस प्रकार कहे गये वे दोनों

भवदीक्षणस्पृहां गतौ = आप को देखने की इच्छा से

व्रजान्ते ककुभौ बभूवतुः॥ = व्रज में अर्जुन वृक्ष बन गये।

भावार्थ—"आप दोनों बहुत समय तक अर्जुन वृक्षों के स्वरूप को प्राप्त करो। बाद में, भगवान् हरि का दर्शन करके अपने स्थान को प्राप्त करो।" इस प्रकार कहे गये वे दोनों आप को देखने की इच्छा से व्रज में अर्जुन वृक्ष बन गये।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

ईर (ईर्ते, ईर्ण) = To utter, To pronounce (As in इति ईरितौ तौ)

ईक्षणं = Seeing, Beholding, (As in भवदीक्षणस्पृहाम् गतौ)

स्पृह = Seized, Affected. (As in -do-)

॥ ६ ॥

अतन्द्रमिन्द्रद्रुयुगं तथाविधं समेयुषा मन्थरगामिना त्वया।
तिरायितोलूखलरोधनिर्धुतौ चिराय जीर्णौ परिपातितौ तरू ॥

पदविभागः—अतन्द्रम्, इन्द्रद्रुयुगम्, तथाविधम्, समेयुषा, मन्थरगामिना, त्वया, तिरायितोलूखलरोधनिर्धुतौ, चिराय, जीर्णौ, परिपातितौ तरू ।

अन्वयः—तथाविधम् इन्द्रद्रुयुगं मन्थगामिना अतन्द्रं समेयुषा त्वया, चिराय जीर्णौ तरू तिरायितोलूखलरोधनिर्धुतौ परिपातितौ ॥

अन्वयार्थः

तथाविधम् इन्द्रद्रुयुगम् = उस प्रकार के दोनों अर्जुन वृक्षों तक

मन्थरगामिना अतन्द्रम् = शनैः शनैः फुर्ती से

समेयुषा त्वया = पहुंचे आप

चिराय जीर्णौ तरू = बहुत समय तक जीर्ण उन दोनों वृक्षों को

तिरायितोलूखलरोधनिर्धुतौ = तिरछे (टेढ़े) उलूखल से रोक कर और हिलाकर

परिपातितौ = गिरा दिया

भावार्थ—उस प्रकार के दोनों अर्जुन वृक्षों तक शनैः शनैः फुर्ती से पहुंचे आप, बहुत समय तक जीर्ण उन दोनों वृक्षों को तिरछे टेढ़े उलूखल से रोक कर और हिलाकर गिरा दिया ।

Words-Explanation :

युगम् = A pair, A couple (As in इन्द्रद्रुयुगम्)

द्रु - A tree

मन्थर= Slow Lazy, (As in मन्थरगामिना) (As in -do-)

अतन्द्र, अतन्द्रित, अतन्द्रिन्, अतन्द्रल = Alert, Careful, Vigilant. (As in मन्थगामिना अतन्द्रम्)

तिरस् = Obliquely, Secretly etc. (As in तिरायितोलूखलरोध निर्धुतौ)

निर्धुत = Shaken off, Removed, Destroyed. (As in -do-)

रोध् (रुणद्धि, रुद्धे, रुद्ध) = To obstruct, Check, Prevent.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

अभाजि शाखिद्वितयं यदा त्वया तदैव तद्गर्भतलान्निरेयुषा।
महात्विषा यक्षयुगेन तत्क्षणादभाजि गोविन्द, भवानपि स्तवैः ॥

पदविभागः—अभाजि, शाखिद्वितयम्, यदा, त्वया, तदा, एव, तद्गर्भतलात्, निरेयुषा महात्विषा, यक्षयुगेन. तत्क्षणात्, अभाजि, गोविन्द, भवान्, अपि, स्तवैः ॥

अन्वयः—गोविन्द, यदा त्वया शाखिद्वितयम् अभाजि, तत्क्षणात् तद्गर्भतलात् निरेयुषा महात्विषा रक्षयुगेन तदा एव भवान् स्तवैः अभाजि अपि ।

अन्वयार्थः

गोविन्द, यदा त्वया शाखिद्वितयम् अभाजि = हे गोविन्द ! जब आपके द्वारा दोनों वृक्ष उखाड़े गये

तत्क्षणात् तद्गर्भतलात् = उसी समय उन वृक्षों के अन्दर से

निरेयुषा महात्विषा यक्षयुगेन = निकले अतितेजस्वी दो यक्षों द्वारा

तदा एव भवान् स्तवैः = तब स्तोत्रों से आपका

अभाजि अपि । = भजन किया गया ।

भावार्थ—हे गोविन्द ! जब आप के द्वारा दोनों वृक्ष उखाड़े गये, उसी क्षण उन वृक्षों के अन्दर से निकले अतितेजस्वी दो यक्षों द्वारा तब स्तोत्रों से आपका भजन किया गया ।

Words-Explanation :

शाखिन् = A tree (As in शाखिद्वितयम्)

द्वितय = Consisting of or Divided into two. (As in शाखिद्वितयम्)

त्विष् = Light, Lustre, Splendour. (As in महात्विषा)

भाज = Worshipping, Sharing/Dividing (As in अभाजि)

॥ ८ ॥

इहान्यभक्तोऽपि समेष्यति क्रमाद्भवन्तमेतौ खलु रुद्रसेवकौ।
मुनिप्रसादाद्भवदङ्घ्रिमागतौ गतौ वृणानौ खलु भक्तिमुत्तमाम् ॥

पदविभागः—इह, अन्यभक्तः, अपि, समेष्यति, क्रमात्, भवन्तम्, एतौ, खलु, रुद्रसेवकौ, मुनिप्रसादात्, भवदङ्घ्रिम्, आगतौ, गतौ, वृणानौ, खलु, भक्तिम्, उत्तमाम् ॥

अन्वयः—इह अन्य भक्तः अपि क्रमात् भवन्तं समेष्यति खलु । एतौ रुद्रसेवकौ मुनिप्रसादात् भवदङ्घ्रिम् आगतौ उत्तमां भक्तिं वृणानौ गतौ खलु ।

अन्वयार्थः

इह अन्य भक्तः अपि = इधर (इस लोक में) अन्य देवताओं के भक्त भी

Indology.in

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रमात् भवन्तं समेष्यति खलु। = आगे बढ़ते (क्रम से) आपके पास निश्चयरूप से पहुंचते हैं,

एतौ रुद्रसेवकौ मुनिप्रसादात् = इन दोनों रुद्र-भक्तों ने, नारद मुनि की कृपा से

भवदङ्घ्रिम् आगतौ = आप के चरणों में आकर

उत्तमां भक्तिं वृणानौ गतौ खलु। = उच्च कोटि की भक्ति प्राप्त की।

भावार्थ—इधर (इस लोक में) अन्य देवताओं के भक्त भी आगे बढ़ते (क्रम से) आप के पास निश्चयरूप से पहुंचते हैं, इन दोनों रुद्र-भक्तों, ने नारद मुनि की कृपा से आप के चरणों में आकर उच्च कोटि की भक्ति प्राप्त की।

Words-Explanation :

क्रम् = A step, Pace, Going, Regular course (As in क्रमात् भवन्तं समेष्यति)

प्रसादः = Favour, Kindness. (As in मुनिप्रसादात्)

अङ्घ्रिः = A foot (As in भवदङ्घ्रिम्)

॥ ९ ॥

ततस्तरूद्धारणदारुणारवप्रकम्पिसम्पातिनि गोपमण्डले।
विलज्जितत्वज्जननीमुखेक्षिना व्यमोक्षि नन्देन भवान् विमोक्षदः ॥

पदविभागः—ततः, तरुद्धारणदारुणारवप्रकम्पिसम्पातिनि, गोपमण्डले विलज्जितत्वज्जननीमुखेक्षिणा, व्यमोक्षि, नन्देन, भवान्, विमोक्षदः ॥

अन्वयः—ततः गोपमण्डले तरुद्धारणदारुणारवप्रकम्पिसम्पातिनि विलज्जितत्वज्जननीमुखेक्षिणा नन्देन विमोक्षदः भवान् व्यमोक्षि।

अन्वयार्थः

ततः गोपमण्डले = उस के बाद गोपगण के

तरूद्धारणदारणारवप्रकम्पिसम्पातिनि = वृक्षों के जड़ से उखाड़कर गिरने की भयंकर ध्वनिं से भयभीत होकर आने पर

विलज्जितत्वज्जननीमुखेक्षिणा नन्देन = लज्जित आपकी माता को देखते नन्द (नन्दगोप) ने

विमोक्षदः भवान् व्यमोक्षि = मोक्ष प्रदान करने वाले को आपको विमुक्त किया।

भावार्थ—उस के बाद गोपगण के वृक्षों के जड़ से उखाड़कर गिरने की भयंकर ध्वनि से भयभीत होकर आने पर लज्जित आपकी माता को देखते नन्द ने मोक्ष प्रदान करने वाले आप को विमुक्त किया।

Words-Explanation :

उद्धारणम् = Drawing out, Raising. (As in तरुद्धारणदारुणारव—)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दारण = Hard, Rough, Harsh (As in-do-)

पातित = Cast down, Thrown, Struck down (As in संपातित)

विमोक्ष = Release, Discharge, Final Emancipation or Beautitude (मोक्ष) (As in विमोक्षदः भवान्)

॥ १० ॥

महीरुहोर्मध्यगतो बतार्भको हरेः प्रभावादपरिक्षतोऽधुना।
इति ब्रुवाणैर्गमितो गृहं भवान् मरुत्पुराधीश्वर, पाहि मां गदात् ॥

पदविभागः—महीरुहोः, मध्यगतः, बत, अर्भकः, हरेः, प्रभावात्, परिक्षतः, अधुना, इति, ब्रुवाणैः, गमितः, गृहम्, भवान्, मरुत्पुराधीश्वर, पाहि, माम्, गदात् ॥

अन्वयः—"महीरुहोः मध्यगतः अर्भकः हरेः प्रभावात् अधुना अपरिक्षतः बत।" इति ब्रुवाणैः भवान् गृहं गमितः। मरुत्पुराधीश्वर, (त्वं) मां गदात् पाहि।

अन्वयार्थः

"महीरुहोः मध्यगतः, अर्भकः हरेः प्रभावात् अधुना अपरिक्षतः बत।" = "दोनों वृक्षों के मध्य (बीच में) गया बालक भगवान् की कृपा से बिना क्षति के इस समय बच गया, आश्चर्य।"

इति ब्रुवाणैः भवान् गृहं गमितः। = इस प्रकार कहते हुए आप को घर ले गये।

मरुत्पुराधीश्वर (त्वं) = हे गुरुवायुपुराधीश ! (आप)

मां गदात् पाहि। = मुझे रोग से बचाओ।

भावार्थ—"दोनों वृक्षों के बीच में गया बालक, भगवान् की कृपा से बिना क्षति (चोट) के इस समय बच गया। आश्चर्य है !" इस प्रकार कहते हुए आप को घर ले गये। हे गुरुवायुपुराधीश ! (आप) मुझे रोग से बचाओ।

Words-Explanation :

महीरुहः = tree

क्षत = Wounded, Hurt (As in अपरिक्षतः)

ब्रू (ब्रवीति, ब्रूते) To say, To tell, To proclaim etc. (As in ब्रुवाणैः)

॥ इति अष्टचत्वारिंशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-४९

वृन्दावन गमन वर्णनम्

[उपेन्द्रवज्रछन्दः]

॥ १ ॥

भवत्प्रभावाविदुरा हि गोपास्तरुप्रपातादिकमत्र गोष्ठे ।
अहेतुमुत्पातगणं विशङ्क्य प्रयातुमन्यत्र मनो वितेनुः ॥

पदविभागः—भवत्प्रभावाविदुराः, हि, गोपाः, तरुप्रपातादिकम्, अत्र, गोष्ठे, अहेतुम्, उत्पातगणम्, विशङ्क्य, प्रयातुम्, अन्यत्र, मनः, वितेनुः ॥

अन्वयः—भवत्प्रभावाविदुराः हि गोपाः अत्र गोष्ठे तरुप्रपातादिकम् अहेतुम् उत्पातगणं विशङ्क्य अन्यत्र प्रयातुं मनः वितेनुः ॥

अन्वयार्थः

भवत्प्रभावाविदुराः हि गोपाः = आप के प्रभाव को बिलकुल न जानते गोपगण ने

अत्र गोष्ठे = इस गोकुल में

तरुप्रपातादिकम् = वृक्ष गिरना आदि

अहेतुम् उत्पातगणम्विशङ्क्य = बिना कारण की अनेक आपत्तियों से चिन्तित होकर

अन्यत्र प्रयातुं मनः वितेनुः ॥ = किसी अन्य स्थान को जाने के लिए सोचा ।

भावार्थ—आप के प्रभाव को बिल्कुल भी न जानते गोपगणों ने इस गोकुल में वृक्ष गिरना आदि, बिना कारण की अनेक आपत्तियों से चिन्तित होकर, किसी अन्य स्थान को जाने के बारे में सोचा ।

Words-Explanation :

विदुरः = Wise, Intelligent अविदुरः-Unwise, (As in अविदुराः)

गोष्ठः/ गोष्ठम् = A cow pen, A cow station (here Gokul) (As in अत्र गोष्ठे)

उत्पातः = Jump, A spring, A portent, Any portentous or unusual phenomenon boding calamity, Any public calamity. (As in उत्पातगणम्)

गणः = A flock, Multitude. (As in उत्पातगणम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद् - (वेत्ति, वेद, विदित) = To know, To understand (As in अविदुरा:)

॥ २ ॥

तत्रोपनन्दाभिधगोपवर्यो जगौ भवत्प्रेरणयैव नूनम्।
इतः प्रतीच्यां विपिनं मनोज्ञम् वृन्दावनं नाम विराजतीति ॥

पदविभागः—तत्र, उपनन्दाभिधगोपवर्यः, जगौ, भवत्प्रेरणाया, एव, नूनम्, इतः, प्रतीच्याम्, विपिनम्, मनोज्ञम्, वृन्दावनम्, नाम विराजति, इति ।

अन्वयः—तत्र उपनन्दाभिधगोपवर्यः नूनं भवत्प्रेरणया एव, इतः प्रतीच्यां वृन्दावनं नाम मनोज्ञ विपिनं विराजति इति जगौ ।

अन्वयार्थः

तत्र उपनन्दाभिधगोपवर्यः = वहाँ उपनन्द नाम के श्रेष्ठ गोप ने

नूनं भवत्प्रेरणया, एव = निश्चित रूप से आपकी प्रेरणा से ही

इतः प्रतीच्यां वृन्दावनं नाम = इधर से पश्चिम वृन्दावन नाम के

मनोज्ञ विपिनं विराजति = मनोहर वन में विराजमान हैं,

इति जगौ । = इस प्रकार कहा ।

भावार्थ—वहाँ उपनन्द नाम के श्रेष्ठ गोप ने, निश्चित रूप से आपकी प्रेरणा से ही, इधर से पश्चिम वृन्दावन नाम के मनोहर वन में विराजमान हैं, इस प्रकार कहा ॥

Words-Explanation :

अभिधा = A name, An appellation, So called (As in उपनन्दाभिधगोपवर्यः)

प्रतीच्य = West, Western, Westerly etc. (As in इतः प्रतीच्याम्)

वर्य = Best, Most excellent etc. (As in गोपवर्यः)

विपिनम् = A wood, A forest, A grove, Thicket. (As in मनोज्ञं विपिनम्)

॥ ३ ॥

बृहद्वनं तत् खलु नन्दमुख्या विधाय गौष्ठीनमथ क्षणेन।
त्वदन्वितत्वज्जननीनिविष्टगरिष्ठयानानुगता विचेलुः ॥

पदविभागः—बृहद्वनम्, तत् खलु, नन्दमुख्याः, विधाय, गौष्ठीनम्, अथ, क्षणेन, त्वदन्वितत्वज्जननीनिविष्टगरिष्ठयानानुगताः, विचेलुः ।

अन्वयः—अथ क्षणेन नन्दमुख्याः तत् खलु बृहद्वनं गौष्ठीनं विधाय त्वदन्वितत्वज्जननीनिविष्टगरिष्ठयानानुगताः विचेलुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अथ क्षणेन नन्दमुख्याः = बाद में तुरन्त नन्दगोप आदि

तत् खलु बृहद्वनम् = उस बृहद्वन को

गौष्ठीनं विधाय = गोकुल बनाकर

त्वदन्वितत्वज्जननीनिविष्टगरिष्ठयानानुगताः विचेलुः = आप को साथ लेकर सुदृढ़ गाड़ी में बैठी माता के साथ अनुगमन करके चले।

भावार्थ—बाद में तुरन्त नन्दगोप आदि उस बृहद्वन को गोकुल (जैसे) बनाकर, आप को साथ लेकर सुदृढ़ गाड़ी में बैठी माता के साथ अनुगमन (पीछा) करके चले।

Words-Explanation :

निविष्ट = Seated, Sitting upon (As in त्वज्जननीनिविष्टगरिष्ठ—)

गरिष्ठ = Heaviest, Most important etc. (As in -do-)

विधानम् = Arranging, Making, Doing. (As in गोष्ठीनं विधाय)

गोष्ठः,गोष्ठम् = A cowpen, A cow station. (As in गौष्ठीनं विधाय)

॥ ४ ॥

अनोमनोज्ञध्वनिधेनुपालीखुरप्रणादान्तरतो वधूभिः।
भवद्विनोदालपिताक्षराणि प्रपीय नाज्ञायत मार्गदैर्घ्यम्॥

पदविभागः—अनोमनोज्ञध्वनिधेनुपालीखुरप्रणादान्तरतः, वधूभिः, भवद्विनोदालपिताक्षराणि, प्रपीय, न अज्ञायत, मार्गदैर्घ्यम्॥

अन्वयः—अनोमनोज्ञध्वनिधेनुपालीखुरप्रणादान्तरतः भवद्विनोदालपिताक्षराणि प्रपीय, वधूभिः मार्गदैर्घ्यम् न अज्ञायत।

अन्वयार्थः

अनोमनोज्ञध्वनिधेनुपालीखुरप्रणादान्तरतः = गाड़ियों की मधुर ध्वनि, गायों के कान तथा पैरों से जनित शब्द, और

भवद्विनोदालपिताक्षराणि प्रपीय = आप की विनोद पूर्ण बातों का अस्वादन करके

वधूभिः मार्गदैर्घ्यम् = गोपस्त्रियां मार्ग की दूरी को

न अज्ञायत। = नहीं जान पायी।

भावार्थ—गाड़ियों की मधुर ध्वनि गायों के कान तथा पैरों से उत्पन्न शब्द और आपकी विनोद पूर्ण बातों को सुनकर गोपस्त्रियां मार्ग की दूरी को नहीं जान पायीं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

अनस् = A cart (As in अनोमनोज्ञ ध्वनि–)

पालिः/ पाली = The tip of the ear [धेनुपाली-The tip of the ear of the cow)] (As in धेनुपालीखुर–)

प्रणदनम् = Sounding, Sound (As in खुरप्रणादान्तरतः)

खुर = A hoof (As in -do-)

लपनम् = Talking, Speaking (As in भवद्विनोदालपिताक्षराणि)

रत = Pleased, Delighted, Gratified (As in खुरप्रणादान्तरतः)

॥ ५ ॥

निरीक्ष्य वृन्दावनमीश, नन्दत्प्रसूनकुन्दप्रमुखद्रुमौघम्।
अमोदथाः शाद्वलसान्द्रलक्ष्म्या हरिन्मणीकुट्टिमपुष्टशोभम् ॥

पदविभागः—निरीक्ष्य, वृन्दावनम्, ईश, नन्दत्प्रसूनकुन्दप्रमुखद्रुमौघम्, अमोदथाः शाद्वलसान्द्रलक्ष्म्या, हरिन्मणीकुट्टिमपुष्टशोभम् ॥

अन्वयः—नन्दप्रसूनकुन्दप्रमुखद्रुमौघम्, शाद्वलसान्द्रलक्ष्म्या हरिन्मणीकुट्टिमपुष्टशोभं वृन्दावनं निरीक्ष्य ईश, अमोदथाः ॥

अन्वयार्थः

नन्दत्प्रसूनकुन्दप्रमुखद्रुमौघम् = आनन्दित करते पुष्पों से भरे "कुन्द" आदि वृक्षों से पूर्ण

शाद्वलसान्द्रलक्ष्म्या = घनी घास की शोभा से

हरिन्मणीकुट्टिमपुष्टशोभम् = मरकत मणि से पूर्ण जैसे अतीव रमणीय

वृन्दावनं निरीक्ष्य = वृन्दावन को देखकर

ईश, अमोदथाः । = हे ईश ! (आप) बहुत सन्तुष्ट हुए ।

भावार्थ—आनन्दित करते पुष्पों से भरे "कुन्द" आदि वृक्षों से पूर्ण घनी घास की शोभा से, मरकत मणि से पूर्ण जैसे अतीव रमणीय वृन्दावन को देखकर हे ईश ! (आप) बहुत सन्तुष्ट हुए ।

Words-Explanation :

सान्द्र = Close, Compact, Thick (As in शाद्वलसान्द्रलक्ष्म्या)

शादः/ शाद्रूलः = Young grass (As in -do-)

द्रु - A tree, औघम् = Flood (Here flooded with trees) (As in द्रुमौघम्)

प्रसूनम् (नन्दत् प्रसूनम्) = Flower

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्द = Joyous, Anything which gives pleasure etc. (As in नन्दत् प्रसून—-)

कुट्टिमः = An inlaid or paved floor, Ground paved with small stones, Cottage, The pomegranate etc. (As in हरिन्मणीकुट्टिम—-)

॥ ६ ॥

नवाकनिर्व्यूढनिवासभेदेष्वशेषगोपेषु सुखासितेषु ।
वनश्रियं गोपकिशोरपालीविमिश्रितः पर्यगलोकथास्त्वम् ॥

पदविभागः—नवाकनिर्व्यूढनिवासभेदेषु, अशेषगोपेषु, सुखासितेषु, वनश्रियम्, गोपकिशोरपालीविमिश्रितः पर्यक्, अलोकथाः, त्वम् ॥

अन्वयः—नवाकनिर्व्यूढनिवासभेदेषु अशेषगोपेषु सुखायितेषु (सत्सु) त्वं गोपकिशोरपाली विमिश्रितं पर्यक् वनश्रियम् अलोकथाः ॥

अन्वयार्थः

नवाकनिर्व्यूढनिवासभेदेषु = नये बने अनेक प्रकार के घरों में

अशेषगोपेषु सुखासितेषु (सत्सु) = समस्त गोपगण के सुख से रहते समय

त्वं गोपकिशोरपाली विमिश्रितं = आपने गोप-किशोरों के साथ मिलकर

पर्यक् वनश्रियम् अलोकथाः = चारों ओर के वन की सुन्दरता को देखा ।

भावार्थ—नये बने अनेक प्रकार के घरों में समस्त गोपगण के सुख से रहते समय, आप ने गोप-किशोरों के साथ मिलकर आस-पास के वन की सुन्दरता को देखा ।

Words-Explanation :

नवाकम् = New. (As in नवाकनिर्व्यूढ—)

व्यूढ = Expanded, Developed etc. (As in नवाकनिर्व्यूढ)

पाली = A line, A row (Here a line of boys) (As in किशोरपाली)

पर्यक् = Round about, In every direction (As in पर्यक् वनश्रियम्)

॥ ७ ॥

अरालमार्गागतनिर्मलापां मरालकूजाकृतनर्मलापाम् ।
निरन्तरस्मेरसरोजवक्त्रां कलिन्दकन्यां समलोकयस्त्वम् ॥

पदविभागः—अरालमार्गागतनिर्मलापाम्, मरालकूजाकृतनर्मलापाम्, निरन्तरस्मेरसरोजवक्त्राम्, कलिन्दकन्याम्, समलोक्यः, त्वम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अरालमार्गागतनिर्मलापां, मरालकूजाकृतनर्मलापाम्, निरन्तरस्मेरसरोजवक्त्रां कलिन्दकन्यां त्वं समलोकयः ॥

अन्वयार्थः

अरालमार्गागतनिर्मलापाम् = टेढ़े-मेढ़े घूमते मार्ग से शुद्धजल से चलती (बहती)

मरालकूजाकृतनर्मलापाम् = हंस की ध्वनि से पूर्ण

निरन्तरस्मेरसरोजवक्त्राम् = सदा (विकसित) कमल रूपी मुख वाली

कलिन्दकन्यां त्वं समलोकयः = कलिन्द की पुत्री (यमुना) को आपने देखा।

भावार्थ—टेढ़े-मेढ़े घूमते मार्ग से शुद्ध जल से चलती (बहती), हंस की ध्वनि से पूर्ण सदा विकसित कमल रूपी मुख वाली कलिन्द की पुत्री (यमुना) को आपने देखा।

Words-Explanation :

अराल = Curved, Crooked, (As in अरालमार्गागत—)

मराल = Swan, Flamingo, Goose, etc. (As in मरालकूजाकृतनर्मलापाम्)

कूजः, कूजनम्, कूजितम् = Cooing (As in -do-)

लापः = Speaking, Talking, Chattering etc. (As in -do-)

॥ ८ ॥

मयूरकेकाशतलोभनीयं मयूखमालाशबलं मणीनाम्।
विरिञ्चिलोकस्पृशमुच्चश्रृङ्गैर्गिरिञ्च गोवर्धनमैक्षथास्त्वम् ॥

पदविभागः—मयूरकेकाशतलोभनीयम्, मयूखमालाशबलम्, मणीनाम्, विरिञ्चिलोकस्पृशम्, उच्चश्रृङ्गैः, गिरिम्, च, गोवर्धनम्, ऐक्षथाः, त्वम् ॥

अन्वयः—मयूरकेकाशतलोभनीयं, मणीनां मयूखमालाशबलम्, उच्चश्रृङ्गैः विरिञ्चिलोकस्पृशं गोवर्धनं गिरिं च त्वम् ऐक्षथाः ॥

अन्वयार्थः

मयूरकेकाशतनोभनीयम् = मोरों के केकार शब्द से आकर्षक

मणीनां मयूखमालाशबलम् = रत्नों के प्रकाश से अनेक वर्णों से प्रदीप्त

उच्चश्रृङ्गैः = ऊँचे शिखरों से

विरिञ्चिलोकस्पृशम् = ब्रह्मलोक तक पहुंचते

गोवर्धनं गिरिं च = गोवर्धन गिरि को भी

त्वम् ऐक्षथाः = आपने देखा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—अनेक मोरों के "केकार" शब्द से आकर्षक, रत्नों के प्रकाश से अनेक प्रकार के वर्णों से प्रदीप्त ऊंचे शिखरों से ब्रह्मलोक तक पहुंचते गोवर्धन गिरि को भी आप ने देखा।

Words-Explanation :

स्पृश् (स्पृशति, स्पृष्ट) = To touch, To lay hand on, Stroke gently with etc. (As in विरिञ्चिलोकस्पृशम्)

लोभनीय = Enticing, Alluring, Attractive (As in मयूरकेकाशतलोभनीयम्)

मयूखः = A ray of light, Brightness etc. (As in मयूखमालाशबलम्)

शबल/शवल = Spotted, Variegated colour (As in -do-)

शत- (शत is used to denote a large number as an adjective while शतम् is one hundred.) (As in मयूरकेकाशत—)

॥ ९ ॥

समं ततो गोपकुमारकैस्त्वम् समन्ततो यत्र वनान्तमागाः।
ततस्ततस्तां कुटिलामपश्यः कलिन्दजां रागवतीमिवैकाम्॥

पदविभागः—समम्, ततः, गोपकुमारकैः, त्वम्, समन्ततः, यत्र, वनान्तम्, आगाः, ततः, ततः, ताम्, कुटिलाम्, अपश्यः, कलिन्दजाम्, रागवतीम्, इव, एकाम्॥

अन्वयः—ततः त्वं गोपकुमारैः समं समन्ततः यत्र वनान्तम् आगाः, ततः ततः कुटिलां तां कलिन्दजां एकां रागवतीम् इव अपश्यः॥

अन्वयार्थः

ततः त्वं गोपकुमारैः समम् = बाद में आप गोपबालकों के साथ

समन्ततः यत्र वनान्तम् आगाः, = चारों दिशाओं में जहां वन में गये

ततः ततः कुटिलां = वहीं वहीं टेढ़ी-मेढ़ी जाती

तां कलिन्दजां = वह कलिन्द की पुत्री (कालिन्दी/यमुना)

एकां रागवतीम् इव = एक रागवती कामिनी के समान

अपश्यः। = दिखायी दी।

भावार्थ—बाद में आप गोपबालकों के साथ चारों दिशाओं में जहाँ वन में गये वहीं वहीं टेढ़ी-मेढ़ी जाती वह कलिन्द की पुत्री (कालिन्दी/यमुना) एक रागवती कामिनी जैसी दिखायी दी।

Words-Explanation :

कुटिल = Crooked, Bent, Curved, Curled, Winding, Tortuous, Insincere, Dishonest, Fradulent etc. (As in कुटिलां तां कलिन्दजाम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिन्द/ कालिन्दी = Coming from the mountain Kalinda or the river Yamuna. (As in कलिन्दजाम्)

॥ १० ॥

तथाविधेऽस्मिन् विपिने पशव्ये समुत्सुको वत्सगणप्रचारे ।
चरन् सरामोऽथ कुमारकैस्त्वं समीरगेहाधिप, पाहि रोगात् ॥

पदविभागः—तथाविधे, अस्मिन्, विपिने, पशव्ये, समुत्सुकः, वत्सगणप्रचारे, चरन्, सरामः, अथ, कुमारकैः त्वम्, समीरगेहाधिप, पाहि, रोगात् ॥

अन्वयः—तथाविधे पशव्ये अस्मिन् विपिने वत्सगणप्रचारे समुत्सुकः अथ त्वं सरामः कुमारकैः (सह) चरन् समीरगेहाधिप रोगात् (मां) पाहि ।

अन्वयार्थः

तथाविधे पशव्ये अस्मिन् = उस प्रकार के पशुओं के लिए उचित इस

विपि ने वत्सगणप्रचारे समुत्सुकः = वन में बछड़ों को चलाने में उत्सुक

अथ त्वं सरामः = बाद में बलराम के साथ

कुमारकैः (सह) चरन् = गोपबालकों को लेकर चलते

समीरगेहाधिप रोगात् (मां) पाहि = हे गुरुवायुपुराधीश, रोग से मेरी रक्षा करें ।

भावार्थ—उस प्रकार के पशुओं के लिए उचित इस वन में बछड़ों को चलाने में उत्सुक बाद में बलराम के साथ गोपबालकों को लेकर चलते हे गुरुवायुपुराधीश, रोग से मेरी रक्षा करें ।

Words-Explanation :

पशव्य = fit for cattle, Suitable for cattle, Relating to cattle etc. (As in तथाविधे पशव्ये अस्मिन् विपिने)

॥ इति ऊनपञ्चाशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-५०

वत्सासुरवधवर्णनं, बकासुरवध वर्णनञ्च ।

[हरिणीछन्दः]

॥ १ ॥

तरलमधुकृद्वृन्दे वृन्दावनेऽथ मनोहरे
पशुपशिशुभिः साकं वत्सानुपालनलोलुपः ।
हलधरसखो देव श्रीमन्, विचेरिथ धारयन्
गवलमुरलीवेत्रं नेत्राभिरामतनुद्युतिः ॥

पदविभागः—तरलमधुकृद्वृन्दे, वृन्दावने, अथ, मनोहरे, पशुपशिशुभिः, साकम्, वत्सानुपालनलोलुपः, हलधरसखः, देव, श्रीमन्, विचेरिथ, धारयन्, गवलमुरलीवेत्रम्, नेत्राभिरामतनुद्युतिः ॥

अन्वयः—श्रीमन्, देव, अथ हलधरसखः नेत्राभिरामतनुद्युतिः त्वं तरलमधुकृद्वृन्दे मनोहरे वृन्दावने, वत्सानुपालनलोलुपः गवलमुरलीवेत्रं धारयन्, पशुपशिशुभिः साकं विचेरिथ ॥

अन्वयार्थः

श्रीमन्, देव, अथ = हे श्रीमन् ! हे देव ! उस के बाद

हलधरसखः नेत्राभिरामतनुद्युतिः त्वम् = बलराम के साथ देखने में सुन्दर प्रकाशमान शरीर वाले आपने

तरलमधुकृद्वृन्दे मनोहरे वृन्दावने = गतिशील भ्रमरों के समूह से भरे मनोहर वृन्दावन में,

वत्सानुपालनलोलुपः = बछड़ों को चराने की इच्छा रखकर

गवलमुरलीवेत्रं धारयन् = सींग (Horn), बांसुरी तथा डंडे लेकर

पशुपशिशुभिः साकं विचेरिथ । = गोपबालकों के साथ विचरण किया ।

भावार्थ—हे श्रीमन् ! हे देव ! उसके बाद बलराम के साथ देखने में सुन्दर प्रकाशमान् शरीर वाले गतिशील भ्रमरों के समूह से भरे मनोहर वृन्दावन में बछड़ों को चराने की इच्छा रखकर, सींग (horn), बांसुरी तथा डण्डे लेकर, गोपबालकों के साथ विचरण किया ।

Words-Explanation :

वृन्दं = A mulitude,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेत्रः = A cane

गवलम् = Buffalo's horn,

लोलुप = Longing for

मधुकृत् = A bee

॥ २ ॥

विहितजगतीरक्षं लक्ष्मीकराम्बुजलालितम्
ददति चरणद्वन्द्वं वृन्दावने त्वयि पावने।
किमिव न बभौ सम्पत्संपूरितं तरुवल्लरी-
सलिलधरणीगोत्रक्षेत्रादिकं कमलापते ॥

पदविभागः—विहितजगतीरक्षम्, लक्ष्मीकराम्बुजलालितम्, ददति, चरणद्वन्द्वम्, वृन्दावने, त्वयि, पावने, किमिव, न, बभौ, सम्पत्सम्पूरितम्, तरुवल्लरीसलिलधरणीगोत्रक्षेत्रादिकम्, कमलापते ।

अन्वयः—कमलापते, त्वयि वृन्दावने पावने विहितजगतीरक्षं लक्ष्मी-कराम्बुजलालितं चरणद्वन्द्वं ददति, तरुवल्ल-रीसलिलधरणीगोत्रक्षेत्राधिकं किमिव सम्पत्सम्पूरितं न बभौ ?

अन्वयार्थः

कमलापते, त्वयि वृन्दावने पावने विहितजगतीरक्षम् = हे विष्णो ! आप के द्वारा पावन वृन्दावन में, जगत् की रक्षा करते

लक्ष्मीकराम्बुजलालितम् चरणद्वन्द्वं ददति, = लक्ष्मी देवी के करकमलों द्वारा लालित चरणों को रखने से

तरुवल्लरीसलिलधरणीगोत्रक्षेत्राधिकम् किमिव सम्पत्सम्पूरितं न बभौ ? = वृक्ष, लतायें, भूमि, पर्वत, जल, खेत ये सब सम्पन्न हो गये । क्या-क्या सम्पत्तियां न हुई ?

भावार्थ—हे विष्णो ! आप के द्वारा पावन वृन्दावन में, जगत् की रक्षा करते, लक्ष्मी देवी के करकमलों द्वारा लालित चरणों को रखने से, वृक्ष, लतायें, भूमि, पर्वत, जल, खेत ये सब सम्पन्न हो गये । क्या क्या सम्पत्तियां (ऐश्वर्य) नहीं हुईं ॥

Words-Explanation :

विहित = Done, Performed, Arranged, Decreed etc. (As in विहित-जगतिरक्षम्)

दद् (ददते) = offering, giving. (As in चरणद्वन्द्वम् ददति)

तरुः = tree, वल्लरी-A creeping plant, सलिलम्-Water, गोत्र - Mountain

क्षेत्र = Field धरणिः = Earth. (As in तरुवल्लरीसलिलधरणीगोत्रक्षेत्राधिकम्)

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

विलसदुलपे कान्तारान्ते समीरणशीतले
विपुलयमुनातीरे गोवर्धनाचलमूर्धसु।
ललितमुरलीनादः सञ्चारयन् खलु वात्सकम्
क्वचन दिवसे दैत्यं वत्साकृतिं त्वमुदैक्षथाः ॥

पदविभागः—विलसदुलपे, कान्तारान्ते, समीरणशीतले, विपुलयमुनातीरे, गोवर्धनाचलमूर्धसु, ललितमुरलीनादः, सञ्चारयन्, खलु, वात्सकम्, क्वचन्, दिवसे, दैत्यम्, वत्साकृतिम्, त्वम्, उदैक्षथाः ॥

अन्वयः—विलसदुलपे कान्तारान्ते समीरणशीतले विपुलयमुनातीरे गोवर्धनाचलमूर्धसु (च) त्वं ललितमुरलीनादः वात्सकं सञ्चारयन् खलु क्वचन दिवसे वत्साकृतिं दैत्यम् उदैक्षथाः ॥

अन्वयार्थः

विलसदुलपे कान्तारान्ते = कोमल घास वाले वन में,

समीरणशीतले विपुलयमुनातीरे = शीतल पवन से युक्त विशाल यमुना के किनारे,

गोवर्धनाचलमूर्धसु (च) = (तथा) गोवर्धन पर्वत के शिखर पर,

त्वं ललितमुरलीनादः = आप ने सुन्दर ढंग से बांसुरी बजाकर

वात्सकं सञ्चारयन् खलु क्वचन = बछड़ों को चराते समय

दिवसे वत्साकृतिं दैत्यम् उदैक्षथाः = किसी दिन बछड़े के रूप वाले असुर को देखा।

भावार्थ—कोमल घास वाले वन में, शीतल पवन से युक्त विशाल यमुना के किनारे, (तथा) गोवर्धन पर्वत के शिखर पर, आप ने सुन्दर ढंग से बांसुरी बजाकर बछड़ों को चराते समय किसी दिन बछड़े के रूप वाले असुर को देखा।

Words-Explanation :

उलपः = soft grass, A creeping plant, Spreading creeper (As in विलसदुलपे)

कान्तारः = A large forest, A dreary forest (As in कान्तारान्ते)

विलसत् = Glittering, Shining (As in विलसदुलपे)

॥ ४ ॥

रभसविचलत्पुच्छं विच्छायतोऽस्य विलोकयन्
किमपि वलितस्कन्धं रन्ध्रप्रतीक्षमुदीक्षितम्।
तमथ चरणे बिभ्रद्विभ्रामयन् मुहुरुच्चकैः
कुहचन महावृक्षे चिक्षेपिथ क्षतजीवितम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—रभसविचलत्पुच्छम्, विच्छायतः, अस्य, विलोकयन्, किमपि, वलितस्कन्धम्, रन्ध्रपतीक्षम्, उदीक्षितम्, तम, अथ, चरणे, बिभ्रत् विभ्रामयन्, मुहुः, उच्चकैः, कुहचन, महावृक्षे, विक्षेपिथ, क्षतजीवितम् ॥

अन्वय—रभसविचलत्पुच्छं विच्छायतः अस्य वलितस्कन्धं रन्ध्र प्रतीक्षं किमपि उदीक्षितं विलोकयन् अथ (त्वं) चरणे बिभ्रत् तं मुहुः उच्चकैः विभ्रामयन् क्षतजीवितं कुहचन महावृक्षे चिक्षेपिथ ।

अन्वयार्थः

रभसविचलत्पुच्छम् = तीव्रता से पूँछ हिलाते

विच्छायतः अस्य वलितस्कन्धं = गर्दन को पीछे घुमाकर जाते

रन्ध्रप्रतीक्षं किमपि उदीक्षितम् विलोकयन्, अथ = कुछ अवसर की प्रतीक्षा करते देखते हुए

त्वं चरणं बिभ्रत् = (आपने) पैरों से पकड़कर

तं मुहुः उच्चकैः विभ्रामयन् = उसको बार-बार ऊपर घुमाते हुए

क्षतजीवितं कुहचन = प्राण जाने पर

महावृक्षे चिक्षेपिथ = किसी बड़े पेड़ पर पटका ।

भावार्थ—तीव्रता से पूंछ हिलाते गर्दन को पीछे घुमाकर जाते कुछ अवसर की प्रतीक्षा करते देखते हुए (आपने) तब पैरों से पकड़कर उस को बार-बार ऊपर घुमाते हुए प्राण जाने पर किसी प्रतीक्षा करते बड़े पेड़ पर पटका ।

Words-Explanation :

विच्छु = To go, To move (As in विच्छायतः)

रन्ध्रम् = A hole, Cavity, A weak or vulnerable point. (As in रन्ध्रप्रतीक्षम्)

रभस् = Violent, Zeal, Strength. (As in रभसविचलत्पुच्छम्)

॥ ५ ॥

निपतति महादैत्ये जात्या दुरात्मनि तत्क्षणम्
निपतनजवक्षुण्णक्षोणीरुहक्षतकानने ।
दिवि परिमिलद्वृन्दा वृन्दारकाः कुसुमोत्करैः
शिरसि भवतो हर्षाद्वर्षन्ति नाम तदा हरे ॥

पदविभागः—निपतति, महादैत्ये, जात्या, दुरात्मनि, तत्क्षणम्, निपतनजवक्षुण्णक्षोणीरुहक्षतकानने, दिवि, परिमिलद्वृन्दाः, वृन्दारकाः, कुसुमोत्करैः, शिरसि, भवतः, हर्षात्, वर्षन्ति, नाम, तदा, हरे ॥

अन्वयः—हरे ! जात्या दुरात्मनि महादैत्ये निपतनजवक्षुण्णक्षोणीरुहक्षतकानने तत्क्षणं निपतति (सति) दिवि परिमिलद्वृन्दाः वृन्दारकाः हर्षात् भवतः शिरसि कुसुमोत्करैः वर्षन्ति नाम ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

हरे, जात्या दुरात्मनि महादैत्ये, = हे हरे ! जन्म से ही दुष्ट उस महाराक्षस के भूमि पर

निपतनजवक्षुण्णक्षोणीरुहक्षतकानने तत्क्षणं निपतति (सति) = गिरने की तीव्रता से टूटे वृक्षों के वन में तत्काल गिरने से

दिवि परिमिलद्वृन्दाः वृन्दारकाः हर्षात् = आकाश में मिले देवों के समूहों ने सन्तोष से लेकर

भवतः शिरसि कुसुमोत्करैः वर्षन्ति नाम = हाथों में फूल लेकर आपके सिर पर पुष्प वर्षा की

भावार्थ—हे हरे ! जन्म से ही दुष्ट उस महासुर के गिरने की तीव्रता से टूटे वृक्षों के वन में तत्काल गिरने से आकाश में एकत्रित हुए देवों के समूह ने सन्तोष से हाथों में फूल लेकर आप के सिर पर पुष्प वर्षा की ।

Words-Explanation :

क्षुण्ण = trodden, Beaten, Followed etc. (As in क्षुण्णक्षोणीरुहक्षतकानने)

क्षोणीरुहः = tree-क्षोणी= Earth, क्षत=Wounded (As in -do-)

वृन्दारकः = A god, deity. (here devas) (As in परिमिलद्वृन्दाः वृन्दारकाः)

उत्करः = A heap, Multitude. (As in कुसुमोत्करैः)

जव = Speed. (As in निपतनजव—)

॥ ६ ॥

"सुरभिलतमा मूर्धन्यूर्ध्वं कुतः कुसुमावली
निपतति तवेत्युक्तो बालैस्सहेलमुदैरयः ।
झटिति दनुजक्षेपेणोर्ध्वंगतस्तरुमण्डलात्
कुसुमनिकरः सोऽयं नूनं समेति शनैरिति ॥

पदविभागः—सुरभिलतमा, मूर्धनि, ऊर्ध्वम्, कुतः कुसुमावली, निपतति, तव, इति, उक्तः, बालैः, सहेलम्, उदैरयः, झटिति, दनुजक्षेपेण, ऊर्ध्वंगतः, तरुमण्डलात्, कुसुमनिकरः, सः, अयम्, नूनम्, समेति, शनैः, इति ।

अन्वयः—तव मूर्धनि कुसुमावली सुरभिलतमा ऊर्ध्वं कुतः निपतति ? "इति बालैः उक्तः (त्वम्)" दनुजक्षेपेण तरुमण्डलात् झटिति ऊर्ध्वंगतः सः अयं कुसुमनिकरः नूनं शनैः समेति ।" इति सहेलम् उदैरयः ॥

अन्वयार्थः

तव मूर्धनि कुसुमावली सुरभिलतमा ऊर्ध्वं कुतः निपतति ?" = आपके सिर पर सुगन्धित पुष्पावली ऊपर कहां से गिरी ?"

इति बालैः उक्तः (त्वं) = इस प्रकार बालकों द्वारा पूछे जाने पर (आपने)

"दनुजक्षेपेण तरुमण्डलात् झटिति ऊर्ध्वंगतः सः अयं कुसुमनिकरः नूनं शनैः समेति ।" = "असुर को फेंकने से वृक्षों के समूह से तुरन्त ऊपर को गये वे पुष्पों के समूह निश्चय ही शनै शनैः नीचे गिर रहे हैं ।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति सहेलम् उदैरयः । = इस प्रकार ऐसे ही साधारणतः कहा ।

भावार्थ—आप के सिर पर सुगन्धित कुसुमावली ऊपर कहां से गिरी ? इस प्रकार बालकों द्वारा पूछे जाने पर (आप) ने "असुर को फेंकने से वृक्षों के समूह से तुरन्त ऊपर को गये वे पुष्पों के समूह, निश्चय ही शनैः शनैः नीचे गिर रहे हैं ।" इस प्रकार उस बात को टाल दिया ।

Words-Explanation :

निकरः = Pile, Flock. (As in कुसुमनिकरः)

कुसुमम् = A flower (As in कुसुमावली)

आवली = A line, A row, Range. (As in -do-)

क्षेपः = Throwing, Tossing (As in दनुजक्षेपेण—)

सहेलम् = Disregarding, Slighting (As in सहेलम् उदैरयः)

॥ ७ ॥

क्वचन दिवसे भूयो भूयस्तरे परुषातपे
तपनतनयापाथः पातुं गता भवदादयः ।
चलितगरुतं प्रेक्षामासुर्बकं खलु विस्मृतम्
क्षितिधरगरुच्छेदे कैलासशैलमिवापरम् ॥

पदविभागः—क्वचन, दिवसे, भूयः, भूयस्तरे, परुषातपे, तपनतनयापाथः, पातुम्, गताः, भवदादयः, चलितगरुतम्, प्रेक्षामासुः, बकम्, खलु विस्मृतम्, क्षितिधरगरुच्छेदे, कैलासशैलम्, इव, अपरम् ॥

अन्वयः—भूयः क्वचन दिवसे भूयस्तरे परुषातपे तपनतनयापाथः पातुं गताः भवदादयः, क्षितिधरगरुच्छेदे विस्मृतं खलु अपरं कैलासशैलं इव चलितगरुतं बक प्रेक्षामासुः ॥

अन्वयार्थः

भूयः क्वचन दिवसे = फिर किसी दिन

भूयस्तरे परुषातपे = भयंकर गर्मी में

तपनतनयापाथः पातुम् = यमुना में पानी पीने के लिए

गताः भवदादयः = गये आपलोगों ने

क्षितिधरगरुच्छेदे विस्मृतं खलु = पर्वतों के पंखों को काटने में (इन्द्र द्वारा) भूलवश

अपरं कैलासशैलं इव = दूसरे कैलास पर्वत के समान

चलितगरुतं बकं प्रेक्षामासुः = पंखों को चलाते बक को देखा ।

भावार्थ—फिर किसी दिन भयंकर गर्मी में यमुना में पानी पीने के लिए गये आप लोगों ने पर्वतों के पंखों को काटने में (इन्द्र द्वारा) भूल वश दूसरे कैलाश पर्वत के समान पंखों को चलाते बक को देखा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

तपनः=The sun तपनतनया - Yamuna (Also Godavari) पाथम्-Water

परुष = Hard, Severe, Unkind etc. (As in परुषातपे)

आतपः = Heat. (As in परुषातपे) गरुत् - The wing of a bird.(As in चलितगरुतम्)

वकः = The Indian crane. (As in बकं प्रेक्षामासुः)

भूयस् = Greater, Abundant, More, Larger etc. (As in भूयस्तरै परुषातपे)

॥ ८ ॥

पिबति सलिलं गोपव्राते भवन्तमभिद्रुतः
स किल निगिलन्नग्निप्रख्यं पुनर्द्रुतमुद्वमन् ।

दलयितुमगात् त्रोट्याः कोट्या तदाशु भवान् विभो
खलजनभिदाचुञ्चुश्चञ्चू प्रगृह्य ददार तम् ॥

पदविभागः—पिबति, सलिलम्, गोपव्राते, भवन्तम्, अभिद्भुतः, सः, किल, निगिलन्, अग्निप्रख्यम्, पुनः, द्रुतम्, उद्वमन्, दलयितुम्, अगात्, त्रोट्याः कोट्या तदा, आशु, भवान्, विभो, खलजनभिदाचुञ्चुः, चञ्चू, प्रगृह्य, ददार, तम् ॥

अन्वयः—गोपव्राते सलिलं पिबति (सति) सः (बकः) भवन्तम् अभिद्रुतः निगिलन्, अग्निप्रख्यं किल पुनः द्रुतम् उद्वमन्, त्रोट्याः कोट्या दलयितुम् अगात् । विभो, तदा खलजनभिदाचुञ्चुः भवान्, आशु चञ्चू प्रगृह्य तं ददार ।

अन्वयार्थः

गोपव्राते सलिलं पिबति (सति) = गोपबालकों द्वारा पानी पीते समय

सः (बकः) भवन्तम् अभिद्रुतः = वह (बक) द्रुत गति से

निगिलन् = आपको निगलकर

अग्निप्रख्यं किल पुनः द्रुतम् उद्वमन् = आग जैसी अनुभूति होने पर फिर तुरन्त वमन (उल्टी) करके

त्रोट्याः कोट्या दलयितुम् अगात् । = चोंच के अग्र भाग से काटने के लिए आया ।

विभो, तदा खलजनभिदाचुञ्चुः = हे विभो ! तब दुष्ट जनों को काटने में निपुण

भवान् आशु चञ्चू प्रगृह्य = आपने तुरन्त चोंच को पकड़कर

तं ददार । = उसको फाड़ डाला ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—गोप बालकों के द्वारा पानी पीते समय वह (बक) द्रुतगति से आपको निगलकर, आग जैसी अनुभूति होने पर तुरन्त वमन (उल्टी) करके चोंच के अग्र भाग से काटने के लिए आया । हे विभो ! तब दुष्टजनों को काटने में निपुण आपने तुरन्त चोंच को पकड़कर उसको फाड़ डाला ।

Words-Explanation :

व्रातः = Multitude, Flock. (As in गोपव्राते)

प्रख्य = Resembling, Look like etc. (As in अग्निप्रख्यं किल)

(This is used of the end of a composite word as अग्निप्रख्य, अमृतप्रख्य etc)

त्रोटि : = A bill, Beak (As in त्रोट्याः कोट्या)

कोटिः/ कोटी = The sharp edge of a weapon. (here the sharp edge of the beak) (As in -do-)

दलनम् = Breaking, Bursting, Cutting (As in त्रोट्याः कोट्या दलयितुम्)

चुञ्चुः = Well known, Celebrated etc. (As in खलजनभिदाचुञ्चुः)

भिदा = Breaking, Tearing etc. (As in -do-)

चञ्चू = A Beak. (As in चञ्चू प्रगृह्य)

॥ ९ ॥

सपदि सहजां सन्द्रष्टुं वा मृतां खलु पूतना-
मनुजमघमप्यग्रे गत्वा प्रतीक्षितुमेव वा ।
शमननिलयं याते तस्मिन् बके सुमनोगणे
किरति सुमनोवृन्दं वृन्दावनात् गृहमैयथाः ॥

पदविभागः—सपदि, सहजाम्, सन्द्रष्टुम्, मृताम्, खलु, पूतनाम्, अनुजम्, अघम्, अपि, अग्रे, गत्वा, प्रतीक्षितुम्, एव, वा, शमननिलयम्, याते, तस्मिन् बके, सुमनोगणे, किरति, सुमनोवृन्दम्, वृन्दावनात्, गृहम्, ऐयथाः ॥

अन्वयः—मृतां सहजां पूतनां सपदि संद्रष्टुं वा, अनुजम् अघम् अपि अग्रे गत्वा प्रतीक्षितुम् एव वा अस्मिन् बके शमननिलयं याते सुमनोगणे सुमनोवृन्दं किराति वृन्दावनात् (त्वं) गृहम् ऐयथाः खलु ॥

अन्वयार्थः

मृतां सहजां पूतनां सपदि सन्द्रष्टुं वा = मृत सहोदरी पूतना को एकदम देखने की इच्छा से

अनुजम् अघम् अपि अग्रे गत्वा प्रतीक्षितुम् एव वा = या पहले जाकर अनुज अघ की प्रतीक्षा करते जैसे

अस्मिन् बके शमननिलयं याते = उस बक के यम के घर जाने से

सुमनोगणे सुमनोवृन्दं किरति = देवगणों द्वारा की गयी पुष्पवृष्टि को स्वीकार करके

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृन्दावनात् (त्वं) गृहम् ऐयथाः खलु। = वृन्दावन से (आप) घर को गये।

भावार्थ—मृत सहोदरी पूतना को तुरन्त देखने की इच्छा से या पहले जाकर अनुज अघ की प्रतीक्षा करते जैसे उस बक के यम के घर जाने से, देवगण द्वारा की गयी पुष्पवृष्टि को स्वीकार करके वृन्दावन से (आप) घर को गये।

Words-Explanation :

शमनः = Lord Yama the god of death. (As in शमननिलयम्)

वृन्दम् = Multitude, A flook (As in सुमनोवृन्दम्)

सुमनम् = A flower. (As in सुमनोवृन्दम्)

॥ १० ॥

ललितमुरलीनादं दूरान्निशम्य वधूजनै-
स्त्वरितमुपगम्यारादारूढमोदमुदीक्षितः।
जनितजननीनन्दानन्दः समीरणमन्दिर-
प्रथितवसते शौरे, दूरीकुरुष्व ममामयान्॥

पदविभागः—ललितमुरलीनादम्, दूरात्, निशम्य, वधूजनैः त्वरितम्, उपगम्य, आरात्, आरूढमोदम्, उदीक्षितः, जनितजननीनन्दानन्दः, समीरणमन्दिरप्रथितवसते, शौरे, दूरीकुरुष्व, मम, आमयान्।

अन्वयः—ललितमुरलीनादं दूरात् निशम्य वधूजनैः त्वरितं आरात् उपगम्य आरूढमोदम् उदीक्षितः जनितजननी-नन्दानन्दः समीरणमन्दिरप्रथितवसते शौरे, मम आमयान् दूरीकुरुष्व।

अन्वयार्थः

ललितमुरलीनादम् दूरात् निशम्य = मधुर बांसुरी की आवाज को दूर से सुनकर

वधूजनैः त्वरितं आरात् उपगम्य = गोपस्त्रियों के द्वारा तुरन्त समीप आकर

आरूढ़मोदम् उदीक्षितः = प्राप्त प्रसन्नता से देखे जाते हुए

जनितजननीनन्दानन्दः = माता पिता को आनन्द प्रदान करते हुए

समीरणमन्दिरप्रथितवसते शौरे, = गुरुवायुपुर मन्दिर में प्रसिद्धि पूर्वक रहने वाले हे शौरे !

मम आमयान् दूरी कुरुष्व। = मेरे रोगों को दूर करो।

भावार्थ—मधुर बांसुरी की आवाज़ को दूर से सुनकर गोपस्त्रियों के द्वारा तुरन्त समीप आकर प्राप्त प्रसन्नता से देखे जाते हुए माता पिता को आनन्द प्रदान करते हुए गुरुवायुपुर मन्दिर में कीर्ति सहित रहने वाले हे शौरे ! मेरे रोगों को दूर करो।

Words-Explanation :

आरात् = Near, In the vicinity of (As in त्वरितम् आरात् उपगम्य)

Digitized by K.S. MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आरूढम् = Ascended, Mounted. (As in आरूढमोदम्)

प्रथित Spread, celebrated, Renowned, proclaimed, Declared, Increased, etc. (As in समीरणमन्दिरप्रथितवसते शौरे)

॥ इति पञ्चाशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-५१

अघासुरवधवर्णनं वनभोजनञ्च

[अतिरुचिरछन्दः]

॥ १ ॥

कदाचन व्रजशिशुभिः समं भवान् वनाशने विहितमतिः प्रगेतराम् ।
समावृतो बहुतरवत्समण्डलैः सतेमनैर्निरगमदीश, जेमनैः ॥

पदविभागः—कदाचन, व्रजशिशुभिः, समम्, भवान्, वनाशने, विहितमतिः, प्रगेतराम्, समावृतः, बहुतरवत्समण्डलैः, सतेमनैः, निरगमत्, ईश, जेमनैः ॥

अन्वयः—ईश, कदाचन व्रजशिशुभिः समं भवान् वनाशने विहितमतिः बहुतरवत्समण्डलैः सतेमनैः जेमनैः प्रगेतरां निरगमत् ।

अन्वयार्थः

ईश, कदाचन व्रजशिशुभिः समं भवान् वनाशने विहितमतिः = हे ईश ! कभी व्रज के गोप बालकों के साथ आप वन-भोजन का निश्चय करके

बहुतरवत्समण्डलैः समावृतः = अनेक बछड़ों के समूह के साथ (आवृत्त होकर)

सतेमनैः जेमनैः प्रगेतरां निरगमत् = सब्जियां और भोजन लेकर भोर में (प्रातःकाल) (वन को) गये ।

भावार्थ—हे ईश ! कभी व्रज के गोप - बालकों के साथ आप वनभोजन करने का निश्चय करके अनेक बछड़ों के समूह के साथ (आवृत्त होकर) सब्जियां और भोजन लेकर भोर में (प्रातःकाल) (वन को) गये ।

Words-Explanation :

अशनम् = The act of eating. (As in वनाशने विहितमतिः)

विहित = Done, Performed, Fixed, Arranged etc. (As in वनाशने विहितमतिः)

तेमनम् = Sause, Condiment, Moisture, Wetting etc. (As in सतेमनैः जेमनैः)

जेमनम्/ जमनम् = Food, Eating etc. (As in सतेमनैः जेमनैः)

Digitized by Kashi Mobi

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रागे = Early in the morning, At the day break. (As in प्रागेतरां निरगमत्)

॥ २ ॥

विनिर्यतस्तव चरणाम्बुजद्वयादुदञ्चितं त्रिभुवनपावनं रजः ।
महर्षयः पुलकधरैः कलेबरैरुदूहिरे धृतभवदीक्षणोत्सवाः ॥

पदविभागः—विनिर्यतः, तव, चरणाम्बुजद्वयात्, उदञ्चितम्, त्रिभुवनपावनम्, रजः, महर्षयः, पुलकधरैः, कलेबरैः, उदूहिरे, धृतभवदीक्षणोत्सवाः ॥

अन्वयः—विनिर्यतः तव चरणाम्बुजद्वयात् उदञ्चितं त्रिभुवनपावनं रजः महर्षयः धृतभवदीक्षणोत्सवाः पुलकधरैः कलेबरैः उदूहिरे ।

अन्वयार्थः

विनिर्यतः तव चरणाम्बुजद्वयात् = घर से निकलते समय आपके दोनों चरणकमलों से

उदञ्चितं त्रिभुवनपावनं रजः = ऊपर उठती तीनों लोकों को पवित्र करती धूल को

महर्षयः धृतभवदीक्षणोत्सवाः पुलकधरैः कलेबरैः = आपके दर्शन से प्रसन्न महर्षियों ने रोमाञ्चित शरीरों पर

उदूहिरे । = धारण किया ।

भावार्थ—घर से निकलते (प्रस्थान करते) समय आपके दोनों चरणकमलों से ऊपर उठती तीनों लोकों को पवित्र करती धूल को आपके दर्शनों से प्रसन्न महर्षियों ने रोमाञ्चित (पुलकित) हुए शरीरों पर धारण किया ।

Words-Explanation :

ईक्ष् (ईक्षित, ईक्षते) = To see, To behold. (As in भवदीक्षणोत्सवाः)

उत्सवः = Joy, Merriment, Pleasure, A festival, etc. (As in भवदीक्षणोत्सवाः)

कलेवरः/ कलेबरः = The Body (As in पुलकधरैः कलेबरैः)

उदत्, उदंच्, उदङ्, उदक् = Turned or going upwards. (As in उदञ्चितम् त्रिभुवनपावनम्)

पुलकः = Erection or bristling of hairs of the body, Horripilation. (As in पुलकधरैः)

॥ ३ ॥

प्रचारयत्यविरलशाद्वले तले पशून् विभो भवति समं कुमारकैः ।
अघासुरो न्यरुणदघाय वर्तनीं भयानकः सपदि शयानकाकृतिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—प्रचारयति, अविरलशाद्वले, तले, पशून्, विभो, भवति, समम्, कुमारकैः, अघासुरः, न्यरुणत्, अघाय, वर्तनीम्, भयानकः, सपदि, शयनाकृतिः ॥

अन्वयः—विभो, भवति अविरलशाद्वले तले कुमारकैः समं पशून् प्रचारयति (सति) भयानकः अघासुरः शयानाकृतिः, अघाय सपदि वर्तनीं न्यरुणत् ॥

अन्वयार्थः

विभो, भवति अविरलशाद्वले तले = हे विभो ! आपके द्वारा घनी घास के स्थान पर

कुमारकैः समम् = बालकों के साथ

पशून् प्रचारयति (सति) = गाय के बछड़ों को चराते समय

भयानकः अघासुरः शयनाकृतिः = भयंकर अघासुर ने सांप का रूप धारण करके

अघाय सपदि = पाप के उद्देश्य से तत्काल

वर्तनीं न्यरुणत्। = मार्ग रोका।

भावार्थ—हे विभो ! आपके द्वारा घनी घास के स्थान पर बालकों के साथ गाय के बछड़ों को चराते समय भयंकर अघासुर ने सांप का रूप धारण करके, पाप करने के लिए तत्काल आपका मार्ग रोका।

Words-Explanation :

प्रचार = Going forth, A pasture ground, Pasturage, (चराना) (As in पशून् प्रचारयति)

पशु = Animal (Here Cow-Calf) (As in पशून् प्रचारयति)

अघम्= Sin. (As in अघाय सपदि)

वर्तनः = A Roadway, (As in वर्तनीं न्यरुणत्)

शयानकः = A kind of snake, The Boa, (As in शयानाकृतिः अघाय सपदि)

॥ ४ ॥

महाचलप्रतिमतनोर्गुहानिभप्रसारितप्रथितमुखस्य कानने।
मुखोदरं विहरणकौतुकाद्गताः कुमारकाः किमपि विदूरगे त्वयि ॥

पदविभागः—महाचलप्रतिमतनोः, गुहानिभप्रसारितप्रथितमुखस्य, कानने, मुखोदरम्, विहरणकौतुकात्, गताः, कुमारकाः, किमपि, विदूरगे, त्वयि।

अन्वयः—त्वयि किमपि विदूरगे (सति) विहरणकौतुकात् कुमारकाः, कानने महाचलप्रतिमतनोः गुहनिभ प्रसारित-प्रथितमुखस्य (तस्य) मुखोदरं गताः ॥

अन्वयार्थः

त्वयि किमपि विदूरगे (सति) = आपके कुछ दूरी पर रहते समय

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विहरणकौतुकात् कुमारकाः = खेलने की इच्छा से गोपबालक

कानने महाचलप्रतिमतनोः = वन में बड़े पहाड़ के स्वरूप वाली आकृति के

गुहनिभप्रसारितप्रथितमुखस्य (तस्य) मुखोदरं गताः । = गुफा के समान विस्तृत (उसके) मुख के अन्दर गये ।

भावार्थ—आपके कुछ दूरी पर रहते समय खेलने की इच्छा से गोपबालंक वन में बड़े पहाड़ के स्वरूप वाली आकृति के गुफा के समान (उसके) मुँह के अन्दर गये ।

Words-Explanation :

प्रथित = Increased, Spread etc. (As in गुहनिभप्रसारितप्रथितमुखस्य)

प्रतिमा = Resemblance, Similitude. (As in महाचलप्रतिमतनोः)

विहरणम् = Pleasure, Pastime, Taking a walk, Rumbling for pleasure, Taking away, Removing etc. (As in विहरणकौतुकात्)

॥ ५ ॥

प्रमादतः प्रविशति पन्नगोदरं क्वथत्तनौ पशुपकुले सवात्सके ।
विदन्निदं त्वमपि विवेशिथ प्रभो सुहृज्जनं विशरणमाशु रक्षितुम् ॥

पदविभागः—प्रमादतः, प्रविशति, पन्नगोदरम्, क्वथत्तनौ, पशुपकुले, सवात्सके, विदन्, इदम्, त्वम्, अपि, विवेशिथ, प्रभो, सुहृज्जनम्, विशरणं, आशु, रक्षितुम् ॥

अन्वयः—सवात्सके पशुपकुले प्रमादतः, पन्नगोदरं प्रविशति क्वथत्तनौ, इदं विदन् प्रभो त्वम् अपि विशरणं सुहृज्जनं रक्षितुम् आशु विवेशिथ ।

अन्वयार्थः

सवात्सके पशुपकुले = बछड़ों के साथ गोपबालकों के

प्रमादतः पन्नगोदरं प्रविशति क्वथत्तनौ = अनजाने में साँप के अन्दर प्रवेश करने पर शरीर के जलने पर

इदं विदन् प्रभो, त्वम् अपि = इसकी जानकारी होने पर हे प्रभो ! आप भी

विशरणं सुहृज्जनं रक्षितुम् = शरण रहित अपने मित्रों की रक्षा करने के लिए

आशु विवेशिथ । = तुरन्त अन्दर गये ।

भावार्थ—बछड़ों के साथ गोपबालकों के अनजाने में साँप के (मुँह के) अन्दर प्रवेश करने पर शरीर के जलने पर इसकी जानकारी होने पर हे प्रभो ! आप भी इसको जानकर, शरणहीन अपने मित्रों की रक्षा करने के लिए शीघ्र अन्दर (साँप के मुँह के अन्दर) प्रविष्ट हुए ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

प्रमाद: = Carelessness. (As in प्रमादत: पन्नगोदरं प्रविशति)

विद् (वेद, विदित, वेत्ति) = To know, To understand (As in इदं विदन्)

क्वथ् (क्वथित) = To boil, Decoct, To digest. (As in क्वथत्तनौ)

आशु = Fast, Quick. (As in आशु विवेशिथ)

॥ ६ ॥

गलोदरे विपुलितवर्ष्मणा त्वया महोरगे लुठति निरुद्धमारुते।
द्रुतं भवान् विदलितकण्ठमण्डलो विमोचयन् पशुपपशून् विनिर्ययौ ॥

पदविभाग:—गलोदरे, विपुलितवर्ष्मणा, त्वया, महोरगे, लुठति, निरुद्धमारुते, द्रुतम्, भवान्, विदलितकण्ठमण्डल:, विमोचयन्, पशुपपशून्, विनिर्ययौ ।

अन्वय:—गलोदरे त्वया विपुलितवर्ष्मणा निरुद्धमारुते महोरगे लुठति (सति) भवान् द्रुतं विदलितकण्ठमण्डल:, पशुपपशून् विमोचयन् (स्वयं) विनिर्ययौ ॥

अन्वयार्थ:

गलोदरे त्वया विपुलितवर्ष्मणा = गले के अन्दर आपके द्वारा शरीर को बड़ा करके

निरुद्ध मारुते = वायु (सांस) को रोकने पर

महोरगे लुठति (सति) = उस बड़े सर्प के तड़पने पर

भवान् द्रुतं विदलितकण्ठमण्डल: = आपने शीघ्र गले को फाड़कर

पशुपपशून् विमोचयन् (स्वयं) विनिर्ययौ = गोपगण तथा पशुओं (बछड़ों) को मुक्त करके (स्वयं) बाहर निकला ।

भावार्थ—गले के अन्दर आपके द्वारा शरीर को बड़ा करके, वायु (सांस) को रोकने पर उस बड़े सर्प के तड़पने पर, आपने शीघ्र (उसके) गले को फाड़कर (विदलित करके) गोपगण तथा बछड़ों को मुक्त करके (स्वयं) बाहर निकला ।

Words-Explanation :

विपुल = Wide, Broad, Large, Capacious, Spacious (As in विपुलितवर्ष्मणा)

वर्ष्मन् = Body, Form. (As in विपुलितवर्ष्मणा)

विदल = Split, Opened, Blown, Dividing etc. (As in विदलितकण्ठमण्डल:)

लुठनम् = Rolling, Wallowing, Moving to & fro. (As in महोरगे लुठति)

मण्डलम् = Round, Circular (As in कण्ठमण्डल:)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कण्ठः/ कण्ठम्= Throat (As in कण्ठमण्डलः)

॥ ७ ॥

क्षणं दिवि त्वदुपगमार्थमास्थितं महासुरप्रभवमहो, महो महत्।
विनिर्गते त्वयि तु निलीनमञ्जसा नभःस्थले ननृतुरथो जगुः सुराः ॥

पदविभागः—क्षणम्, दिवि, त्वदुपगमार्थम्, आस्थितम्, महासुरप्रभवम्, अहो, महः, महत्, विनिर्गते, त्वयि, तु निलीनम्, अञ्जसा, नभः, स्थले, ननृतुः, अथो, जगुः, सुराः।

अन्वयः—महासुरप्रभवं महत् महः तु त्वदुपगमार्थं क्षणं दिवि आस्थितं, विनिर्गते त्वयि अञ्जसा निलीनम् अहो। अथो, नभःस्थले सुराः ननृतुः जगुः।

अन्वयार्थः

महासुरप्रभवं महत् महः तु = महासुर से उत्पन्न अत्यन्त प्रभा तो

त्वदुपगमार्थं क्षणं दिवि आस्थितम् = आपके पास आने के लिए कुछ क्षण आकाश में रही

विनिर्गते त्वयि अञ्जसा निलीनम् अहो। = बाहर आकर आपमें तुरन्त विलीन हो गयी। अहो आश्चर्य।

अथो, नभःस्थले सुराः ननृतुः जगुः। = उसके बाद आकाश में देवगणों ने नृत्य और गायन किया।

भावार्थ—महा-असुर से उत्पन्न अत्यन्त प्रभा तो, आपके पास आने के लिए कुछ क्षण आकाश में रही, बाहर आकर आपमें तुरन्त विलीन हो गयी। अहो आश्चर्य। उसके बाद आकाश में देवगणों ने नृत्य और गायन किया।

Words-Explanation :

प्रभवः = Source, Origin, Vishnu (प्रभवःप्रभूरीश्वर - Vishnusahasranamam) (As in महासुरप्रभवम्—) प्रभा = Light

(नभःस्थल) नभम्/ नभस् = The Sky, Atmosphere,

विलीन = Sticking to, Cluling to, Attached to. (As in विलीनम् अहो)

दिवम् = Heaven, The Sky, A day, A forest etc. (Here the Heaven) (As in दिवि आस्थितम्)

॥ ८ ॥

सविस्मयैः कमलभवादिभिः सुरैरनुद्रुतस्तदनु गतः कुमारकैः।
दिने पुनस्तरुणदशामुपेयुषि स्वकैर्भवानतनुत भोजनोत्सवम् ॥

पदविभागः—सविस्मयैः, कमलभवादिभिः, सुरैः, अनुद्रुतः, तदनु, गतः, कुमारकैः, दिने, पुनः, तरुणदशाम्, उपेयुषि, स्वकैः, भवान्, अतनुत, भोजनोत्सवम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—तदनु सविस्मयैः कमलभवादिभिः सुरैः अनुद्रुतः कुमारकैः गतः भवान् पुनः दिने तरुणदशाम् उपेयुषि, स्वकैः भोजनोत्सवम् अतनुत ।

अन्वयार्थः

तदनु सविस्मयैः = उसके बाद विस्मय के साथ (आश्चर्य से)

कमलभवादिभिः सुरैः = ब्रह्माजी आदि देवगण

अनुद्रुतः कुमारकैः गतः । भवान्, पुनः = पीछे-पीछे चलते (गोप) कुमारों के साथ गये । आपने फिर

दिने तरुणदशाम् उपेयुषि = दिन में सूरज के ऊपर आने पर (अर्थात् मध्य दिन में)

स्वकैः भोजनोत्सवम् अतनुत = अपने मित्रों के साथ भोजनोत्सव (वनभोजन) मनाया ।

भावार्थ—उसके बाद विस्मय के साथ (आश्चर्य से) ब्रह्माजी आदि देवगण पीछे-पीछे अनुगमन करके (गोप) कुमारों के साथ गये । आपने फिर दिन में सूरज के ऊपर आने पर (मध्याह्न में) अपने मित्रों के साथ भोजनोत्सव (वनभोजन-Picnic) मनाया ।

Words-Explanation :

कमलभवः = Brahma (Born out of Lotus)

तरुण = Young, New, Fresh, Newly born, Not high in the Sky (as the Sun) (As in तरुणदशाम् उपेयुषि)

॥ ९ ॥

विषाणिकामपि मुरलीं नितम्बके निवेशयन् कबलधरः कराम्बुजे ।
प्रहासयन् कलवचनैः कुमारकान् बुभोजिथ त्रिदशगणैर्मुदा नुतः ॥

पदविभागः—विषाणिकाम्, अपि, मुरलीम्, नितम्बके, निवेशयन्, कबलधरः, कराम्बुजे, प्रहासयन्, कलवचनैः, कुमारकान्, बुभोजिथ, त्रिदशगणैः, मुदा, नुतः ॥

अन्वयः—विषाणिकां, मुरलीम् अपि नितम्बके निवेशयन् कराम्बुजे कबलधरः कलवचनैः कुमारकान् प्रहासयन् (त्वं) बुभोजित । (तदा) त्रिदशगणैः मुदा (त्वं) नुतः ॥

अन्वयार्थः

विषाणिकाम्, मुरलीम् अपि = सींग तथा मुरली (बांसुरी) को

नितम्बके निवेशयन् = पृष्ठभाग पर लगाकर

कराम्बुजे कबलधरः = कमल जैसे हाथ में भोजन को लेकर

कलवचनैः कुमारकान् प्रहासयन् = मीठी-मीठी बातें करके बालकों को हँसाते हुए

(त्वं) बुभोजित । = (आपने) भोजन किया ।

(तदा) त्रिदशगणैः मुदा = (तब) देवगणों ने सन्तुष्ट होकर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(त्वं) नुतः । = (आपकी) स्तुति की ।

भावार्थ—सींग तथा बांसुरी को पृष्ठभाग पर लगाकर, कमल जैसे हाथ में भोजन को लेकर, मीठी-मीठी बातें करके बालकों को हँसाते हुए भोजन किया । (उस समय) देवगणों ने सन्तुष्ट होकर (आपकी) स्तुति की ।

Words-Explanation :

विषाणः/ विषाणम्/ विषाणी = A horn, The tusk of an elephant or a boar etc. (As in विषाणिकाम्)

॥ १० ॥

"सुखाशनं त्विह तव गोपमण्डले मखाशनात् प्रियमिव देवमण्डले ।"
इति स्तुतस्त्रिदशवरैर्जगत्पते मरुत्पुरीनिलय, गदात्प्रपाहि माम् ॥

पदविभागः—सुखाशनम्, तु, इह, तव, गोपमण्डले, मखाशनात्, प्रियम्, इव, देवमण्डले, इति, स्तुतः, त्रिदशवरैः, जगत्पते, मरुत्पुरीनिलय, गदात्, प्रपाहि, माम् ।

अन्वयः—"इह गोपमण्डले तव सुखाशनं तु, देवमण्डले मखाशनात् प्रियम् इव" इति त्रिदशवरैः स्तुतः (त्वं) जगत्पते मरुत्पुरीनिलय, मां गदात् प्रपाहि ।

अन्वयार्थः

"इह गोपमण्डले तव सुखाशनम् तु = "इधर गोपबालकों के बीच आप का भोजन तो,

देवमण्डले मखाशनात् प्रियम इव" = देवों के बीच में यज्ञ में आहुति से प्राप्त हविस् के समान प्रिय है,"

इति त्रिदशवरैः = इस प्रकार श्रेष्ठ देवगणों द्वारा

स्तुतः (त्वं) जगत्पते = स्तुति प्राप्त (आप), हे जगत्पते,

मरुत्पुरीनिलय, = हे गुरुवायुपुराधीश !

मां गदात् प्रपाहि । = मुझे रोगों से बचाओ ।

भावार्थ—इधर गोपबालकों के बीच आप का भोजन तो, देवों के बीच में यज्ञ में आहुति से प्राप्त हविस् के समान प्रिय है, इस प्रकार श्रेष्ठ देवगणों द्वारा स्तुति प्राप्त (आप) हे जगत्पते, हे गुरुवायुपुराधीश ! मुझे रोगों से बचाओ ।

॥ इति एकपञ्चशत्तमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-५२

वत्सापहरणवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

अन्यावतारनिकरेष्वनिरीक्षितं ते भूमातिरेकमभिवीक्ष्य तदाघमोक्षे।
ब्रह्मा परीक्षितुमनाः स परोक्षभावं निन्येऽथ वत्सकगणान् प्रवितत्य मायाम् ॥

पदविभागः—अन्यावतारनिकरेषु, अनिरीक्षितम्, ते, भूमातिरेकम्, अभिवीक्ष्य, तदा, अघमोक्षे, ब्रह्मा, परीक्षितुमनाः, सः, परोक्षभावम्, निन्ये, अथ, वत्सकगणान्, प्रवितत्य, मायाम् ॥

अन्वयः—अथ सः ब्रह्मा तदा अघमोक्षे, अन्यावतारनिकरेषु अनिरीक्षितम् ते भूमातिरेकम् अभिवीक्ष्य परीक्षितुमनाः, मायां प्रवितत्य वत्सकगणान् परोक्षभावं निन्ये।

अन्वयार्थः

अथ सः ब्रह्मा तदा अघमोक्षे = उस के बाद उन ब्रह्मा जी ने तब अघासुर के मोक्ष में

अन्यावतारनिकरेषु अनिरीक्षितम् ते भूमातिरेकम् अभिवीक्ष्य = अन्य अवतारों में न देखे गये आप के प्रभाव को साक्षात् देखकर

परीक्षितुमनाः = परीक्षा लेने का संकल्प करके

मायां प्रवितत्य वत्सकगणान् परोक्षभावं निन्ये। = माया का ध्यान करके बछड़ों को अदृश्य करा दिया।

भावार्थ—उसके बाद में उन ब्रह्मा जी ने तब अघासुर के मोक्ष में, अन्य अवतारों में न देखे गये आप के प्रभाव को साक्षात् देखकर, परीक्षा लेने का संकल्प करके माया का ध्यान करके बछड़ों को अदृश्य करा दिया।

Words-Explanation :

प्रवितत = Spread out, Disordered. (As in प्रवितत्य वत्सकगणान्)

॥ २ ॥

वत्सानवीक्ष्य विवशे पशुपोत्करे तानानेतुकाम इव धातृमतानुवर्ती।
त्वं सामिभुक्तकबलो गतवांस्तदानीं भुक्तांस्तिरोऽधित सरोजभवः कुमारान् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—वत्सान्, अवीक्ष्य, विवशे, पशुपोत्करे, तान्, आनेतुकाम, इव, धातृमतानुवर्ती, त्वम्, सामिभुक्तकबलः, गतवान्, स्तदानीम्, भुक्तान्, तिरोऽधित, सरोजभवः, कुमारान् ॥

अन्वयः—पशुपोत्करे वत्सान् अवीक्ष्य विवशे (सति) त्वं धातृमतानुवर्ती तान् (वत्सकान्) आनेतुकाम इव, सामिभुक्तकबलः गतवान् । तदानीं सरोजभवः भुक्तान् कुमारान् तिरोऽधित ।

अन्वयार्थः

पशुपोत्करे वत्सान् अवीक्ष्य विवशे (सति) = गोपगणों के बछड़ों को न देखकर विवश होने पर

त्वं धातृमतानुवर्ती = ब्रह्माजी की इच्छा का अनुसरण करके आप

तान् (वत्सकान्) आनेतुकाम इव सामिभुक्तकबलः गतवान् । = उन बछड़ों को लाने की इच्छा करते जैसे आधे खाये भोजन को लेकर गया ।

तदानीं सरोजभवः = उस समय कमल से जनित ब्रह्मा ने

भुक्तान् कुमारान् तिरोऽधित । = भोजन करते बालकों को तिरोधान करा दिया ।

भावार्थ—गोपगण के बछड़ों को न देखकर विवश होने पर ब्रह्माजी की इच्छा का अनुसरण करके आप उन (बछड़ों) को लाने की इच्छा करते जैसे, आधे खाये भोजन को लेकर गये । उस समय कमल से जनित ब्रह्माजी ने भोजन करते बालकों को भी (माया द्वारा) तिरोधान करा दिया ।

Words-Explanation :

सामि = Half, Unfinished. (As in सामिभुक्तकबलः गतवान्)

कवलं/कवलः = A mouthful. (As in सामिभुक्तबलः)

॥ ३ ॥

वत्सायितस्तदनु गोपगणायितस्त्वं शिक्यादिभाण्डमुरलीगवलादिरूपः ।
प्राग्वद्विहृत्य विपिनेषु चिराय सायं त्वं मायया अथ बहुधा व्रजमाययाथ ॥

पदविभागः—वत्सायितः, तदनु, गोपगणायितः, त्वम्, शिक्यादिभाण्डमुरलीगवलादिरूपः प्राग्वत्, विहृत्य, विपिनेषु, चिराय, सायम्, त्वम्, मायया, अथ, बहुधा व्रजम्, आययाथ ॥

अन्वयः—तदनु त्वम् वत्सायितः, गोपगणायितः, शिक्यादिभाण्डमुरलीगवलादिरूपः, विपिनेषु प्रागवत् चिराय विहृत्य, अथ सायं त्वं मायया बहुधा व्रजम् आययाथ ।

अन्वयार्थः

तदनु त्वम् वत्सायितः = उस के बाद आप बछड़ा

गोपगणायितः, शिक्यादिभाण्डमुरलीगवलादिरूपः = गोपगण, सीक्, बर्तन (पात्र) बांसुरी, सींग आदि के रूप धारण कर

विपिनेषु प्राग्वत् चिराय विहृत्य, = वन में पूर्ववत् बहुत समय तक खेलकर,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ सायं त्वं मायया बहुधा = बाद में शाम को आप माया को अपनाकर बछड़े, गोप, मुरली, सीक, आदि अनेक रूप बनकर व्रज में आये।

व्रजम् आययाथ। = व्रज में आये।

गलित = Fallen, Lost, Vanished, Emptied etc. (As in गलितसर्वजले)

मरुत् = Deva, Air (Wind God) etc. (As in मरुतांपतिः)

॥ ९ ॥

शममुपेयुषि वर्षभरे तदा पशुपधेनुकुले च विनिर्गते ।
भुवि, विभो, समुपाहितभूधरः प्रमुदितैः पशुपैः परिरेभिषे ॥

पदविभागः—शशम्, उपेयुषि, वर्षभरे, तदा, पशुपधेनुकुले, च, विनिर्गते, भुवि, विभो, समुपाहितभूधरः, प्रमुदितैः, पशुपैः, परिरेभिषे ॥

अन्वयः—तदा वर्षभरे शमम् उपेयुषि (सति) पशुपधेनुकुले च विनिर्गते (सति), विभो, भुवि समुपाहितभूधरः (त्वाम्) प्रमुदितैः पशुपैः परिरेभिषे ॥

अन्वयार्थः

तदा वर्षभरे शमम् उपेयुषि (सति) = उस समय वर्षा की तीव्रता के पूर्ण रूप से समाप्त होने पर

पशुपधेनुकुले च विनिर्गते (सति) = गोपों और गायों के भी चले जाने पर

विभो, भुवि समुपाहितभूधरः = हे विभो ! (आपने) भूमि पर (गोवर्धन) पर्वत को रखा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रमुदितैः पशुपैः = प्रसन्न गोपगणों ने (आपका)

परिरेभिषे। = आलिंगन किया।

भावार्थ—उस समय वर्षा की तीव्रता के पूर्ण रूप से समाप्त होने पर गोपों तथा गायों के भी चले जाने पर, हे विभो ! (आपने) भूमि पर (गोवर्धन) पर्वत को रखा, प्रसन्न गोपगणों ने (आपका) आलिंगन किया।

Words-Explanation :

भरः = Burden, Multitude, A great number etc. (As in वर्षभरे शमम् उपेयुषि)

उपाहित = Placed, Deposited, Put on, Connected, Joined etc. (As in भुवि समुपाहितभूधरः)

परिरम्भः/ परीरम्भः/ परिरम्भणम् = Embracing. (As in पशुपैः परिरेभिषे)

॥ १० ॥

"धरणिमेव पुरा धृतवानसि क्षितिधरोद्धरणे तव कः श्रमः।"
इति नुतस्त्रिदशैः कमलापते गुरुपुरालय, पालय मां गदात्॥

पदविभागः—धरणिम्, एव, पुरा, धृतवान्, असि, क्षितिधरणोद्धरणे, तव, कः, श्रमः, इति, नुतः, त्रिदशैः, कमलापते, गुरुपुरालय, पालय, माम्, गदात्॥

अन्वयः—"पुरा (त्वं) धरणिम् एव धृतवान् असि। क्षितिधरणोद्धरणे तव कः श्रमः ?" इति त्रिदशैः नुतः (त्वं) कमलापते, गुरुपुरालय, मां रोगात् पालय।

अन्वयार्थः

"पुरा (त्वं) धरणिम् एव धृतवान् असि। = "पहले (आपने) पृथ्वी को ही उठा लिया था।

क्षितिधरणोद्धरणे तव कः श्रमः ?" = पर्वत को उठाने में आपका श्रम ही क्या लगा होगा ?"

इति त्रिदशैः नुतः (त्वं) = इस प्रकार देवों द्वारा वन्दित (आप)

कमलापते, गुरुपुरालय, = हे कमलापते ! हे गुरुवायुपुराधीश !

मां रोगात् पालय = मुझे रोग से बचाओ।

भावार्थ—"पहले (आपने) पृथ्वी को ही उठा लिया था। पर्वत को उठाने में आपका श्रम ही क्या लगा होगा ? इस प्रकार देवों द्वारा वन्दित (आप) हे कमलापते ! हे गुरुवायुपुराधीश ! मुझे रोग से बचाओ।

Words-Explanation :

त्रिदशः = Devas (As in इति त्रिदशैः नुतः)

क्षितिधरः = Mountain (As in क्षितिधरोद्धरणे)

॥ इति त्रिषष्टितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-६४

गोविन्दाभिषेकवर्णनम्

[उपजातिछन्दः]

॥ १ ॥

आलोक्य शैलोद्धरणादिरूपं प्रभावमुच्चैस्तव गोपलोकाः ।
विश्वेश्वरं त्वामभिमत्य विश्वे नन्दं भवज्जातकन्वपृच्छन् ॥

पदविभागः—आलोक्य, शैलोद्धरणादिरूपम्, प्रभावम्, उच्चैः, तव, गोपलोकाः, विश्वेश्वरम्, त्वाम्, अभिमत्य, विश्वे, नन्दम्, भवज्जातकम्, अन्वपृच्छन् ॥

अन्वयः—विश्वे गोपलोकाः तव शैलोद्धरणादिरूपम् उच्चैः प्रभावम् आलोक्य त्वां विश्वेश्वरम् अभिमत्य, नन्दं भवज्जातकं अन्वपृच्छन् ॥

अन्वयार्थः

विश्वे गोपलोकाः तव = समस्त गोप समूह ने आपके द्वारा

शैलोद्धरणादिरूपम् उच्चैः प्रभावम् आलोक्य = पर्वत को उठाना आदि आपके उन्नत प्रभाव के स्वरूप को देखकर

त्वां विश्वेश्वरम् अभिमत्य = आपको समस्त लोकों के ईश्वर मानकर

नन्दं भवज्जातकम् अन्वपृच्छन् = नन्द से आपकी कुण्डली के विषय में पूछा

भावार्थ—समस्त गोपसमूह ने आपके द्वारा पर्वत को उठाना आदि आपके उन्नत प्रभाव के स्वरूप को देखकर, आपको समस्त लोकों के ईश्वर मानकर नन्द से आपकी कुण्डली के विषय में पूछा ।

Words-Explanation :

मत्यम् = Exercise of knowledge (As in विश्वेश्वरम् अभिमत्य)

प्रभावः = Lustre, Dignity, Glory, Majesty, Brilliance etc. (As in उच्चैः प्रभावम् आलोक्य)

॥ २ ॥

गर्गोदितो निर्गदितो निजाय वर्गाय तातेन तव प्रभावः ।
पूर्वाधिकस्त्वय्यनुराग एषामैधिष्ट तावद्बहुमानभारः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—गर्गोदितः, निर्गदितः, निजाय, वर्गाय, तातेन, तव, प्रभावः, पूर्वाधिकः त्वयि, अनुरागः, एषाम्, ऐधिष्ट, तावत्, बहुमानभारः ॥

अन्वयः—तातेन निजाय वर्गाय गर्गोदितः तव प्रभावः निर्गदितः । तावत् एषां त्वयि अनुरागः बहुमानभारः पूर्वाधिकम् ऐधिष्ट ।

अन्वयार्थः

तातेन निजाय वर्गाय = पिता (नन्दगोप) ने अपने उन लोगों को

गर्गोदितः तव प्रभावः = गर्गमुनि द्वारा कहे गये आपके प्रभावों को

निर्गदितः । = बताया ।

तावत् एषां त्वयि अनुरागः = उस समय उन लोगों का आपके प्रति प्रेम

बहुमानभारः पूर्वाधिकम् ऐधिष्ट । = अत्यधिक श्रद्धा से युक्त होकर पूर्व से अधिक हो गया ।

भावार्थ—पिता (नन्दगोप) ने अपने उन लोगों को गर्गमुनि द्वारा कहे गये आपके प्रभावों को बताया । उस समय उन लोगों का आपके प्रति प्रेम अत्यधिक श्रद्धा से युक्त होकर पूर्व से अधिक हो गया ।

Words-Explanation :

बहुमानः = Great respect, High esteem (As in एषां त्वयि अनुरागः बहुमानभारः—)

भारः = Excess, Load etc. (As in बहुमानभारः)

॥ ३ ॥

ततोऽवमानोदिततत्वबोधः सुराधिराजः सह दिव्यगव्या ।
उपेत्य तुष्टाव स नष्टगर्वः स्पृष्ट्वा पदाब्जं मणिमौलिना ते ॥

पदविभागः—ततः, अवमानोदिततत्वबोधः, सुराधिराजः, सह, दिव्यगव्या, उपेत्य, तुष्टाव, सः, नष्टगर्वः, स्पृष्ट्वा, पदाब्जम्, मणिमौलिना, ते ॥

अन्वयः—ततः अवमानोदिततत्वबोधः सः सुराधिराजः नष्टगर्वः दिव्यगव्या सह उपेत्य, मणिमौलिना ते पदाब्जम् स्पृष्ट्वा तुष्टाव ।

अन्वयार्थः

ततः अवमानोदिततत्वबोधः = तदनन्तर अपमानित होने के बाद सत्य को जानकर

सः, सुराधिराजः नष्टगर्वः = उस देवेन्द्र ने गर्व को त्यागकर

दिव्यगव्या सह उपेत्य = दिव्य-पशु (कामधेनु) के साथ आकर

मणिमौलिना ते पदाब्जम् = रत्न-किरीट से आपके पादारविन्द का

स्पृष्ट्वा तुष्टाव । = स्पर्श करके स्तुति की ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—तदनन्तर अपमानित होने के बाद सत्य को जानकर उस देवेन्द्र ने गर्व को त्याग कर दिव्य-पशु (कामधेनु) के साथ आकर रत्न-किरीट (मुकुट) से आपके चरण कमलों का स्पर्श करके स्तुति की।

Words-Explanation :

तत्वम् = True state or condition, True or essential nature, The real nature of the human soul or the material world as being identified with the Supreme Spirit pervading the Universe. (As in अवमानोदिततत्वबोधः)

मौलि = The head, The crown of the head, (As in मणिमौलिना ते पदाब्जम्)

दिव्यगविः = Kamdhenu (As in दिव्यगव्या सह)

॥ ४ ॥

स्नेहस्नुतैस्त्वां सुरभिः पयोभिर्गोविन्दनामाङ्कितमभ्यषिञ्चत्।
ऐरावतोपाहृतदिव्यगङ्गापाथोभिरिन्द्रोऽपि च जातहर्षः॥

पदविभागः—स्नेहस्नुतैः, त्वाम्, सुरभिः, पयोभिः, गोविन्दनामाङ्कितम्, अभ्यषिञ्चत्, ऐरावतोपाहृतदिव्यगङ्गापाथोभिः, इन्द्रः, अपि, च, जातहर्षः॥

अन्वयः—सुरभिः स्नेहस्नुतैः पयोभिः त्वां गोविन्दनामाङ्कितम् अभ्यषिञ्चत्। इन्द्रः अपि च जातहर्षः ऐरावतोपाहृतदिव्यगङ्गापाथोभिः (अभ्यषिञ्चत्)।

अन्वयार्थः

सुरभिः स्नेहस्नुतैः पयोभिः = कामधेनु के स्नेह पूर्वक दूध के द्वारा

त्वां गोविन्दनामाङ्कितम् अभ्यषिञ्चत्। = आपको "गोविन्द" नाम से अलङ्कृत करते हुए अभिषेक किया और

इन्द्रः अपि च जातहर्षः = इन्द्र ने भी सन्तुष्ट होकर

ऐरावतोपाहृतदिव्यगङ्गापाथोभिः (अभ्यषिञ्चत्) = ऐरावत द्वारा लाये गये आकाशगङ्गा के जल से (अभिषेक किया)।

भावार्थ—कामधेनु ने स्नेह पूर्वक (प्रेम से) दिये दूध के द्वारा आपको "गोविन्द" नाम से अलङ्कृत करते हुए अभिषेक किया और इन्द्र ने भी सन्तुष्ट होकर ऐरावत द्वारा लाये गये दिव्यगङ्गाजल से (अभिषेक किया)।

Words-Explanation :

पयस् = Milk, Water, (Here Milk) (As in स्नेहस्नुतैः पयोभिः)

स्नु (स्नीति, स्नुत) = To drip, Trickle, Fall in drops, Ooze, Pour forth, flow out etc. (As in - do -)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पाथम् = Water (As in दिव्यगङ्गापाथोभिः)

अङ्कनम् = Act of marking, Stamping, A mark, A Token etc. (As in गोविन्दनामाङ्कितम्)

॥ ५ ॥

जगत्रयेशे त्वयि गोकुलेशे तथाभिषिक्ते सति गोपवाटः ।
नाकेऽपि वैकुण्ठपदेऽप्यलभ्यां श्रियं प्रपेदे भवतः प्रभावात् ॥

पदविभागः—जगत्रयेशे, त्वयि, गोकुलेशे, तथा, अभिषिक्ते, सति, गोपवाटः, नाके, अपि, वैकुण्ठपदे, अपि, अलभ्याम्, श्रियं, प्रपेदे, भवतः, प्रभावात् ॥

अन्वयः—जगत्रयेशे त्वयि गोकुलेशे तथा अभिषिक्ते सति, गोपवाटः भवतः प्रभावात् नाके अपि, वैकुण्ठपदे अपि अलभ्यां श्रियं प्रपेदे ॥

अन्वयार्थः

जगत्रयेशे त्वयि = हे तीनो लोकों के ईश ! आपके

गोकुलेशे तथा अभिषिक्ते सति = गोकुल के ईश के रूप में इस प्रकार अभिषिक्त होने पर

गोपवाटः भवतः प्रभावात् = व्रज भूमि ने आपके प्रभाव से

नाके अपि, वैकुण्ठपदे अपि = स्वर्ग में भी, वैकुण्ठपद में भी

अलभ्यां श्रियं प्रपेदे । = अप्राप्त श्रीत्व को प्राप्त किया ।

भावार्थ—हे तीनों लोकों के ईश ! आपके गोकुल के ईश के रूप में इस प्रकार अभिषिक्त होने पर व्रज भूमि ने आपके प्रभाव से स्वर्ग में भी, वैकुण्ठपद में भी अप्राप्त श्रीत्व को प्राप्त किया ।

Words-Explanation :

नाकः = Heaven. (As in नाके अपि, वैकुण्ठपदे अपि)

वाटः = An enclosure, A piece of enclosed ground. (As in गोपवाटः भवतः प्रभावात्)

प्रभावः = Lustre, Splendour. (As in भवतः प्रभावात्)

॥ ६ ॥

कदाचिदन्तर्यमुनं प्रभाते स्नायन् पिता वारुणपूरुषेण ।
नीत, स्तमानेतुमगाः पुरीं त्वं तां वारुणीं कारणमर्त्यरूपः ॥

पदविभागः—कदाचित्, अन्तर्यमुनम्, प्रभाते, स्नायन्, पिता, वारुणपूरुषेण, नीतः, तम्, आनेतुम्, अगाः, पुरीम्, त्वम्, ताम्, वारुणीम्, कारणमर्त्यरूपः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—कदाचित् प्रभाते अन्तर्यमुनं स्नायन् (ते) पिता वारुणपूरुषेण नीतः। कारणमर्त्यरूपः त्वं तम् आनेतुं तां वारुणीं पुरीम् अगाः।

अन्वयार्थः

कदाचित् प्रभाते अन्तर्यमुनं स्नायन् = किसी समय प्रातःकाल में यमुना में स्नान करते हुए

(ते) पिता वारुणपूरुषेण नीतः। = (आपके) पिता वरुण के दूत द्वारा ले जाये गये

कारणमर्त्यरूपः त्वम् = कारणार्थ मनुष्य-रूप धृत आप

तम् आनेतुं तां वारुणीं पुरीम् अगाः। = उन (पिता) को लाने के लिए वरुण की पुरी को गये

भावार्थ—किसी समय प्रातःकाल में यमुना में स्नान करते हुए (आपके) पिताजी को वरुण का दूत ले गया। कारणार्थ मनुष्य का रूप धारण किये हुए आप उन (पिता) को लाने के लिए वरुण की पुरी को गये।

Words-Explanation :

पुरुषः/पूरुषः = A Male, Mankind, Servant, Agent, Attendant etc. (As in वारुणपूरुषेण नीतः)

॥ ७ ॥

ससम्भ्रमं तेन जलाधिपेन प्रपूजितस्त्वं प्रतिगृह्य तातम्।
उपागतस्तत्क्षणमात्मगेहं पिताऽवदत्तच्चरितं निजेभ्यः॥

पदविभागः—ससम्भ्रमम्, तेन, जलाधिपेन, प्रपूजितः, त्वम्, प्रतिगृह्य, तातम्, उपागतः, तत्क्षणम्, आत्मगेहम्, पिता, अवदत्, तच्चरितम्, निजेभ्यः॥

अन्वयः—त्वं ससम्भ्रमं तेन जलाधिपेन प्रपूजितः, तातं प्रतिगृह्य तत्क्षणम् आत्मगेहम् उपागतः। पिता तच्चरितं निजेभ्यः अवदत्।

अन्वयार्थः

त्वं ससम्भ्रमं तेन जलाधिपेन प्रपूजितः = आप उस भयभीत वरुण के द्वारा पूजे गये।

तातं प्रतिगृह्य = पिताजी को स्वीकार करके

तत्क्षणम् आत्मगेहम् उपागतः। = उसी समय अपने घर लौट आये।

पिता तच्चरितं निजेभ्यः अवदत् = पिताजी ने उस विषय में अपने लोगों से कहा।

भावार्थ—आप उस भयभीत वरुण के द्वारा पूजे गये, पिताजी को लेकर उसी समय अपने घर को लौट आये। पिताजी ने उसके बारे में अपने लोगों से कहा।

Words-Explanation :

सम्भ्रमः = Confusion, Agitation, Fear, Reverance, Respect. etc. (As in ससम्भ्रमं तेन जलाधिपेन)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निज = Own, one's own, Relating to oneself etc. (As in निजेभ्यः अवदत्)

॥ ८ ॥

हरिं विनिश्चित्य भवन्तमेतान् भवत्पदालोकनबद्धतृष्णान् ।
निरीक्ष्य विष्णो, परमं पदं तद्दुरापमन्यैस्त्वमदीदृशस्तान् ॥

पदविभागः—हरिम्, विनिश्चित्य, भवन्तम्, एतान्, भवत्पदालोकनबद्धतृष्णान्, निरीक्ष्य, विष्णो, परमम्, पदम्, तत्, दुरापम्, अन्यैः, त्वम्, अदीदृशः, तान् ॥

अन्वयः—विष्णो, भवन्तं हरिं विनिश्चित्य, भवत्पदालोकनबद्धतृष्णान् निरीक्ष्य त्वम् एतान् अन्यैः दुरापं परमं तत् पदं तान् अदीदृशः ॥

अन्वयार्थः

विष्णो = हे विष्णो !

भवन्तं हरिं विनिश्चित्य = आपको विष्णु निश्चित मानकर

भवत्पदालोकनबद्धतृष्णान् निरीक्ष्य त्वम् एतान् = (उन गोपों द्वारा) आपके स्थान को देखने की इच्छा को देखकर, आपने इन (गोपों) को

अन्यैः दुरापं परमं तत् पदं तान् अदीदृशः = अन्य लोगों को अप्राप्त श्रेष्ठ आपके उस धाम को उन लोगों को दिखाया ।

भावार्थ—हे विष्णो ! आपको विष्णु निश्चित मानकर (उन गोपों द्वारा) आपके धाम को देखने की इच्छा को देखकर, आपने इन (गोपों) को अन्य जनों को अप्राप्त आपके श्रेष्ठ उस धाम को उन लोगों को दिखाया ।

Words-Explanation :

तृष्णा = Thirst, Strong desire (As in भवत्पदालोकनबद्धतृष्णान्)

बद्ध = Cherished, Entertained. (As in बद्धतृष्णान्)

आपन्न = Gained, Obtained, (दुरापन्न - Not Gained, Not obtained) (As in दुरापं परमं तत् पदम्)

॥ ९ ॥

स्फुरत्परानन्दरसप्रवाहप्रपूर्णकैवल्यमहापयोधौ ।
चिरं निमग्नाः खलु गोपसङ्घास्त्वयैव भूमन्, पुनरुद्धृतास्ते ॥

पदविभागः—स्फुरत्परानन्दरसप्रवाहप्रपूर्णकैवल्यमहापयोधौ, चिरम्, निमग्नाः, खलु, गोपसङ्घाः, त्वया, एव, भूमन्, पुनः, उद्धृताः, ते ।

अन्वयः—गोपसङ्घाः स्फुरत्परानन्दरसप्रवाहप्रपूर्णकैवल्यमहापयोधौ चिरं निमग्नाः खलु । भूमन् पुनः ते त्वया एव उद्धृताः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

गोपसङ्घाः स्फुरत्परानन्दरसप्रवाहप्रपूर्णकैवल्यमहापयोधौ = गोपों के समूह प्रकाशमान परमानन्द के रस प्रवाह वाले क्षीर सागर में

चिरं निमग्नाः खलु। = बहुत समय तक मग्न रहे।

भूमन्, पुनः ते त्वया एव उद्धृताः। = हे भूमन ! बाद में फिर उन लोगों को आपके द्वारा ही उस से निकाला गया।

भावार्थ—गोपों के समूह प्रकाशमान परमानन्द के रस प्रवाह वाले मोक्ष रूपी क्षीर-सागर में बहुत समय तक मग्न रहे। हे भूमन ! बाद में उन लोगों को आपके द्वारा ही उससे निकाला गया।

Words-Explanation :

कैवल्यम् = Moksha, Perfect isolation (As in कैवल्यमहापयोधौ)

पयस् = Milk. (As in पयोधौ)

पयोधौ = In the Milky Ocean

उद्धृतिः = Drawing out, Pulling out, Rescueing, Purifying from sin, etc. (As in त्वया एव उद्धृताः)

[मालिनीछन्दः]

॥ १० ॥

करबदरवदेवं देव कुत्रावतारे परपदमनवाप्यं दर्शितं भक्तिभाजाम्।
तदिह पशुपरूपी त्वं हि साक्षात्परात्मा पवनपुरनिवासिन्, पाहि मामामयेभ्यः ॥

पदविभागः—करबदरवत्, एवम्, देव, कुत्र, अवतारे, परपदम्, अनवाप्यम्, दर्शितम्, भक्तिभाजाम्, तत्, इह, पशुपरूपी, त्वम्, हि, साक्षात्, परात्मा, पवनपुरनिवासिन्, पाहि, माम्, आमयेभ्यः ॥

अन्वयः—देव, कुत्र अवतारे अनवाप्यं परपदम् एवं करबदरवत् भक्तिभाजां दर्शितम् ? तत् इह पशुपरूपी त्वं हि साक्षात् परात्मा। पवनपुरनिवासिन्, त्वं माम् आमयेभ्यः पाहि।

अन्वयार्थः

देव, कुत्र अवतारे = हे देव ! कौन से अवतार में

अनवाप्यं परपदम् एवं करबदरवत् भक्तिभाजां दर्शितम् ? = अप्राप्त परमपद को इस प्रकार, हाथ में रखे बेर के फल के समान भक्तजनों को दिखाया !

तत् इह पशुपरूपी त्वम् हि साक्षात् परात्मा। = वह इधर व्रज में गोपाल के रूप में आप ही साक्षात् परब्रह्म हैं।

पवनपुरनिवासिन्, त्वं माम् आमयेभ्यः पाहि। = हे पवनपुराधीश ! आप मुझे रोगों से बचाओ।

Funding by IKS&MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—हे देव ! कौन से अवतार में अप्राप्त परमपद को इस प्रकार, हाथ में रखे बेर के फल के समान भक्तजनों को दिखाया ? वह इधर व्रज में गोपाल के रूप में आप निश्चित रूप से साक्षात् परमात्मा हैं । हे पवनपुराधीश ! आप मुझे रोगों से बचाओ ।

Words-Explanation :

भाज = (usually added at the end of a compound word) - Having, Enjoying, Possessing etc. (As in भक्तिभाजाम्)

वदरः = The Jujube Tree (बेर)

॥ इति चतुःषष्टितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-६५

गोपीसमागमनवर्णनम्

[वसन्ततिलकछन्दः]

॥ १ ॥

गोपीजनाय कथितं नियमावसाने मारोत्सवं त्वमथ साधयितुं प्रवृत्तः ।
सान्द्रेण चान्द्रमहसा शिशिरीकृताशे प्रापूरयो मुरलिकां यमुनावनान्ते ॥

पदविभागः—गोपीजनाय, कथितम्, नियमावसाने, मारोत्सवम्, त्वम्, अथ, साधयितुम्, प्रवृत्तः, सान्द्रेण, चान्द्रमहसा, शिशिरीकृताशे, प्रापूरयः, मुरलिकाम्, यमुनावनान्ते ॥

अन्वयः—त्वम् अथ नियमावसाने गोपीजनाय कथितं मारोत्सवं साधयितुं प्रवृत्तः (सन्) सान्द्रेण चान्द्रमहसा शिशिरीकृताशे यमुनावनान्ते मुरलिकां प्रापूरयः ॥

अन्वयार्थः

त्वम् अथ नियमावसाने गोपीजनाय कथितम् = आप ने उसके बाद व्रत के अन्त में गोपीजनों को कहे गये

मारोत्सवं साधयितुं प्रवृत्तः (सन्) = मारोत्सव (रासक्रीडा) को पूर्ण करने के लिए प्रवृत्त होकर

सान्द्रेण चान्द्रमहसा शिशिरीकृताशे यमुनावनान्ते = चन्द्रमा की उज्ज्वल चाँदनी की शीतलता से रोमाञ्चित यमुना के समीप वन में

मुरलिकां प्रापूरयः । = बाँसुरी बजायी ।

भावार्थ—आप ने उसके बाद व्रत के अन्त में गोपीजनों को कहे गये मारोत्सव (रासक्रीडा) को पूर्ण करने के लिए प्रवृत्त होकर चन्द्रमा की उज्ज्वल चाँदनी की शीतलता से रोमाञ्चित यमुना के समीप वन में बाँसुरी बजायी ।

Words-Explanation :

सान्द्र = Strong, Robust, Pleasing etc. (As in सान्द्रेण चान्द्रमहसा)

महस् = Light, Lustre. (As in सान्द्रेण चान्द्रमहसा)

शिशिर = Cool, Chill, Cold etc. (As in शिशिरीकृताशे)

आशिस् = A Blessing, Benediction. (As in शिशिरीकृताशे)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

सम्मूर्च्छनाभिरुदितस्वरमण्डलाभिः सम्मूर्च्छयन्तमखिलं भुवनान्तरालम् ।
त्वद्वेणुनादमुपकर्ण्य विभो, तरुण्यस्तत्तादृशं कमपि चित्तविमोहमापुः ॥

पदविभागः—सम्मूर्च्छनाभिः, उदितस्वरमण्डलाभिः, सम्मूर्च्छयन्तम्, अखिलम्, भुवनान्तरालम्, त्वद्वेणुनादम्, उपकर्ण्य, विभो, तरुण्यः, तत्तादृशम्, कमपि, चित्तविमोहम्, आपुः ॥

अन्वयः—उदितस्वरमंडलाभिः सम्मूर्च्छनाभिः (च) अखिलं भुवनान्तरालं सम्मूर्च्छयन्तं, विभो, त्वद्वेणुनादम् उपकर्ण्य तरुण्यः तत्तादृशं कमपि चित्तविमोहम् आपुः ॥

अन्वयार्थः

उदितस्वरमंडलाभिः = उभरते स्वर-समूहों द्वारा और

सम्मूर्च्छनाभिः (च) = मूर्च्छनाओं (रोगों की कलाओं) से

अखिलं भुवनान्तरालं सम्मूर्च्छयन्तम् = समस्त लोकों को वश में करती हुई

त्वद्वेणुनादम् उपकर्ण्य = आपकी बाँसुरी को सुनकर

विभो, तरुण्यः तत्तादृशं कमपि = हे विभो ! गोपिकायें, अवर्णनीय एक प्रकार के

चित्तविमोहम् आपुः । = वशीकरण को प्राप्त हुईं ।

भावार्थ—उभरते स्वर-समूहों द्वारा तथा मूर्च्छनाओं (रोगों की कलाओं) से समस्त लोकों को वश में करती हुई आपकी बाँसुरी (के नाद) को सुनकर हे विभो ! गोपिकायें अवर्णनीय एक प्रकार के चित्त मोह की स्थिति को प्राप्त हुईं ।

Words-Explanation :

विमोहनम् = Seducing, Alluring, Tempting, Fascinating etc. (As in चित्तविमोहम् आपुः)

मूर्च्छनम् = (In Music this is rising of sounds in a pleasing manner with pleasing combination of swaras. A raga's real life is depicted through Moorchanas which are also called in Hindi as "Pakad.") (As in सम्मूर्च्छनाभि)

॥ ३ ॥

ता गेहकृत्यनिरतास्तनयप्रसक्ताः कान्तोपसेवनपराश्च सरोरुहाक्ष्यः ।
सर्वं विसृज्य मुरलीरवमोहितास्ते कान्तारदेशमयि कान्ततनो, समेताः ॥

पदविभागः—ताः, गेहकृत्यनिरताः, तनयप्रसक्ताः, कान्तोपसेवनपराः, च, सरोरुहाक्ष्यः, सर्वम्, विसृज्य, मुरलीरवमोहिताः, ते, कान्तारदेशम्, अयि, कान्ततनो, समेताः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—ताः सरोरुहाक्ष्यः, गेहकृत्यनिरताः, तनयप्रसक्ताः, कान्तोपसेवनपराः च, अयि, कान्ततनो, ते मुरलीरवमोहिताः (सत्यः) सर्वं विसृज्य कान्तारदेशं समेताः ।

अन्वयार्थः

ताः सरोरुहाक्ष्यः = वे कमल के समान आँखों वाली

गेहकृत्यनिरताः = घर के कामों में व्यस्त

तनयप्रसक्ताः = बच्चों के लाड़-प्यार में तल्लीन और

कान्तोपसेवनपराः च, = पति-शुश्रूषा में तत्पर (स्त्रियाँ)

अयि, कान्ततनो = हे मोहन रूप !

ते मुरलीरवमोहिताः (सत्यः) = आपकी बाँसुरी (नाद) से मोहित होकर

सर्वं विसृज्य = सब को छोड़कर

कान्तारदेशं समेताः । = वन प्रदेश को आयीं ।

भावार्थ—वे कमल के समान आँखों वाली घर के कामों में व्यस्त, बच्चों के लाड़-प्यार में तल्लीन और पति-शुश्रूषा में तत्पर (स्त्रियाँ) हे मोहन रूप ! आपकी बाँसुरी (नाद) से मोहित होकर, सब को छोड़कर वन-प्रदेश को आयीं ।

Words-Explanation :

सेवनम्- = The act of serving, Service, Attending upon, Worship. (As in कान्तोपसेवनपराः)

कान्तारः = A Large dreary forest. (As in कान्तारदेशं समेताः)

प्रसक्त = Attached to, Fond of etc. (As in स्वतनयप्रसक्ताः)

॥ ४ ॥

काश्चिन्निजाङ्गपरिभूषणमादधाना वेणुप्रणादमुपकर्ण्य कृतार्धभूषाः ।
त्वामागता ननु तथैव विभूषिताभ्यस्ता एव संरुरुचिरे तव लोचनाय ॥

पदविभागः—काश्चित्, निजाङ्गपरिभूषणम्, आदधाना, वेणुप्रणादम्, उपकर्ण्य, कृतार्धभूषाः, त्वाम्, आगताः, ननु, तथा, एव, विभूषिताभ्यः, ताः, एव, संरुरुचिरे, तव, लोचनाय ॥

अन्वयः—वेणुप्रणादम् उपकर्ण्य काश्चित् निजाङ्गपरिभूषणम् आदधानाः, कृतार्धभूषाः (सत्यः) तथा एव ननु त्वाम् आगताः । तव लोचनाय विभूषिताभ्यः, ताः एव संरुरुचिरे ।

अन्वयार्थः

वेणुप्रणादम् उपकर्ण्य = बाँसुरी की उन्नत ध्वनि को सुनकर

काश्चित् निजाङ्गपरिभूषणम् आदधानाः = कोई (गोपिका) अपने आभूषणों को लेकर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतार्धभूषाः (सत्यः) = अधूरे गहनें पहनकर

तथा एव ननु त्वाम् आगताः । = वैसे ही आपके समीप आयी ।

तव लोचनाय विभूषिताभ्यः = आपके ऑखों को पूर्ण, रूप से गहने पहनकर आयी गोपिकाओं से,

ताः एव संरुरुचिरे । = वे (गोपिकाएं) ही अधिक सुन्दर लगीं ।

भावार्थ—बाँसुरी की उन्नत (ऊंची) ध्वनि को सुनकर, कोई (गोपिका) अपने आभूषणों (गहनें) को लेकर अधूरे गहनें पहनकर वैसे ही आपके समीप आयीं । आपके ऑखों को पूर्ण रूप से गहने पहनकर आई गोपिकाओं से वे (गोपिकाएं) ही अधिक सुन्दर लगीं ।

Words-Explanation :

प्रणादः = A loud noise, Roaring, A roar etc. (As in वेणुप्रणादम् उपकर्ण्य)

रुचिर = Bright, Exciting, Rediant etc. (As in ताः एव संरुरुचिरे)

भूषणम् = Ornament. (As in निजाङ्गपरिभूषणम्)

॥ ५ ॥

हारं नितम्बभुवि काचन धारयन्ती काञ्चीं च कण्ठभुवि देव समागता त्वाम् ।
हारित्वमात्मजघनस्य मुकुन्द तुभ्यं व्यक्तं बभाष इव मुग्धमुखी विशेषात् ॥

पदविभागः—हारम्, नितम्बभुवि, काचन, धारयन्ती, काञ्चीम्, च, कण्ठभुवि, देव, समागता, त्वाम्, हारित्वम्, आत्मजघनस्य, मुकुन्द, तुभ्यम्, व्यक्तम्, बभाष, इव, मुग्धमुखी, विशेषात् ॥

अन्वयः—काचन हारं नितम्बभुवि काञ्चीं कण्ठभुवि च धारयन्ती (सती) देव, त्वां समागता । मुग्धमुखी आत्मजघनस्य विशेषात् हारित्वं मुकुन्द, तुभ्यं व्यक्तं बभाषे इव ।

अन्वयार्थः

काचन हारं नितम्बभुवि = कोई (गोपिका) हार को नितंब भाग में

काञ्चीं कण्ठभुवि च = तथा कमरबन्ध को गले में

धारयन्ती (सती) देव, त्वां समागता । = धारण करके हे देव ! आपके समीप आयी ।

मुग्धमुखी आत्मजघनस्य विशेषात् हारित्वं, मुकुन्द, तुभ्यं व्यक्तं बभाषे इव । = वह सुन्दर मुखी गोपिका अपने जघन के विशेष आकर्षण के विषय में हे मुकुन्द जैसे आपको बताने लगी ।

भावार्थ—कोई (गोपिका) हार को नितंब भाग में तथा कमरबन्ध को गले में धारण करके हे देव ! आपके समीप आयी । वह सुन्दर मुखी युवती अपने जघन के विशेष आकर्षण के विषय में हे मुकुन्द जैसे आपको बताने लगी ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

जघनम् = The hip and the loins, Buttocks. (As in आत्मजघनस्य विशेषात् हारित्वम्)

हारित = Attracted, हारित्वम् = Attraction.

नितम्बः = The Buttocks. (As in हारं नितंब भुवि)

काञ्ची, काञ्चि = A woman's girdle or zone furnished with small tinkling bells or other ornaments. (As in काञ्चीं कण्ठभुवि)

मुग्धा = A young girl attractive by her youth.

॥ ६ ॥

काचित् कुचे पुनरसज्जितकञ्चुलीका व्यामोहतः परवधूभिरलक्ष्यमाणा ।
त्वामाययौ निरुपमप्रणयातिभारराज्याभिषेकविधये कलशीधरेव ॥

पदविभागः—काचित्, कुचे, पुनः, असज्जितकञ्चुलीका, व्यामोहतः, परवधूभिः, अलक्ष्यमाणा, निरुपमप्रणयातिभार-राज्याभिषेकविधये, कलशीधरा, इव ॥

अन्वयः—काचित् पुनः व्यामोहतः कुचे असज्जितकञ्चुलिका (व्यामोहतः) परवधूभिः अलक्ष्यमाणा, निरुपमप्रणया-तिभारराज्याभिषेकविधये कलशीधरा इव त्वाम् आययौ ॥

अन्वयार्थः

काचित् पुनः व्यामोहतः = कोई (गोपिका) फिर मोहित होकर

कुचे असज्जितकञ्चुलीका = स्तनों में आवरण न पहनकर

(व्यामोहतः) परवधूभिः अलक्ष्यमाणा = (मोह से) अन्य गोपिकायें उसको न देखती हुई

निरुपमप्रणयातिभारराज्याभिषेकविधये = उपमा-रहित अत्यधिक प्रेम के राज्य में राज्याभिषेक करने के लिए

कलशीधरा इव त्वाम् आययौ । = कलशों को धारण किये हुए के समान आपके समीप आयी ।

भावार्थ—कोई (गोपिका) फिर मोहित होकर, स्तनों पर आवरण न करके (मोह से) अन्य गोपिकायें उसको न देखती हुई उपमा-रहित अत्यधिक प्रेम के राज्य में राज्याभिषेक करने के लिए जल से भरे दो कलशों को धारण किये हुए के समान आपके समीप आयी ।

Words-Explanation :

कलशः/ कलसः/ कलशम्/ कलसम् = A Pitcher, Water pot. (As in कलशीधरा इव)

कंचुलिका/ कंचुली = A Bodice (As in असज्जितकञ्चुलिका)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विध् (विधति) = To honour, To worship, To administer etc. (As in राज्याभिषेकविधये)

व्यामोहः = Infatuation, Bewilderment, Perplexity, Embarrassment etc. (As in पुनः व्यामोहतः)

॥ ७ ॥

काश्चिद् गृहात् किल निरेतुमपारयन्त्यस्त्वामेव देव, हृदये सुदृढं विभाव्य ।
देहं विधूय परचित्सुखरूपमेकं त्वामाविशन्, परमिमा ननु धन्यधन्याः ॥

पदविभागः—काश्चित्, गृहात्, किल, निरेतुम्, अपारयन्त्यः, त्वाम्, एव, देव, हृदये, सुदृढम्, विभाव्य, देहम्, विधूय, परचित्सुखरूपम्, एकम्, त्वाम्, आविशन्, परम्, इमाः, ननु, धन्यधन्याः ॥

अन्वयः—काश्चित्, गृहात् निरेतुम् अपारयन्त्यः किल, देव, त्वाम् एव हृदये सुदृढं विभाव्य देहं विधूय परचित्सुखरूपम् एकं त्वाम् आविशन् । ननु इमाः परं धन्यधन्याः ॥

अन्वयार्थः

काश्चित्, गृहात् निरेतुम् अपारयन्त्यः किल = कुछ (गोपिकायें) घर से बाहर निकलने में असमर्थ होने पर

देव, त्वाम् एव हृदये सुदृढं विभाव्य = हे देव ! आपको ही हृदय में दृढ़ता से धारण करके

देहं विधूय = शरीर का त्याग करके

परचित्सुखरूपम् एकं त्वाम् आविशन् । = परमात्मस्वरूपी एक आप में ही लीन हो गयीं ।

ननु इमाः परं धन्यधन्याः । = निश्चित रूप से ये (गोपियाँ) अत्यधिक धन्य हैं ।

भावार्थ—कुछ (गोपियां) घर से बाहर निकलने में असमर्थ होने पर हे देव ! आपको ही हृदय में दृढ़ता से धारण करके, शरीर का त्याग करके परमात्मस्वरूपी एक आप में ही लीन हो गयी । निश्चित रूप से ये (गोपियाँ) बहुत धन्य हैं ।

Words-Explanation :

विभावनम्/ विभावना = Clear perception or Ascertainment, Discrimination, Judgement, Conception, etc. (As in सुदृढं विभाव्य)

विधूत = Abandoned, Separated. (As in देहं विधूय)

॥ ८ ॥

जारात्मना न परमात्मतया स्मरन्त्यो नार्यो गताः परमहंसगतिं क्षणेन ।
तं त्वां प्रकाशपरमात्मतनुं कथञ्चिच्चित्ते वहन्नमृतमश्रममश्नुवीय ॥

पदविभागः—जारात्मना, न, परमात्मतया, स्मरन्त्यः, नार्यः, गताः, परमहंसगतिम्, क्षणेन, तम्, त्वाम्, प्रकाशपरमात्मतनुम्, कथञ्चित्, चित्ते, वहन्, अमृतम्, अश्रमम्, अश्नुवीय ॥

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—नार्यः परमात्मतया न जारात्मना स्मरन्त्यः क्षणेन परमहंसगतिं गताः । प्रकाशपरमात्मतनुं तं त्वाम् कथञ्चित चित्ते वहन् (अहं) अश्रमम् अमृतम् अश्नुवीय ॥

अन्वयार्थः

नार्यः परमात्मतया न = नारियां परमात्मा के रूप में नहीं,

जारात्मना स्मरन्त्यः = जार पुरुष के रूप में स्मरण करती हुई

क्षणेन परमहंसगतिं गताः । = क्षण भर में परमहंस गति को पहुँचीं ।

प्रकाशपरमात्मतनुं तं त्वाम् कथञ्चित् चित्ते वहन् (अहम्) = प्रकाश परमानन्दरूपी उस प्रकार के आपको किसी न किसी प्रकार से मन में धारण करके (मैं)

अश्रमम् अमृतम् अश्नुवीय । = प्रयास के बिना अमृत का सेवन करूँ ।

भावार्थ—नारियां परमात्मा के रूप में नहीं, जार पुरुष के रूप में स्मरण करती हुई क्षण भर में परमहंस गति को पहुँचीं । प्रकाश परमानन्दरूपी उस प्रकार के आपको किसी न किसी प्रकार से मन में धारण करके (मैं) प्रयास के बिना अमृत का सेवन करूँ ॥

Words-Explanation :

जारः = A Paramour, Gallant lover (As in जारात्मना स्मरन्त्यः)

तनुस् = The Body. (As in प्रकाशपरमात्मतनुम्)

तनू = The Body. (तनु as an adjective is "Thin", "Lean" etc.)

॥ ९ ॥

अभ्यागताभिरभितो व्रजसुन्दरीभिर्मुग्धस्मितार्द्रवदनः करुणावलोकी ।
निस्सीमकान्तिजलधिस्त्वमवेक्ष्यमाणोविश्वैकहृद्य, हर मे पवनेश रोगान् ॥

पदविभागः—अभ्यागताभिः, अभितः, व्रजसुन्दरीभिः, मुग्धस्मितार्द्रवदनः, करुणावलोकी, निस्सीमकान्तिजलधिः, त्वम्, अवेक्ष्यमाणः, विश्वैकहृद्य, हर, मे, पवनेश, रोगान् ॥

अन्वयः—अभितः अभ्यागताभिः व्रजसुन्दरीभिः मुग्धस्मितार्द्रवदनः करुणावलोकी निस्सीमकान्तिजलधिः अवेक्ष्यमाणः त्वं विश्वैकहृद्य, पवनेश, मे रोगान् हर ।

अन्वयार्थः

अभितः अभ्यागताभिः व्रजसुन्दरीभिः = दोनों दिशाओं में आकर खड़ी व्रज की सुन्दरियों से घिरे हुए

मुग्धस्मितार्द्रवदनः करुणावलोकी = मन्दहास से युक्त मुख वाले तथा करुणा प्रकट करते आँखों वाले

निस्सीमकान्तिजलधिः = सीमा-रहित कान्ति के समुद्र जैसे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवेक्ष्यमाणः त्वम् = दीखते आप

विश्वैकहृद्य, पवनेश, मे रोगान् हर। = समस्त जनों के प्रिय हे गुरुपवनपुराधीश, मेरे रोगों को दूर करो।

भावार्थ—दोनों दिशाओं में आकर खड़ी व्रज की सुन्दरियों से घिर हुए मन्दहास से युक्त मुख वाले करुणा प्रकट करते आँखों वाले सीमा-रहित कान्ति के समुद्र जैसे दीखते आप, समस्त जनों के प्रिय हे गुरुवायुपुराधीश ! मेरे रोगों को दूर करो।

Words-Explanation :

अवेक्षा = Seeing, Looking at (As in अवेक्ष्यमाणः)

॥ इति पञ्चषष्टितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-६६

रासक्रीडायां, धर्मोपदेशवर्णनम्

[गीतिछन्दः]

॥ १ ॥

उपयातानां सुदृशां कुसुमायुधबाणपातविवशानाम्।
अभिवाञ्छितं विधातुं कृतमतिरपि ता जगाथ वाममिव ॥

पदविभागः—उपयातानाम्, सुदृशाम्, कुसुमायुधबाणपातविवशानाम्, अभिवाञ्छितम्, विधातुम्, कृतमतिः, अपि, ताः, जगाथ, वामम्, इव ॥

अन्वयः—कुसुमायुधबाणपातविवशानाम् उपयातानां सुदृशाम् अभिवाञ्छितं विधातुं कृतमतिः अपि त्वं तां वामम् इव जगाथ ॥

अन्वयार्थः

कुसुमायुधबाणपातविवशानाम् उपयातानां सुदृशाम् = कामदेव के बाण के प्रहार से विवश होकर समीप आयी सुन्दरियों की

अभिवाञ्छितं विधातुम् = इच्छा को पूरा करने के लिए

कृतमपिः अपि = मन में संकल्प करने पर भी

त्वं तां वामम् इव जगाथ। = आपने उन (गोपियों) को उसके विपरीत के समान ही कहा

भावार्थ—कामदेव के बाण के प्रहार से विवश होकर समीप में आयी सुन्दरियों की इच्छा को पूरा करने के लिए मन में संकल्प करने पर भी आपने उन (गोपियों) को उसके विपरीत के समान ही कहा।

Words-Explanation :

कुसुमम् = A flower (As in कुसुमायुधबाण—)

पातः = Falling down, Alighting, Stroke, A Blow, An attack etc. (As in बाणपातविवशानाम्)

वाञ्छित = Wished, Desired. (As in अभिवाञ्छितं विधातुम्)

विध्-(विधति) = To honour, To worship etc. (As in अभिवाञ्छितं विधातुम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाम - (As in तां वामम् इव जगाथ) = Left side, Reverse, Opposite, Acting contrary, Of an opposite nature etc.

॥ २ ॥

गगनगतं मुनिनिवहं श्रावयितुं जगिथ कुलवधूधर्मम् ।
धर्म्यं खलु ते वचनं कर्म तु नो निर्मलस्य विश्वास्यम् ॥

पदविभागः—गगनगतम्, मुनिनिवहम्, श्रावयितुम्, जगिथ, कुलवधूधर्मम्, धर्म्यम्, खलु, ते, वचनम्, कर्म, तु, नो, निर्मलस्य, विश्वास्यम् ।

अन्वयः—गगनगतं मुनिनिवहं श्रावयितुं (त्वं) कुलवधूधर्मं जगिथ । ते वचनं धर्म्यं खलु । निर्मलस्य (भवतः) कर्म तु नो विश्वास्यम् ।

अन्वयार्थः

गगनगतं मुनिनिवहम् = आकाश में स्थित मुनियों को

श्रावयितुं (त्वम्) = सुनाने के लिए (आपने)

कुलवधूधर्मं जगिथ । = कुलवधुओं के धर्म (आचरण) के विषय में कहा ।

ते वचनं धर्म्यं खलु । = आपके वचन तो धर्म के अनुसार हैं ।

निर्मलस्य (भवतः) कर्म तु नो विश्वास्यम् = निर्मलस्वरूप आपके कार्य तो अविश्वसनीय हैं ।

भावार्थ—आकाश में स्थित मुनियों को सुनाने के लिए (आपने) कुलवधुओं के धर्म (आचरण) के विषय में उपदेश दिया । आपके वचन तो धर्म के अनुसार हैं । निर्मलस्वरुप आपके कार्य तो अविश्वसनीय हैं ।

Words-Explanation :

निवहः = A multitude, Collection. (As in मुनिनिवहम्)

श्रावित = Told, Narrated. (As in मुनिनिवहम् श्रावयितुम्)

नो = No, Not. (As in कर्म तु नो विश्वास्यम्)

॥ ३ ॥

आकर्ण्य ते प्रतीपां वाणीमेणीदृशः परं दीनाः ।
मा मा करुणासिन्धो परित्यजेत्यतिचिरं विलेपुस्ताः ॥

पदविभागः—आकर्ण्य, ते, प्रतीपाम्, वाणीम्, एणीदृशः, परम्, दीनाः, मा, मा, करुणासिन्धो, परित्यज, इति, अतिचिरम्, विलेपुः, ताः ॥

अन्वयः—ते प्रतीपां वाणीम् आकर्ण्य परं दीनाः ताः एणीदृशः "करुणासिन्धो मा मा परित्यज" इति अतिचिरं विलेपुः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

ते प्रतीपां वाणीम् आकर्ण्य = आपकी विपरीत बातें सुनकर

परं दीनाः ताः एणीदृशः = अत्यन्त व्याकुल वे मृगनयनियाँ

"करुणासिन्धो मा मा परित्यज" इति = "हे करुणासिन्धो ! त्याग मत करो, त्याग मत करो" इस प्रकार

अतिचिरं विलेपुः । = बहुत समय तक विलाप करती रहीं ।

भावार्थ—आपकी विपरीत बातें सुनकर अत्यन्त व्याकुल वे मृगनयनियाँ "हे करुणासिन्धो ! त्याग मत करो, त्याग मत करो" इस प्रकार बहुत समय तक विलाप करती रहीं ।

Words-Explanation :

प्रतीप = Contrary, Unfavourable. (As in ते प्रतीपां वाणीम्)

एणी = Female Black Deer. (As in ताः एणीदृशः)

दीन = Distressed, Dejected, Melancholy etc. (As in परं दीनाः ताः)

चिर = Long, Long lasting, For a along time. (As in अतिचिरं विलेपुः)

॥ ४ ॥

तासां रुदितैर्लपितैः करुणाकुलमानसो मुरारे त्वम् ।
ताभिः समं प्रवृत्तो यमुनापुलिनेषु काममभिरन्तुम् ॥

पदविभागः—तासाम्, रुदितैः, लपितैः, करुणाकुलमानसः, मुरारे, त्वम्, ताभिः, समम्, प्रवृत्तः, यमुनापुलिनेषु, कामम्, अभिरन्तुम् ॥

अन्वयः—मुरारे, तासां रुदितैः लपितैः करुणाकुलमानसः त्वं ताभिः समं यमुनापुलिनेषु कामम् अभिरन्तुं प्रवृत्तः ॥

अन्वयार्थः

मुरारे, तासां रुदितैः लपितैः = हे मुरारे ! उन (गोपस्त्रियों) के रोदन और आलाप द्वारा

करुणाकुलमानसः त्वं = करुणा से व्याकुल मन वाले आपने

ताभिः समं यमुनापुलिनेषु = उनके साथ यमुना के रेतीले प्रदेश पर

कामम् अभिरन्तुं प्रवृत्तः । = रास-क्रीडा आरम्भ की ।

भावार्थ—हे मुरारे ! उन (गोपस्त्रियों) के रोदन और आलाप द्वारा करुणा से व्याकुल मन वाले आपने उनके साथ यमुना के रेतीले प्रदेश पर रास-क्रीडा आरम्भ की ।

Words-Explanation :

लपनम् = Talking, Speaking (As in रुदितैः लपितैः)

आकुल = Fall of, (As in करुणाकुलमानसः)

पुलिनः/ पुलिनम् = A sand-bank, a Sandy Beach. (As in यमुनापुलिनेषु)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभिरतिः - = Pleasure, Delight, Satisfaction, Attachment, Devoted to etc. (As in अभिरन्तुं प्रवृत्तः)

॥ ५ ॥

चन्द्रकरस्यन्दलसत्सुन्दरयमुनातटान्तवीथीषु ।
गोपीजनोत्तरीयैरापादितसम्स्तरो न्यषीदस्त्वम् ॥

पदविभागः—चन्द्रकरस्यन्दलसत्सुन्दरयमुनातटान्तवीथीषु, गोपीजनोत्तरीयैः आपादितसम्स्तरः, न्यषीदः, त्वम् ।

अन्वयः—चन्द्रकरस्यन्दलसत्सुन्दरयमुनातटान्तवीथीषु गोपीजनोत्तरीयैः आपादितसम्स्तरः त्वं न्यषीदः ।

अन्वयार्थः

चन्द्रकरस्यन्दलसत्सुन्दरयमुनातटान्तवीथीषु = चाँदनी से प्रकाशित सुन्दर यमुना-तट की कुञ्ज गलियों में

गोपीजनोत्तरीयैः = गोपियों के ऑचलों (दुपट्टों) से

आपादितसम्स्तरः = बनायी शय्या पर

त्वं न्यषीदः = आप बैठे ।

भावार्थ—चाँदनी से प्रकाशित सुन्दर यमुना-तट की कुञ्ज गलियों में गोपियों के ऑचलों (दुपट्टों) से बनायी शय्या पर आप बैठे ।

Words-Explanation :

स्यन्द = Flowing, Trickling, Spreading. (As in चन्द्रकरस्यन्द—)

लस् (लसति/लसित) = To shine, Glitter

आपादनम् = Bringing about, Causing to arrive at, Tending to etc. (As in आपादितसम्स्तरः)

स्तर = Spreading, Covering. स्तरः = Bed, Conch, Anything Spread (As in सम्स्तरः)

॥ ६ ॥

सुमधुरनर्मालपनैः करसंग्रहणैश्च चुम्बनोल्लासैः ।
गाढालिङ्गनसङ्गैस्त्वमङ्गनालोकमाकुलीचकृषे ॥

पदविभागः—सुमधुरनर्मालपनैः, करसङ्ग्रहणै, च, चुम्बनोल्लासैः, गाढालिङ्गनसङ्गैः, त्वम्, अङ्गनालोकम्, आकुलीचकृषे ।

अन्वयः—सुमधुरनर्मालपनैः, करसङ्ग्रहणैः, चुम्बनोल्लासैः, गाढालिङ्गनसङ्गैः च, त्वम् अङ्गनालोकम् आकुलीचकृषे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

सुमधुरनर्मालपनैः = मधुर वार्तालाप के साथ

करसङ्ग्रहणैः = हाथों को पकड़ करके,

चुम्बनोल्लासैः = चुम्बनों के आस्वादन से

गाढालिङ्गनसङ्गैः च = तथा आलिंगनों से

त्वम् अङ्गनालोकम् = आपने वनिताजनों को

आकुलीचकृषे = मुग्ध करा दिया।

भावार्थ—मधुर वार्तालाप से हाथों को पकड़ करके, चुम्बनों के आस्वादन से तथा आलिंगनों से, आपने वनिताजनों को मुग्ध करा दिया।

Words-Explanation :

आलपनम् = Speaking to, Conversation. (As in नर्मालपनैः)

नर्मन् = Sport, Amorous pastime, Amusement. (As in नर्मालपनैः)

सङ्ग्रहणम् = Seizing, Grasping. (As in करसङ्ग्रहणैः)

उल्लासः = Joy, Delight, Splendour. (As in चुम्बनोल्लासैः)

॥ ७ ॥

वासोहरणदिने यद्वासोहरणं प्रतिश्रुतं तासाम्।
तदपि विभो, रसविवशस्वान्तानां कान्त, सुभ्रुवामदधाः ॥

पदविभागः—वासोहरणदिने, यत्, वासोहरणम्, प्रतिश्रुतम्, तासाम्, तदपि, विभो, रसविवशस्वान्तानाम्, कान्त, सुभ्रुवाम्, अदधाः ॥

अन्वयः—विभो, रसविवशस्वान्तानां सुभ्रुवां कान्त (त्वया) वासोहरणदिने तासां यत् वासोहरणं प्रतिश्रुतं (तासाम्) अपि अदधाः ॥

अन्वयार्थः

विभो, रसविवशस्वान्तानाम् सुभ्रुवां कान्त (त्वया) = हे विभो ! हे रस से विवश मन वाली और सुन्दर भौंहों वाली गोपिकाओं के कान्त ! हे भगवन् ! (आप द्वारा)

वासोहरणदिने तासाम् = वस्त्र-हरण के दिन उनका

यत् वासोहरणं प्रतिश्रुतम् = जो वस्त्रहरण का वचन लिया था

(तासाम्) अपि अदधाः = (वह भी) पूरा किया।

भावार्थ—हे विभो ! रस से विवश मन वाली सुन्दर भौंहों वाली गोपिकाओं के कान्त ! हे भगवन् ! (आप द्वारा) वस्त्र-हरण के दिन उनका जो वस्त्रहरण का वचन लिया था वह भी पूरा किया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

भ्रु = Eyebrow (भौंहें) (As in सुभ्रुवां कान्त)

वासनम् = Dress, Cloth, Dwelling, Envelope etc. (As in वासोहरणदिने)

प्रतिश्रुतिः, प्रतिश्रुत् = A Promise, An echo etc. (As in वासोहरणं प्रतिश्रुतम्)

॥ ८ ॥

कन्दलितघर्मलेशं कुन्दमृदुस्मेरवक्त्रपाथोजम् ।
नन्दसुत, त्वां त्रिजगत्सुन्दरमुपगुह्य नन्दिता बालाः ॥

पदविभागः—कन्दलितधर्मलेशम्, कुन्दमृदुस्मेरवक्त्रपाथोजम्, नन्दसुत, त्वाम्, त्रिजगत्सुन्दरम्, उपगुह्य, नन्दिताः, बालाः ॥

अन्वयः—नन्दसुत, कन्दलितघर्मलेशं, कुन्दमृदुस्मेरवक्त्रपाथोजं, त्रिजगत्सुन्दरं त्वाम् उपगुह्य बालाः नन्दिताः ॥

अन्वयार्थः

नन्दसुत, कन्दलितघर्मलेशम् = हे नन्द के पुत्र ! कुछ-कुछ ऊपर को आयी पसीने की बूंदों से अलंकृत,

कुन्दमृदुस्मेरवक्त्रपाथोजम् = कुन्द जैसे मृदुल हँसी के मुखारविन्द वाले

त्रिजगत्सुन्दरं त्वाम् उपगुह्य = तीनों लोकों में सुन्दर आपका आलिंगन करके,

बालाः नन्दिताः । = गोपिकायें आनन्दित हो गयीं ।

भावार्थ—हे नन्द के पुत्र ! कुछ-कुछ ऊपर को आयी पसीने की बूंदों से अलंकृत, कुन्द (गोधरा) जैसे मृदुल हँसी से शोभित मुखारविन्द वाले तीनों लोकों में सुन्दर आपका आलिंगन करके, गोपिकायें आनन्दित हो गयीं ।

Words-Explanation :

पाथोजम् = Lotus (Born out of water) (As in वक्त्रपाथोजम्)
(पाथम् = Water)

कन्दल = A new shoot or sprout. (As in कन्दलितघर्मलेशम्)

कुन्दः/कुन्दम् = A kind of Jasmine. (As in कुन्दमृदुस्मेरवक्त्रपाथोजम्)

उपगूहनम् = An embrace (As in त्वाम् उपगुह्य)

॥ ९ ॥

विरहेष्वङ्गारमयः श्रृङ्गारमयश्च सङ्गमे हि त्वम् ।
नितरामङ्गारमयस्तत्र पुनस्सङ्गमेऽपि चित्रमिदम् ॥

पदविभागः—विरहेषु, अङ्गारमयः, श्रृङ्गारमयः, च, सङ्गमे, हि, त्वम्, नितराम्, अङ्गारमयः, तत्र, पुनः, सङ्गमे, अपि, चित्रम्, इदम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—त्वं विरहेषु अङ्गारमयः । सङ्गमे श्रृङ्गारमयः च हि । तत्र सङ्गमे अपि पुनः नितराम् अङ्गारमयः (अङ्ग, अरमय) ।

अन्वयार्थः

त्वं विरहेषु अङ्गारमयः । = आप विरह में अग्निमय हैं । (आपके विरह में भक्त तड़पते हैं)

सङ्गमे श्रृङ्गारमयः च हि । = यह भी सत्य है कि मिलन में आप श्रृंगारमय हैं ।

तत्र सङ्गमे अपि पुनः = वहां (गोपिकाओं के) मिलन

नितरां अङ्गारमयः । = में भी पुनः बहुत दाहमय हो गये ।

(अङ्ग, अरमय) = (हे भगवन् ! रमण किया) (अंग - Well sir,)

चित्रम् इदम् = यह आश्चर्य है ।

भावार्थ—आप विरह में अग्निमय है (विरह में आपके भक्त तड़पते हैं) । यह भी सत्य है कि मिलन में आप श्रृंगारमय हैं । वहां (गोपिकाओं के) मिलन में भी पुनः (आप) बहुत दाहमय हो गये (भगवन् ! आपने) पूर्णरूप से सन्तुष्ट रमण किया । यह आश्चर्य है ।

Words-Explanation :

नितराम् = Wholly, Entirely

अङ्ग - (अङ्ग, अरमय) = Well sir,

अरमय - सन्तुष्ट कराये = (Made Happy).

अङ्गार/अङ्गारम् = Charcoal. (As in अङ्गारमयः)

Note. In addition to the two meanings of अङ्गारमय (As in अङ्ग, अरमय अङ्गारमयः), there is a philosophical angle where, in a state in Samadhi which is described in the Chaitanya School of Vaishnavisam a stage is reached which is callled "ADHIRODHA" or perfect maturity when one experiences both pleasure and pain together i.e. All the happiness of the universe and at the same time all the pains of the bite of all the snakes and stings of all the scorpions. The Gopis felt that pain and pleasure together.

॥ १० ॥

राधातुङ्गपयोधरसाधुपरीरम्भलोलुपात्मानम् ।
आराधये भवन्तं पवनपुराधीश, शमय सकलगदान् ॥

पदविभागः—राधातुङ्गपयोधरसाधुपरीरम्भलोलपात्मानम्, आराधये, भवन्तम्, पवनपुराधीश, शमय, सकलगदान् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—पवनपुराधीश, राधातुङ्गपयोधरसाधुपरिरम्भलोलुपात्मानं भवन्तं (अहम्) आराधये। (त्वं) (मे) सकल-गदान् शमय।

अन्वयार्थः

पवनपुराधीश, = हे गुरुपवनपुराधीश !

राधातुङ्गपयोधरसाधुपरीरम्भलोलुपात्मानम् = राधा के ऊंचे स्तनों को पकड़कर आलिंगन करने के इच्छुक

भवन्तं (अहम्) आराधये। = आपका (मैं) आराधना करता हूँ।

(त्वं) (मे) सकलगदान् शमय। = (आप) (मेरे) समस्त रोगों को दूर करो।

भावार्थ—हे गुरुपवनपुराधीश ! राधा के ऊंचे स्तनों को पकड़कर आलिंगन करने के इच्छुक आपका (मैं) आराधना करता हूँ। (आप) (मेरे) समस्त रोगों को दूर करो।

Words-Explanation :

परिरम्भः/परीरम्भः/परिरम्भणम्/परीरम्भणम् = An embrace, Embracing.

लोलुप = Desirous, Very eager, Ardently longing for.

तुङ्ग = High, Elevated etc.

साधु = Good, Excellent, Perfect.

॥ इति षट्षष्टितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-६७

भगवतस्तिरोभाववर्णनम्

[उपेन्द्रवज्रछन्दः]

॥ १ ॥

स्फुरत्परानन्दरसात्मकेन त्वया समासादितभोगलीलाः ।
असीममानन्दभरं प्रपन्ना महान्तमापुर्मदमंबुजाक्ष्यः ॥

पदविभागः—स्फुरत्परानन्दरसात्मकेन, त्वया, समासादितभोगलीलाः, असीमम्, आनन्दभरम्, प्रपन्नाः, महान्तम्, आपुः, मदम्, अंबुजाक्ष्यः ॥

अन्वयः—स्फुरत्परानन्दरसात्मकेन त्वया समासादितभोगलीलाः असीमम् आनन्दभरं प्रपन्नाः अम्बुजाक्ष्यः महान्तं मदम् आपुः ॥

अन्वयार्थः

स्फुरत्परानन्दरसात्मकेन त्वया = तेजोमय परमानन्द-स्वरूप आपके साथ

समासादितभोगलीलाः = मिलन आदि लीलाओं के द्वारा

असीमम् आनन्दभरं प्रपन्नाः = सीमा रहित आनन्द प्राप्त

अम्बुजाक्ष्यः = कमलनयनियां

महान्तं मदम् आपुः । = अत्यधिक अहंभाव को प्राप्त हुई ।

भावार्थ—तेजोमय परमानन्दस्वरूप आपके साथ मिलन आदि लीलाओं के द्वारा असीम आनन्द प्राप्त कमलनयनियां अत्यधिक अहंभाव को प्राप्त हो गई ।

Words-Explanation :

स्फुर् (स्फुरति/स्फुरित) = To glitter, To sparkle. (As in स्फुरत्परानन्दरसात्मकेन)

समासः = Union (As in समासादिभोगलीलाः)

प्रपन्न = Arrived at. (As in असीममानन्दभरं प्रपन्नाः)

मद = Intoxication, Madness, Pride, Arrogance, Blinded by pride, Arrogant etc. (As in मदम् आपुः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

निलीयतेऽसौ मयि मय्यमायं रमापतिर्विश्वमनोभिरामः ।
इति स्म सर्वाः कलिताभिमाना निरीक्ष्य गोविन्द तिरोहितोऽभूः ॥

पदविभागः—निलीयते, असौ, मयि, मयि, अमायम्, रमापतिः, विश्वमनोभिरामः, इति, स्म, सर्वाः, कलिताभिमानाः, निरीक्ष्य, गोविन्द, तिरोहितः, अभूः ॥

अन्वयः—"विश्वमनोभिरामः असौ रमापतिः अमायं मयि निलीयते, मयि निलीयते" इति स्म सर्वाः कलिताभिमानाः निरीक्ष्य, गोविन्द (त्वम्) तिरोहितः अभूः ॥

अन्वयार्थः

"विश्वमनोभिरामः असौ रमापतिः = "लोकों को प्रसन्न कराने वाले ये रमा के पति

अमायं मयि निलीयते मयि (निलीयते) " इति स्म सर्वाः कलिताभिमानाः निरीक्ष्य, = सच में मुझ पर न्यौछावर हैं मुझ पर लीन हैं" इस प्रकार सब (गोपस्त्रियों) को गर्वित हुई देखकर

गोविन्द (त्वम्) = हे गोविन्द, (आप)

तिरोहितः अभूः । = तिरोधान हो गये ।

भावार्थ—"लोकों को प्रसन्न कराने वाले ये रमा के पति, सच में मुझ पर न्यौछावर हैं मुझ पर लीन हैं" इस प्रकार सब (गोपस्त्रियों) को गर्वित देखकर, हे गोविन्द ! (आप) तिरोधान हो गये ।

Words-Explanation :

अभिरामः = Pleasing, Delightful, Sweet. (As in विश्वमनोभिरामः)

अमाय = Not Cunning, Sagacious, Sincere. (As in अमायं मयि निलीयते)

कलित = Held, Seized, Taken, Possessed. (As in कलिताभिमानाः)

अभिमानः = Pride (in good sense), Self respect. (As in कलिताभिमानाः)

तिरोहितः Vanished. (तिरस् - Without, Conceal, cover, तिरोधा - Disappear)

[उपजातिछन्दः]

॥ ३ ॥

राधाभिधां तावदजातगर्वामतिप्रियां गोपवधूं मुरारे ।
भवानुपादाय गतो विदूरम् तया सह स्वैरविहारकारी ॥

पदविभागः—राधाभिधाम्, तावत्, अजातगर्वाम्, अतिप्रियाम्, गोपवधूम्, मुरारे, भवान् उपादाय, गतः, विदूरम्, तया, सह, स्वैरविहारकारी ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—मुरारे, भवान् तावत् अजातगर्वाम् अतिप्रियां राधाभिधां गोपवधूम् उपादाय तया सह स्वैरविहारकारी विदूरं गतः ॥

अन्वयार्थः

मुरारे, भवान् तावत् = हे मुरारे ! आप उस समय

अजातगर्वाम् अतिप्रियाम् = गर्वरहित, अतिप्रिय

राधाभिधां गोपवधूम् उपादाय = राधा नाम की गोपिका को लेकर

तया सह स्वैरविहारकारी = उसके साथ स्वतन्त्र रूप से रमण करते हुए

विदूरं गतः । = बहुत दूर गये ।

भावार्थ—हे मुरारे ! आप उस समय गर्वरहित, अतिप्रिय राधा नाम की गोपिका को लेकर उसके साथ स्वतन्त्र रूप से रमण करते हुए बहुत दूर गये ।

Words-Explanation :

अभिधा = A name, An appellation (As in राधाभिधाम्)

स्वैर = Following one's own will or fancy, Self-willed etc. (As in स्वैरविहारकारी)

विहारिन् = Diverting or amusing oneself. (As in स्वैरविहारकारी)

[उपेन्द्रवज्रछन्दः]

॥ ४ ॥

तिरोहितेऽथ त्वयि जाततापाः समं समेताः कमलायताक्ष्यः ।
वने वने त्वां परिमार्गयन्त्यो विषादमापुर्भगवन्नपारम् ॥

पदविभागः—तिरोहिते, अथ, त्वयि, जाततापाः, समम्, समेताः, कमलयताक्ष्यः, वने, वने, त्वाम्, परिमार्गयन्त्यः, विषादम्, आपुः, भगवन्, अपारम् ॥

अन्वयः—भगवन्, त्वयि तिरोहिते अथ जाततापाः कमलायताक्ष्यः समं समेताः वने वने त्वां परिमार्गयन्त्यः अपारं विषादम् आपुः ॥

अन्वयार्थः

भगवन्, त्वयि तिरोहिते अथ = हे भगवन् ! आपके तिरोधान होने के बाद

जाततापाः कमलायताक्ष्यः = दुखी कमलनयनियों (गोपियों) ने

समं समेताः वने वने त्वाम् = साथ मिलकर वनों में आपको

परिमार्गयन्त्यः = खोजती हुई

अपारं विषादम् आपुः । = बहुत दुखी हुई ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—हे भगवन् ! आपके तिरोधान होने के बाद दुखी कमलनयनियों (गोपिकाओं) ने साथ मिलकर वनों में आपको खोजती हुई बहुत दुखी हुई ।

Words-Explanation :

मार्गणम् = Seeking, Looking for. (As in परिमार्गयन्त्यः)

समेत = Come or met together. (As in समं समेतः)

विषादः = Dejection, Sadness. (As in विषादम् आपुः)

[इन्द्रवज्रछन्दः]

॥ ५ ॥

"हा चूत, हा चम्पक, कर्णिकार हा मल्लिके, मालति, बालवल्यः ।
किं वीक्षितो नो हृदयैकचोर" इत्यादि तास्त्वत्प्रवणा विलेपुः ॥

पदविभागः—हा, चूत, हा चम्पक, कर्णिकार, हा मल्लिके, मालति, बालवल्यः, किम्, वीक्षितः नः, हृदयैकचोरः, इत्यादि, ताः, त्वत्प्रवणाः, विलेपुः ॥

अन्वयः—हा चूत, हा चम्पक, कर्णिकार, हा मल्लिके, बालवल्यः, नः हृदयैकचोरः (युष्माभिः) किं वीक्षितः ? इत्यादि त्वप्रवणाः ताः विलेपुः ॥

अन्वयार्थः

हा चूत, हा चम्पक, कर्णिकार, हा मल्लिके, बालवल्यः = हे आम के पेड़ ! हे चम्पक ! हे कर्णिकार ! हे मल्लिके ! छोटी छोटी लताओं !

नः हृदयैकचोरः (युष्माभिः) किं वीक्षितः ? = हमारे हृदय को चुराने वाले (आप लोगों द्वारा) क्या देखे गये ?

इत्यादि त्वत्प्रवणाः ताः विलेपुः । = इस प्रकार आपकी वे प्रेमिकायें विलाप करती रहीं ।

भावार्थ—हे आम के पेड़ ! चम्पक ! हे कर्णिकार ! हे मल्लिके ! छोटी छोटी लताओं ! हमारे हृदय को चुराने वाले (आप लोगों द्वारा) देखे गये हैं क्या ? इस प्रकार आपकी वे प्रेमिकायें विलाप करती रहीं ।

Words-Explanation :

प्रवण = Attached, Devoted to, Inclined to, addicted to etc. (As in त्वत् प्रवणाः)

चूत = A Mango Tree. (MANGIFERA INDICA) (As in हा चूत)

कर्णिकार = Name of a tree, The pericap of Lotus etc. (As in कर्णिकार)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चम्पकः = A Tree bearing fragrant flowers (MICHELIA CHEMPAKA) (As in हा चम्पक)

मल्लिका = A kind of Jasmine (JASMINUM Species) (As in हा मल्लिके)

[उपजातिछन्दः]

॥ ६ ॥

"निरीक्षितोऽयं सखि, पङ्कजाक्षः पुरो ममे" त्याकुलमालपन्ती ।
त्वां भावनाचक्षुषि वीक्ष्य काचित् तापं सखीनां द्विगुणीचकार ॥

पदविभागः—निरीक्षितः, अयम्, सखि, पङ्कजाक्षः, पुरः मम, इति, आकुलम्, आलपन्ती, त्वाम्, भावनाचक्षुषि, वीक्ष्य, काचित्, तापम्, सखीनाम्, द्विगुणीचकार ॥

अन्वयः—काचित् (गोपिका) त्वाम् भावनाचक्षुषि वीक्ष्य "सखि, अयं पङ्कजाक्षः मम पुरः निरीक्षितः" इति आकुलम् आलपन्ती सखीनां तापं द्विगुणीचकार ।

अन्वयार्थः

काचित् (गोपिका) त्वाम् = किसी (गोपिका) ने आपको

भावनाचक्षुषि वीक्ष्य = अपनी भावना दृष्टि द्वारा देखकर,

"सखि, अयं पङ्कजाक्षः मम पुरः निरीक्षितः" = "सखी ! यह कमलनयन मेरे सामने हैं" (ऐसा मेरे द्वारा) देखा गया है ।

इति आकुलम् आलपन्ती = इस प्रकार व्याकुल होकर कहती हुई

सखीनां तापं द्विगुणीचकार । = सखी के दुःख को दुगुना कर गयी ।

भावार्थ—किसी (गोपिका) ने आपको अपनी भावना दृष्टि द्वारा देखकर, "सखी ! यह कमलनयन मेरे सामने हैं" (ऐसा मेरे द्वारा) देखा गया । इस प्रकार व्याकुल होकर कहती हुई सखी के दुःख को दुगुना कर गयी ।

Words-Explanation :

आकुल = Agitated, Confounded, etc. (As in इति आकुलम् आलपन्ती)

आलपः = Speaking to, Conversation, Mention etc. (As in इति आकुलम् आलपन्ती)

पुरस् = Before the eyes, In front etc. (As in मम पुरः निरीक्षितः)

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ७ ॥

[उपेन्द्रवज्रछन्दः]

त्वदात्मिकास्ता यमुनातटान्ते तवानुचक्रुः किल चेष्टितानि।
विचित्य भूयोऽपि तथैव मानात् त्वया विमुक्तां ददृशुश्च राधाम् ॥

पदविभागः—त्वदात्मिकाः, ताः, यमुनातटान्ते, तव, अनुचक्रुः, किल, चेष्टितानि, विचित्य, भूयः, अपि, तथा, एव, मानात्, त्वया, विमुक्ताम्, ददृशुः, च, राधाम् ॥

अन्वयः—त्वदात्मिकाः ताः यमुनातटान्ते तव चेष्टितानि अनुचक्रुः किल भूयः अपि विचित्य तथा एव मानात् त्वया विमुक्तं राधां ददृशुः च।

अन्वयार्थः

त्वदात्मिकाः ताः = आपके साथ एक भाव हुई उन गोपस्त्रियों ने

यमुनातटान्ते = यमुनातट पर

तव चेष्टितानि अनुचक्रुः किल = आप द्वारा की गयी चेष्टाओं का अनुकरण किया

भूयः अपि विचित्य = फिर भी ढूँढ कर

तथा एव मानात् त्वया विमुक्तां राधां ददृशुः च = और उसी तरह गर्व से आप द्वारा विमुक्त राधा को भी देखा।

भावार्थ—आपके साथ एक भाव हुई उन गोपिकाओं ने यमुनातट पर आप द्वारा की गयी चेष्टाओं की पुनरावृत्ति की। फिर भी ढूँढ कर और उसी तरह गर्व से आप द्वारा विमुक्त राधा को भी देखा।

Words-Explanation :

चेष्टा = Plays, Deeds. (As in तव चेष्टितानि)

विचित = Searched. (As in भूयः अपि विचित्य)

मानः = Hautiness, Pride, Respect etc. (As in तथा एव मानात्)

॥ ८ ॥

ततः समं ता विपिने समन्तात्तमोवतारावधि मार्गयन्त्यः।
पुनर्विमिश्रा यमुनातटान्ते भृशं विलेपुश्च जगुर्गुणांस्ते ॥

पदविभागः—ततः, समम्, ताः, विपिने, समन्तात्, तमोवतारावधि, मार्गयन्त्यः, पुनः, विमिश्राः, यमुनातटान्ते, भृशम्, विलेपुः, च, जगुः, गुणान्, ते।

अन्वयः—ततः ताः समं विपिने समन्तात् तमोवतारावधि मार्गयन्त्यः पुनः यमुनातटान्ते विमिश्राः भृशं विलेपुः, ते गुणान् जगुः च।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

ततः ताः समम् विपिने समन्तात् = उसके बाद वे (गोपिकायें) एक साथ वन में चारों ओर

तमोवतारावधि मार्गयन्त्यः = जब तक अन्धेरा नहीं हुआ तब तक ढूँढती हुई

पुनः यमुना तटान्ते विमिश्राः = फिर यमुना के तट पर एकत्रित होकर

भृशं विलेपुः, ते गुणान् जगुः च। = बहुत रोयीं और आपके गुणों का बखान करती रहीं।

भावार्थ—उसके बाद वे (गोपिकायें) एक साथ वन में चारों ओर जब तक अन्धेरा नहीं हुआ तब तक ढूँढती हुई, फिर से यमुना के तट पर एकत्रित होकर बहुत रोयीं और आपके गुणों का बखान करती रहीं।

Words-Explanation :

विपिनम् = A wood, A forest. (As in ताः समं विपिने)

तमिः/तमी = Night. (तमिस्र - Darkness) (As in तमोवतारावधि मार्गयन्त्यः)

अवतरणम् = Descending, Coming down, Crossing etc. (As in तमोवतारावधि)

अवधि = Limit, Boundary. (As in तमोवतारावधि)

मार्गणम् = Searching, Seeking, Begging. (As in तमोवतारावधि मार्गयन्त्यः)

[उपजातिछन्दः]

॥ ९ ॥

तथा व्यथासङ्कुलमानसानां व्रजाङ्गनानां करुणैकसिन्धो।
जगत्रयीमोहनमोहनात्मा त्वं प्रादुरासीरयि मन्दहासी॥

पदविभागः—तथा, व्यथासङ्कुलमानसानाम्, व्रजाङ्गनानाम्, करुणैकसिन्धो, जगत्रयीमोहनमोहनात्मा, त्वम्, प्रादुरासीः, मन्दहासी॥

अन्वयः—अयि करुणैकसिन्धो त्वं तथा व्यथासङ्कुलमानसानाम् व्रजाङ्गनानां (पुरः) जगत्रयीमोहनमोहनात्मा मन्दहासी प्रादुरासीः॥

अन्वयार्थः

अयि करुणैकसिन्धो त्वम् = हे कुरुणा के समुद्र ! आप

तथा व्यथासङ्कुलमानसानाम् = उस प्रकार व्यथापूर्ण (पीड़ा से भरे) मन वाली

व्रजाङ्गनानां (पुरः) = व्रज-नारियों के (सम्मुख)

जगत्रयीमोहनमोहनात्मा = तीनों लोकों को माया के अधीन कराते मनोहर स्वरूप

मन्दहासी प्रादुरासीः। = मन्दहास करके प्रत्यक्ष हुए।

भावार्थ—हे, करुणा के समुद्र ! आप उस प्रकार (पीड़ा से भरे) मन वाली व्रजनारियों के (सम्मुख), तीनों लोकों को माया के अधीन कराते मनोहर स्वरूप, मन्दहास करके, प्रत्यक्ष हुए (प्रकट हुए)।

Digitized by IKS and IGE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

प्रादुस् = Appearance of a Deity on earth, Manifestly, Evidently, Visibly. (प्रादुर्भावः - Coming into existence). (As in मन्दहासी प्रादुरासीः)

मोहन = Stupifying, (one of the arrows of cupid the Lord of Love) (As in जगत्रयीमोहनमोहनात्मा)

व्यथा = Pain, Anguish, Fear, Agony etc. (As in व्यथासङ्कुलमानसानां)

[इन्द्रवज्रछन्दः]

॥ १० ॥

सन्दिग्धसन्दर्शनमात्मकान्तं त्वां वीक्ष्य तन्व्यः सहसा तदानीम् ।
किं किं न चक्रुः प्रमदातिभारात् स त्वं गदात् पालय मारुतेश ॥

पदविभागः—सन्दिग्धसन्दर्शनम्, आत्मकान्तम्, त्वाम्, वीक्ष्य, तन्व्यः, सहसा, तदानीम्, किम्, किम्, न, चक्रुः, प्रमदातिभारात्, सः, त्वम्, गदात्, पालय, मारुतेश ।

अन्वयः—सन्दिग्धसन्दर्शनम् आत्मकान्तं त्वां सहसा वीक्ष्य तन्व्यः तदानीं प्रमदातिभारात् किं किं न चक्रुः ? मारुतेश, सः त्वं (मां) गदात् पालय ।

अन्वयार्थः

सन्दिग्धसन्दर्शनम्, आत्मकान्तं त्वां सहसा वीक्ष्य तन्व्यः = पुनः न मिलने का सन्देह करती अपने प्रेमी, आपको अचानक देखकर तरुणियों ने

तदानीं प्रमदातिभारात् किं किं न चक्रुः ? = उस समय सन्तोषाधिक्य से क्या-क्या नहीं किया ?

मारुतेश, सः त्वं (मां) गदात् पालय । = हे गुरुवायुपुराधीश ! उस तरह के आप (मुझे) रोगों से बचाओ ।

भावार्थ—पुनः न मिलने का सन्देह करती अपने प्रेमी आपको अचानक देखकर तरुणियों ने उस समय सन्तोषधिक्य से क्या-क्या नहीं किया ? हे गुरुवायुपुराधीश ! उस तरह के आप (मुझे) रोगों से बचाओ ।

Words-Explanation :

सन्दिग्ध = Doubtful, Uncertain etc. (As in सन्दिग्धसन्दर्शनम्)

कान्त = Beloved. (As in आत्मकान्तम्)

प्रमदः = Joy, Pleasure, Delight. (As in प्रमदातिभारात्)

॥ इति सप्तषष्टितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-६८

गोपिकानाम् आनन्दपारवश्यवर्णनम्

[सम्मताछन्दः]

॥ १ ॥

तव विलोकनाद् गोपिकाजनाः प्रमदसङ्कुलाः पङ्कजेक्षण ।
अमृतधारया सम्प्लुता इव स्तिमिततां दधुस्त्वत्पुरोगताः ॥

पदविभागः—तव, विलोकनाद्, गोपिकाजनाः, प्रमदसङ्कुलाः, पङ्कजेक्षण, अमृतधारया, सम्प्लुताः इव, स्तिमिततां, दधुः, त्वत्पुरोगताः ॥

अन्वयः—पङ्कजेक्षणः, गोपिकाजनाः तव विलोकनात् प्रमदसङ्कुलाः अमृतधारया सम्प्लुताः इव त्वत्पुरोगताः स्तिमिततां दधुः ॥

अन्वयार्थः

पङ्कजेक्षण, गोपिकाजनाः = हे कमलनयन ! गोपियां

तव विलोकनात् प्रमदसङ्कुलाः = आपको देखने से सन्तुष्ट होती हुई

अमृतधारया सम्प्लुताः इव = अमृत की धारा से रसमय होती हुई जैसे

त्वत्पुरोगताः = आपके सामने आकर

स्तिमिततां दधुः । = निर्विकार होकर मौन हुई ।

भावार्थ—हे कमलनयन ! गोपिकायें आपको देखने से सन्तुष्ट होती हुई अमृतधारा से रसमय होती हुई जैसे आपके सामने आकर निर्विकार होकर मौन हुईं ।

Words-Explanation :

दध् (दधते) = To hold, To Possess, To retain etc. (As in स्तिमिततां दधुः)

स्तिम्, स्तीम् (स्तिम्यति/स्तीम्यति) = To become wet or moist, To become fixed & immovable, Be rigid etc. (As in स्तिमिततां दधुः)

विलोकनम् = Seeing, Looking at, Observing etc. (As in तव विलोकनात्)

सङ्कुल = Confused. (As in प्रमदसङ्कुल)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रमद = Joy, Delight, Intoxicated, Impassioned etc. (As in प्रमदसङ्कुल)

प्लवनम् = Swimming, Bathing etc. (As in सम्प्लुताः इव)

॥ २ ॥

तदनु काचन त्वत्कराम्बुजं सपदि गृह्णती निर्विशङ्किता ।
घनपयोधरे सन्निधाय सा पुलकसम्वृता तस्थुषी चिरम् ॥

पदविभागः—तदनु, काचन, त्वत्कराम्बुजम्, सपदि, गृह्णती, निर्विशङ्किता, घनपयोधरे, सन्निधाय, सा, पुलकसम्वृता, तस्थुषी, चिरम् ॥

अन्वयः—तदनु काचन (गोपिका) त्वत्कराम्बुजं निर्विशङ्किता सपदि गृह्णती, घनपयोधरे सन्निधाय सा पुलकसंवृता चिरं तस्थुषी ।

अन्वयार्थः

तदनु काचन (गोपिका) = उसके बाद कोई (गोपस्त्री)

त्वत्कराम्बुजं निर्विशङ्किता, सपदि गृह्णती = बिना संकोच के आपके हाथ को तुरन्त पकड़कर

घनपयोधरे सन्निधाय = (अपने) बड़े स्तनों पर रखकर

सा पुलकसंवृता चिरं तस्थुषी । = वह रोमाञ्चित होकर बहुत समय वैसे ही खड़ी रही ।

भावार्थ—उसके बाद कोई (गोपिका) बिना संकोच के आपके हाथ को तुरन्त पकड़कर (अपने) बड़े स्तनों पर रखकर वह रोमाञ्चित होकर बहुत समय तक वैसे ही खड़ी रही ।

Words-Explanation :

शङ्क (शङ्कते/शङ्कित) = To doubt, To dread, To be afraid, To hesitate, Be uncertain, Be doubtful etc. (निर्विशङ्कित = Without hesitation, Without doubt, etc.) (As in निविशङ्किता)

निधानम् = Putting down, Depositing, Laying down etc. (As in घनपयोधरे सन्निधाय)

पुलकः = Erection or bristling of the hairs of the body, Horripilation. (As in पुलकसंवृता)

संवृत = Covered. (As in पुलकसंवृता)

॥ ३ ॥

तव विभो, परा कोमलं भुजं निजगलान्तरे पर्यवेष्टयत् ।
गलसमुद्गतं प्राणमारुतं प्रतिनिरुन्धतीवातिहर्षुला ॥

पदविभागः—तव, विभो, परा, कोमलम्, भुजम्, निजगलान्तरे, पर्यवेष्टयत्, गलसमुद्गतम्, प्राणमारुतम्, प्रतिनिरुन्धती, इव, अतिहर्षुला ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—विभो, परा (गोपिका) अतिहर्षुला तव कोमलं भुजं गलसमुद्गतं प्राणयमारुतं प्रतिनिरुन्धती इव निजगलान्तरे पर्यवेष्टयत् ।

अन्वयार्थः

विभो परा (गोपिका) = हे प्रभो ! अन्य कोई (गोपिका)

अतिहर्षुला तव कोमलं भुजम् = अत्यन्त हर्षित होती हुई आपके कोमल हाथ को

गलसमुद्गतं प्राणमारुतम् = गले से ऊपर को निकलते प्राणवायु को

प्रतिनिरुन्धती इव = रोकती हुई जैसे

निजगलान्तरे पर्यवेष्टयत् । = अपने गले में लिपटाने लगी ।

भावार्थ—हे विभो ! अन्य कोई (गोपिका) अत्यन्त हर्षित होती हुई आपके कोमल हाथ को गले से ऊपर को निकलते प्राणवायु को रोकती हुई जैसे अपने गले में लिपटाने लगी ।

Words-Explanation :

कोमल = Tender, Soft, Delicate, Pleasing, Sweet. (As in तव कोमलं भुजम्)

गलः = Throat, Neck. (As in गलसमुद्गतम्)

उद् = A prefix to indicate moving upwards. (उद्गतम् - Moving upwards). (As in उद्गतं प्राणमारुतम्)

॥ ४ ॥

अपगतत्रपा कापि कामिनी तव मुखाम्बुजात् पूगचर्वितम् ।
प्रतिगृहय्य तद्वक्त्रपङ्कजे निदधती गता पूर्णकामताम् ॥

पदविभागः—अपगतत्रपा, कापि, कामिनी, तव, मुखम्बुजात्, पूगचर्वितम्, प्रतिगृहय्य, तत्, वक्त्रपङ्कजे, निदधती, गता, पूर्णकामताम् ॥

अन्वयः—का अपि कामिनी अपगतत्रपा तव मुखाम्बुजात् पूगचर्वितं प्रतिगृहय्य तत् वक्त्रपङ्कजे निदधती पूर्णकामतां गताः ॥

अन्वयार्थः

का अपि कामिनी अपगतत्रपा = कोई कामिनी (गोपिका) निर्लज्ज होकर .

तव मुखाम्बुजात् = आपके कमल के समान मुख से

पूगचर्वितं प्रतिगृहय्य = चबाये गये पान (ताम्बूल) को लेकर

तत् वक्त्रपङ्कजे निदधती = उसको कमल के समान अपने मुँह में डालकर

पूर्णकामतां गताः । = अपनी इच्छा की पूर्णता को प्राप्त हुई ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—कोई कामिनी (गोपिका) निर्लज्ज होकर आपके कमल के समान मुँह से, चबाये गये पान को लेकर, उसको अपने कमल के समान मुँह में डालकर अपनी इच्छा की पूर्णता को प्राप्त हुई।

Words-Explanation :

त्रपा = Bashfulness, Modesty, Shame (in a good or bad sense) (As in अपगतत्रपा)

पूगम् = Arecanut, Betel nut. (As in पूगचर्वितम्)

चर्वणम् = chewing. चर्वित् - Chewed. (As in पूगचर्वितम्)

॥ ५ ॥

"विकरुणो वने संविहाय मामपगतोऽसि का त्वामिह स्पृशेत्।"
इति सरोषया तावदेकया सजललोचनं वीक्षितो भवान्॥

पदविभागः—विकरुणः, वने, संविहाय, माम्, अपगतः, असि, का, त्वाम्, इह, स्पृशेत्, इति, सरोषया, तावत्, एकया, सजललोचनम्, वीक्षितः, भवान्॥

अन्वयः—त्वं विकरुणः वने मां संविहाय अपगतः असि। इह का त्वां स्पृशेत्? इति सरोषया एकया सजललोचनं तावत् भवान् वीक्षितः॥

अन्वयार्थः

त्वं विकरुणः वने मां संविहाय अपगतः असि। = आप करुणा-रहित होकर वन में हमें छोड़कर गये।

इह का त्वां स्पृशेत्? = इधर आपको कौन स्पर्श करेगी?

इति सरोषया एकया = इस प्रकार रोष से एक गोपिका ने

सजललोचनं = आँखों में जल भरकर

तावत् भवान् वीक्षितः। = उस समय आपको देखा।

भावार्थ—आप निर्दय होकर वन में हमें छोड़कर गये। इधर आप को कौन स्पर्श करेगा? इस प्रकार रोष से एक गोपिका ने आँखों में आँसू भरकर उस समय आपको देखा।

Words-Explanation :

स्पृश् (स्पृशति, स्पृष्ट) = To Touch, To lay the hands on etc. (As in का त्वां स्पृशेत्?)

॥ ६ ॥

इति मुदाकुलैर्वल्लवीजनैः सममुपागतो यामुनेतटे।
मृदुकुचाम्बरैः कल्पितासने घुसृणपाभासुरे वर्यसोभथाः॥

Digitized by K.S.M.S.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—इति, मुदा, आकुलैः, वल्लवीजनैः, समम्, उपागतः, यामुनेतटे, मृदुकुचाम्बरैः, कल्पितासने, घुसृणभासुरे, पर्यशोभथाः ॥

अन्वयः—इति मुदा आकुलैः वल्लवीजनैः समं यामुनेतटे समुपागतः घुसृणभासुरे मृदुकुचाम्बरैः कल्पितासने (त्वं) पर्यशोभथाः ॥

अन्वयार्थः

इति मुदा आकुलैः = इस प्रकार प्रसन्नता से रोमाञ्चित

वल्लवीजनैः समम् = गोपस्त्रियों के साथ

यामुनेतटे समुपागतः = यमुना के तट पर आये और

घुसृणभासुरे = गेरुए रंग से उज्ज्वल

मृदुकुचाम्बरैः = कोमल दुपट्टों (उत्तरीयों) से

कल्पितासने = सजाये गये आसन पर

(त्वं) पर्यशोभथाः = (आप) शोभायमान हुए।

भावार्थ—इस प्रकार प्रसन्नता से रोमाञ्चित गोपिकाओं के साथ यमुना के तट पर आकर, गेरुए रंग से उज्ज्वल कोमल दुपट्टों (उत्तरीयों) से सजाये गये आसन पर (आप) शोभायमान हुए।

Words-Explanation :

वल्लवी = Cow herdess (गोपिका) (As in वल्लवीजनैः समम्)

घुसृणम् = Saffron (As in घुसृणभासुरे)

भासुरि = Shining, Bright, Splendid (As in घुसृणभासुरे)

कल्पित = Arranged. (As in कल्पितासने)

॥ ७ ॥

"कतिविधा कृपा केऽपि सर्वतो धृतदयोदयाः केचिदाश्रिते।
कतिचिदीदृशा मादृशेष्वपी"त्यभिहितो भवान् वल्लवीजनैः ॥

पदविभागः—कतिविधा, कृपा, के, अपि, सर्वतः, धृतदयोदयाः, केचित्, आश्रिते, कतिचित्, ईदृशाः, मादृशेषु, अपि, इति, अभिहितः, वल्लवीजनैः ॥

अन्वयः—"कृपा कतिविधा ? के अपि सर्वतः धृतदयोदयाः। केचित् आश्रिते (धृतदयोदयाः)। कतिचित् मादृशेषु अपि ईदृशाः (सन्ति)।" इति वल्लवीजनैः भवान् अभिहितः ॥

अन्वयार्थः

"कृपा कतिविधा ? = "कृपा कितने प्रकार की हैं ?

के अपि सर्वतः धृतदयोदयाः। = कुछ लोग सब पर दया करते हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केचित् आश्रिते (धृतदयोदयाः) । = कुछ लोग केवल आश्रित लोगों पर ही (दया करते हैं) ।

कतिचित् मादृशेषु अपि ईदृशाः (सन्ति) ।" = और कुछ लोग हम (शरण में आयी) जैसी गोपियों पर भी इस प्रकार (दया नहीं दिखाने वाले) होते हैं ।"

इति वल्लवीजनैः भवान् अभिहितः = इस प्रकार गोपिकाओं के द्वारा आपको कहा गया ।

भावार्थ—कृपा कितने प्रकार की है ? कुछ लोग सब पर दया करते हैं । कुछ लोग केवल आश्रित लोगों पर ही (दया करते हैं) । और कुछ लोग हम जैसे (शरण में आयी) जैसी गोपियों पर भी इस प्रकार (दया नहीं दिखाने वाले/निर्दय) होते हैं । इस प्रकार गोपिकाओं के द्वारा आप से कहा गया ।

Words-Explanation :

अभिहित = Said, Addressed etc. (As in वल्लवीजनैः भवान् अभिहितः)

दया = Pity, Tenderness, Compassion. (As in धृतदयोदयाः)

उदयः = Rise, Going upwards, Appearance (As in धृतदयोदयाः)

धृत = Held, Carried. (As in धृतदयोदयाः)

॥ ८ ॥

अयि कुमारिका नैव शङ्क्यतां कठिनता मयि प्रेमकातरे ।
मयि तु चेतसो वोऽनुवृत्तये कृतमिदं मयेत्यूचिवान् भवान् ॥

पदविभागः—अयि, कुमारिकाः, न, एव, शङ्क्यताम्, कठिनता, मयि, प्रेमकातरे, मयि, तु, चेतसः, वः, अनुवृत्तये, कृतम्, इदम्, मया, इति, ऊचिवान्, भवान् ॥

अन्वयः—"अयि कुमारिकाः प्रेमकातरे मयि कठिनता न एव शङ्क्यताम् । मयि तु वः चेतसः अनुवृत्तये मया इदं कृतम् ।" इति भवान् ऊचिवान् ।

अन्वयार्थः

"अयि कुमारिकाः प्रेमकातरे मयि कठिनता न एव शङ्क्यताम् । = "हे कुमारियों ! प्रेम के बारे में .मुझमें निर्दयता होने की शङ्का न करें ।

मयि तु वः चेतसः अनुवृत्तये मया इदं कृतम् ।" = मुझमें आप लोगों के मन के अटूट प्रेम को स्थापित करने के लिए मैंने इस प्रकार किया ।"

इति भवान् ऊचिवान् । = इस प्रकार आपने कहा ।

भावार्थ—"हे कुमारियों ! प्रेम के बारे में मुझमें निर्दयता होने की शङ्का न करें । मुझमें आप लोगों के मन के अटूट प्रेम को स्थापित करने के लिए मैंने इस प्रकार किया ।" इस प्रकार आपने कहा ।

Words-Explanation :

कातर = Cowardly, Distressed, Agitated, Confused, Grieved etc. (As in प्रेमकातरे मयि कठिनता)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

अयि निशम्यतां जीववल्लभाः प्रियतमो जनो नेदृशो मम ।
तदिह रम्यतां रम्ययामिनीष्वनुपरोधमित्यालपो विभो ॥

पदविभागः—अयि, निशम्यताम्, जीववल्लभाः, प्रियतमः, जनः, न, ईदृशः, मम, तत्, इह, रम्यताम्, रम्ययामिनीषु, अनुपरोधम्, इति, आलपः, विभो ॥

अन्वयः—"अयि जीववल्लभाः निशम्यताम् । मम ईदृशः प्रियतमः जनः न । तत् इह रम्ययामिनीषु अनुपरोधं रम्यताम् ।" इति विभो त्वम् आलपः ॥

अन्वयार्थः

"अयि जीववल्लभाः निशम्यताम् । = "हे प्राणवल्लभाओ ! सुन लें ।

मम ईदृशः प्रियतमः जनः न । = मेरे इस प्रकार के प्रियजन दूसरे नहीं हैं ।

तत् इह रम्ययामिनीषु अनुपरोधं रम्यताम् ।" = इसलिए इधर (यमुना तट पर) रमणीय रातों में निर्विरोध (मेरे साथ) रमण कर लें ।"

इति विभो त्वम् आलपः । = इस प्रकार हे विभो ! आपने कहा ।

भावार्थ—"हे प्राणवल्लभाओ ! सुन लें । मेरे इस प्रकार के प्रियजन और नहीं हैं । इसलिए इधर (इस यमुना तट पर) रमणीय रातों में निर्विरोध (मेरे साथ) रमण करें ।" इस प्रकार हे विभो ! आपने कहा ।

Words-Explanation :

वल्लभ = Beloved. (As in जीववल्लभाः)

यामिनी/यामिका = Night. (As in रम्ययामिनीषु अनुपरोधम्)

उपरोधनम् = Obstruction. (As in अनुपरोधं रम्यताम्)

॥ १० ॥

इति गिराऽधिकं मोदमेदुरैर्व्रजवधूजनैः साकमारमन् ।
कलितकौतुको रासखेलने गुरुपुरीपते, पाहि मां गदात् ॥

पदविभागः—इति, गिरा, अधिकम्, मोदमेदुरैः, व्रजवधूजनैः, साकम्, आरमन्, कलित्कौतुकः, रासखेलने, गुरुपुरीपते, पाहि, माम्, गदात् ॥

अन्वयः—इति गिरा अधिकं मोदमेदुरैः व्रजवधूजनैः साकम् आरमन् रासखेलने कलितकौतुकः गुरुपुरीपते, (त्वं) मां गदात् पाहि ।

अन्वयार्थः

इति गिरा = इस प्रकार की बातों से

अधिकं मोदमेदुरैः = अत्यधिक प्रसन्नता से भरी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्रजवधूजनैः साकम् आरमन् = व्रज-नारियों के साथ रमण करके

रासखेलने कलितकौतुकः = रास-लीला के इच्छुक

गुरुपुरीपते, (त्वं) मां गदात् पाहि। = हे गुरुवायुपुराधीश ! (आप) मुझे रोग से बचाओ।

भावार्थ—इस प्रकार की बातों से प्रसन्नता से भरी व्रज-नारियों के साथ रमण करके रास-लीला के इच्छुक हे गुरुवायुपुराधीश ! (आप) मुझे रोग से बचाओ।

Words-Explanation :

मोदः = Delight, Pleasure (As in मोदमेदुरैः)

मेदुर = Thick, Dense, Full of, Covered with (This is usually used at the end of a compound word such as मोदमेदुरैः) (As in मोदमेदुरैः)

कलित = Full of, Mixed, Impenetrable. (As in कलितकौतुकः)

कौतुकम् = Desire, Curiosity, Wish, Eagerness. (As in कलिककौतुकः)

॥ इति अष्टषष्टितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ दशकम्-६९ ॥

रासक्रीडावर्णनम्

[कुसुममञ्जरीछन्दः]

॥ १ ॥

केशपाशधृतपिञ्छिकाविततिं सञ्चलन्मकरकुण्डलम्
हारजालवनमालिकाललितमङ्गरागघनसौरभम् ।
पीतचेलधृतकाञ्चिकाञ्चितमुदञ्चदंशुमणिनूपुरम्
रासकेलिपरिभूषितं तव हि रुपमीश, कलयामहे ॥

पदविभागः—केशपाशधृतपिञ्छिकाविततिं, सञ्चलन्मकरकुण्डलम्, हारजालवनमालिकाललितम्, अङ्गरागघनसौरभम्, पीतचेलधृतकाञ्चिकञ्चितम्, उदञ्चदंशुमणिनूपुरम्, रासकेलिपरिभूषितम्, तव, हि, रुपम्, ईश, कलयामहे ॥

अन्वयः—केशपाशधृतपिञ्छिकाविततिं सञ्चलन्मकरकुण्डलं, हारजालवनमालिकाललितं, अङ्गहारघनसौरभं, पीतचेलधृतकाञ्चिकाञ्चितं, उदञ्चदंशुमणिनूपुरं, रासकेलिपरिभूषितं ईश, तव हि रुपम् (अहं) कलयामहे ।

अन्वयार्थः

केशपाशधृतपिञ्छिकाविततिं = बालों के गुच्छे पर रखे मोर का पंख

सञ्चलन्मकरकुण्डलम् = हिलते हुए मकर के समान कुण्डल

हारजालवनमालिकाललितम् = अनेक प्रकार की वनमालाओं से सुशोभित

अङ्गरागघनसौरभम् = अङ्गराग की तीक्ष्ण सुगन्ध

पीतचेलधृतकाञ्चिकाञ्चितम् = पीले वस्त्र के ऊपर कमरबन्ध पहनकर सुन्दर

उदञ्चदंशुमणिनूपुरम् = ऊपर उड़ते पायलों के मणियों की शोभा से युक्त

रासकेलिपरिभूषितम् = रास-लीला के लिए सुसज्जित

ईश, तव हि रूपं (अहं) कलयामहे = हे ईश ! आपके ही रूप का (मैं) ध्यान करता हूँ ।

भावार्थ—बालों के गुच्छे पर रखे मोर का पंख, हिलते हुए मकर के समान कुण्डल, अनेक प्रकार की वनमालाओं से सुशोभित, अङ्गराग की तीक्ष्ण सुगन्ध, पीले वस्त्र के ऊपर कमरबन्ध पहनकर सुन्दर, ऊपर उड़ते पायलों

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

के मणियों की शोभा से युक्त रासलीला के लिए सुसज्जित, हे ईश ! आपके ही रूप का (मैं) ध्यान करता हूँ ॥

Words-Explanation :

पिञ्छिका = The feathers of a peacock. (As in पिञ्छिकाविततिं)

वितत = Spread out (As in पिञ्छिकाविततिं)

चित् = To shine. (As in काञ्चिकाञ्चितम्)

काञ्चि/ काञ्ची = A girdle with small bells. (As in काञ्चिकाञ्चितम्)

ललित = Sporting, Beautiful, Dallying etc. (As in वनमालिकाललितम्)

उदञ्चनम् = Rising upwards, Moving upwards. (As in उदञ्चदंशुमणिनूपुरम्)

कल् (कलते, कलति) = To hold, To carry, To bear, To understand, To know etc. (As in कलयामहे)

॥ २ ॥

तावदेव कृतमण्डने कलितकञ्चुलीककुचमण्डले
गण्डलोलमणिकुण्डले युवतिमण्डलेऽथ परिमण्डले ।
अन्तरा सकलसुन्दरीयुगलमिन्दिरारमण, सञ्चरन्
मञ्जुलां तदनु रासकेलिमयि कञ्जनाभ, समुपादधाः ॥

पदविभागः—तावत्, एव, कृतमण्डने, कलितकञ्चुलीककुचमण्डले, गण्डलोलमणिकुण्डले, युवतिमण्डले, अथ, परिमण्डले, अन्तरा, सकलसुन्दरीयुगलम्, इन्दिरारमण, सञ्चरन्, मञ्जुलाम्, तदनु, रासकेलिम्, अयि, कञ्जनाभ, समुपादधाः ॥

अन्वयः—अथ तावत् एव युवतिमण्डले कृतमण्डने कलितकञ्चुलीककुचमण्डले गण्डलोलमणिकुण्डले परिमण्डले (सति), अयि, कञ्जनाभ, इन्दिरारमण तदनु सकलसुन्दरीयुगलं अन्तरा सञ्चरन् मञ्जुलां रासकेलीं समुपादधाः ।

अन्वयार्थः

अथ तावत् एव युवतिमण्डले कृतमण्डने = उसके बाद उसी समय युवतियों के सुसज्जित होकर

कलितकञ्चुलीककुचमण्डले = अपने स्तनों पर वस्त्र पहनकर

गण्डलोलमणिकुण्डले = गालों में झूमते हुए रत्न-कुण्डलों से युक्त होने पर

परिमण्डले (सति) = गोलाकृति में खड़ी होने पर

अयि, कञ्जनाभ, इन्दिरारमण = हे, पद्मनाभ ! हे लक्ष्मी के रमण !

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदनु सकलसुन्दरीयुगलं अन्तरा सञ्चरन् = उसके बाद सब दो-दो युवतियों के बीच में सञ्चार करते हुए

मञ्जुलां रासकेलीं समुपादधाः । = (आपने) अतिसुन्दर रासलीला प्रस्तुत की ।

भावार्थ—उसके बाद उसी समय युवतियों के सुसज्जित होकर, अपने स्तनों पर वस्त्र पहनकर गालों में झूमते हुए रत्न-कुण्डलों से युक्त होने पर गोलाकृति में खड़ी होने पर, हे पद्मनाभ ! हे लक्ष्मी के रमण ! उसके बाद सब दो-दो युवतियों के बीच में सञ्चार करते हुए (आपने) अतिसुन्दर रासलीला प्रस्तुत की ।

Words-Explanation :

मण्ड् - (मण्डति, मण्डयति, मण्ड्यते, मण्डित) = To adorn, To decorate, Dress. (As in कृतमण्डने)

कञ्चुलीका/ कञ्चुली = A Bodice, (As in कञ्चुलीककुचमण्डले)

कलित = Seized, Taken etc. (As in कलितकञ्चुलीक—)

युगलम् = A Pair (As in सकलसुन्दरीयुगलं)

गण्डः = The cheek, The whole side of the face including the temple. (As in गण्डलोल—)

मञ्जु/ मञ्जुल - = Lovely, Beautiful. (As in मञ्जुलां रासकेलीम्)

॥ ३ ॥

वासुदेव, तव भासमानमिह रासकेलिरससौरभम्
दूरतोऽपि खलु नारदागदितमाकलय्य कुतुकाकुला ।
वेषभूषणविलासपेशलविलासिनीशतसमावृता
नाकतो युगपदागता वियति वेगतोऽथ सुरमण्डली ॥

पदविभागः—वासुदेव, तव, भासमानम्, इह, रासकेलिरससौरभम्, दूरतः, अपि, खलु, नारदागदितम्, आकलय्य, कुतुकाकुला, वेषभूषणविलासपेशलविलासिनीशतसमावृता, नाकतः, युगपत्, आगता, वियति, वेगतः, अथ, सुरमण्डली ॥

अन्वयः—वासुदेव, तव इह भासमानं रासकेलिरससौरभं दूरतः अपि खलु नारदागदितं आकलय्य, कुतुकाकुला सुरमण्डली वेषभूषणविलासपेशलविलासिनीशतसमावृता नाकतः युगपत् वियति अथ वेगतः आगता ।

अन्वयार्थः

वासुदेव, तव इह भासमानम् = हे वासुदेव ! आपकी इधर उज्ज्वल

रासकेलिरससौरभं दूरतः अपि खलु नारदागदितं आकलय्य = रासलीला की सुन्दरता को दूर से ही (देखने वाले) नारद द्वारा कहे गये वर्णन को सुनकर

कुतुकाकुला सुरमण्डली = रोमाञ्चित देवताओं के समूह

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेषभूषणविलासपेशलविलासिनीशतसमावृता नाकतः युगपत् वियति = वेष भूषादि धारण करके श्रृंगारमय खेलों में विदग्ध अनेक देव तथा देवस्त्रियां स्वर्ग से एक साथ आकाश में

अथ वेगतः आगता। = उसके बाद शीघ्र आ गये।

भावार्थ--हे वासुदेव ! आपकी इधर उज्ज्वल रासलीला की सुन्दरता को दूर से ही (देखने वाले) नारद मुनि द्वारा कहे गये वर्णन को सुनकर रोमाञ्चित देवों के समूह, वेष भूषादि धारण करके श्रृंगारमय खेलों में विदग्ध अनेक देव तथा देवस्त्रियां स्वर्ग से एक साथ आकाश में उसके बाद शीघ्र आ गये।

Words-Explanation :

भास = Brightness, Glittering (As in भासमानम्)

पेश, पेष, पेस, पेसल, पेशल, पेषल = Soft, Tender, Delicate. (As in विलासपेशल)

विलासः = Play, Pastime, Amorous pastime etc. (As in विलासपेशल)

आकलनम् = Inquiry, Comprehending, Counting, Laying hold of etc. (Here : Hearing) (As in आकलय्य कुतुकाकुला)

सौरभम् - Fragrance = सौरभ्यम् - Beauty

॥ ४ ॥

वेणुनादकृततानदानकलगानरागगतियोजना-
लोभनीयमृदुपादपातकृततालमेलनमनोहरम्।
पाणिसङ्क्वणितकङ्कणं च मुहुरम्सलम्बितकराम्बुजम्
श्रोणिबिम्बचलदम्बरं भजत रासकेलिरसडम्बरम्॥

पदविभागः—वेणुनादकृततानदानकलगानरागगतियोजनालोभनीयमृदुपादपातकृततालमेलनमनोहरम्, पाणिसङ्क्वणितकङ्कणम्, च, मुहुः, अम्सलम्बितकराम्बुजम्, श्रोणिविम्बचलदम्बरम्, भजत, रासकेलिरसडम्बरम्॥

अन्वयः—वेणुनादकृततानदानकलगानरागगतियोजनालोभनीयमृदुपादपातकृततालमेलनमनोहरं, पाणिसम्क्वणितकङ्कणं, मुहुः अम्सलम्बितकराम्बुजं, श्रोणिबिम्बचलदम्बरं च रासकेलिरसडम्बरं भजत॥

अन्वयार्थः

वेणुनादकृततानदानकलगानरागगतियोजनालोभनीयमृदुपादपातकृततालमेलनमनोहरम्, = वेणुनाद से उत्पन्न मधुर ध्वनि की गति से मिलकर चलाते चरणों की ताल से मनोहर

पाणिसम्क्वणितकङ्कणम् = हाथ में धारण किये कंकणों के मधुर शब्द,

मुहुः अम्सलम्बितकराम्बुजम् = बार-बार कमर पर रखे करकमल और

श्रोणिबिम्बचलदम्बरम् च = पृष्ठ भाग से गिरते वस्त्र आदि से युक्त

रासकेलिरसदुम्बरं भजत। = रासलीला का ध्यान करें।

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—वेणुनाद से उत्पन्न मधुर ध्वनि की गति से मिलकर चलाते चरणों की ताल से मनोहर, हाथ में धारण किये कंकणों के मधुर नाद, बार-बार कमर पर रखे करकमल, तथा पृष्ठभाग से गिरते वस्त्र आदि से युक्त रासलीला का ध्यान करें।

Words-Explanation :

लोभनीय = Enticing, Alluring, Attractive. (As in लोभनीयमृदुपादपात–)

तानः = A thread, In music a protracted tone, A key note. (As in तानदानकलगानं–)

दान् (दानति, दानते) = To cut, To make straight. (As in तानदानकलगान–)

कल = Sweet and indistinct. (As in कलगानरागगति–)

पात = A Blow, A stroke. (As in पादपातकृत–)

अम्स = Shoulder, Shoulder Blade.

क्वण् (क्वणति, क्वणित) = To sound, To jingle.

मुहुस् = Often, Repeatedly. (As in मुहुः)

लम्ब् (लम्बते, लम्बित) = To hang down, To be attached etc.

॥ ५ ॥

स्पर्धया विरचितानुगानकृततारतारमधुरस्वरे
नर्तनेऽथ ललिताङ्गहारलुलिताङ्गहारमणिभूषणे।
सम्मदेन कृतपुष्पवर्षमलमुन्मिषद्दिविदां कुलम्
चिन्मये त्वयि निलीयमानमिव सम्मुमोह सवधूकुलम्॥

पदविभागः—स्पर्धया, विरचितानुगानकृततारतारमधुरस्वरे, नर्तने अथ, ललिताङ्गहारलुलिताङ्हारमणिभूषणे, सम्मदेन, कृतपुष्पवर्षम्, अलमुन्मिषत्, दिविषदाम्, कुलम्, चिन्मये, त्वयि, निलीयमानम्, इव, सम्मुमोह, सवधूकुलम्॥

अन्वयः—अथ स्पर्धया विरचितानुगानकृततारतारमधुरस्वरे, नर्तने सम्मदेन ललिताङ्गहारलुलिताङ्गहारमणिभूषणे (सति), सवधूकुलं दिविषदां कुलं कृतपुष्पवर्षम् अलमुन्मिषत् चिन्मये त्वयि निलीयमानम् इव सम्मुमोह।

अन्वयार्थः

अथ स्पर्धया विरचितानुगानकृततारतारमधुरस्वरे = बाद में स्पर्धा से एक के बाद एक अधिक ऊंचे मधुर रूप में गाती

नर्तने सम्मदेन ललिताङ्गहारलुलिताङ्गहारमणिभूषणे (सति) = नृत्य की तल्लीनता से हार तथा आभूषण अपने-अपने स्थानों से निकलने पर

सवधूकुलं दिविषदां कुलम् = देवस्त्रियों के साथ देवगण के

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतपुष्पवर्षम् अलमुन्मिषत् = पुष्प-वर्षा करके आँखें खोलते हुए

चिन्मये त्वयि निलीयमानम् इव सम्मुमोह। = चिन्मयानन्द आप में लीन होने के समान मोहवश हो गये।

भावार्थ—बाद में स्पर्धा से एक के बाद एक अधिक ऊंचे मधुर रूप में गाती, नृत्य की तल्लीनता से हार तथा आभूषण अपने-अपने स्थानों से निकलने पर देवस्त्रियों के साथ देवगण के पुष्प-वर्षा करके आँखें खोलते हुए चिन्मयानन्द आप में लीन होने के समान मोहवश हो गये।

Words-Explanation :

अङ्गहारः = Gesticulation, Advance. (As in ललिताङ्गहार—)

लुलित = Shaken, Moved to & fro. (As in लुलिताङ्गहारमणिभूषणे)

उन्मेष/ उन्मेषणम् = Opening of the eyes, Winking (As in अलमुन्मिषत्)

दिविष, दिविष्ठः, दिविस, दिविजः दिवौकस, दिवसौकसः = Inhabitant of the Heaven. (As in दिविषदां कुलम्)

॥ ६ ॥

स्विन्नसन्नतनुवल्लरी तदनु कापि नाम पशुपाङ्गना
कान्तंसमवलम्बते स्म तव तान्तिभारमुकुलेक्षणा।
काचिदाचलितकुन्तला नवपटीरसारघनसौरभम्
वञ्चनेन तव सञ्चुचुम्ब भुजमञ्चितोरुपुलकाङ्कुरा॥

पदविभागः—स्विन्नसन्नतनुवल्लरी, तदनु, कापि, नाम, पशुपाङ्गना, कान्तम्, अम्सम्, अवलम्बते, स्म, तव, तान्तिभारमुकुलेक्षणा, काचित्, आचलितकुन्तला, नवपटीरसारघनसौरभम्, वञ्चनेन, तव, सञ्चुचुम्ब, भुजम्, अञ्चितोरुपुलकाङ्कुरा॥

अन्वयः—कापि पशुपाङ्गना नाम तदनु स्विन्नसन्नतनुवल्लरी तान्ति भारमुकुलेक्षणा तव कान्तम् अम्सम् अवलम्बते स्म। काचित् आचलितकुन्तला अञ्चितोरुपुलकाङ्कुरा नवपटीरसारघनसौरभं तव भुजं वञ्चनेन सञ्चुचुम्ब।

अन्वयार्थः

कापि पशुपाङ्गना नाम तदनु = कोई गोपस्त्री तो उस (नृत्य) के बाद

स्विन्नसन्नतनुवल्लरी = पसीने से आर्द्र लता के समान शरीर वाली

तान्तिभारमुकुलेक्षणा तव = थकावट के भार से वह कमलनयनी आपके

कान्तम् अम्सम् अवलम्बते स्म। = सुन्दर कमर के सहारे खड़ी हुई।

काचित् आचलितकुन्तला = किसी विचलित केशों वाली गोपिका ने

अञ्चितोरुपुलकाङ्कुरा। = पुलकित होकर

नवपटीरसारघनसौरभं तव भुजम् = ताजे चन्दनरस की तेज सुगन्ध वाले आपके हाथ को

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वञ्चनेन सञ्चुचुम्ब = (बहाने) चोरी से चूमा

भावार्थ—कोई गोपस्त्री तो, उस (नृत्य) के बाद पसीने से आर्द्र लता के समान शरीर वाली थकावट के भार से वह कमलनयनी आपके सुन्दर कमर के सहारे खड़ी हुई। किसी (गोपिका) विचलित बिखरे केशों वाली गोपिका ने पुलकित होकर ताजे चन्दनरस की तेज सुगन्ध वाले आपके हाथ को (सुगन्ध को सूँघने के बहाने) चोरी से चूमा।

Words-Explanation :

स्विद् = Sweat, Perspiration. (As in स्विन्नसन्न–)

सन्(सनति, सनोति, सनुते) = To acquire, To obtained. (As in स्विन्नसन्नतनु–)

वल्लरी/ वल्लरि = A creeping plant, Creaper. (लता) (As in तनुवल्लरी)

मुकुलः/ मुकुलम् = A Bud. ईक्षणम्- Eye, Seeing etc. (As in मुकुलेक्षणा)

कान्त = Pleasing, Agreeable, Desired, Loved. (As in कान्तम् अम्सम्)

अम्सम् = Shoulder. (As in कान्तम् अम्सम्)

अवलम्बनम् = A Prop, Support, etc.

पटीरः = Sandlewood. (As in नवपटीरसारघनसौरभम्)

कुन्तलः = A lock of hair, The hair of the head.

॥ ७ ॥

कापि गण्डभुवि सन्निधाय निजगण्डमाकुलितकुण्डलम्
पुण्यपूरनिधिरन्ववाप तव पूगचर्वितरसामृतम्।
इन्दिराविहृतिमन्दिरं भुवनसुन्दरं हि नटनान्तरे
त्वामवाप्य दधुरङ्गनाः किमु न सम्मदोन्मददशान्तरम्॥

पदविभागः—कापि, गण्डभुवि, सन्निधाय, निजगण्डम्, आकुलितकुण्डलम्, पुण्यपूरनिधि, अन्ववाप, तव, पूगचर्वितरसामृतम्, इन्दिराविहृतिमन्दिरम्, भुवनसुन्दरम्, हि, नटनान्तरे, त्वाम्, अवाप्य, दधुः, अङ्गनाः, किमु, न, सम्मदोन्मददशान्तरम्॥

अन्वयः—पुण्यपूरनिधिः कापि (गोपिका) आकुलितकुण्डलं निजगण्डं गण्डभुवि सन्निधाय तव पूगचर्वितरसामृतम् अन्ववाप। अङ्गनाः इन्दिराविहृतिमन्दिरं भुवनसुन्दरं हि त्वाम् अवाप्य नटनान्तरे किमु सम्मदोन्मददशान्तरम् न दधुः ?

अन्वयार्थः

पुण्यपुरनिधिः कापि (गोपिका) = अतीव भाग्यशाली किसी (गोपिका) ने

आकुलितकुण्डलं निजगण्डम् = झूमते कुण्डल से युक्त अपने गाल को

गण्डभुवि सन्निधाय = आपके गाल पर रखकर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तव पूगचर्वितरसामृतम् अन्ववाप। = आपके चबाये पान के अमृत रूपी रस को अपने मुँह में रखा।

अङ्गनाः इन्दिराविहृतिमन्दिरम् = गोपस्त्रयां लक्ष्मी जी के विहारस्थल

भुवनसुन्दरं हि त्वाम् अवाप्य = भुवनसुन्दर आप को ही प्राप्त करके नृत्य में

नटनान्तरे किमु सम्मदोन्मददशान्तरम् न दधुः ? = किस-किस सन्तोष प्रदान करने वाली अवस्थाओं को प्राप्त नहीं हुई।

भावार्थ—अतीव भाग्यशाली किसी (गोपिका) ने झूमते कुण्डल से युक्त अपने गाल को आपके गाल पर रखकर आपके चबाये पान के अमृत रूपी रस को अपने मुँह में स्वीकार किया। गोपिकायें लक्ष्मी जी के विहारस्थल भुवनसुन्दर आप को ही प्राप्त करके नृत्य के बीच में किस-किस सन्तोष प्रदान करने चाली अवस्थाओं को न प्राप्त हुईं।

Words-Explanation :

पूगः = Betel Nut. (As in पूगचर्वितरसामृतम्)

चर्वणम् = Chewing. (As in पूगचर्वितरसामृतम्)

आकुलित (आकुलितकुण्डलम्) = Agitated, Distressed,

गण्ड = Cheek, The whole side of the face including the temple. (As in निजगण्डम् गण्डभुवि)

॥ ८ ॥

गानमीश विरतं क्रमेण किल वाद्यमेलनमुपारतम्
ब्रह्मसम्मदरसाकुलाः सदसि केवलं ननृतुरङ्गनाः।
नाविदन्नपि च नीविकां किमपि कुन्तलीमपि च कञ्चुलीम्
ज्योतिषामपि कदम्बकं दिवि विलम्बितं किमपरं ब्रुवे॥

पदविभागः—गानम्, ईश, विरतम्, क्रमेण, किल, वाद्यमेलनम्, उपारतम्, ब्रह्मसम्मदरसाकुलाः, सदसि, केवलम्, ननृतुः, अङ्गनाः, न, अविदन्, अपि, च, नीविकाम्, किमपि, कुन्तलीम्, अपि, च, कञ्चुलीम्, ज्योतिषाम्, अपि, कदम्बकम्, दिवि, विलम्बितम्, किम्, अपरम्, ब्रुवे।

अन्वयः—ईश, क्रमेण गानं विरतम्। वाद्यमेलनम् उपारतम् किल। केवलम् अङ्गनाः ब्रह्मसम्मदरसाकुलाः सदसि ननृतुः। अपि च (गोपस्त्रियः) नीविकां, कुन्तलीं, कञ्चुलीं अपि च किमपि न अविदन्। ज्योतिषां कदम्बकम् अपि दिवि विलम्बितम्। अपरं किं ब्रुवे ?

अन्वयार्थः

ईश, क्रमेण गानम् विरतम्। = हे ईश ! क्रम से गाना समाप्त हुआ।

वाद्यमेलनम् उपारतम् किल = वाद्य वृन्द भी समाप्त हुआ।

केवलम् अङ्गनाः ब्रह्मसम्मदरसाकुलाः = केवल ब्रह्मानन्द का रसास्वादन करती स्त्रियां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सदसि ननृतुः । = सभा में नृत्य करती रहीं ।

अपि च (गोपस्त्रियः) नीविकां, कुन्तलीं, कञ्चुलीम् अपि च किमपि न अविदन् । = और (गोपिकायें) वस्त्र के विषय में, केशों के विषय में, तथा स्तन के आवरण के विषय में किसी के विषय में भी नहीं जान पायी । (लापरवाह रहीं) ।

ज्योतिषां कदम्बकम् अपि दिवि विलम्बितम् । = आकाश में तारों के समूह आदि भी स्तम्भित हो गये ।

अपरं किं ब्रुवे ? = इससे अधिक क्या कहें ?

भावार्थ—हे ईश ! क्रम से गाना समाप्त हुआ । वाद्यवृन्द भी समाप्त हुआ । केवल ब्रह्मानन्द का रसास्वादन करती स्त्रियां सभा में नृत्य करती रहीं । और (गोपिकायें) वस्त्र, केश, स्तनावरण आदि के बारे में कुछ भी नहीं जान पायीं । (अर्थात् वस्त्र पहने हैं या नहीं इसके बारे में लापरवाह रहीं) । आकाश में तारों के गण आदि भी स्तम्भित हो गये । और इससे अधिक क्या क्या कहें ?

Words-Explanation :

विरत = Ceased, Stopped etc. (As in गानं विरतम्)

नीविः = A cloth worn round a woman's waist or more properly the ends of the cloth tied into a knot in front. (As in नीविकां, कुन्तलीं—)

कदम्बकः = A multitude. (As in ज्योतिषां कदम्बकम्)

॥ ९ ॥

मोदिसीम्नि भुवनं विलाप्य विहृतिं समाप्य च ततो विभो
केलिसम्मृदितनिर्मलाङ्गनवघर्मलेशसुभगात्मनाम् ।
मन्मथासहनचेतसां पशुपयोषितां सुकृतचोदित-
स्तावदाकलितमूर्तिरादधिथ मारवीरपरमोत्सवान् ॥

पदविभागः—मोदसीम्नि, भुवनम्, विलाप्य, विहृतिम्, समाप्य, च, ततः, विभो, केलिसम्मृदितनिर्मलाङ्गनवघर्मलेश-सुभगात्मनाम्, मन्मथासहनचेतसाम्, पशुपयोषिताम्, सुकृतचोदितः, तावदाकलितमूर्तिः, आदधित, मार-वीरपरमोत्सवान् ॥

अन्वयः—ततः विभो, भुवनं मोदसीम्नि विलाप्य विहृतिं समाप्य च, केलिसम्मृदितनिर्मलाङ्गनवघर्मलेशसुभगात्मनां मन्मथासहनचेतसां पशुपयोषितां सुकृतचोदितः तावदाकलितमूर्तिः, मारवीरपरमोत्सवान् आदधिथ ॥

अन्वयार्थः

ततः विभो, भुवनं मोदसीम्नि विलाप्य विहृतिं समाप्य च = उसके बाद हे विभो ! पृथ्वी को आनन्द की सीमा में पहुँचाकर, तथा क्रीडा समाप्त करके

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केलिसंमृदितनिर्मलाङ्गनवघर्मलेशसुभगात्मनाम् = क्रीडा से शरीरों में उभर कर आयी कुछ-कुछ निर्मल पसीने की बूंदों से सुन्दर दीखती स्त्रियों के

मन्मथासहनचेतसाम् = असह्य कामवेदना से भरे मन वाली

पशुपयोषितां सुकृतचोदितः तावदाकलितमूर्तिः = गोपस्त्रियों की भलाई करने के लिए प्रेरित होकर, (जितनी गोपस्त्रयां थीं) उतने ही रूप धारण करके

मारवीरपरमोत्सवान् आदधिथ। = कामलीला के परमोत्कृष्ट उत्सव को निभाया।

भावार्थ—उसके बाद हे विभो ! पृथ्वी को आनन्द की सीमा में पहुँचाकर, तथा क्रीडा समाप्त करके क्रीडा से शरीर पर उभर कर आयी कुछ निर्मल पसीने के बूंदों से सुन्दर दीखती स्त्रियों के असह्य कामवेदना से भरे मन वाली गोपस्त्रियों की भलाई करने के लिए प्रेरित होकर (जितनी गोपस्त्रियाँ थीं) उतने ही रूप धारण करके कामलीला के परमोत्कृष्ट उत्सव को निभाया।

Words-Explanation :

चोदित = Sent, Directed, Urged on, Driven, Prompted. (As in सुकृतचोदितः)

आकलनम् = Laying hold of, Comprehending. (As in तावदाकलितमूर्तिः)

विहृतिः = Sport, Pastime. (As in विहृतिं समाप्य)

संमृष्ट = Strained, Filtered. (As in केलिसम्मृदित)

योषा, योषित्, योषिता = A woman, A young woman in general.

॥ १० ॥

केलिभेदपरिलोलिताभिरतिलालिताभिरबलालिभिः
स्वैरमीश ननु सूरजापयसि, चारु नाम विहृतिं व्यधाः।
काननेऽपि च विसारिशीतलकिशोरमारुतमनोहरे
सूनसौरभमये विलेसिथ विलासिनीशतविमोहनम्॥

पदविभागः—केलिभेदपरिलोलिताभिः, अतिलालिताभिः, अबलालिभिः, स्वैरम्, ईश, ननु, सूरजापयसि, चारु, नाम, विहृतिम्, व्यधाः, कानने, अपि, च, विसारिशीतलकिशोरमारुतमनोहरे, सूनसौरभमये, विलेसिथ, विलासिनीशतविमोहनम्॥

अन्वयः—केलिभेदपरिलोलिताभिः अतिलालिताभिः अबलालिभिः ननु ईश स्वैरं सूरजापयसि चारु नाम विहृतिं व्यधाः। अपि च विसारिशीतलकिशोरमारुतमनोहरे सूनसौरभमये कानने विलासिनीशतविमोहनं विलेसिथ।

अन्वयार्थः

केलिभेदपरिलोलिताभिः = अनेक प्रकार की क्रीडाओं से उत्तेजित

Funding By IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिलालिताभिः अबलालिभिः = अत्यन्त प्रिय स्त्रियों के साथ

ननु ईश स्वैरम् सूरजापयसि = हे ईश ! स्वतन्त्र रूप से यमुना के जल में

चारु नाम विहर्तिं व्यधाः । = सुन्दर रूप से आपने क्रीडा की ।

अपि च विसारिशीतलकिशोरमारुतमनोहरे, सूनसौरभमये कानने = और बहते हुए शीतल तथा मन्द मारुत से मनोहर सुगन्धित पुष्पों से भरे वन में

विलासिनीशतविमोहनं विलेसिथ । = स्त्रियों का सम्पूर्ण रूप से वशीकरण करके विलास किया ।

भावार्थ—अनेक प्रकार की क्रीडाओं से उत्तेजित, अत्यन्त प्रिय स्त्रियों के साथ हे ईश ! स्वतन्त्रता से यमुना के जल में सुन्दर-रूप से आपने क्रीडा की । उसके बाद, प्रसारित शीतल और मन्द मारुत से मनोहर सुगन्धित पुष्पों से भरे वन में स्त्रियों का सम्पूर्ण रूप से वशीकरण करके विलास किया ।

Words-Explanation :

स्वैर = Freely, Without any control. (As in स्वैरं सूरजापयसि)

सूरजा = Yamuna River (As in सूरजापयसि—)

सून = Blossomed, Opened, Blown, Budded, Produced, Born etc. (As in सूनसौरभमये कानने)

विसारिन् = Spreading, Gliding, Diffusing (As in विसारिशीतल—)

विलासिनि = A woman in general, A wanton woman. (As in विलासिनीशत—)

लोलित = Shaken. Excited, Agitated etc. (As in केलिभेदपरिलोलिताभिः)

लालनम् = Carassing, Fondling etc. (As in अतिलालिताभिः)

॥ ११ ॥

कामिनीरिति हि यामिनीषु खलु कामनीयकनिधे भवान्
पूर्णसम्मदरसार्णवं कमपि योगिगम्यमनुभावयन् ।
ब्रह्मशङ्करमुखानपीह पशुपाङ्गनासु बहुमानयन्
भक्तलोकगमनीयरूप कमनीय कृष्ण परिपाहि माम् ॥

पदविभागः—कामिनीरिति, हि, यामिनीषु, खलु, कामनीयकनिधे, भवान्, पूर्णसम्मदरसार्णवम्, कमपि, योगिगम्यम्, अनुभावयन्, ब्रह्मशङ्करमुखान्, अपि, इह, पशुपाङ्गनासु, बहुमानयन्, भक्तलोकगमनीयरूप, कमनीय, कृष्ण परिपाहि, माम् ।

अन्वयः—कामनीयकनिधे, भवान् इति हि यामिनीषु खलु योगिगम्यं कमपि पूर्णसम्मदरसार्णवं कामिनीः अनुभावयन् इह पशुपाङ्गनासु ब्रह्मशङ्करमुखान् अपि बहुमानयन्, भक्तलोकगमनीयरूप, कमनीय कृष्ण मां परिपाहि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

कामनीयकनिधे, भवान् = हे सुन्दरता के सागर ! आप

इति हि यामिनीषु खलु = इस प्रकार रातों में

योगिगम्यं कमपि पूर्णसम्मदरसार्णवं कामिनीः अनुभावयन् = वस्तुतः केवल श्रेष्ठ योगीश्वरों को ही किसी तरह प्राप्त होने वाले पूर्ण आनन्द के समुद्र को, गोपिकाओं को अनुभव कराकर

इह पशुपाङ्गनासु ब्रह्मशङ्करमुखान् अपि बहुमानयन्, = इधर गोपिकाओं में ब्रह्मा, शङ्कर आदि भी आदर के पात्र बनाये,

भक्तलोकगमनीयरूप, कमनीय कृष्ण मां परिपाहि । = भक्तों को ही प्राप्त सुन्दर स्वरूप हे कृष्ण ! मेरी रक्षा करें ।

भावार्थ—हे कामनीय कनिधे ! (हे सुन्दरता के सागर !), आप इस प्रकार रातों में वस्तुतः केवल श्रेष्ठ योगीश्वरों को ही किसी तरह प्राप्त होने वाले पूर्ण आनन्द के समुद्र को, गोपिकाओं को अनुभव कराकर, इधर गोपिकाओं में ब्रह्मा, शंकर आदि भी आदर के पात्र बनाये, भक्तों को ही प्राप्त सुन्दर स्वरूप, हे कृष्ण ! मेरी रक्षा करें ।

Words-Explanation :

कमनीय =Lovely, Charming, Beautiful.(As in कमनीय कृष्ण परिपाहि माम्)

यामिका/ यामिनी = Night. (As in यामिनीषु खलु—)

॥ इति ऊनसप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७०

सुदर्शनशापमोक्षवर्णनम्

[पृथ्वीछन्दः]

॥ १ ॥

इति त्वयि रसाकुलं रमितवल्लभे वल्लवाः
कदापि पुरमम्बिकाकमितुरम्बिकाकानने ।
समेत्य भवता समं निशि निषेव्य दिव्योत्सवम्
सुखं सुषुपुरग्रसीद्व्रजपमुग्रनागस्तदा ॥

पदविभागः—इति, त्वयि, रसाकुलम्, रमितवल्लभे, वल्लवाः, कदापि, पुरम्, अम्बिकाकमितुः, अम्बिकाकानने, समेत्य, भवता, समम्, निशि, निषेव्य, दिव्योत्सवम्, सुखम्, सुषुपुः, अग्रसीत्, व्रजपम्, उग्रनागः, तदा ।

अन्वयः—इति त्वयि रसाकुलं रमितवल्लभे (सति) वल्लवाः कदापि अम्बिकाकानने अम्बिकाकमितुः पुरं भवता समं समेत्य दिव्योत्सवं निषेव्य, निशि सुखं सुषुपुः तदा उग्रनागः व्रजपम् अग्रसीत् ।

अन्वयार्थः

इति त्वयि रसाकुलं रमितवल्लभे (सति) , वल्लवाः = इस प्रकार आपके गोपस्त्रियों के साथ रस से परिपूर्ण रमण करते समय, गोपसमूह

कदापि अम्बिकाकानने = कभी अम्बिका वन में

अम्बिकाकमितुः पुरं भवता समं समेत्य = अम्बिका के पति (शिवजी) के क्षेत्र में आपके साथ पहुँचकर

दिव्योत्सवं निषेव्य = दिव्य उत्सव मनाकर

निशि सुखं सुषुपुः तदा = रात में सुखपूर्वक सो रहा था (उस समय)

उग्रनागः व्रजपम् अग्रसीत् । = भयंकर सर्प ने नन्दगोप को पकड़ा ।

भावार्थ—इस प्रकार आपके गोपस्त्रियों के साथ रस से परिपूर्ण रमण करते समय, गोपसमूह कभी अम्बिका वन में अम्बिका के पति (शिवजी) के मंदिर में आपके साथ पहुँचकर, दिव्य उत्सव मनाकर रात में सुखपूर्वक सो रहा था (उस समय) भयंकर (साँप) ने नन्दगोप को पकड़ा ।

Words-Explanation :

वल्लवः = Cowherd. (As in वल्लवाः कदापि—)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्रजपः = The Lord of Vraj, Nandagopa (The head of Vraj) (As in व्रजपम् अग्रसीत्)

कम् - (कामयते, कामित, कांत) = To love, In love with. (As in अम्बिकाकमितुः)

निषेवण्म्/ निषेवा = Serving, Adoration, Worship, enjoying, etc. (As in दिव्योत्सवं निषेव्य)

॥ २ ॥

समुन्मुखमथोल्मुकैरभिहतेऽपि तस्मिन् बला-
दमुञ्चति भवत्पदे न्यपति पाहि पाहीति तैः ।
तदा खलु पदा भवान् समुपगम्य पस्पर्श तम्
वभौ स च निजां तनुं समुपसाद्य वैद्याधरीम् ॥

पदविभागः—समुन्मुखम्, अथ, उल्मुकैः, अभिहते, अपि, तस्मिन्, बलात्, अमुञ्चति, भवत्पदे, न्यपति, पाहि, पाहि, इति, तैः, तदा, खलु, पदा, भवान्, समुपगम्य, पस्पर्श, तम्, बभौ, सः, च, निजाम्, तनुम्, समुपसाद्य, वैद्याधरीम् ॥

अन्वयः—अथ तस्मिन् बलात् समुन्मुखम् उल्मुकैः अभिहते अपि समुञ्चति । तैः "पाहि पाहि" इति भवत्पदे न्यपति (सति) तदा खलु भवान् समुपगम्य पदा तं पस्पर्श । सः निजां वैद्याधरीं तनुं समुपसाद्य बभौ च ॥

अन्वयार्थः

अथ तस्मिन् बलात् समुन्मुखम् उल्मुकैः अभिहते अपि अमुञ्चति । = बाद में उस पर बल प्रयोग करके उसको देखकर मशाल से पीटने पर भी (उसने) नहीं छोड़ा ।

तैः "पाहि पाहि" इति भवत्पदे न्यपति (सति) तदा खलु भवान् = वे लोग "रक्षा करो रक्षा करो" इस प्रकार आपके चरणों में गिरे, तब तो आपने

समुपगम्य पदा तं पस्पर्श । = समीप में आकर चरण से उसका स्पर्श किया ।

सः निजां वैद्याधरीं तनुं समुपसाद्य बभौ च । = और वह अपना वैद्याधर के शरीर को प्राप्त करके शोभित हुआ ।

भावार्थ—बाद में उस पर बल प्रयोग करके सामने उसको देखकर मशाल से पीटने पर भी (उसने) नहीं छोड़ा । वे लोग "रक्षा करो, रक्षा करो" इस प्रकार आपके चरणों में गिरे तब तो आपने समीप में आकर चरण से उसका स्पर्श किया और वह अपना वैद्याधर के शरीर को प्राप्त करके शोभित हुआ ॥

Words-Explanation :

उन्मुखम्/उन्मुखी = Looking up, Raising the face (As in समुन्मुखम्—)

उल्मुकः = A fire, Brand, Torch. (As in समुन्मुखम् उल्मुकैः अभिहते)

अभिहत = Struck, Beaten, Injured. (As in समुन्मुखम् उल्मुकैः अभिहते)

Digitized by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुच् (मोचते, मुञ्चति, मुञ्चते, मुक्त–) = To loose, To liberate, To Release etc. (As in अमुञ्चति)

॥ ३ ॥

सुदर्शनधर प्रभो ननु सुदर्शनाख्योऽस्म्यहम्
मुनीन् क्वचिदुपाहसं त इह मां व्यधुर्वाहसम् ।
भवत्पदसमर्पणादमलतां गतोऽस्मीत्यसौ
स्तुवन् निजपदं ययौ व्रजपदं च गोपा मुदा ॥ ३ ॥

पदविभागः—सुदर्शनधर, प्रभो, ननु, सुदर्शनाख्यः, अस्मि, अहम्, मुनीन्, क्वचित्, उपाहसम्, ते, इह, माम्, व्यधुः, वाहसम्, भवत्पादसमर्पणात्, अमलताम्, गतः, अस्मि, इति, असौ, स्तुवन्, निजपदम्, ययौ, व्रजपदम्, च, गोपाः, मुदा ।

अन्वयः—सुदर्शनधर प्रभो, अहं सुदर्शनाख्यः अस्मि ननु । क्वचित् मुनीन् उपाहसन् । ते माम् इह वाहसं व्यधुः । भवत्पादसमर्पणात् अमलतां गतः अस्मि । इति असौ स्तुवन् निजपदं ययौ । गोपाः मुदा व्रजपदं (ययौ) च ।

अन्वयार्थः

सुदर्शनधर प्रभो, अहं सुदर्शनाख्यः = हे सुदर्शनधारी ! हे प्रभो ! मैं तो सुदर्शन नाम से जाना जाता हूँ

क्वचित् मुनीन् उपाहसम् । = कभी मैंने मुनिगणों का परिहास किया था ।

ते माम् इह वाहसं व्यधुः । = उन्होंने मुझे इधर बड़ा साँप बनाकर छोड़ दिया ।

भवत्पादसमर्पणात् अमलतां गतः अस्मि । = आपके चरण के स्पर्श से मैं निर्मल हो गया हूँ ।

इति असौ स्तुवन् निजपदं ययौ । = इस प्रकार वह स्तुति करके अपने स्थान को गया ।

गोपाः मुदा व्रजपदं (ययौ) च । = और गोप लोग भी सन्तुष्ट होकर व्रज को (गये) ।

भावार्थ—हे सुदर्शनधारी ! हे प्रभो ! मैं तो सुदर्शन नाम से जाना जाता हूँ । कभी मैंने मुनिगणों की हंसी उड़ायी थी । उन्होंने मुझे इधर बड़ा साँप बनाकर छोड़ दिया, आपके चरण के स्पर्श से मैं निर्मल हो गया हूँ । इस प्रकार वह स्तुति करके अपने स्थान को गया । और गोपलोग भी सन्तुष्ट होकर व्रज को (गये) ।

Words-Explanation :

वाहसः = A big serpant, The Boa. (As in वाहसं व्यधुः)

॥ ४ ॥

कदापि खलु सीरिणा विहरति त्वयि स्त्रीजनै-
र्जहार धनदानुगः स किल शङ्खचूडोऽबलाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिद्रुतमनुद्रुतस्तमथ मुक्तनारीजनम्
रुरोजिथ शिरोमणिं हलभृते च तस्याददाः ॥

पदविभागः--कदापि, खलु, सीरिणा, विहरति, त्वयि, स्त्रीजनैः, जहार, धनदानुगः, सः, किल, शङ्खचूडः, अबलाः, अतिद्रुतम्, अनुद्रुतः, तम्, अथ, मुक्तनारीजनम्, रुरोजिथ, शिरोमणिम्, हलभृते, च, तस्य, अददाः ॥

अन्वयः—कदापि खलु त्वयि सीरिणा स्त्रीजनैः विहरति (सति), सः धनदानुगः शङ्खचूडः अबलाः जहार किल । अथ त्वम् अतिद्रुतम् अनुद्रुतः मुक्तवारीजनं तं रुरोजिथ । तस्य शिरोमणिं हलभृते अददाः च ।

अन्वयार्थः

कदापि खलु त्वयि सीरिणा स्त्रीजनैः विहरति (सति) = कभी आपके बलराम सहित गोपस्त्रियों से क्रीड़ा करने पर

सः धनदानुगः शङ्खचूडः अबलाः जहार किल । = वह कुबेर का सेवक शङ्खचूड़ स्त्रियों को चुराकर ले गया ।

अथ त्वम् अतिद्रुतम् अनुद्रुतः मुक्तनारीजनं तं रुरोजिथ । = बाद में आपके अतिशीघ्र दौड़ कर जाने पर स्त्रियों को छोड़कर भागते हुए उसका वध किया ।

तस्य शिरोमणिं हलभृते अददाः च । = और उसके सिर पर पहन रखे रत्न को लाकर बलराम को दिया ।

भावार्थ—कभी आपके बलराम सहित गोपस्त्रियों से क्रीडा करने पर वह कुबेर का सेवक शङ्खचूड स्त्रियों को चुराकर ले गया । बाद में आपके अतिशीघ्र दौड़ कर जाने पर स्त्रियों को छोड़कर भागते उसका वध किया । और उस के सिर पर पहन रखे रत्न को लाकर बलराम को दिया ।

Meaning of some words:

सीरिन् = An epithet for Balarama (As in सीरिणा स्त्रीजनैः—)

हलभृत = An epithet for Balarama. (As in हलभृते अददाः)

॥ ५ ॥

दिनेषु च सुहृज्जनैस्सह वनेषु लीलापरम्
मनोभवमनोहरं रसितवेणुनादामृतम् ।
भवन्तममरीदृशाममृतपारणादायिनम्
विचिन्त्य किमु नालपन् विरहतापिता गोपिकाः ॥

पदविभागः—दिनेषु, च, सुहृज्जनैः, सह, वनेषु, लीलापरम्, मनोभवमनोहरम्, रसितवेणुनादामृतम्, भवन्तम्, अमरीदृशाम्, अमृतपारणादायिनम्, विचिन्त्य, किमु, न, आलपन्, विरहतापिता, गोपिकाः ॥

अन्वयः—दिनेषु च सुहृज्जनैः सह वनेषु लीलापरं, मनोभवमनोहरं, रसितवेणुनादामृतम्, अमरीदृशां अमृतपारणादायिनं भवन्तं विचिन्त्य विरहतापिताः गोपिकाः किमु न आलपन् ?

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

दिनेषु च सुहृज्जनैः सह = और दिनों में मित्रों के साथ

वनेषु लीलापरं, मनोभवमनोहरम् = वनों में खेलते मन को लुभाते मनोहर

रसितवेणुनादामृतम् = बाँसुरी पर मृदु नाद सुनाते

अमरीदृशां अमृतपारणादायिनम् = देवस्त्रियों की आँखों में अमृतपान कराते

भवन्तं विचिन्त्य = आपका चिन्तन कर

विरहतापिताः गोपिकाः = विरहताप से गोपिकाओं ने

किमु न आलपन्? = क्या-क्या आलाप नहीं किया।

भावार्थ—और दिनों में मित्रों के साथ वनों में खेलते, मन को लुभाते मनोहर बाँसुरी पर मृदु नाद सुनाते देवस्त्रियों की आँखों को अमृतपान कराते, आपका चिन्तन विरहताप से गोपिकाओं ने क्या-क्या आलाप नहीं किया।

Words-Explanation :

रस् (रसति/ रसित) = To sound, To tinkle, To made noise etc. (As in रसितवेणुनादामृतम्)

अमरी = The female of Gods (देवस्त्री) (As in अमरीदृशां अमृतपारणादायिनम्)

पारणा = Eating after a fast, Eating in general, Fulfilling, Accomplishing etc. (As in अमृतपारणादायिनम्)

[स्वागतछन्दः]

॥ ६ ॥

भोजराजभृतकस्त्वथ कश्चित् कष्टदुष्टपथदृष्टिररिष्टः।
निष्ठुराकृतिरपष्ठुनिनादस्तिष्ठते स्म भवते वृषरूपी ॥ ६ ॥

पदविभागः—भोजराजभृतकः, तु, अथ, कश्चित्, कष्टदुष्टपथदृष्टिः, अरिष्टः, निष्ठुराकृतिः, अपष्ठुनिनादः, तिष्ठते, स्म, भवते, वृषरूपी ॥

अन्वयः—अथ भोजराजभृतकः कष्टदुष्टपथदृष्टिः निष्ठुराकृतिः, अरिष्टः कश्चित् तु, वृषरूपी अपष्ठुनिनादः भवते तिष्ठते स्म ॥

अन्वयार्थः

अथ भोजराजभृतकः = उसके बाद भोजराज (कंस) का भृत्य (सेवक)

कष्टदुष्टपथदृष्टिः = कष्टप्रद कुमार्ग की दृष्टि वाला

निष्ठुराकृतिः अरिष्टः कश्चित् तु = क्रूर आकृति वाला अरिष्ट नामक कोई (असुर) तो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृषरूपी अपष्ठुनिनादः भवते तिष्ठते स्म । = साँड का रूप धारण करके घोर शब्द करके आपके पास आकर खड़ा हो गया ।

भावार्थ—उसके बाद भोजराज (कंस) का सेवक कष्टप्रद कुमार्ग की दृष्टि वाला, क्रूर आकृति वाला, अरिष्ट नामक कोई (असुर) तो साँड (वृषभ) का रूप धारण करके घोर शब्द करके, आपके सम्मुख आकर खड़ा हो गया ।

Words-Explanation :

भृतकः = A hired servant (As in भोजराजभृतकः)

दुष् (दुष्यति, दुष्ट) = To be bad, Corrupt. (दुष्टपथ - Bad Path) (As in कष्टदुष्टपथदृष्टिः)

कष्ट = Bad, Mischievous, Injurious, Painful, Hurtful, etc. (As in कष्टदुष्टपथदृष्टिः)

निष्ठुर = Fierce, Hard, Rugged, Cruel etc. (As in निष्ठुराकृति अपष्ठु)

अपष्ठु = Unfavourable, False, Contrary, Adverse, Opposite etc. (As in अपष्ठुनिनादः)

॥ ७ ॥

शाक्वरोऽथ जगतीधृतिहारी मूर्तिमेष बृहतीं प्रदधानः ।
पङ्क्तिमाशु परिघूर्ण्य पशूनां छन्दसां निधिमवाप भवन्तम् ॥

पदविभागः—शाक्वरः, अथ, जगतीधृतिहारी, मूर्तिम्, एषः, बृहतीम्, प्रदधानः, पङ्क्तिम्, आशु, परिघूर्ण्य, पशूनाम्, छन्दसाम्, निधिम्, अवाप, भवन्तम् ॥

अन्वयः—अथ जगतिधृतिहारी एषः शाक्वरः, बृहतीं मूर्तिं प्रदधानः पशूनां पङ्क्तिं आशु परिघूर्ण्य, छन्दसां निधिं भवन्तम् अवाप ॥

अन्वयार्थः

अथ जगतीधृतिहारी = उसके बाद जगत् को हिलाता

एषः शाक्वरः = यह साँड (वृषभ)

बृहतीं मूर्तिं प्रदधानः = बड़े रूप को धारण करके

पशूनां पङ्क्तिम् आशु परिघूर्ण्य = पशुओं के समूह को तुरन्त इधर-उधर भगाकार

छन्दसां निधिं भवन्तम् अवाप = वेदों की निधि आपके समीप आया ।

भावार्थ—उसके बाद जगत् को हिलाता यह साँड (वृषभ) बड़े रूप को धारण करके पशुओं के समूह को तुरन्त इधर-उधर भगाकर, वेदों की निधि, आपके समीप आया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

शाक्वरः = An ox (As in एषः शाक्वरः)

(औक्षकं/ औक्षं) = A multitude of oxen)

घूर्ण = Moving to & fro, Shaking. (As in आशु परिघूर्ण्य)

॥ ८ ॥

तुङ्गश्रृङ्गमुखमाश्वभियन्तं सङ्गृहय्य रभसादभियं तम् ।
भद्ररूपमपि दैत्यमभद्रं मर्दयन्नमदयः सुरलोकम् ॥

पदविभागः—तुङ्गश्रृंगमुखम्, आशु, अभियन्तम्, सङ्गृहय्य, रभसात्, अभियम्, तम्, भद्ररूपम्, अपि, दैत्यम्, अभद्रम्, मर्दयन्, अमदयः, सुरलोकम् ॥

अन्वयः—तुङ्गश्रृङ्गमुखम् आशु अभियन्तम् अभियं, भद्ररूपम् अपि अभद्रम् तं दैत्यं रभसात् संगृहय्य मर्दयन् (त्वं) सुरलोकम् अमदय ।

अन्वयार्थः

तुङ्गश्रृङ्गमुखम् आशु अभियन्तम् = सींग तथा सिर को ऊपर उठाकर अतिशीघ्र आगे आते

अभियं, भद्ररूपम् अपि अभद्रम् = निडर, अच्छे रूप के होने पर भी बुरे, (साँड होने पर भी साँड नहीं)

तं दैत्यम् रभसात् संगृहय्य = उस असुर को जोर से पकड़कर,

मर्दयन् (त्वं) सुरलोकम् अमदय । = पैर से दबाकर आपने देवलोक में रहने वाले लोगों को सन्तुष्ट किया ।

भावार्थ—सींग तथा सिर को ऊपर उठाकर अतिशीघ्र आगे आते, निडर, अच्छे रूप होने पर भी बुरे (साँड रूप होने पर भी साँड नहीं) उस असुर को जोर से पकड़कर, पैर से दबाकर आपने देवलोक को सन्तुष्ट किया ।

Words-Explanation :

भद्र = Good, Happy, Prosperous etc. (As in भद्ररूपम् अपि अभद्रम्)

भद्रः = A Bullock. (As in भद्ररूपम् अपि अभद्रम्)

रभस् = With force, Violent etc. (As in रभसात् संगृहय्य)

॥ ९ ॥

चित्रमद्य भगवन् वृषघातात् सुस्थिराजनि वृषस्थितिरुर्व्याम् ।
वर्धते च वृषचेतसि भूयान् मोद इत्यभिनुतोऽसि सुरैस्त्वम् ॥

पदविभागः—चित्रम्, अद्य, भगवन्, वृषघातात्, सुस्थिरा, अजनि, वृषस्थितिः, उर्व्याम्, वर्धते, च, वृषचेतसि, भूयान्, मोद, इति अभिनुतः, असि, सुरैः, त्वम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—"भगवन्, अद्य वृषघातात् उर्व्यां वृषस्थितिः सुस्थिरा अजनि। वृषचेतसि भूयान् मोदः वर्धते च। चित्रम्।" इति सुरैः त्वम् अभिनुतः असि।

अन्वयार्थः

"भगवन्, अद्य वृषघातात् = हे भगवन्! आज वृषभ (बैल) को मारने से

उर्व्यां वृषस्थितिः सुस्थिरा अजनि। = पृथ्वी पर वृषस्थिति (धर्मस्थिति) स्थिर हो गयी।

वृषचेतसि भूयान् मोदः वर्धते च। = और इन्द्र के मन में सन्तोष बहुत बढ़ गया।

चित्रम्।" इति सुरैः त्वम् अभिनुतः असि। = आश्चर्य। इस प्रकार देवगणों ने आपकी स्तुति की।

भावार्थ—हे भगवन्! आज वृषभ (बैल) को मारने से पृथ्वी पर धर्म स्थिर हो गया। और इन्द्र के मन में सन्तोष बहुत बढ़ गया। आश्चर्य! इस प्रकार देवगणों ने आपकी स्तुति की।

Words-Explanation :

वृषः = Bull. (As in अद्य वृषघातात्)

वृषः = Morality, Justice, Virtue etc. (As in वृषस्थितिः)

वृषन् = Indra. (वृषम्- A peacock's Plumage) (As in वृषचेतसि)

उर्वी = Earth. (As in उर्व्यां वृषस्थितिः)

॥ १० ॥

औक्षकाणि परिधावत दूरं वीक्ष्यतामयमिहोक्षविभेदी।
इत्थमात्तहसितैस्सह गोपैर्गेहगस्त्वमव वातपुरेश॥

पदविभागः—औक्षकाणि, परिधावत, दूरम्, वीक्ष्यताम्, अयम्, इह, उक्षतिभेदी, इत्थम् आत्तहसितैः, सह, गोपैः, गेहगः, त्वम्, अव, वातपुरीश।

अन्वयः—"औक्षकाणि (यूयं) दूरं परिधावत।" "अयम् इह उक्षविभेदी वीक्ष्यताम्"। इत्थं आत्तहसितैः गोपैः सह गेहगः त्वं वातपुरेश (माम्) अव।

अन्वयार्थः

"औक्षकाणि (यूयं) दूरं परिधावत। = "बैलों! (तुम लोग) दूर भाग जाओ।

अयम् इह उक्षविभेदी वीक्ष्यताम्।" = यह इधर साँडों का वध करने वाला है, देख लें।"

इत्थं आत्तहसितैः गोपैः सह गेहगः त्वं वातपुरेश (माम्) अव। = इस प्रकार हंसते गोपगणों के साथ घर गये हे वातपुरेश! आप (मेरी) रक्षा करें।

भावार्थ—"हे बैलों! (तुम लोग) दूर भाग जाओ। यह इधर बैलों का वध करने वाला है, देख लें।" इस प्रकार हंसी उड़ाकर गोपगणों के साथ घर गये हे गुरुवायुपुराधीश! आप (मेरी) रक्षा करें।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

उक्षन् = Oxen. (As in औक्षकाणि दूरं परिधावत ।)

आत्त = Taken, Assumed, Accepted. (As in आत्तहसितैः)

अव् (अवति, अवित, ऊत) = To Protect, Defend. To Please, To satisfy. (As in वातपुरेश माम् अव)

SOME WORDS WHICH ARE SIMILAR IN ENGLISH & SANSKRIT.

[These words have gone from Sanskrit to English as Sanskrit is the mother of many of the Indo-European languages]

नो - No स्विद् - To Sweat, Perspire

उक्षन् - Oxen फालः - Ploughshare

मशकः मशः - Mosquito बन्धः - Bond

होरा - Hour (In English it is pronounced or "our" but because of Sanskrit origin "H" is retained at the start as "Hour")

अक्षः - An Axis, Axle भर - Bearing

जंगलम् - Jungle, Forest भरः - Burden

आलुः - An owl भ्रातृ - Brother

इतर - The other मातृ - Mother

इरा - Earth मिश्र - Mix

ज्ञानम् - Knowing सूपः - Soup.,Broth

वयनम् - Weaving

झंप,झंपा - Jump, (Also a spring), Leap

नव - New

पितृ - Father

[This is not an exhaustive List]

॥ इति सप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७१

केशिवधवर्णनम्

[इन्द्रवज्रछन्दः]

॥ १ ॥

यत्नेषु सर्वेष्वपि नावकेशी केशी स भोजेशितुरिष्टबन्धुः ।
त्वां, सिन्धुजावाप्य इतीव मत्वा सम्प्राप्तवान् सिन्धुजवाजिरूपः ॥

पदविभागः—यत्नेषु, सर्वेषु, अपि, नावकेशी, केशी, सः, भोजेशितुः, इष्टबन्धुः, त्वाम्, सिन्धुजावाप्यः, इति, इव, मत्वा, सम्प्राप्तवान्, सिन्धुजवाजिरूपः ॥

अन्वयः—सर्वेषु अपि यत्नेषु नावकेशी भोजेशितुः इष्टबन्धुः, सः केशी सिन्धुजावाप्यः इति मत्वा इव सिन्धुजवाजिरूपः त्वां सम्प्राप्तवान् ।

अन्वयार्थः

सर्वेषु अपि यत्नेषु नावकेशी = सब कार्यों में सफलता प्राप्त

भोजेशितुः, इष्टबन्धुः सः केशी = भोजराज (कंस) का मित्र वह केशी

सिन्धुजावाप्यः इति मत्वा इव = सिन्धु में उत्पन्न लोगों को शीघ्र प्राप्त हैं (आप) इस प्रकार मानकर जैसे

सिन्धुजवाजिरूपः त्वां सम्प्राप्तवान् । = सिन्धु प्रदेश में उत्पन्न घोड़े का रूप लेकर आप के समीप आया ।

भावार्थ—सब कार्यों में सफलता प्राप्त भोजराज (कंस) का मित्र वह केशी सिन्धु में उत्पन्न लोगों को (आप) शीघ्र प्राप्त होते हैं, इस प्रकार मानकर जैसे, सिन्धु प्रदेश में उत्पन्न घोड़े का रूप लेकर आपके पास आया ।

Words-Explanation :

अवाप्य = Attainable. (As in सिन्धुजावाप्य—)

अवकेशिन् = Barren, Unfruitful. (न+अवकेशी-नावकेशी) (As in यत्नेषु नावकेशी)

सिन्धु = Ocean/Sind Province. (As in सिन्धुजावाप्य/ सिन्धुजवाजिरूपः)

वाजिन् = A Horse. (As in सिन्धुजवाजिरूपः)

सिन्धुजा = Born from the ocean (Lakshmi)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिन्धुजम् = Born in the land of Sind

॥ उपजातिछन्दः ॥

॥ २ ॥

गन्धर्वतामेष गतोऽपि रूक्षैर्नादैः समुद्वेजितसर्वलोकः ।
भवद्विलोकावधि गोपवाटीं प्रमर्द्य पापः पुनरापतत् त्वाम् ॥

पदविभागः—गन्धर्वताम्, एषः, गतः, अपि, रूक्षैः, नादैः, समुद्वेजितसर्वलोकः, भवद्विलोकावधि, गोपवाटीम्, प्रमर्द्य, पापः, पुनः, आपतत्, त्वाम् ॥

अन्वयः—एषः पापः गन्धर्वतां गतः अपि रूक्षैः नादैः समुद्वेजितसर्वलोकः भवद्विलोकावधि गोपवाटीं प्रमर्द्य पुनः त्वाम् आपतत् ॥

अन्वयार्थः

एषः पापः गन्धर्वतां गतः अपि = वह पापी, गन्धर्व होने पर भी

रूक्षैः नादैः = भयंकर रूखे शब्दों से

समुद्वेजितसर्वलोकः = सब लोगों को उत्तेजित कराकर

भवद्विलोकावधि = आपको देखने की अवधि तक

गोपवाटीं प्रमर्द्य पुनः = व्रज में तोड़ फोड़ करके, बाद में

त्वाम् आपतत् । = आपके समीप आ पड़ा ।

भावार्थ—वह पापी, गन्धर्व होने पर भी भयंकर रूखे शब्दों से सब लोगों को उत्तेजित कराकर, आपको देखने की अवधि तक व्रज में तोड़ फोड़ करके, बाद में आपके समीप आ पड़ा ।

Words-Explanation :

उद्वेजनम् = Agitation, Anxeity, Inflicting pain, Torture etc. (As in समुद्वेजितसर्वलोकः)

गन्धर्वः = A celestial musician, A horse etc. (As in गन्धर्वतां गतः अपि)

रूक्ष = Rough, Harsh, (As in रूक्षैः नादैः)

॥ ३ ॥

तार्क्ष्यार्पिताङ्घ्रेस्तव तार्क्ष्य एष चिक्षेप वक्षोभुवि नाम पादम् ।
भृगोः पदाघातकथां निशम्य स्वेनापि शक्यं तदितीव मोहात् ॥

पदविभागः—तार्क्ष्यार्पिताङ्घ्रेः, तव, तार्क्ष्यः, एषः, चिक्षेप, वक्षोभुवि, नाम, पादम्, भृगोः, पादघातकथाम्, निशम्य, स्वेन, अपि, शक्यम्, तत्, इति, इव, मोहात् ॥

Funding by IKS-MoE

पदविभागः—एष्यामि, इति, विमुक्तया, अपि, भगवन्, आलेपदात्र्या, तया, दूरात्, कातरया, निरीक्षितगतिः, त्वम्, प्राविशः, गोपुरम्, आघोषानुमितत्वदागममहाहर्षोल्ललद्देवकीवक्षोजप्रगलत्पयोरसमिषात्, त्वत्, कीर्तिः, अन्तर्गता ।

अन्वयः—भगवन्, एष्यामि इति विमुक्तया अपि दूरात् कातरया तया आलेपदात्र्या निरीक्षितगतिः त्वं गोपुरं प्राविशः । आघोषानुमितत्वदागममहाहर्षोल्ललद्देवकीवक्षोजप्रगलत्पयोरसमिषात् त्वत्कीर्तिः अन्तर्गता ॥

अन्वयार्थः

भगवन्, एष्यामि इति विमुक्तया अपि, दूरात् कातरया तया आलेपदात्र्या निरीक्षितगतिः त्वम् = भगवन्, "मैं आती हूँ" इस प्रकार कहकर, जाने को कहने पर भी विरह से पीड़ित उस मालिश वाली की देखते-देखते, आपने

गोपुरं प्राविशः । = गोपुर में प्रवेश किया ।

आघोषानुमितत्वदागममहाहर्षोल्ललद्देवकीवक्षोजप्रगलत्पयोरसमिषात् = लोगों के शब्दों से आप के आने की वार्ता को जानकर अत्यधिक आनन्द से देवकी के स्तनों से निकलते दूध से स्पर्धा करते जैसे

त्वत्कीर्तिः अन्तर्गता । = आपकी कीर्ति अन्दर को बह गयी ।

भावार्थ—हे भगवन्, "मैं आती हूँ" इस प्रकार कहकर, जाने को कहने पर भी विरह से पीड़ित उस मालिश वाली को देखते-देखते, आपने गोपुर में प्रवेश किया । लोगों के शब्दों से आपके आने की वार्ता को जानकर, अत्यधिक आनन्द से देवकी के स्तनों से निकलते दूध से स्पर्धा करते जैसे आपकी कीर्ति अन्दर को बह गयी ।

Words-Explanation :

उल्लोलः = Large wave or surge. (As in हर्षोल्ललत्)

आलेप/ आलेपनम् = Anointing, Smearing (As in आलेपदात्र्या तया)

कातर = Cowardly, Distressed, Confused, Agitated etc. (As in कातरया निरीक्षितगतिः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुमितिः = Inference from given premises, The knowledge that arises from deduction or syllogistic reasoning. (As in घोषानुमित त्वदागम)

वक्षोजः, वक्षोरुहः = The female breast (As in देवकीवक्षोजप्रगलत्)

गल् (गलति, गलित) = To drop, Drip, Ooze, Trickle etc. (As in देवकीवक्षोजप्रगलत्)

मिष् (मिषति) = To rival, Emulate etc. (As in पयोरसमिषात्)

॥ ८ ॥

आविष्टो नगरीं महोत्सववतीं कोदण्डशालां व्रजन्
माधुर्येण नु तेजसा नु पुरुषैर्दूरेण दत्तान्तरः ।
स्रग्भिर्भूषितमर्चितं वरधनुर्मामेति वादात् पुरः
प्रागृहणाः समरोपयः किल समाक्राक्षीरभाङ्क्षीरपि ॥

पदविभागः—आविष्ट, नगरीम्, महोत्सववतीम्, कोदण्डशालाम्, व्रजन्, माधुर्येण, नु, तेजसा, नु, पुरुषैः, दूरेण, दत्तान्तरः, स्रग्भिः, भूषितम्, अर्चितम्, वरधनुः, मा, मा, इति, वादात्, पुरः, प्रागृहणाः, समरोपयः, किल, समाक्राक्षीः, अभाङ्क्षीः, अपि ।

अन्वयः—महोत्सववतीं नगरीं आविष्टः (त्वं) कोदण्डशालां व्रजन्, माधुर्येण नु, तेजसा नु, पुरुषैः दूरेण दत्तान्तरः, स्रग्भिः भूषितम् अर्चितं वरधनुः, मा, मा, इति वादात् पुरः, प्रागृहणाः, समरोपयः, समाक्राक्षीः अभाङ्क्षीः अपि किल ।

अन्वयार्थः

महोत्सववतीं नगरीं आविष्टः (त्वं) = महोत्सव की नगरी (मथुरा) में प्रवेश करके (आपने)

कोदण्डशालां व्रजन् = कोदण्ड (धनु) शाला में जाकर

माधुर्येण नु तेजसा नु पुरुषैः दूरेण दत्तान्तरः = (आपकी) माधुर्य या तेज के प्रभाव से कोदण्ड की रक्षा करते लोगों के दूर होने पर आपके अन्दर जाने पर

स्रग्भिः भूषितं अर्चितं वरधनुः = माला से अलंकृत तथा पूजित श्रेष्ठ धनुष है

मा, मा, इति वादात् पुरः = मत करो, मत करो इस प्रकार कहने से पूर्व

प्रागृहणाः समरोपयः समाक्राक्षीः अभाङ्क्षीः अपि किल । = (हाथ में) लेकर, जोड़कर, खींचकर तोड़ भी दिया ।

भावार्थ—महोत्सव की नगरी (मथुरा) में प्रवेश करके (आपने), कोदण्ड (धनुष) शाला में प्रवेश करके (आपकी) माधुर्य से या (आपके) तेज के प्रभाव से, कोदण्ड की रक्षा करते लोग दूर हटकर (आपके) अन्दर जाने पर माला से अलंकृत तथा पूजित श्रेष्ठ धनुष है मत करो, मत करो, इस प्रकार कहने से पूर्व, (हाथ में) लेकर, जोड़कर, खींचकर तोड़ भी दिया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

आक्रान्तः = Seized, Taking possession of, Overcome etc. (As in समाक्राक्षीः)

रोपणम् = The act of erecting, Setting up or raising. (As in समारोपयः)

भङ्गः = Breaking. (As in अभाङ्क्षीः)

स्रग्विन् = Wearing a garland. (As in स्रग्भिः भूषितम्)

॥ ९ ॥

श्वः कंसक्षपणोत्सवस्य पुरतः प्रारम्भतूर्योपम-
श्चापध्वम्समहाध्वनिस्तव विभो, देवानरोमाञ्चयत् ।
कम्सस्यापि च वेपथुस्तदुदितः कोदण्डखण्डद्वयी-
चण्डाभ्याहतरक्षिपूरुषरवैरुत्कूलितोऽभूत् त्वया ॥

पदविभागः—श्वः, कम्सक्षपणोत्सवस्य, पुरतः, प्रारम्भतूर्योपमः, चापध्वम्समहाध्वनिः, तव, विभो, देवान्, अरोमाञ्चयत्, कम्सस्य, अपि, च, वेपथुः, तदुदितः, कोदण्डखण्डद्वयीचण्डाभ्याहतरक्षिपूरुषरवैः, उत्कूलितः, अभूत्, त्वया ॥

अन्वयः—विभो, श्वः कम्सक्षपणोत्सवस्य पुरतः, प्रारम्भतूर्योपमः तव चापध्वम्समहाध्वनिः देवान् अरोमाञ्चयत् । कम्सस्य अपि च तदुदितः वेपथुः, कोदण्डखण्डद्वयीचण्डाभ्याहतरक्षिपूरुषरवैः त्वया उत्कूलितः अभूत् ।

अन्वयार्थः

विभो, श्वः कम्सक्षपणोत्सवस्य पुरतः = हे विभो ! कल के कंस-वध के पूर्व के

प्रारम्भतूर्योपमः तव चापध्वम्स महाध्वनिः देवान अरोमाञ्चयत् । = पूर्वाभ्यास जैसे आपके धनुष को तोड़ने की ध्वनि ने देवों को रोमाञ्चित किया ।

कंसस्य अपि च तदुदितः वेपथुः = उसको सुनकर उदित कंस का भी कम्पन,

कोदण्डखण्डद्वयीचण्डाभ्याहतरक्षिपूरुषरवैः = कोदण्ड के दोनों टुकड़ों से मारे गये कोदण्डरक्षकों के क्रन्दन से,

त्वया उत्कूलितः अभूत् । = आप द्वारा असीमित कर दिया गया ।

भावार्थ—हे विभो ! कल के होने वाले कंस-वध के पूर्व के पूर्वाभ्यास जैसे आपके धनुष को तोड़ने की ध्वनि ने देवों को रोमाञ्चित किया । उसको सुनकर उदित कंस का भी कम्पन कोदण्ड के दोनों टुकड़ों से मारे गये कोदण्डरक्षकों के क्रन्दन से आप द्वारा असीमित कर दिया गया ।

Words-Explanation :

तूर्य = A kind of musical instrument (As in प्रारम्भतूर्योपमः)

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चण्ड = Fierce, Violent. (As in चण्डाभ्याहत)

अभ्याहननम् = Striking, Killing, Hurting etc. (As in चण्डाभ्याहत)

रवः = A cry, Shriek, Scream etc. (As in रक्षिपूरुषरवैः)

उत्कूलित = Breaching the bank, Without limit. (As in त्वया उत्कूलितः अभूः)

क्षपणः = Destroying, Suppressing etc. (As in कम्सक्षपणोत्सवस्य)

वेपथुः = Tremour, Trembling. (As in तदुदित वेपथुः)

॥ १० ॥

शिष्टैर्दुष्टजनैश्च दृष्टमहिमा प्रीत्या च भीत्या ततः
सम्पश्यन् पुरसम्पदं प्रविचरन् सायं गतो वाटिकाम् ।
श्रीदाम्ना सह राधिकाविरहजं खेदं वदन् प्रस्वप-
न्नानन्दन्नवतारकार्यघटनाद्वातेश, संरक्ष माम् ॥

पदविभागः—शिष्टैः, दुष्टजनैः, च, दृष्टमहिमा, प्रीत्या, च, भीत्या, ततः, सम्पश्यन्, पुरसम्पदम्, प्रविचरन्, सायम्, गतः, वाटिकाम्, श्रीदाम्ना, सह, राधिकाविरहजम्, खेदम्, वदन्, प्रस्वपन्, आनन्दन्, अवतारकार्यघटनात्, वातेश, संरक्ष, माम् ॥

अन्वयः—ततः शिष्टैः प्रीत्या च दुष्टजनैः भीत्या च दृष्टमहिमा त्वं, पुरसम्पदं सम्पश्यन् प्रविचरन्, सायं वाटिकां गतः । श्रीदाम्ना सह राधिकाविरहजं खेदं वदन् प्रस्वपन्, अवतारकार्यघटनात् आनन्दन् वातेश, मां संरक्ष ।

अन्वयार्थः

ततः शिष्टैः प्रीत्या च दुष्टजनैः भीत्या च दृष्टमहिमा त्वम् = बाद में सज्जनों ने प्रीति से तथा दुर्जनों ने भीति से देखे माहात्म्य के आप

पुरसम्पदं सम्पश्यन् प्रविचरन् सायं वाटिकां गतः । = मथुरा नगर की सम्पत्तियों को देखकर, चलकर शाम को उद्यान में पहुंचे ।

श्रीदाम्ना सह राधिकाविरहजं खेदं वदन् प्रस्वपन् = श्रीदाम के साथ राधा न होने के दुःख को प्रकट करके सोते समय

अवतारकार्यघटनात् आनन्दन् = अवतार के कार्य पूर्ण होने के अवसर प्राप्ति से आनन्दित

वातेश, मां संरक्ष । = गुरुवायुपुराधीश, मेरी रक्षा करें ।

भावार्थ—बाद में सज्जनों ने प्रीति से तथा दुर्जनों ने भय से देखे माहात्म्य के आप, मथुरा नगर की सम्पत्तियों को देखकर, चलकर शाम को उद्यान में पहुंचे । श्रीदाम के साथ राधा न होने के दुःख को प्रकट करके सोते समय, अवतार के कार्य पूर्ण होने के अवसर प्राप्ति से आनन्दित गुरुवायुपुराधीश, मेरी रक्षा करें ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

वाटिका = Garden. (As in सायं वाटिकां गतः)

पुरम् = A town, A city. (As in पुरसम्पदं सम्पश्यन्)

॥ इति चतुःसप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७५

कंसवधवर्णनम्

[स्रग्धरछन्दः]

॥ १ ॥

प्रातः सन्त्रस्तभोजक्षितिपतिवचसा प्रस्तुते मल्लतूर्ये
सङ्घे राज्ञां च मञ्चानभिययुषि गते नन्दगोपेऽपि हर्म्यम् ।
कम्से सौधाधिरूढे त्वमपि सहबलः सानुगश्चारुवेषो
रङ्गद्वारं गतोऽभूः कुपितकुवलयापीडनागावलीढम् ॥

पदविभागः—प्रातः, सन्त्रस्तभोजक्षितिपतिवचसा, प्रस्तुते, मल्लतूर्ये, सङ्घे, राज्ञाम्, च, मञ्चान्, अभिययुषि, गते, नन्दगोपे, अपि, हर्म्यम्, कम्से, सौधाधिरूढे, त्वम्, अपि, सहबलः, सानुगः, चारुवेषः, रङ्गद्वारम्, गतः, अभूः, कुपितकुवलयापीडनागावलीढम् ॥

अन्वयः—प्रातः सन्त्रस्तभोजक्षितिपतिवचसा मल्लतूर्ये प्रस्तुते (सति), राज्ञां सङ्घे च मञ्चान् अभिययुषि । नन्दगोपे अपि हर्म्यं गते (सति) कम्से सौधाधिरूढे (सति) त्वम् अपि सहबलः सानुगः चारुवेषः कुपितकुवलयापीडनागावलीढं रङ्गद्वारं गतः अभूः ॥

अन्वयार्थः

प्रातः सन्त्रस्तभोजक्षितिपतिवचसा = प्रातःकाल में भयभीत कंस के आदेश द्वारा

मल्लतूर्ये प्रस्तुते (सति) = मल्लयुद्ध के ढोल बजाने पर

राज्ञां सङ्घे च मञ्चान् अभिययुषि । = राजाओं के समूह भी मंच पर आये ।

नन्दगोपे अपि हर्म्यं गते (सति) = नन्दगोप के भी महल में जाने पर और

कम्से सौधाधिरूढे (सति) = कंस के राजमहल में आसीन होने पर,

त्वम् अपि सहबलः सानुगः चारुवेषः = आप भी बलराम के साथ, अनुचरों को साथ लेकर सुन्दर वेषभूषा से विभूषित

कुपितकुवलयापीडनागावलीढं = क्रुद्ध कुवलयापीड (हाथी) द्वारा रोके गये

रङ्गद्वारं गतः अभूः । = रंगद्वार पर आये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—प्रातःकाल में भयभीत कंस के आदेश द्वारा मल्लयुद्ध के ढोल बजाने पर, राजाओं के समूह भी मंच पर आये। नन्दगोप के भी महल में जाने पर और कंस के राजमहल में आसीन होने पर, आप भी बलराम के साथ, अनुचरों को साथ लेकर सुन्दर वेषभूषा से विभूषित क्रुद्ध कुवलयापीड हाथी द्वारा रोके गये रंगद्वार पर आये।

Words-Explanation :

अवलीढ = Surrounded on all sides (As in कुवलयापीडनागावलीढम्)

सौध = A white washed mansion, Any great mansion, A palace etc. (As in सौधाधिरूढे)

अधिरूढ = Mounted, Ascended etc. (As in सौधाधिरूढे)

हर्म्यम् = Mansion, A Palace. (As in हर्म्यं गते)

॥ २ ॥

पापिष्ठापेहि मार्गाद् द्रुतमिति वचसा निष्ठुरक्रुद्धबुद्धे-
रम्बष्ठस्य प्रणोदादधिकजवजुषा हस्तिना गृह्यमाणः।
केलीमुक्तोऽथ गोपीकुचकलशचिरस्पर्धिनं कुम्भमस्य
व्याहत्यालीयथास्त्वं चरणभुवि पुनर्निगतो वल्गुहासी ॥

पदविभागः—पापिष्ठ, अपेहि, मार्गात्, द्रुतम्, इति, वचसा, निष्ठुरक्रुद्धबुद्धेः, अम्बष्ठस्य, प्रणोदात्, अधिकजवजुषा, हस्तिना, गृह्यमाणः, केलीमुक्तः, अथ, गोपीकुचकलशचिरस्पर्धिनम्, कुम्भम्, अस्य, व्याहत्य, आलीयथाः, त्वम्, चरणभुवि, पुनः, निर्गतः, वल्गुहासी।

अन्वयः—"पापिष्ठ, मार्गात् द्रुतम् अपेहि", इति वचसा निष्ठुरक्रुद्धबुद्धेः अम्बष्ठस्य प्रणोदात् अधिकजवजुषा हस्तिना गृह्यमाणः त्वम् केलीमुक्तः, गोपीकुचकलशचिरस्पर्धिनम् अस्य कुम्भं व्याहत्य, चरणभुवि अलीयथाः, पुनः वल्गुहासी निर्गतः ॥

अन्वयार्थः

"पापिष्ठ, मार्गात् द्रुतम् अपेहि", इति वचसा निष्ठुरक्रुद्धबुद्धेः अम्बष्ठस्य प्रणोदात् = "हे पापी ! मार्ग से तुरन्त हटो", इस प्रकार के (आपके) वचनों से क्रुद्ध हाथी के पालक की प्रेरणा से

अधिकजवजुषा हस्तिना गृह्यमाणः त्वम् केलीमुक्तः = अति शीघ्रता से हाथी द्वारा पकड़े गये आप तुरन्त बहुत आसानी से मुक्त होकर

गोपीकुचकलशचिरस्पर्धिनम् अस्य कुम्भम् = गोपियों के स्तनों से बहुत काल से स्पर्धा करते उसके (हाथी के) मस्तक को

व्याहत्य चरणभुवि अलीयथाः पुनः वल्गुहासी निर्गतः = मारकर (उसके) पैरों के बीच में छिपकर, फिर मन्दहास करके बाहर आये।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—"हे पापी, मार्ग से तुरन्त हटो", इस प्रकार के (आपके) वचनों से क्रुद्ध हाथी के पालक की प्रेरणा से, अति शीघ्रता से हाथी द्वारा पकड़े गये आप तुरन्त खेल-खेल में मुक्त होकर, गोपियों के स्तनों से बहुत समय तक स्पर्धा करते उस (हाथी) के मस्तक को मारकर (उसके) पैरों के बीच में छिपकर, फिर मन्दहास करके बाहर निकले।

Words-Explanation :

प्रणेदः = Directing, Driving (As in अम्बष्ठस्य प्रणोदात्)

जवन = Swift, Quick, (As in जवजुषा)

वल्गु = Lovely, Beautiful

जुष् (जुषते, जुष्ट) = To be pleased, Delighted etc.

ली (लयति) = To Melt, To lie or rest on, To hide (As in अलीयथाः)

केलिः = Play, (Also केली) - Sport etc. (As in त्वम् केलीमुक्तः)

॥ ३ ॥

हस्तप्राप्योऽप्यगम्यो झटिति मुनिजनस्येव धावन् गजेन्द्रम्
क्रीडन्नापात्य भूमौ पुनरभिपततस्तस्य दन्तं सजीवम्।
मूलादुन्मूल्य तन्मूलगमहितमहामौक्तिकान्यात्ममित्रे
प्रादास्त्वं "हारमेभिर्ललितविरचितं राधिकायै दिशेति"॥

पदविभागः—हस्तप्राप्यः, अपि, अगम्यः, झटिति, मुनिजनस्य, इव, धावन्, गजेन्द्रम्, क्रीडन्, आपात्य, भूमौ, पुनः, अभिपततः, तस्य, दन्तम्, सजीवम्, मूलात्, उन्मूल्य, तन्मूलगमहितमहामौक्तिकानि, आत्ममित्रे, प्रादाः, त्वम्, हारम्, एभिः, ललितविरचितम्, राधिकायै, दिश, इति।

अन्वयः—त्वं मुनिजनस्य अपि हस्तप्राप्यः अपि अगम्यः धावन् क्रीडन् गजेन्द्रं झटिति भूमौ आपात्य, पुनः अभिपततः तस्य दन्तं सजीवं मूलात् उन्मूल्य, तन्मूलगमहितमहामौक्तिकानि "एभिः ललितविरचितं हारं राधिकायै दिश" इति (उक्त्वा) आत्ममित्रे प्रादाः॥

अन्वयार्थः

त्वं मुनिजनस्य अपि हस्तप्राप्यः अपि = मुनिजनों के हस्तंगत होने पर भी दुर्लभ आपने

अगम्यः धावन् क्रीडन् गजेन्द्रम् झटिति भूमौ आपात्य = दौड़ते हुए, खेलते हुए गजेन्द्र को अतिशीघ्र पृथ्वी पर गिराकर

पुनः अभिपततः तस्य दन्तं सजीवं मूलात् उन्मूल्य = फिर से आपने उस (हाथी) के दाँत को (उसके) प्राण के साथ मूल से निकालकर

Funding by IKS-MoE

तन्मूलगमहितमहामौक्तिकानि = उसके अन्दर पड़े श्रेष्ठ मोतियों को

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"एभिः ललितविरचितं हारं राधिकायै दिश" इति = "इन से सुन्दर रूप से बने हार राधा को दे दो" इस प्रकार (कहते हुए)

आत्ममित्रे प्रादाः । = अपने मित्र को दिया ।

भावार्थ—मुनिजनों के हस्तंगत होने पर भी दुर्लभ आपने दौड़ते हुए, खेलते हुए गजेन्द्र को अतिशीघ्र पृथ्वी पर गिराकर, फिर से आपने उस (हाथी) के दाँत को (उसके) प्राण के साथ जड़ से निकालकर, उसके अन्दर पड़े श्रेष्ठ मोतियों को "इन से सुन्दर रूप से बने हार राधा को दे दो", इस प्रकार कहते हुए अपने मित्र को दिया ।

Words-Explanation :

झटिति = Quickly, At once (As in अगम्यः झटिति)

ललित = Elegant, Beautiful, Pleasing, Charming, Fine, Agreeable etc. (As in ललितविरचितं हारम्)

॥ ४ ॥

गृह्णानं दन्तमंसे युतमथ हलिना रङ्गमङ्गाविशन्तम्
त्वां मङ्गल्याङ्गभङ्गीरभसहृतमनोलोचना वीक्ष्य लोकाः ।
"हंहो धन्यो हि नन्दो, नहि, नहि, पशुपालाङ्गना, नो, यशोदा,
नो नो, धन्येक्षणाः स्मस्त्रीजगति वयमे" वेति सर्वे शशम्सुः ॥

पदविभागः—गृह्णानम्, दन्तम्, अंसे, युतम्, अथ, हलिना, रङ्गम्, अङ्ग, आविशन्तम्, त्वाम्, मङ्गल्याङ्गभङ्गीरभसहृत-मनोलोचनाः, वीक्ष्य, लोकाः, हंहो, धन्यः, हि, नन्दः, नहि, पशुपालाङ्गनाः, नो, यशोदा, नो, नो, धन्येक्षणाः, स्मः, स्त्रीजगति, वयम्, एव, इति, सर्वे, शशम्सुः ।

अन्वयः—अङ्ग, अथ दन्तं अंसे गृह्णानम्, हलिना युतं रङ्गम् आविशन्तं त्वां वीक्ष्य मङ्गल्याङ्गभङ्गीरभसहृतमनोलोचनाः "हंहो, नन्दः हि धन्यः, नहि, नहि, पशुपालाङ्गनाः, नो यशोदा, नो, नो, वयम् एव धन्येक्षणाः स्मः ।" इति स्त्रीजगति सर्वे शशम्सुः ।

अन्वयार्थः

अङ्ग, अथ दन्तं अम्से गृह्णानम् = हे भगवन् ! उसके बाद दाँत को कन्धे पर लेकर

हलिना युतं रङ्गम् आविशन्तं त्वां वीक्ष्य = बलराम के साथ रंग में प्रवेश करते आपको देखकर

मङ्गल्याङ्गभङ्गीरभसहृतमनोलोचनाः = मंगलमय शरीर की शोभा से आँख तथा मन से आकर्षित

"हंहो, नन्दः, हिधन्यः, = "वाह नन्द ही धन्य हैं,

नहि नहि पशुपालाङ्गनाः, = नहीं, नहीं, गोपस्त्रियां हैं,

नो, यशोदा, नो, नो, वयम् एव = नहीं यशोदा, नहीं, नहीं हम लोग ही

धन्येक्षणाः स्मः ।" = धन्य आँखों वाले हैं ।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति स्त्रीजगति सर्वे शशम्सुः । = इस प्रकार स्त्री-जगत् में सबने कहा ।

भावार्थ—हे भगवन् ! उसके बाद, दाँत को कन्धे पर लेकर, बलराम से साथ रंग में प्रवेश करते आपको देखकर, मंगलमय शरीर की कान्ति से आँख तथा मन से आकर्षित, "वाह, नन्द ही धन्य हैं, नहीं, नहीं, गोपस्त्रियां हैं, नहीं यशोदा, नहीं नहीं, हम लोग ही धन्य आँखों वाले हैं ।" इस प्रकार स्त्री-जगत् में सबने कहा ।

Words-Explanation :

हंहो = A vocative particle meaning "Ho" "Oh" (As in हंहो नन्दः हि धन्यः)

अङ्ग = Well Sir, (As in अङ्ग, अथ दन्तं अंसे—)

अंसः = Shoulder, Shoulder Blade. (As in दन्तं अंसे गृह्णानम्)

लोचनम् = Sight, Seeing etc. (As in मनोलोचनाः)

ईक्षणम् = Seeing, Beholding. (As in धन्येक्षणाः)

रभस = Strong, Intense

॥ ५ ॥

पूर्णं ब्रह्मैव साक्षान्निरवधि परमानन्दसान्द्रप्रकाशम्
गोपेषु त्वं व्यलासीर्न खलु वहुजनैस्तावदावेदितोऽभूः ।
दृष्ट्वाथ त्वां तदेदं प्रथममुपगते पुण्यकाले जनौघाः
पूर्णानन्दा विपापाः सरसमभिजगुस्त्वत्कृतानि स्मृतानि ॥

पदविभागः—पूर्णम्, ब्रह्म, एव, साक्षात्, निरवधि, परमानन्दसान्द्रप्रकाशम्, गोपेषु, त्वम्, व्यलासीः, न, खलु, बहुजनैः, तावत्, आवेदितः, अभूः, दृष्ट्वा, अथ, त्वाम्, तदा, इदम्, प्रथमम्, उपगते, पुण्यकाले, जनौघाः, पूर्णानन्दाः, विपापाः, सरसम्, अभिजगुः, त्वत्कृतानि, स्मृतानि ।

अन्वयः—पूर्णं निरवधि परमानन्दसान्द्रप्रकाशं ब्रह्म एव त्वं गोपेषु साक्षात् व्यलासीः । बहुजनैः तावत् न खलु (त्वाम्) आवेदितः अभूः । अथ तदा पुण्यकाले उपगते (सति), इदं प्रथमं त्वां दृष्ट्वा जनौघाः विपापाः, पूर्णानन्दाः स्मृतानि त्वत्कृतानि सरसम् अभिजगुः ॥

अन्वयार्थः

पूर्णं निरवधि परमानन्दसान्द्रप्रकाशम् ब्रह्म एव त्वम् = पूर्ण, परमानन्द तेजोमय प्रकाश रूपी परब्रह्म, आप

गोपेषु साक्षात् (व्यलासीः) । = गोपों के बीच में प्रत्यक्ष रूप में रहे ।

बहुजनैः तावत् न खलु (त्वाम्) आवेदितः अभूः । = साधारण लोग तब तक आपको नहीं समझ पाये ।

अथ तदा पुण्यकाले उपगते (सति) ; = बाद में उस समय पुण्यकाल आने पर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदं प्रथमं त्वां दृष्ट्वा जनौघाः = अब प्रथम बार आपको देखकर जन समूह ने

विपापाः, पूर्णानन्दाः स्मृतानि त्वत्कृतानि सरसम् अभिजगुः । = पाप नष्ट होकर, पूर्ण आनन्द का अनुभव करके, स्मृति में आयी आपकी लीलाओं को रुचिपूर्वक कहा ।

भावार्थ—पूर्ण, परमानन्द तेजोमय प्रकाश रूपी परब्रह्म, आप लोगों के मध्य प्रत्यक्ष रूप में विराजमान थे । साधारण जन-समूह तब तक आपको नहीं समझ पाये । बाद में उस समय, पुण्यकाल आने पर अब प्रथम बार आपको देखकर (मथुरा के) जन-समूह ने, पाप नष्ट होकर, पूर्ण आनन्द का अनुभव करके, स्मृति में आयी आपकी लीलाओं को रुचिपूर्वक कहा ।

Words-Explanation :

सान्द्र = Close, Compact, Intense, Strong etc. (As in परमानन्दसान्द्र-प्रकाशम्)

सरस = Full of love. (As in सरसम् अभिजगुः)

॥ ६ ॥

चाणूरो मल्लवीरस्तदनु नृपगिरा मुष्टिको मुष्टिशाली
त्वां रामं चाभिपेदे झटझटिति मिथो मुष्टिपातातिरूक्षम् ।
उत्पातापातनाकर्षणविविधरणान्यासतां तत्र चित्रम्
मृत्योः प्रागेव मल्लप्रभुरगमदयं भूरिशो बन्धमोक्षान् ॥

पदविभागः—चाणूरः, मल्लवीरः, तदनु, नृपगिरा, मुष्टिकः, मुष्टिशाली, त्वाम्, रामम्, च, अभिपेदे, झटझटिति, मिथोमुष्टिपातातिरूक्षम्, उत्पातापातनाकर्षणविविधरणानि, आसताम्, तत्र, चित्रम्, मृत्योः, प्राक्, एव, मल्लप्रभुः, अगमत्, अयम्, भूरिशः, बन्धमोक्षान् ॥

अन्वयः—तदनु नृपगिरा मल्लवीरः चाणूरः त्वां, मुष्टिशाली मुष्टिकः रामं च, झटझटिति मिथोमुष्टिपातातिरूक्षम् अभिपेदे । उत्पातापातनाकर्षणविविधरणानि, आसताम्, तत्र अयं मल्लप्रभूः मृत्योः प्राक् एव भूरिशः वन्धमोक्षान् अगमत्, चित्रम् ।

अन्वयार्थः

तदनु नृपगिरा मल्ल्वीरः चाणूरः त्वां, मुष्टिशाली मुष्टिकः रामं च = उसके बाद राजा के आदेश से मल्लवीर चाणूर आपसे, तथा मुष्टियुद्ध में बलराम से

झटझटिति मिथोमुष्टिपातातिरूक्षम् अभिपेदे । = शीघ्र ही आपस में एक दूसरे को मुट्ठी से जोर से मारते हुए लड़े ।

उत्पातापातनाकर्षणविविधरणानि आसताम्, = ऊपर को उठाकर, नीचे गिराकर, खींचकर (इस प्रकार) विविध प्रकार के युद्धों से लड़े

तत्र अयं मल्लप्रभुः मृत्योः प्राक् एव भूरिशः वन्धमोक्षान् अगमत्, चित्रम् । = वहाँ मल्लयुद्ध में उस वीर ने, मृत्यु के पूर्व ही कई बार बन्ध (पकड़ना) और मोक्ष (छोड़ना) का अनुभव किया, आश्चर्य !

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—उसके बाद राजा (कंस) के आदेश से मल्लवीर चाणूर आपसे, तथा मुष्टियुद्ध में श्रेष्ठ मुष्टिक बलराम से शीघ्र ही आपस में एक-दूसरे को मुट्ठी द्वारा जोर से मारकर लड़े। ऊपर को उठाकर, नीचे गिराकर, खींचकर (इस प्रकार) विविध प्रकार के युद्धों से लड़े वहाँ मल्लयुद्ध में उस वीर ने, मृत्यु के पूर्व ही कई बार बन्ध (पकड़ना) और मोक्ष (छोड़ना) का अनुभव किया, आश्चर्य !

Words-Explanation :

मिथस् = Mutually, Reciprocally, To each other etc. (As in मिथोमुष्टिपातातिरूक्षम्)

रूक्ष = Rough, Harsh. (As in मिथोमुष्टिपातातिरूक्षम्)

भूरि = Much, Numerous, Frequent, Abundant. (As in एव भूरिशः बन्धमोक्षान्—)

प्राक् = Before, At first, Previously etc. (usually used with Ablative) (As in प्राक् एव भूरिशः—)

॥ ७ ॥

"हा धिक् कष्टं, कुमारौ सुललितवपुषौ मल्लवीरौ कठोरौ
न द्रक्ष्यामो, व्रजामस्त्वरित"मिति जने भाषमाणे तदानीम्।

चाणूरं तं करोद्भ्रामणविगलदसुं पोथयामासिथोर्व्याम्
पिष्टोऽभून्मुष्टिकोऽपि द्रुतमथ हलिना नष्टशिष्टैर्दधावे॥

पदविभागः—हा, धिक्, कष्टम्, कुमारौ, सुललितवपुषौ, मल्लवीरौ, कठोरौ, न, द्रक्ष्यामः, व्रजामः, त्वरितम्, इति, जने, भाषमाणे, तदानीम्, चाणूरम्, तम्, करोद्भ्रामणविगलदसुम्, पोथयामासिथ, उर्व्याम्, पिष्टः, अभूत्, मुष्टिकः, अपि, द्रुतम्, अथ, हलिना, नष्टशिष्टैः, दधावे॥

अन्वयः—"हा, धिक्, कष्टं कुमारौ सुललितवपुषौ। मल्लवीरौ कठोरौ। न द्रक्ष्यामः त्वरितं व्रजामः।" इति तदानीं जने भाषमाणे (सति) (त्वं) तं चाणूरं करोद्भ्रमणविगलदसुम् उर्व्यां पोथयामासिथ। अथ द्रुतं हलिना मुष्टिकः अपि पिष्टः अभूत्। नष्टशिष्टैः दधावे।

अन्वयार्थः

"हा, धिक्, कष्टं कुमारौ सुललितवपुषौ = "हाय, धिक्कार है (कंस को) सुन्दर शरीर वाले कुमार हैं।

मल्लवीरौ कठोरौ। = मल्लयुद्ध करने वाले कठोर हैं।

न द्रक्ष्यामः त्वरितं व्रजामः।" = देख नहीं सकेंगे हम लोग (यह युद्ध), तुरन्त वापिस चलते हैं।"

इति तदानीं जने भाषमाणे (सति) = इस प्रकार लोगों के बातें करने पर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(त्वं) तं चाणूरं करोद्भ्रामणविगलदसुं = (आपने) उस चाणूर को हाथों से घुमाकर प्राणों के जाने पर

उर्व्यां पोथयामासिथ। = भूमि पर मारा।

अथ द्रुतं हलिना मुष्टिकः अपि पिष्टः अभूत्। = उसके बाद तुरन्त बलराम द्वारा मुष्टिक भी मारा गया।

नष्टशिष्टैः दधावे। = बचे हुए लोग भाग गये।

भावार्थ—"हाय, धिक्कार है (कंस को) सुन्दर शरीर वाले कुमार हैं। मल्लवीर कठोर हैं। हम (यह युद्ध) देख नहीं सकते, तुरन्त चलते हैं।" इस प्रकार, उस समय लोगों के बातें करने पर (आपने) उस चाणूर को हाथों से घुमाकर, प्राणों के जाने पर उसे भूमि पर मारा। उसके बाद तुरन्त बलराम द्वारा मुष्टिक भी मारा गया। बचे हुए लोग भाग गये।

Words-Explanation :

विगलित = Gone away, Fallen or dropped down. (As in विगलदसुम्)

असुः = Breath, Life, Life of Departed spirits etc. (As in विगलदसुम्)

॥ ८ ॥

कम्सः संवार्य तूर्यं खलमतिरविदन् कार्यमार्यान् पितॄंस्ता-
नाहन्तुं व्याप्तमूर्तेस्तव च समशिषद्दूरमुत्सारणाय।
रुष्टो दुष्टोक्तिभिस्त्वं गरुड इव गिरिं मञ्चमञ्चन्नुदञ्चत्-
खड्गव्यावल्गदुःसंग्रहमपि च हठात् प्राग्रहीरौग्रसेनिम्॥

पदविभागः—कम्सः, सम्वार्य, तूर्यम्, खलमतिः, अविदन्, कार्यं, आर्यान्, पितॄन्, तान्, आहन्तुम्, व्याप्तमूर्तेः, तव, च, समशिषत्, दूरं, उत्सारणाय, रुष्टः, दुष्टोक्तिभिः, त्वम्, गरुडः, इव, गिरिम्, मञ्चम्, अञ्चन्, उदञ्चत्, खड्ग्व्यावल्गदुस्सङ्ग्रहम्, अपि, च हठात्, प्राग्रहीः, औग्रसेनिम्॥

अन्वयः—खलमतिः कम्सः कार्यम् अविदन्, तूर्यं सम्वार्य, आर्यान् तान् पितॄन् आहन्तुं, व्याप्तमूर्तेः तव दूरम् उत्सारणाय च समशिषत्। दुष्टोक्तिभिः रुष्टः त्वं गिरिं गरुडः इव मञ्चम् अञ्चन्, औग्रसेनिम् उदञ्चत्खड्ग-व्यावल्गदुस्सङ्ग्रहम् अपि च हठात् प्राग्रहीः॥

अन्वयार्थः

खलमतिः कम्सः कार्यम् अविदन्, तूर्यं सम्वार्य = दुष्टचित्त के कंस ने क्या करना है यह न जानकर, भेरी वादन रोककर

आर्यान् तान् पितॄन् आहन्तुम्, = पूजनीय उन पिताओं को मारने (वध करने) के लिए और

व्याप्तमूर्तेः तव दूरम् उत्सारणाय च समशिषत् = सर्वव्यापी आपको दूर जाने का भी आदेश दिया।

दुष्टोक्तिभिः रुष्टः त्वं गिरिं गरुडः इव मञ्चम् अञ्चन् = दुष्ट वचनों से क्रुद्ध आपने गिरि को जाते गरुड़ के समान मञ्च पर कूदकर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

औग्रसेनिम् उदञ्चत्खड्गव्यावल्गदुस्सङ्ग्रहम् अपि च हठात् प्राग्रहीः । = तलवार ऊपर उठाने वाले कंस को पकड़ने में कठिन होने पर भी जोर से पकड़ा ।

भावार्थ—दुष्टचित्त के कंस ने क्या करना है यह न जानकर, भेरी वादन को रुकवाकर, पूजनीय उन पिताओं का वध करने के लिए तथा सर्वव्यापी आपको दूर जाने का भी आदेश दिया । (कंस के) दुष्ट वचनों से क्रुद्ध आपने पर्वत को जाते गरुड़ के समान मंच पर कूदकर, तलवार ऊपर उठाने वाले कंस को पकड़ने में कठिन होने पर भी जोर से पकड़ा ।

Words-Explanation :

अच् (अचति, अंचति, अचते, आनंच, अंचित, अक्त) = To go, To move. (As in मञ्चम् अञ्चन्)

आर्य = Respectable. (As in आर्यान् तान्)

उदञ्चत् = Moving upwards. (As in उदञ्चत् खड्ग—)

उत्सारणम् = Driving out of the way, Keeping at a distance etc. (As in दूरम् उत्सारणाय)

हठः = Force, Violent. (As in हठात् प्राग्रहीः)

व्यावल्गित = Moved, Agitated. (As in खड्गव्यावल्ग—)

॥ ९ ॥

सद्यो निष्पिष्टसन्धिं भुवि नरपतिमापात्य तस्योपरिष्टात्
त्वय्यापात्ये, तदैव त्वदुपरि पतिता नाकिनां पुष्पवृष्टिः ।
किं किं ब्रूमस्तदानीं सततमपि भिया त्वद्गतात्मा स भेजे
सायुज्यं त्वद्वधोत्था परम, परमियं वासना कालनेमेः ॥

पदविभागः—सद्यः, निष्पिष्टसन्धिम्, भुवि, नरपतिम्, आपात्य, तस्य, उपरिष्टात्, त्वयि, आपात्ये, तदा, एव, त्वदुपरि, पतिता, नाकिनाम्, पुष्पवृष्टिः, किम्, किम्, ब्रूमः, तदानीम्, सततम्, अपि, भिया, त्वद्गतात्मा, सः, भेजे, सायुज्यम्, त्वद्वधोत्था, परम, परम्, इयम्, वासना, कालनेमेः ॥

अन्वयः—सद्यः नरपतिं निष्पिष्टसन्धिं भुवि आपात्य, तस्य उपरिष्टात् त्वयि आपात्ये, (सति) तदा एव त्वदुपरि नाकिनां पुष्पवृष्टिः पतिता । किं, किं, ब्रूमः ? भिय अपि सततं त्वत्गतात्मा सः (कंसः) सायुज्यं भेजे । परम, इयं त्वद्वधोत्था कालनेमेः वासना परम् ।

अन्वयार्थः

सद्यः नरपतिं निष्पिष्टसन्धिं भुवि आपात्य, तस्य उपरिष्टात् त्वयि आपात्ये (सति) तदा एव त्वदुपरि = तत्काल राजा (कंस) के सन्धिबन्धों को तोड़कर, पृथ्वी पर गिराकर, उसके ऊपर आपके गिरने पर उसी समय आपके ऊपर

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाकिनां पुष्पवृष्टिः पतिता। = देवों ने पुष्पवर्षा की।

किं, किं, ब्रूमः ? = क्या क्या कहें ?

भिय अपि सततं त्वद्गतात्मा सः (कम्सः) सायुज्यं भेजे। = भय से आपको सर्वदा चिन्तित करने वाला वह (कंस) सायुज्य-गति को प्राप्त हुआ।

परम, इयं त्वद्वधोत्था कालनेमेः वासना परम्। = हे परब्रह्म ! इस प्रकार आप द्वारा मारे गये कालनेमि के पूर्वजन्म की वासना ही है।

भावार्थ—तत्काल राजा (कंस) के सन्धिबन्धों को तोड़कर, पृथ्वी पर गिराकर, उसके ऊपर आपके गिरने पर, उसी समय आपके ऊपर देवों ने पुष्पवर्षा की। क्या क्या कहें ? भय से भी आपको सर्वदा चिन्तित करने वाला वह (कंस) सायुज्य गति को प्राप्त हुआ। हे परब्रह्म ! यह तो आप द्वारा मारे गये कालनेमि के पूर्वजन्म की वासना ही है।

Words-Explanation :

नाकः = Heaven. (As in नाकिनां पुष्पवृष्टिः पतिताः)

पिष् (पिष्ट, पिनष्टि) = Crush, To pound, Grind, Injure, Destroy, Kill etc. (As in निष्पिष्टसन्धिम्)

उत्थ - (त्वद्वधोत्था) (used only at the end of a composite word.)= Born or Produced from, Arising, Originating from etc.

॥ १० ॥

तद्भ्रातृनष्ट पिष्ट्वा द्रुतमथ पितरौ सन्नमन्नुग्रसेनम्
कृत्वा राजानमुच्चैर्यदुकुलमखिलं मोदयन् कामदानैः।
भक्तानामुत्तमं चोद्धवममरगुरोराप्तनीतिं सखायम्
लब्ध्वा तुष्टो नगर्यां पवनपुरपते रुन्धि मे सर्वरोगान् ॥

पदविभागः—तद्भ्रातृन्, पिष्ट्वा, द्रुतम्, अथ, पितरौ, सन्नमन्, उग्रसेनम्, कृत्वा, राजानम्, उच्चैः, यदुकुलम्, अखिलम्, मोदयन्, कामदानैः, भक्तानाम्, उत्तमम्, च, उद्धवम्, अमरगुरोः, आप्तनीतिम्, सखायम्, लब्ध्वा, तुष्टः, नगर्याम्, पवनपुरपते, रुन्धि, मे, सर्वरोगान् ॥

अन्वयः—तद्भ्रातृन् अष्टपिष्ट्वा अथ द्रुतं पितरौ सन्नमन्, उग्रसेनं राजानं कृत्वा, यदुकुलम् अखिलं कामदानैः उच्चै मोदयन्, भक्तानाम् उत्तमम् अमरगुरोः आप्तनीतिम् उद्धवं सखायं लब्ध्वा नगर्थां तुष्टः, पवनपुरपते त्वं मे सर्वरोगान् रुन्धि।

अन्वयार्थः

तद्भ्रातृन् अष्ट पिष्ट्वा अथ = उसके आठ भाइयों का वध करने के बाद में

द्रुतं पितरौ सन्नमन्, = शीघ्र माता पिता को नमस्कार करके,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उग्रसेनं राजानं कृत्वा, = उग्रसेन को राजा बनाकर,

यदुकुलं अखिलं कामदानैः = यादवों की समस्त आशाओं को पूर्ण करके,

उच्चैः मोदयन् = अत्यधिक सन्तोष प्रदान करके,

भक्तानाम् उत्तमम् अमरगुरोः = भक्तों में उत्तम, देवों के गुरु से नीतिशास्त्र का ज्ञान पाने वाले उद्धव को

सखायं लब्ध्वा नगर्यां तुष्टः पवनपुरपते त्वं, सर्वरोगान् रुन्धि। = सखा के रूप में प्राप्त करके नगर में सन्तुष्ट होकर रहते आप, हे गुरुपवनपुराधीश ! मेरे समस्त रोगों को रोक दो।

भावार्थ—उस (कंस) के आठ भाइयों का वध करने के बाद में शीघ्र माता पिता को नमस्कार करके, उग्रसेन को राजा बनाकर, यादवों की समस्त आशाओं को पूर्ण करके, अत्यधिक सन्तोष प्रदान करके, भक्तों में उत्तम, देवों के गुरु से नीतिशास्त्र का ज्ञान पाने वाले उद्धव को सखा के रूप में प्राप्त करके, नगर में सन्तुष्ट होकर रहने वाले हे गुरुवायुपुराधीश आप मेरे रोगों को रोक दो।

Words-Explanation :

आप्त = Got, Obtained, Gained etc. (As in अमरगुरोः आप्तनीतिम्)

अमरः = A God, Diety, Deva. (As in अमरगुरोः)

॥ इति पञ्चसप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७६

उद्धवदूत्यवर्णनम्

[मन्दाक्रान्तछन्दः]

॥ १ ॥

गत्वा सान्दीपनिमथ चतुःषष्टिमात्रैरहोभिः
सर्वज्ञस्त्वं सह मुसलिना सर्वविद्या गृहीत्वा ।
पुत्रं नष्टं यमनिलयनादाहृतं दक्षिणार्थम्
दत्वा तस्मै निजपुरमगा नादयन् पाञ्चजन्यम् ॥

पदविभागः—गत्वा, सान्दीपनिम्, अथ, चतुःषष्टिमात्रैः, अहोभिः, सर्वज्ञः, त्वम्, सह, मुसलिना, सर्वविद्याः, गृहीत्वा, पुत्रम्, नष्टम्, यमनिलयनात्, आहृतम्, दक्षिणार्थम्, दत्वा, तस्मै, निजपुरम्, अगाः, नादयन्, पाञ्चजन्यम् ॥

अन्वयः—अथ सर्वज्ञः त्वं मुसलिना सह सान्दीपनिं गत्वा चतुःषष्टिमात्रैः अहोभिः सर्वविद्याः गृहीत्वा, नष्टं यमनिलयनात् आहृतं पुत्रं दक्षिणार्थं तस्मै दत्वा, पाञ्चजन्यं नादयन् निजपुरम् अगाः ॥

अन्वयार्थः

अथ सर्वज्ञः त्वं मुसलिना सह = बाद में सर्वज्ञ आप बलराम के साथ

सान्दीपनिं गत्वा = सान्दीपनि मुनि के पास जाकर

चतुःषष्टिमात्रैः अहोभिः = मात्र चौसठ दिनों में

सर्वविद्याः गृहीत्वा = समस्त विद्याओं को सीखकर

नष्टं यमनिलयनात् आहृतं पुत्रं दक्षिणार्थं तस्मै दत्वा, = मृत्यु प्राप्त (मुनि के) पुत्र को दक्षिणा के रूप में उन गुरु को समर्पित करके

पाञ्चजन्यं नादयन् = पाञ्चजन्य को बजाते हुए

निजपुरम् अगाः । = अपने नगर (मथुरा) को गये ।

भावार्थ—बाद में सर्वज्ञ आप बलराम के साथ सान्दीपनि मुनि के पास जाकर केवल चौसठ दिन में समस्त विद्याओं को सीखकर, मृत्यु प्राप्त (मुनि के) पुत्र को दक्षिणा के रूप में उन गुरु को समर्पित करके, पाञ्चजन्य को बजाते हुए अपनी नगरी (मथुरा) को गये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

मुसलिन् = Balarama. (As in मुसलिना सह)

अहस् = A day (Including a day and a night) (As in चतुःषष्टिमात्रै रहोभिः)

॥ २ ॥

स्मृत्वा स्मृत्वा पशुपसुदृशः प्रेमभारप्रणुन्नाः
कारुण्येन त्वमपि विवशः प्राहिणोरुद्धवं तम् ।

किञ्चामुष्मै परमसुहृदे भक्तवर्याय तासाम्
भक्त्युद्रेकं सकलभुवने दुर्लभं दर्शयिष्यन् ॥

पदविभागः—स्मृत्वा, स्मृत्वा, पशुपसुदृशः, प्रेमभारप्रणुन्नाः, कारुण्येन, त्वम्, अपि, विवशः, प्राहिणोः, उद्धवम्, तम्, किञ्च, अमुष्मै, परमसुहृदे, भक्तवर्याय, तासाम्, भक्त्युद्रेकम्, सकलभुवने, दुर्लभम्, दर्शयिष्यन् ॥

अन्वयः—त्वं प्रेमभारप्रणुन्नाः पशुपसुदृशः स्मृत्वा स्मृत्वा कारुण्येन विवशः अपि किञ्च परमसुहृदे भक्तवर्याय अमुष्मै सकलभुवने दुर्लभं तासां भक्त्युद्रेकं दर्शयिष्यन् तम् उद्धवं प्राहिणोः ।

अन्वयार्थः

त्वं प्रेमभारप्रणुन्नाः पशुपसुदृशः स्मृत्वा, स्मृत्वा = आपने, प्रेमाधिक्य से तड़पती गोपस्त्रियों को याद करते-करते,

कारुण्येन विवशः अपि = कारुण्य से विवश होने पर भी,

किञ्च परमसुहृदे भक्तवर्याय अमुष्मै सकल भुवने दुर्लभम् तासां भक्त्युद्रेकं दर्शयिष्यन् = इसके अतिरिक्त, परम मित्र भक्तों में श्रेष्ठ इस (उद्धव) को समस्त लोकों में दुर्लभ उन (गोपियों) की उन्नत भक्ति को दिखाने की कामना से

तम् उद्धवं प्राहिणोः । = उस उद्धव को भेजा ।

भावार्थ—आपने, प्रेमाधिक्य से तड़पती गोपस्त्रियों को याद करते-करते कारुण्य से विवश होने पर भी, इसके अतिरिक्त, परम मित्र भक्तों में श्रेष्ठ इस (उद्धव) को समस्त लोकों में दुर्लभ प्राप्त उन (गोपिकाओं) की उन्नत भक्ति को दिखाने की कामना से उस उद्धव को भेजा ।

Words-Explanation :

उद्रेकः = Excess, Increase, Abundance etc. (As in भक्त्युद्रेकं दर्शयन्)

प्रणुन्न = Firm, Trembling, Shaking, Driven away etc. (As in प्रेमभारप्रणुन्नाः)

Funding by IKS-MoE

किञ्च = Moreover, And again, Further. (As in किञ्च परमसुहृते भक्तवर्याय)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

त्वन्माहात्म्यप्रथिमपिशुनं गोकुलं प्राप्य सायम्
त्वद्वार्ताभिर्बहु स रमयामास नन्दं यशोदाम्।

प्रातर्दृष्ट्वा मणिमयरथं शङ्किताः पङ्कजाक्ष्यः
श्रुत्वा प्राप्तं भवदनुचरं त्यक्तकार्याः समीयुः ॥

पदविभागः—त्वन्माहात्म्यप्रथिमपिशुनं, गोकुलम्, प्राप्य, सायम्, त्वद्वार्ताभिः, बहु, सः, रमयामास, नन्दम्, यशोदाम्, प्रातः, दृष्ट्वा, मणिमयरथम्, शङ्किताः, पङ्कजाक्ष्यः, श्रुत्वा, प्राप्तम्, भवदनुचरम्, त्यक्तकार्याः, समेयुः ॥

अन्वयः—सः सायं त्वन्माहात्म्यप्रथिमपिशुनं गोकुलं प्राप्य, त्वद्वार्ताभिः नन्दं यशोदां (च) बहु रमयामास। प्रातः पङ्कजाक्ष्यः मणिमयरथं दृष्ट्वा शङ्किताः भवदनुचरं प्राप्तं श्रुत्वा, त्यक्तकार्याः समीयुः ॥

अन्वयार्थः

सः सायं त्वन्माहात्म्यप्रथिमपिशुनम् गोकुलं प्राप्य, = उसने शाम को आपकी कीर्ति को प्रदर्शित करते गोकुल में आकर,

त्वद्वार्ताभिः नन्दं यशोदां (च) बहु रमयामास। = आपसे सम्बन्धित बातों से नन्द तथा यशोदा को अत्यन्त आनन्दित किया।

प्रातः पङ्कजाक्ष्यः मणिमयरथं दृष्ट्वा शङ्किताः भवदनुचरं प्राप्तं श्रुत्वा = प्रातःकाल में कमलनयनियां मणिमय रथ को देखकर, (आपके आगमन की) शङ्का करके, (बाद में) आपके अनुयायी के आने की बात को सुनकर

त्यक्तकार्याः समीयुः। = सब कामों को छोड़कर आयीं।

भावार्थ—उसने शाम को आपकी कीर्ति को प्रदर्शित करते गोकुल में आकर, आपसे सम्बन्धित बातों से नन्द तथा यशोदा को बहुत आनन्दित किया। प्रातःकाल में कमलनयनियां मणिमय रथ को देखकर (आपके आमगन की) शङ्का करके (बाद में) आपके मित्र के आने की बात सुनकर, सब कामों को छोड़कर आयीं ॥

Words-Explanation :

प्रथा = Fame, Celebrity.

प्रथिमन् = Greatness, Magnitude. (As in प्रथिमपिशुनम्)

पिशुन् = Manifesting, Displaying, Indicating, Wicked etc. (As in प्रथिमपिशुनम्)

अनुचरः = Friend, Companion, Follower. (As in भवदनुचरम्—)

रम् (रमते) = To be pleased, Delighted etc. (As in रमयामास)

Digitized by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ४ ॥

दृष्ट्वा चैनं त्वदुपमलसद्वेषभूषाभिरामम्
स्मृत्वा स्मृत्वा तव विलसितान्युच्चकैस्तानि तानि ।

रुद्धालापाः कथमपि पुनर्गद्गदां वाचमूचुः
सौजन्यादीन् निजपरभिदामप्यलं विस्मरन्त्यः ॥

पदविभागः—दृष्ट्वा, च, एनम्, त्वदुपमलसद्वेषभूषाभिरामम्, स्मृत्वा, स्मृत्वा, तव, विलसितानि, उच्चकैः, तानि, तानि, रुद्धालापाः, कथमपि, पुनः, गद्गदाम्, वाचम्, ऊचुः, सौजन्यादीन्, निजपरभिदाम्, अपि, अलम्, विस्मरन्त्यः ॥

अन्वयः—(पङ्कजाक्ष्यः) त्वदुपमलसद्वेषभूषाभिरामम् एनं दृष्ट्वा, तव तानि तानि विलसितानि उच्चकैः स्मृत्वा स्मृत्वा च, रुद्धालापाः, पुनः सौजन्यादीन्, निजपरभिदाम् अपि अलं विस्मरन्त्यः कथमपि गद्गदां वाचम् ऊचुः ॥

अन्वयार्थः

(पङ्कजाक्ष्यः) त्वदुपमलसद्वेषभूषाभिरामम् एनं दृष्ट्वा, = (कमलनयनियां) आपके समान वेषभूषा से अलंकृत इस (उद्धव) को देखकर, और

तव तानि तानि विलसितानि उच्चकैः स्मृत्वा स्मृत्वा च रुद्धालापाः = आपके उन खेलों को अत्यधिक स्मरण करते-करते, कुछ भी नहीं कह पाकर

पुनः सौजन्यादीन्, निजपरभिदाम् अपि अलं विस्मरन्त्यः = फिर, सौजन्य भाव आदि को तथा अपना-पराया, इनको भी पूर्ण रूप से भूलती हुई

कथमपि गद्गदां वाचम् ऊचुः । = किसी प्रकार गद्गद होकर बोली ।

भावार्थ—(कमलनयनियां) आपके समान वेषभूषा से अलंकृत इस (उद्धव) को देखकर, और आपके उन खेलों को अत्यधिक स्मरण करते-करते, कुछ भी नहीं कह पाकर, पुनः, सौजन्य भाव आदि को तथा अपना-पराया, इनको भी पूर्ण रूप से भूलती हुई किसी प्रकार गद्गद् होकर (अवरुद्ध कण्ठ से) बोली ।

Words-Explanation :

विलसनम् = Play, Sport, Dalliance etc. (As in तानि विलसितानि उच्चकैः स्मृत्वा)

आलापः = Talking, Speech. (As in रुद्धालापाः)

सौजन्यम् = Goodness, Kindness, Friendship, Love, Gentilily etc. (As in सौजन्यादीन्—विस्मरन्त्यः)

अलम् = Completely, Thoroughly, Enough, Sufficient for, Competent etc. (As in अलं विस्मरन्त्यः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ५ ॥

श्रीमन् किं त्वं पितृजनकृते प्रेषितो निर्दयेन
क्वासौ कान्तो नगरसुदृशां ? हा, हरे, नाथ, पायाः ।
आश्लेषाणाममृतवपुषो हन्त, ते चुम्बनाना-
मुन्मादानां कुहकवचसां विस्मरेत् कान्त, का वा ? ॥

पदविभागः—श्रीमन्, किम्, त्वम्, पितृजनकृते, प्रेषितः, निर्दयेन्, क्व, असौ, कान्तः, नगरसुदृशाम्, हा, हरे, नाथ, पायाः, आश्लेषाणाम्, अमृतवपुषः, हन्त, ते, चुम्बनानाम्, उन्मादानाम्, कुहकवचसाम्, विस्मरेत्, कान्त, का, वा ॥

अन्वयः—श्रीमन् ! त्वं निर्दयेन पितृजनकृते प्रेषितः किम् ? नगरसुदृशां कान्तः असौ क्वः ? हा, हरे, नाथ पायाः । कान्त, अमृतवपुषः ते आश्लेषाणां, चुंबनानाम्, उन्मादानां, कुहकवचसां (च) हन्त, का वा विस्मरेत् ?

अन्वयार्थः

श्रीमन्, त्वं निर्दयेन पितृजनकृते प्रेषितः किम् ? = श्रीमन् ! आप उस निर्दय के द्वारा पितृजनों (माता पिता) के लिए भेजे गये हैं क्या ?

नगरसुदृशां कान्तः असौ क्व ? = नगर की सुन्दरियों का वह प्रेमी कहां है ?

हा, हरे, नाथ, पायाः । = हाय, हे हरे ! हे नाथ ! रक्षा करें ।

कान्त, अमृतवपुषः ते आश्लेषाणां, चुम्बनानाम्, उन्मादानां, कुहकवचसां (च) हन्त, का वा विस्मरेत् ? = हे नाथ, अमृतमय स्वरूप, आपके आलिंगनों, चुम्बनों, उन्माद लीलाओं, और छलकपट की बातों को कौन-सी स्त्री भूल सकेगी ?

भावार्थ—श्रीमन ! आप उस निर्दय के द्वारा माता पिता के लिए भेजे गये हैं क्या ? नगर की सुन्दरियों का वह प्रेमी कहां है ? हाय, हे हरे ! हे नाथ ! रक्षा करें । हे नाथ, अमृतमय स्वरूप आपके आलिंगनों, चुंबनों, उन्मादलीलाओं तथा छलकपट की बातों को कौन-सी स्त्री भूल सकेगी ?

Words-Explanation :

वपुषः = A God, Diety. वपुस् - Body, Person. (As in अमृतवपुषः)

पा (पिबति, पीत) = Drink. पा (पाति, पात) - To Protect, Guard (As in नाथ पायाः)

कुहका = Jugglery, Deceptive. (कुहकः Juggler, Cheat) (As in कुहकवचसाम्)

॥ ६ ॥

"रासक्रीडालुलितललितं विश्लथत्केशपाशम्
मन्दोद्भिन्नश्रमजलकणं लोभनीयं त्वदङ्गम् ।
कारुण्याब्धे सकृदपि समालिङ्गितुं दर्शयेति"
प्रेमोन्मादाद्भुवनमदन त्वत्प्रियास्त्वां विलेपुः ॥

Digitized by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—रासक्रीडालुलितललितम्, विश्लथत्केशपाशम्, मन्दोद्भिन्नश्रमजलकणम्, लोभनीयम्, त्वदङ्गम्, कारुण्याब्धे, सकृत, अपि, समालिङ्गितुम्, दर्शय, इति, प्रेमोन्मादात्, भुवनमदन, त्वत्प्रियाः, त्वाम्, विलेपुः ॥

अन्वयः—"रासक्रीडालुलितललितं विश्लथत्केशपाशं, मन्दोद्भिन्नश्रमजलकणं लोभनीयं त्वदङ्गं, कारुण्याब्धे, सकृत् अपि समालिङ्गितुं दर्शय" इति प्रेमोन्मादात् भुवनमदन, त्वत्प्रियाः त्वाम् (उद्दिश्य) विलेपुः ॥

अन्वयार्थः

"रासक्रीडालुलितललितं = "रासक्रीडा से हिलते हुए

विश्लथत्केशपाशम् = खुले केशों वाले

मन्दोद्भिन्नश्रमजलकणं लोभनीयं त्वदङ्गम् = शनैः शनैः ऊपर को निकलते हल्के हल्के पसीनों की बूँदों से शोभित आपके शरीर को

कारुण्याब्धे, सकृत् अपि समालिङ्गितुं दर्शय" इति = हे करुणासिन्धो ! एक बार और आलिंगन करने के लिए दर्शन दो" इस प्रकार

प्रेमोन्मादात् भुवनमदन, त्वत्प्रियाः त्वां (उद्दिश्य) विलेपुः । = प्रेमाधिक्य से हे भुवनमदन ! आपकी प्रेमिकाओं ने आप के बारे में सोचकर विलाप किया ।

भावार्थ—"रासक्रीडा से हिलते हुए सुन्दर खुले केशों वाले शनैः-शनैः ऊपर को अंकुरित हल्की हल्की पसीने के बूँदों से शोभित आपके शरीर को, हे करुणासिन्धो ! एक बार और आलिंगन करने के लिए दर्शन दो" इस प्रकार प्रेमाधिक्य से हे भुवनमदन ! आपकी प्रेमिकाओं ने आप के बारे में सोचकर विलाप किया ॥

Words-Explanation :

श्रमजलम् = Sweat, Perspiration. (As in श्रमजलकणम्)

लुलित = Shaken

विश्लथ = Untied, Loose. (As in विश्लथत्केशपाशम्)

लोभनीय = Enticing.

उद्भिद = Spourting, Germinating. (As in मन्दोद्भिन्न)

सकृत् = Once.

मन्द (मन्दोद्भिन्न) = Slowly, Softly, Small, Little etc.

विलापः = Lamentation, Wailing.

॥ ७ ॥

एवं प्रायैर्विवशवचनैराकुला गोपिकास्ता-
स्त्वत्सन्देशैः प्रकृतिमनयत् सोऽथ विज्ञानगर्भैः ।
भूयस्ताभिर्मुदितमतिभिस्तन्मयीभिर्वधूभि-
स्तत्तद्वार्तासरसमनयत् कानिचिद्वासराणि ॥

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—एवं प्रायैः, विवशवचनैः, आकुलाः, गोपिकाः, ताः, त्वत्सन्देशैः, प्रकृतिम्, अनयत्, सः, अथ, विज्ञानगर्भैः, भूयः, ताभिः, मुदितमतिभिः, त्वन्मयीभिः, वधूभिः, तत्तद्वार्तासरसम्, अनयत्, कानिचित्, वासराणि ॥

अन्वयः—अथ सः एवं प्रायैः विवशवचनैः आकुलाः ताः गोपिकाः, विज्ञानगर्भैः त्वत्सन्देशैः प्रकृतिम् अनयत् । भूयः, मुदितमतिभिः त्वन्मयीभिः ताभिः वधूभिः (साकम्) तत्तद्वार्तासरसं कानिचित् वासराणि अनयत् ।

अन्वयार्थः

अथ सः एवं प्रायैः विवशवचनैः = उसके बाद, वह (उद्धव) इस प्रकार की विवश से भरी बातों से

आकुलाः ताः गोपिकाः = बहुत व्याकुल उन गोपिकाओं को

विज्ञानगर्भैः त्वत्सन्देशैः प्रकृतिम् अनयत्। = आत्मज्ञान से युक्त आपके सन्देशों द्वारा प्राकृतिक स्थिति तक ले गया ।

भूयः, मुदितमतिभिः त्वन्मयीभिः = फिर प्रसन्नचित्त होकर आप में ही लीन

ताभिः वधूभिः (सह) = उन गोपस्त्रियों के साथ (उद्धव ने)

तत्तद्वार्तासरसं कानिचित् वासराणि अनयत्। = कुछ रसपूर्ण बातें करके कुछ दिन बिताये ।

भावार्थ—उसके बाद, वह (उद्धव) इस प्रकार की विवशं से भरी बातों से बहुत व्याकुल उन गोपिकाओं को आत्मज्ञान से युक्त आपके सन्देशों द्वारा प्राकृतिक स्थिति तक ले गया । पुनः प्रसन्नचित्त होकर आप में लीन उन गोपस्त्रियों के साथ (उद्धव ने) कुछ रसपूर्ण बातें करके कुछ दिन बिताये ।

Words-Explanation :

विज्ञानम् = Worldly or profound knowledge. (As in विज्ञानगर्भैः त्वत्सन्देशैः)

प्रकृतिः = Natural form, Natural condition or state. (As in प्रकृतिम् अनयत्)

सरस = Full of love, Impassioned, Charming, Lovely, Juicy etc. (As in तत्तद्वार्तासरसम्)

॥ ८ ॥

त्वत्प्रोद्गानैः सहितमनिशं सर्वतो गेहकृत्यम्
त्वद्वार्तैव प्रसरति मिथः सैव चोत्स्वापलापाः ।
चेष्टाः प्रायस्त्वदनुकृतयस्त्वन्मयं सर्वमेवम्
दृष्ट्वा तत्र व्यमुहदधिकं विस्मयादुद्धवोऽयम् ॥

पदविभागः—त्वत्प्रोदगानैः, सहितम्, अनिशम्, सर्वतः, गेहकृत्यम्, त्वद्वार्ता, एव, प्रसरति, मिथः, सा, एव, च, उत्सापलापाः, चेष्टाः, प्रायः, त्वदनुकृतयः, त्वन्मयम्, सर्वम्, एवम्, दृष्ट्वा, तत्र, व्यमुहत्, अधिकम्, विस्मयात्, उद्धवः, अयम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अनिशं सर्वतः गेहकृत्यं त्वत्प्रोदगानै सहितम् (भवति) । मिथः त्वद्वार्ता एव प्रसरति । उत्सापलापाः च सा एव । चेष्टाः प्रायः त्वदनुकृतयः । एवं तत्र सर्वं त्वन्मयं दृष्ट्वा अयम् उद्धवः विस्मयात् अधिकं व्यमुहत् ॥

अन्वयार्थः

अनिशं सर्वतः गेहकृत्यं त्वत्प्रोद्गानैः सहितम् (भवति) । = हर समय, दिन रात सब ओर से घर के काम आपसे संबन्धित गानों से ही होता है ।

मिथः त्वद्वार्ता एव प्रसरति । = आपस में आप से संबन्धित वार्ता ही होती है ।

उत्सापलापाः च सा एव । = और स्वप्नों की बातें भी उसी प्रकार होती हैं ।

चेष्टाः प्रायः त्वदनुकृतयः । = आमतौर पर सब काम आपके अनुसार होते हैं ।

एवं तत्र सर्वं त्वन्मयं दृष्ट्वा अयम् उद्धवः विस्मयात् अधिकं व्यमुहत् । = इस प्रकार वहां सब आपसे संबन्धित देखकर यह उद्धव बहुत आश्चर्यचकित हुआ ।

भावार्थ—दिन रात हर समय सब ओर से घर के काम आपसे संबन्धित गानों से ही होता है । आपस में आपसे संबन्धित वार्ता ही होती है । और स्पप्नों की बातें भी उसी प्रकार होती हैं । प्रायः समस्त कार्य आपके अनुसार ही होते हैं । इस प्रकार वहाँ सब आपसे संबन्धित देखकर, यह उद्धव बहुत आश्चर्यचकित हुआ ।

Words-Explanation :

प्रोत = Tied, Sewn, Transefixed, Extended, Bound, etc. (As in त्वत्प्रोद्गानैः सहितमनिशम्)

स्वप् - (स्वपिति, सुप्त, सुप्यते) = To Sleep, To fall asleep (As in उत्सापलापाः)

आलापः = Talking, Speaking etc.

मिथस् = Mutually, To each other.

॥ ९ ॥

राधाया मे प्रियतममिदं मत्प्रियैवं ब्रवीति
त्वं किं मौनं कलयसि सखे, मानिनी मत्प्रियेव ।

इत्याद्येव प्रवदति सखि, त्वत्प्रियो निर्जने मा-
मित्थंवादैररमयदयं त्वत्प्रियामुत्पलाक्षीम् ॥

पदविभागः—राधायाः, मे, प्रियतमम्, इदम्, मत्प्रिया, एवम्, ब्रवीति, त्वम्, किम्, मौनम्, कलयसि, सखे, मानिनी, मत्प्रिया, इव, इत्यादि, एव, प्रवदति, सखि, त्वत्प्रियः, निर्जने, माम्, इत्थम्वादैः, अरमयत्, अयम्, त्वत्प्रियाम्, उत्पलाक्षीम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—"इदं मे राधायाः प्रियतमम् ।" "मत् प्रिया एवं ब्रवीति ।" "सखे, मानिनी मत् प्रिया इव त्वं किं मौनं कलयसि ?" "इत्यादि एव सखि, त्वत् प्रियः निर्जने मां प्रवदति । इत्थंवादैः अयं त्वत् प्रियाम् उत्पलाक्षीम् अरमयत् ॥"

अन्वयार्थः

"इदं मे राधायाः प्रियतमम् ।" = "यह मेरी राधा का बहुत प्रिय है ।"

"मत् प्रिया एवं ब्रवीति ।" = "मेरी प्रेमिका इस प्रकार कहती है ।"

"सखे, मानिनी मत् प्रिया इव त्वं किं मौनं कलयसि ?" = "हे सखे ! मानिनी मेरी प्रेमिका जैसे तुम क्यों चुप रहते हो ?"

"इत्यादि एव सखि, त्वम् प्रियः निर्जने मां प्रवदति ।" = "इस प्रकार ही हे सखि ! आपके प्रिय (कृष्ण) अकेले में मुझे कहता है ।"

इत्थंवादैः अयं त्वत् प्रियाम् उत्पलाक्षीम् अरमयत् । = ऐसी बातों से ही इस (उद्धव) ने आपकी प्रेमिका कमलनयनी (राधा) को आनन्दित किया ।

भावार्थ—"यह मेरी राधा का बहुत प्रिय है ।" "मेरी प्रेमिका इस प्रकार कहती है ।" "हे सखे ? (मित्र), मानिनी मेरी प्रेमिका जैसे तुम क्यों चुप रहते हो ?" "इस प्रकार ही हे सखि ! आपके प्रिय (वासुदेवकृष्ण) अकेले में मुझे कहता है ।" ऐसी बातों से ही इस (उद्धव) ने आपकी प्रेमिका कमलनयनी (राधा) को आनन्दित किया ।

Words-Explanation :

उत्पलम् = Blue Lotus, Any Lotus or water Lily. (As in उत्पलाक्षीम् अरमयत्)

कल् - (कलति, कलित) = To hold, To weild, Have, Put on. (As in किं मौनं कलयसि ?)

॥ १० ॥

एष्यामि द्रागनुपगमनं केवलं कार्यभारा-
द्विश्लेषेऽपि स्मरणदृढतासम्भवान्मास्तु खेदः ।

ब्रह्मानन्दे मिलति नचिरात् सङ्गमो वा वियोग-
स्तुल्यो वः स्यादिति तव गिरा सोऽकरोन्निर्व्यथास्ताः ॥

पदविभागः—एष्यामि, द्राक्, अनुपगमनम्, केवलम् कार्यभारात्, विश्लेषे, अपि, स्मरणदृढतासम्भवात्, मास्तु, खेदः, ब्रह्मानन्दे, मिलति, न, चिरात्, सङ्गमः, वा, वियोगः, तुल्यः, वः, स्यात्, इति, तव, गिरा, सः, अकरोत्, निर्व्यथाः, ताः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—"(अहम्) द्राक् एष्यामि । अनुपगमनं कार्यभारात् केवलम् । विश्लेषे अपि स्मरणदृढतासम्भवात् खेदः मास्तु । वः न चिरात् ब्रह्मानन्दे मिलति (सति) सङ्गमः, वियोगः वा तुल्यः स्यात् ।" इति तव गिरा सः (उद्धवः), ताः निर्व्यथाः अकरोत् ॥

अन्वयार्थः

"(अहम्) द्राक् एष्यामि ।" = "(मैं) तुरन्त आ जाऊंगा ।"

"अनुपगमनं कार्यभारात् केवलम् ।" = "कार्य-भार के कारण ही आ नहीं पाता हूँ ।"

"विश्लेषे अपि स्मरणदृढतासम्भवात् खेदः मास्तु ।" = "विरह में भी स्मरण में दृढ़ता होने के कारण, (आप लोग) दुःख नहीं करें ।"

वः न चिरात् ब्रह्मानन्दे मिलति (सति) , सङ्गमः, वियोगः वा तुल्यः स्यात् । = आप लोगों को अतिशीघ्र ब्रह्मानन्द प्राप्त होने पर, मिलन या विरह दोनों एक जैसे हो जायेंगे ।

इति तव गिरा सः (उद्धवः) , ताः निर्व्यथाः अकरोत् । = इस प्रकार की आपकी बात से उस (उद्धव) ने उन (स्त्रियों) को दुःख-रहित कर दिया ।

भावार्थ—"(मैं) तुरन्त आऊंगा । कार्य-भार के कारण ही आ नहीं पाता हूँ । विरह में भी स्मरण में दृढ़ता होने के कारण (आप लोग) दुःख न करें । (अर्थात् विरह में स्मरण से प्रेम अधिक होता है, अतः दुःख न करें) । आप लोगों को अतिशीघ्र ब्रह्मानन्द प्राप्त होने से, मिलन या विरह दोनों एक जैसे हो जायेंगे ।" इस प्रकार की आपकी बात से उस (उद्धव) ने उन (स्त्रियों) को दुःख-रहित कर दिया ।

Words-Explanation :

विश्लेषः = Disunion especially separation of lovers.

द्राक् = Quickly.

॥ ११ ॥

"एवं भक्तिः सकलभुवने नेक्षिता न श्रुता वा
किं शास्त्रौघैः किमिह तपसा गोपिकाभ्यो नमोऽस्तु ।"

इत्यानन्दाकुलमुपगतं गोकुलादुद्धवं तम्
दृष्ट्वा हृष्टो गुरुपुरपते पाहि मामामयौघात् ॥

पदविभागः—एवम्, भक्तिः, सकलभुवने, न, ईक्षिता, न, श्रुता, वा, किम्, शास्त्रौघैः, किम्, इह, तपसा, गोपिकाभ्यः, नमः, अस्तु, इति, आनन्दाकुलम्, उपगतम्, गोकुलात्, उद्धवम्, तम्, दृष्ट्वा, हृष्टः, गुरुपुरपते, पाहि, माम्, आमयौघात् ॥

अन्वयः—"एवं भक्तिः सकलभुवने न ईक्षितः, न श्रुता वा । किं शास्त्रौघैः ? इह तपसा किम् ? गोपिकाभ्यः नमः अस्तु ।" इति गोकुलात् उपगतम् आनन्दाकुलं तम् उद्धवं दृष्ट्वा हृष्टः (त्वं) गुरुपुरपते माम् आमयौघात् पाहि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

"एवं भक्तिः सकलभुवने न ईक्षितः न श्रुता वा। = "इस प्रकार की भक्ति समस्त जगत् में न देखी है और न ही सुनी है।

किं शास्त्रौघैः ? इह तपसा किम् ? = शास्त्रों के समूह से क्या है ? इधर (इस लोक में) तप से क्या है ?

गोपिकाभ्यः नमः अस्तु।" = गोपिकाओं को नमस्कार।"

इति गोकुलात् उपगतम् = इस प्रकार गोकुल से लौट आये

आनन्दाकुलं तम् उद्धवं दृष्ट्वा हृष्टः (त्वं) = आनन्द से भरे उस उद्धव को देखकर हर्षित हुए (आप)

गुरुपुरपते माम् = हे गुरुवायुपुरपते !

आमयौघात् पाहि। = रोगों के समूह से मेरी रक्षा करें।

भावार्थ—"इस प्रकार की भक्ति समस्त जगत् में न देखी है और न ही सुनी है। शास्त्रों के समूह से क्या (लाभ) है ? इधर (इस जगत् में) तपस्या से क्या (लाभ) है ? गोपिकाओं को प्रणाम।" इस प्रकार गोकुल से लौट आये आनन्द से भरे उस उद्धव को देखकर हर्षित् हुए (आप) हे गुरुपवनपुराधीश ! रोगों के समूह से मेरी रक्षा करें।

Words-Explanation :

औघः = flood. (As in आमयौघात् पाहि)

ईक्षणम् = Seeing. (As in न ईक्षितः)

॥ इति षट्सप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७७

जरासन्धादियुद्धवर्णनम्

[प्रहर्षिणीछन्दः]

॥ १ ॥

सैरन्ध्रयास्तदनु चिरं स्मरातुराया यातोऽभूः सललितमुद्धवेन सार्धम् ।
आवासं, त्वदुपगमोत्सवं सदैव ध्यायन्त्याः प्रतिदिनवाससज्जिकायाः ॥

पदविभागः—सैरन्ध्रयाः, तदनु, चिरम्, स्मरातुरायाः, यातः, अभूः, सललितम्, उद्धवेन, सार्धम्, आवासम्, त्वदुपगमोत्सवम्, सदा, एव, ध्यायन्त्याः, प्रतिदिनवाससज्जिकायाः ॥

अन्वयः—तदनु, चिरं स्मरातुरायाः सदा एव त्वदुपगमोत्सवं ध्यायन्त्याः प्रतिदिनवाससज्जिकायाः सैरन्ध्रयाः सललितम् आवासं, उद्धवेन सार्धं यातः अभूः ॥

अन्वयार्थः

तदनु, चिरं स्मरातुरायाः सदा एव त्वदुपगमोत्सवं ध्यायन्त्याः = बाद में बहुत दिन से कामातुरा, सदा आपके आगमन की ही प्रतीक्षा करती

प्रतिदिनवाससज्जिकायाः सैरन्ध्रयाः सललितम् आवासं = प्रतिदिन वस्त्रादि से अलंकृत सैरन्ध्री के सुन्दर घर पर

उद्धवेन सार्धं यातः अभूः । = उद्धव के साथ गये ।

भावार्थ—बाद में बहुत दिन से कामातुरा, सदा आपके आगमन की ही प्रतीक्षा करती प्रतिदिन वस्त्रादि से अलंकृत सेरन्ध्री के सुन्दर घर पर उद्धव के साथ गये ।

Words-Explanation :

स्मरः = Cupid, God of Love, Manmatha (As in स्मरातुरायाः—)

आतुर = Hurt, Injured, Suffering, Afflicted, etc. (As in स्मरातुरायाः)

आवासः - (सैरन्ध्रयाः आवासम्) = A House, Abode etc.

वाससज्जिका = A woman who dresses herself (and her house) ready to receive her lover. (one of the eight kinds of Nayikas).

Ashta nayikas are as follows:- (As in प्रतिदिनवाससज्जिकायाः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(१) विप्रलब्दा = Always remembering the lover and gets excited.

(२) विरहोत्खण्डिता = Overwhelmed by desire to have the lover.

(३) वासकसज्जिका = Preparing self and the house for the arrival of the lover.

(४) प्रोषिता = Getting frustrated by remembering the lover.

(५) खण्डिता = Fights with the lover for ignoring her.

(६) कलहान्तरिका = Creating unnecessary problems and ousting the lover and then thinking about the lover.

(७) उत्तमअभिसारिका = Extremely loving towards the lover and seeing his image everywhere.

(८) स्वाधीनपतिका = Complete control over the lover and getting whatever she wants form the lover or becoming one with the lover. (i.e. Radha)

[द्रुतविलम्बितछन्दः]

॥ २ ॥

उपगते त्वयि पूर्णमनोरथां प्रमदसम्भ्रमकम्प्रपयोधराम् ।
विविधमाननमादधतीं मुदा रहसि तां रमयाञ्चकृषे सुखम् ॥

पदविभागः—उपगते, त्वयि, पूर्णमनोरथाम्, प्रमदसम्भ्रमकम्प्रपयोधराम्, विविधमाननम्, अदधतीम्, मुदा, रहसि, ताम्, रमयाञ्चकृषे, सुखम् ॥

अन्वयः—त्वयि उपगते (सति) पूर्णमनोरथां प्रमदसम्भ्रमकम्प्रपयोधरां, विविधमाननं मुदा आदधतीं तां रहसि सुखं रमयाञ्चकृषे ।

अन्वयार्थः

त्वयि उपगते (सति) = आपके आने पर

पूर्णमनोरथां प्रमदसम्भ्रमकम्प्रपयोधराम् = पूर्ण मनोकामना वाली सन्तोष तथा हड़बड़ी से कम्पित स्तनों वाली

विविधमाननं मुदा आदधतीम् तां रहसि सुखं रमयाञ्चकृषे । = अनेक प्रकार के उपचारों से प्रसन्न करती उसको अकेले में (आपने) सुख से आनन्दित किया ।

भावार्थ—आपके आने पर, पूर्ण मनोकामना वाली सन्तोष तथा हड़बड़ी से कम्पित स्तनों वाली अनेक प्रकार के उपचारों से प्रसन्न करती उसको अकेले में (आप ने) सुख से आनन्दित किया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

प्रमदनम् - (As in प्रमदसम्भ्रमकम्प्रपयोधराम्) = Amorous desire.

सम्भ्रमः - (As in प्रमदसम्भ्रमकम्प्रपयोधराम्) = Turning round, Confusion, Agitation, Zeal, Respect etc.

माननम् - (As in विवधमाननम्) = Honouring, Respecting

रहस् - (As in तां रहसि सुखं रमयाञ्चकृषे) = Solitude, Privacy etc.

[वसन्ततिलकछन्दः]

॥ ३ ॥

पृष्टा वरं पुनरसाववृणोद्वराकी, भूयस्त्वया सुरतमेव निशान्तरेषु।
सायुज्यमस्त्विति वदेद्बुध एव कामं सामीप्यमस्त्वनिशमित्यपि नाब्रवीत् किम् ? ॥

पदविभागः—पृष्टा, वरम्, पुनः, असौ, अवृणोत्, वराकी, भूयः, त्वया, सुरतम्, एव, निशान्तरेषु, सायुज्यम्, अस्तु, इति, वदेत्, बुधः, एव, कामम्, सामीप्यम्, अस्तु, अनिशम्, इति, अपि, न, अब्रवीत्, किम् ॥

अन्वयः—पुनः वरं पृष्टा, वराकी असौ भूयः निशान्तरेषु त्वया सुरतम् एव अवृणोत् । बुधः एव सायुज्यं अस्तु इति वदेत् कामम् । अनिशं सामीप्यम् अस्तु इति अपि किं न अब्रवीत् ?

अन्वयार्थः

पुनः वरं पृष्टा, वराकी असौ भूयः निशान्तरेषु त्वया सुरतम् एव अवृणोत्। = बाद में फिर वर के बारे में पूछने पर अभागिन उसने फिर से कुछ और रातों में आप के साथ सम्भोग की ही कामना की ।

बुधः एव सायुज्यं अस्तु अति वदेत् कामम्। = केवल ज्ञान-प्राप्त ही सायुज्य को (माँगते है) इस प्रकार कहें तो ठीक रहेगा ।

अनिशं सामीप्यम् अस्तु इति अपि किं न अब्रवीत् ? = सर्वदा (आपका) सामीप्य रहे, इस प्रकार भी क्यों नहीं बोली ?

भावार्थ—बाद में वर (मांग) के बारे में पूछने पर, अभागिन वह फिर से कुछ और रातें आपके साथ सम्भोग को ही मांगी । केवल ज्ञान प्राप्त ही सायुज्य हो जाय (इस प्रकार मांगते), इस प्रकार कहें तो ठीक रहेगा । सर्वदा (आपके) सामीप्य हो जाय, इस प्रकार भी (वह स्त्री) क्यों नहीं कही ?

Words-Explanation :

वराकः/ वराकी = Poor, Pitiable, Miserable, Wretched Unfortunate etc. (As in वराकी असौ)

बुधः = A wise learned person. (As in बुधः एव—)

सुरतम् = Great delight or enjoyment, Copulation. (As in सुरतम् एव अवृणोत्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[शंशस्थछन्दः]

॥ ४ ॥

ततो भवान देव, निशासु कासुचिन्मृगीदृशं तां निभृतं विनोदयन् ।
अदादुपश्लोक इति श्रुतं सुतं स नारदात् सात्वततन्त्रविद्बभौ ॥

पदविभागः—ततः, भवान्, देव, निशासु, कासुचित्, मृगीदृशम्, ताम्, निभृताम्, विनोदयन्, अदात्, उपश्लोकः, इति, श्रुतम्, सुतम्, सः, नारदात्, सात्वततन्त्रवित्, बभौ ॥

अन्वयः—ततः देव, भवान् कासुचित् निशासु मृगीदृशं तां निभृतं विनोदयन्, उपश्लोकः इति श्रुतं सुतम् अदात् । सः (उपश्लोकः) नारदात् सात्वततन्त्रवित् बभौ ।

अन्वयार्थः

ततः देव, भवान् कासुचित् निशासु तां मृगीदृशं निभृतं विनोदयन् = उसके बाद, हे देव ! आपने कुछ रातों में उस मृगाक्षी को पूर्ण आनन्द देते हुए

उपश्लोकः इति श्रुतं सुतम् अदात् । = उपश्लोक इस नाम के पुत्र को दिया ।

सः (उपश्लोकः) नारदात् सात्वततन्त्रवित् बभौ । = वह (उपश्लोक) नारदमुनि से सात्वततन्त्र विद्या को सीखकर (उस शास्त्र में) प्रवीण हो गया ।

भावार्थ—उसके बाद, हे देव ! आपने कुछ रातों में उस मृगाक्षी को पूर्ण आनन्द देते हुए उपश्लोक इस नाम के पुत्र को दिया । वह (उपश्लोक) नारदमुनि से सात्वततन्त्र विद्या को सीखकर (उस शास्त्र में) प्रवीण हो गया ।

Words-Explanation :

निभृत = Filled with, Full of, Silently, Quietly, Mild, Gentle, Firm etc. (As in तां निभृतं विनोदयन्)

मृगः = A quadruped in general, Deer, An antelope. (As in मृगीदृशम्)

[वसन्ततिलकछन्दः]

॥ ५ ॥

अक्रूरमन्दिरमितोऽथ बलोद्धवाभ्यामभ्यर्चितो बहुनुतो मुदितेन तेन ।
एनं विसृज्य विपिनागतपाण्डवेयवृत्तं विवेदिथ तथा धृतराष्ट्रचेष्टाम् ॥

पदविभागः—अक्रूरमन्दिरम्, इतः, अथ, बलोद्धवाभ्याम्, अभ्यर्चितः, बहुनुतः, मुदितेन, तेन, एनम्, विसृज्य, विपिनागतपाण्डवेयवृत्तम्, विवेदिथ, तथा, धृतराष्ट्रचेष्टाम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अथ बलोद्धवाभ्याम् (साकम्) अक्रूरमन्दिरम् इतः। मुदितेन तेन अभ्यर्चितः बहुनुतः (च)। एनं (अक्रूरं) विसृज्य (त्वं) विपिनागतपाण्डवेयवृत्तं विवेदिथ। तथा धृतराष्ट्रचेष्टाम्।

अन्वयार्थः

अथ बलोद्धवाभ्याम् (साकम्) = उसके बाद बलराम तथा उद्धव के साथ

अक्रूरमन्दिरम् इतः। = अक्रूर के घर गये।

मुदितेन तेन अभ्यर्चितः बहुनुतः (च) = उस अक्रूर ने सत्कार तथा (आपकी) स्तुति की।

एनं विसृज्य, (त्वं) विपिनागतपाण्डवेयवृत्तं विवेदिथ। = उस (अक्रूर) को छोड़कर (आपने) वन से आये पाण्डवों के वृत्तान्त को समझा।

तथा धृतराष्ट्रचेष्टाम्। = उसी प्रकार धृतराष्ट्र की चालें (भी समझीं)

भावार्थ—उसके बाद बलराम तथा उद्धव के साथ अक्रूर के घर गये। उस (अक्रूर) ने सत्कार तथा (आपकी) स्तुति की। उस (अक्रूर) को छोड़कर (आपने) वन से आये पाण्डवों के वृत्तान्त को समझा। उसी प्रकार ही धृतराष्ट्र की चालें (भी समझीं)।

Words-Explanation :

मन्दिरम् = A dwelling, House, An Abode, A Mansion, A Palace. (As in अक्रूरमन्दिरम् इतः)

विद् (विदित, वेत्ति, वेद, विविदिषति) = To know, To understand etc. (As in विवेदिथ)

चेष्टा = Movement, Action, Gesture, Behaviour etc. (As in धृतराष्ट्र-चेष्टाम्)

[शिखरिणीछन्दः]

॥ ६ ॥

विघाताज्जामातुः परमसुहृदो भोजनृपतेर्जरासन्धे रुन्धत्यनवधिरुषान्धेऽथ मथुराम्।
रथाद्यैर्द्योर्लब्धैः कतिपयबलस्त्वं बलयुतस्त्रयोविंशत्यक्षौहिणि तदुपनीतं समहृथाः॥

पदविभागः—विघातात्, जामातुः, परमसुहृदः, भोजनृपतेः, जरासन्धे, रुन्धति, अनवधिरुषा अन्धे, अथ, मथुराम्, रथाद्यैः, द्योः, लब्धै, कतिपयबलः, त्वम्, बलयुतः, त्रयोविंशत्यक्षौहिणि, तदुपनीतम्, समहृथाः॥

अन्वयः—अथ जामातुः परमसुहृदः भोजनृपतेः विघातात् जरासन्धे अनवधिरुषा अन्धे मथुरां रुन्धति (सति), द्योः लब्धैः रथाद्यैः कतिपयबलः त्वं बलयुतः तदुपनीतं त्रयोविंशत्यक्षौहिणि समहृथाः॥

अन्वयार्थः

Funding by IKS-MoE

अथ जामातुः परमसुहृदः = उसके बाद जामाता तथा परममित्र

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भोजनृपतेः विघातात् = भोजराज (कंस) की हत्या से

जरासन्धे अनवधिरुषा अन्धे = जरासन्ध के अत्यन्त क्रोध से अन्धे होकर

मथुरां रुन्धति (सति) = मथुरा को घेरने पर,

द्योः लब्धैः रथाद्यैः = स्वर्ग से प्राप्त रथ आदि (रथ, सारथी आदि)

कतिपयबलः त्वम् = और कुछ सैनिकों के साथ आपने

बलयुतः तदुपनीतम् त्रयोविंशत्यक्षौहिणि समहथाः । = बलराम के साथ उस (जरासन्ध) के द्वारा लाये गये तेईस अक्षौहिणी सेना का संहार किया ।

भावार्थ—उसके बाद, जामाता तथा परममित्र भोजराज (कंस) की हत्या से जरासन्ध के अत्यन्त क्रोध से अन्धे होकर मथुरा को घेरने पर, स्वर्ग से प्राप्त रथ आदि (रथ, सारथी आदि), और कुछ सैनिकों के साथ आप ने बलराम के साथ उस (जरासन्ध) के द्वारा लायी गई तेईस "अक्षौहिणी" सेना का संहार किया ।

Words-Explanation :

रुष्, रुषा = Anger, Wrath, Rage etc. (As in रुषा अन्धे)

रुन्ध् = Prevent, Obstruct, Stop, Oppose, Besiege etc. (As in मथुरां रुन्धति सति)

द्यो = Heaven. (As in द्योः लब्धैः)

कतिपय = Some, Several, A certain number etc. (As in कतिपयबलः)

[वसन्ततिलकछन्दः]

॥ ७ ॥

बद्धं बलादथ बलेन बलोत्तरं त्वं भूयो बलोद्यमरसेन मुमोचिथैनम् ।
निश्शेषदिग्जयसमाहृतविश्वसैन्यात् कोऽन्यस्ततो हि बलपौरुषवांस्तदानीम् ॥

पदविभागः—बद्धम्, बलात्, अथ, बलेन, बलोत्तरम्, त्वम्, भूयः, बलोद्यमरसेन, मुमोचिथ, एनम्, निश्शेषदिग्जयसमाहृतविश्वसैन्यात्, कः, अन्यः, ततः, हि, बलपौरुषवान्, तदानीम् ॥

अन्वयः—अथ बलेन बलात् बद्धं बलोत्तरम् एनं (जरासन्धं) भूयः बलोद्यमरसेन त्वं मुमोचिथ । निश्शेषदिग्जयसमाहृतविश्वसैन्यात् ततः बलपौरुषवान् तदानीं कः अन्यः हि ?

अन्वयार्थः

अथ बलेन बलात् बद्धं बलोत्तरम् एनम् (जरासन्धम्) = बाद में बल से बलराम द्वारा बाँधे गये बलशाली (जरासन्ध) को

भूयः बलोद्यमरसेन त्वं मुमोचिथ । = फिर से सैनिक एकत्रित करके आयेगा इस प्रकार विचार करके आपने मुक्त किया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निश्शेषदिग्जयसमाहृतविश्वसैन्यात् ततः = दिग्विजय करके प्राप्त सैनिकों के उस जरासन्ध से

बलपौरुषवान् तदानीं कः अन्यः हि ? = उस समय बल तथा पौरुष में दूसरा कौन है ?

भावार्थ—बाद में बल से बलराम द्वारा बाँधे गये बलशाली इस (जरासन्ध) को पुनः सैनिक एकत्रित करके आयेगा इस प्रकार विचार करके आपने मुक्त किया। दिग्विजय करके प्राप्त सैनिकों के उस जरासन्ध से उस समय बल तथा पौरुष में दूसरा कौन है ?

Words-Explanation :

हृत (समाहृत) = Taken, Seized, Captivated etc. (As in दिग्विजयसमाहृत-विश्वसैन्यात्)

मोचनम् = Releasing, Freeing from, Liberating etc. (As in त्वं मुमोचित)

[वसन्ततिलकछन्दः]

॥ ८ ॥

भग्नः स लग्नहृदयोपि नृपैः प्रणुन्नो युद्धं त्वया व्यधित षोडशकृत्व एवम्।
अक्षौहिणीः शिव शिवास्य जघन्थ विष्णो, सम्भूय सैकनवतित्रिशतं तदानीम्॥

पदविभागः—भग्नः, सः, लग्नहृदयः, अपि, नृपैः, प्रणुन्नः, युद्धम्, त्वया, व्यधित, षोडशकृत्वः, एवम्, अक्षौहिणीः, शिव, शिव, अस्य, जघन्थ, विष्णो, सम्भूय, सैकनवतित्रिशतम्, तदानीम्॥

अन्वयः—भग्नः सः लग्नहृदयः अपि नृपैः प्रणुन्नः एवं षोडशकृत्वः त्वया युद्धं व्यधित। तदानीं विष्णो, अस्य (जरासन्धस्य) सम्भूय सैकेनवतित्रिशतम् अक्षौहिणीः, शिव, शिव, (त्वं) जगन्थ।

अन्वयार्थः

भग्नः सः लग्नहृदयः अपि = (अन्दर से) टूट गये उस (जरासन्ध) के निराश होने पर भी

नृपैः प्रणुन्नः एवं षोडशकृत्वः त्वया युद्धं व्यधित। = राजाओं द्वारा प्रेरित होकर उसी प्रकार (जैसे पूर्व हुआ उसने) सोलह बार आप के साथ युद्ध किया।

तदानीं विष्णो, अस्य (जरासन्धस्य) सम्भूय सैकनवतित्रिशतम् अक्षौहिणीः शिव, शिव, जगन्थ। = उस समय हे विष्णो ! उस (जरासन्ध) के सब मिलकर तीन सौ इक्यानब्बे अक्षौहणी (सैनिकों) को लोककल्याण के लिए (आपने) मार डाला।

भावार्थ—(अन्दर से) टूट गये उस (जरासन्ध) के निराश होने पर भी, राजाओं द्वारा प्रेरित होकर (जैसे पूर्व हुआ उसने) उसी प्रकार सोलह बार आपके साथ युद्ध किया। उस समय हे विष्णो ! उस (जरासन्ध) के कुल मिलाकर तीन सौ इक्यानब्बे अक्षौहिणी (सैनिकों) को लोककल्याण के लिए (आपने) मार डाला।

Words-Explanation :

भग्न = Broken, Fractured, frustrated etc. (As in भग्नः सः)

Funding by IKS-MoE

प्रणुन्न = Driven or sent away, Set in motion etc. (As in नृपैः प्रणुन्नः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अक्षौहिणी = An "अक्षौहिणी" consists of the following in an Army: Chariots - 21870 Elephants - 21870 Horses- 65610 Foot Soldiers - 109350 (As in सैकनवतित्रिंशतम् अक्षौहिणीः)

॥ ९ ॥

अष्टादशेऽस्य समरे समुपेयुषि त्वं दृष्ट्वा पुरोथ यवनं यवनत्रिकोट्या ।
त्वष्ट्रा विधाप्य पुरमाशु पयोधिमध्ये तत्राऽथ योगबलतः स्वजनाननैषीः ॥

पदविभागः—अष्टादशे, अस्य, समरे, समुपेयुषि, त्वम्, दृष्ट्वा, परः, अथ, यवनम्, यवनत्रिकोट्या, त्वष्ट्रा, विधाप्य, पुरम्, आशु, पयोधिमध्ये, तत्र, अथ, योगबलतः, स्वजनान्, अनैषीः ॥

अन्वयः—अस्य अष्टादशे समरे समुपेयुषि (सति), अथ यवनत्रिकोट्या यवनं पुरः त्वं दृष्ट्वा, पयोधिमध्ये आशु पुरं त्वष्ट्रा विधाप्य अथ स्वजनान् योगबलतः तत्र अनैषीः ।

अन्वयार्थः

अस्य अष्टादशे समरे समुपेयुषि (सति) , अथ यवनत्रिकोट्या यवनं पुरः त्वं दृष्ट्वा । = उस (जरासन्ध) के अठारहवें बार युद्ध के लिए आते समय उसी समय तीन करोड़ यवन सैनिकों के साथ यवन को सामने देखकर ।

पयोधिमध्ये आशु पुरं त्वष्ट्रा विधाप्य अथ स्वजनान् योगबलतः तत्र अनैषीः । = समुद्र के बीच में तुरन्त एक नगर विश्वकर्मा द्वारा बनवाकर, योगबल से अपने जनों को वहां ले गये ।

भावार्थ—उस (जरासन्ध) के अठारहवें बार युद्ध के लिए आते समय उसी समय तीन करोड़ यवन सैनिकों सहित यवन को देखकर, समुद्र के बीच में तुरन्त एक नगर विश्वकर्मा द्वारा बनवाकर, योगबल से अपने जनों को वहां ले गये ।

Words-Explanation :

पयोधिः = Ocean. (As in पयोधिमध्ये)

आशु = Quick, Fast. (As in आशु पुरं त्वष्ट्रा विधाप्य)

विध् (विधति) = Cut, To Rule, To administer etc. (As in त्वष्ट्रा विधाप्य)

त्वष्ट्र- = Carpenter, Builder, Workman, Viswakarma the Architect of Gods. (As in त्वष्ट्रा विधाप्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[स्रग्धरछन्दः]

॥ १० ॥

पद्भ्यां त्वं पद्ममाली चकित इव पुरान्निर्गतो धावमानो
म्लेच्छेशेनानुयातो वधसुकृतविहीनेन शैले न्यलैषीः ।

सुप्तेनाङ्घ्रयाहतेन द्रुतमथ मुचुकुन्देन भस्मीकृतेऽस्मिन्
भूपायास्मै गुहान्तः सुललितवपुषा तस्थिषे भक्तिभाजे ॥

पदविभागः—पद्भ्याम्, त्वम्, पद्ममाली, चकितः, इव, पुरात्, निर्गतः, धावमानः, म्लेच्छेशेन, अनुयातः, वधसुकृति-विहीनेन, शैले, न्यलैषीः, सुप्तेन, अङ्घ्रयाहतेन, द्रुतम्, अथ, मुचुकुन्देन, भस्मीकृते, अस्मिन्, भूपाय, अस्मै, गुहान्तः, सुललितवपुषा, तस्थिषे, भक्तिभाजे ।

अन्वयः—पद्ममाली त्वं चकितः इव पुरात् निर्गतः पद्भ्यां धावमानः वधसुकृतविहीनेन म्लेच्छेशेन अनुयात, शैले न्यलैषीः । सुप्तेन अङ्घ्रयाहतेन मुचुकुन्देन अस्मिन् अथ द्रुतं भस्मीकृते (सति) भक्तिभाजे अस्मै भूपाय सुललितवपुषा गुहान्तः तस्थिषे ॥

अन्वयार्थः

पद्ममाली त्वं चकितः इव पुरात् निर्गतः पद्भ्यां धावमानः = कमल के फूल से बनी माला को पहने आप भयभीत हुए जैसे (मथुरा) पुरी से बाहर आकर पैदल दौड़ते

वधसुकृतविहीनेन म्लेच्छेशेन अनुयातः शैले न्यलैषीः । = आपके हाथों से वध-प्राप्ति के सत्कर्म नहीं किये म्लेच्छ राजा द्वारा पीछे दौड़ने पर (आप) पर्वत में छिप गये ।

सुप्तेन अङ्घ्रयाहतेन मुचुकुन्देन अस्मिन् अथ द्रुतं भस्मीकृते (सति) = सोते मुचुकुन्द को पैर से मारने पर तुरन्त उस (यवन) के भस्म (राख) होने पर,

भक्तिभाजे अस्मै भूपाय सुललितवपुषा गुहान्तः तस्थिषे । = भक्तिमान् उस राजा (मुचुकुन्द) को सुसज्जित वेषभूषा से गुफा के अन्दर (आपने) दर्शन दिये ।

भावार्थ—कमल से बनी माला को पहने आप भयभीत हुए जैसे (मथुरा) पुरी से बाहर निकलकर पैदल दौड़ते, आपके हाथों से वध प्राप्ति के लिए सत्कर्म नहीं किये म्लेच्छ राजा द्वारा आपके पीछे दौड़ने पर (आप) पर्वत में छिप गये । सोते मुचुकुन्द को पैर से मारने पर तुरन्त उस (यवन) के भस्म होने पर, भक्तिमान् उस राजा (मुचुकुन्द) को सुसज्जित वेषभूषा से गुफा के अन्दर (आपने) दर्शन दिये ।

Words-Explanation :

अङ्घ्रि = A foot भूपः = A king

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[स्रग्धरछन्दः]

॥ ११ ॥

ऐक्ष्वाकोहं, विरक्तोस्म्यखिलनृपसुखे त्वत्प्रसादैककांक्षी,
हा देवेति स्तुवन्तं वरविततिषु तं निःस्पृहं वीक्ष्य हृष्यन्।
मुक्तेस्तुल्यां च भक्तिं धुतसकलमलां मोक्षमप्याशु दत्वा
कार्यं हिंसाविशुद्धै तप इति च तदा प्रात्थ लोकप्रतीत्यै ॥

पदविभागः—ऐक्ष्वाकः, अहम्, विरक्तः, अस्मि, अखिलनृपसुखे, त्वत्प्रसादैककांक्षी, हा, देव, इति, स्तुवन्तम्, वरविततिषु, तम्, निःस्पृहम्, वीक्ष्य, हृष्यन्, मुक्तेः, तुल्याम्, च, भक्तिम्, धुतसकलमलाम्, मोक्षम्, अपि, आशु दत्वा, कार्यम्, हिंसाविशुद्धै, तपः, इति, च तदा, प्रात्थ, लोकप्रतीत्यै ॥

अन्वयः—हा, देव, अहम् ऐक्ष्वाकः अस्मि। अखिलनृपसुखे विरक्तः (अस्मि)। त्वत्प्रसादैककांक्षी इति स्तुवन्तं तं वरविततिषु निःस्पृहं वीक्ष्य हृष्यन्, धुतसकलमलां मुक्तेः तुल्यां च भक्तिं आशु मोक्षम् अपि दत्वा, हिंसाविशुद्धै तपः कार्यम् इति च लोकप्रतीत्यै तदा प्रात्थ।

अन्वयार्थः

हा, देव अहम् ऐक्ष्वाकः अस्मि अखिलनृपसुखे विरक्तः (अस्मि), त्वत्प्रसादैककांक्षी। = हे, देव ! मै इक्ष्वाकु वंश का हूं। राजाओं को प्राप्त सुखों में विरक्त हूं। आपके प्रसाद का ही आग्रह करता हूं।

इति स्तुवन्तं तं वरविततिषु निःस्पृहं वीक्ष्य हृष्यन्, धुतसकलमलां मुक्तेः तुल्यां च भक्तिं आशु मोक्षम् अपि दत्वा, हिंसाविशुद्धै तपः कार्यम् इति च लोकप्रतीत्यै तदा प्रात्थ। = इस प्रकार स्तुति पूर्वक उन वरों को एकत्रित करने में इच्छा-रहित देखकर, हर्षित होकर, समस्त पापों को धोकर, मुक्ति के समान भक्ति तथा मोक्ष तुरन्त देकर, हिंसा से पाप-निवारण के लिए तप ही करना है, इस प्रकार लोगों को विश्वास दिलाने के लिए आपने अनुग्रह किया।

भावार्थ—हे देव, मैं इक्ष्वाकु वंश का हूं। राजाओं को प्राप्त सुखों में विरक्त हूं। आपके प्रसाद का ही आग्रह करता हूं। इस प्रकार स्तुति पूर्वक वरों को एकत्रित करने में इच्छा रहित देखकर, हर्षित होकर, समस्त पापों को धोकर, मुक्ति के समान भक्ति तथा मोक्ष तुरन्त देकर, हिंसा से हुए पाप-निवारण के लिए तपस्या ही करनी है, इस प्रकार लोगों को विश्वास दिलाने के लिए आपने अनुग्रह किया।

Words-Explanation :

विततिः = Collection, Extension (As in वरविततिषु निःस्पृहम्)

स्पृहणम् The act of desiring (निःस्पृहणम्, निःस्पृहम् Not desiring) (As in वरविततिषु निःस्पृहम्) =

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[हरिणीछन्दः]

॥ १२ ॥

तदनु मथुरां गत्वा हत्वा चमूं यवनाहृताम्
मगधपतिना मार्गे सैन्यैः पुरेव निवारितः ।
चरमविजयं दर्पायास्मै प्रदाय पलायितो
जलधिनगरीं यातो वातालयेश्वर, पाहि माम् ॥

पदविभागः—तदनु, मथुराम्, गत्वा, हत्वा, चमूम्, यवनाहृताम्, मगधपतिना, मार्गे, सैन्यैः, पुरा, इव, निवारितः, चरमविजयम्, दर्पाय, अस्मै, प्रदाय, पलायितः, जलधिनगरीम्, यातः, वातालयेश्वर, पाहि, माम् ॥

अन्वयः—तदनु मथुरां गत्वा यवनाहृतं चमूं हत्वा, मार्गे पुरा इव मगधपतिना सैन्यैः निवारितः । दर्पाय अस्मै चरमविजयं प्रदाय पलायितः, जलधिनगरीं यातः वातालयेश्वर, मां पाहि ।

अन्वयार्थः

तदनु मथुरां गत्वा यवनाहृतं चमूं हत्वा, = उसके बाद मथुरा जाकर, यवन द्वारा लाये सैनिकों का वध करके

मार्गे पुरा इव मगधपतिनो सैन्यैः निवारितः । = मार्ग में पहले जैसे मगध राजा (जरासन्ध) द्वारा सैनिकों से (आपको) रोका गया ।

दर्पाय अस्मै चरमविजयं प्रदाय पलायित, जलधिनगरीं यातः वातालयेश्वर, मां पाहि । = उसके अहंकार को तृप्त करने के लिए अन्तिम विजय उसको प्रदान करके भागकर द्वारका गये, हे वातालयेश्वर मेरी रक्षा करें ।

भावार्थ—उसके बाद मथुरा जाकर, यवन द्वारा लाये सैनिकों का वध करके, मार्ग में पहले जैसे मगध के राजा (जरासन्ध) द्वारा सैनिकों से (आपको) रोका गया । उसके अहंकार को तृप्त करने के लिए अन्तिम विजय उसको प्रदान करके, भागकर द्वारका गये, हे वातालयेश्वर मेरी रक्षा करें ।

Words-Explanation :

चमू = An army (in general), A Division of an Army consisting of 729 elephants, 729 Chariots, 2187 Horses & 3645 soldiers (foot) (As in हत्वा चमूम्)

चरम = Last. (As in चरमविजयं प्रदाय) दर्पः = Pride. (As in दर्पाय अस्मै)

पलायनम् = Running away, Retreat, Escape etc. (As in पलायितः जलधिनगरीम्)

॥इति सप्तसप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७८

रुक्मिणीसंदेशप्राप्तिवर्णनम्

[द्रुतविलम्बितछन्दः]

॥ १ ॥

त्रिदिववर्धकिवर्धितकौशलं त्रिदशदत्तसमस्तविभूतिमत् ।
जलधिमध्यगतं त्वमभूषयो नवपुरं वपुरञ्चितरोचिषा ॥

पदविभागः—त्रिदिववर्धकिवर्धितकौशलम्, त्रिदशदत्तसमस्तविभूतिमत्, जलधिमध्यगतम्, त्वम्, अभूषयः, नवपुरम्, वपुरञ्चितरोचिषा ॥

अन्वयः—त्वं त्रिदिववर्धकिवर्धितकौशलं, त्रिदशदत्तसमस्तविभूतिमत् जलधिमध्यगतं नवपुरं वपुरञ्चितरोचिषा अभूषयः ॥

अन्वयार्थः

त्वं त्रिदिववर्धकिवर्धितकौशलम् = आपने विश्वकर्मा के कौशल से बने,

त्रिदशदत्तसमस्तविभूतिमत् = देवों से प्राप्त समस्त ऐश्वर्यों से शोभित

जलधिमध्यगतं नवपुरम् = समुद्र के बीच में स्थित नयी नगरी को

वपुरञ्चितरोचिषा अभूषयः । = (अपने) सुन्दर शरीर की शोभा से अलंकृत किया ।

भावार्थ—आपने विश्वकर्मा की कुशलता से बने, देवों से प्राप्त समस्त विभूतियों से संपूर्ण, समुद्र के मध्य में स्थित नयी नगरी (द्वारका) का अपने सुन्दर शरीर की शोभा से अलंकृत किया ।

Words-Explanation :

वर्धकः, वर्धकिः, वर्धकिन् = Carpenter (As in त्रिदिववर्धकिवर्धित—)

त्रिदिववर्धकि = The Carpenter of Heaven i.e; Viswakarma

त्रिदिशः = An immortal, Deva (As in त्रिदिशदत्त—)

विभूतिः = Might, Power, Prosperity, Dignity etc. (As in समस्तविभूतिमत्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ २ ॥

ददुषि रेवतभूभृति रेवतीं हलभृते तनयां विधिशासनात् ।
महितमुत्सवघोषमपूपुषः समुदितैर्मुदितैस्सह यादवैः ॥

पदविभागः—ददुषि, रेवतभूभृति, रेवतीम्, हलभृते, तनयाम्, विधिशासनात्, महितम्, उत्सवघोषम्, अपूपुषः, समुदितैः, मुदितैः, सह, यादवैः ॥

अन्वयः—रेवतभूभृति तनयां रेवतीं, विधिशासनात्, हलभृते ददुषि (सति), त्वं मुदितैः, समुदितैः, यादवैः सह महितम् उत्सवघोषम् अपूपुषः ।

अन्वयार्थः

रेवतभूभृति तनयां रेवतीम् = रेवत नाम के राजा के (अपनी) पुत्री रेवती को

विधिशासनात् हलभृते ददुषि (सति) = ब्रह्माजी के आदेशानुसार बलराम को (विवाह में) देने पर

त्वं मुदितैः = आपने प्रसन्नता से

समुदितैः यादवैः सह = एकत्रित हुए अनेक यादवों के साथ

महितम् उत्सवघोषम् = महान् उत्सव (विवाहोत्सव)

अपूपुषः । = मनाया ।

भावार्थ—रेवत नाम के राजा के (अपनी) पुत्री रेवती को ब्रह्माजी के आदेशानुसार बलराम को (विवाह में) देने पर, आपने प्रसन्नता से एकत्रित हुए अनेक यादवों के साथ महान उत्सव (विवाहोत्सव) मनाया ।

Words-Explanation :

भूभृति = King, भूभृत्- Mountain (As in रेवतभूभृति)

हलभृत् = Balarama. (As in हलभृते)

विधिः = Brahma. (As in विधिशासनात्)

समुदित = Assembled, Collected, United. (As in समुदितैः यादवैः)

॥ ३ ॥

अथ विदर्भसुतां खलु रुक्मिणीं प्रणयिनीं त्वयि देव, सहोदरः ।
स्वयमदित्सत चेदिमहीभुजे स्वतमसा तमसाधुमुपाश्रयन् ॥

पदविभागः—अथ, विदर्भसुताम्, खलु, रुक्मिणीम्, प्रणयिनीम्, त्वयि, देव, सहोदरः, स्वयम्, अदित्सत, चेदिमहीभुजे, स्वतमसा, तम्, असाधुम्, उपाश्रयन् ॥

अन्वयः—देव, अथ विदर्भसुतां त्वयि खलु प्रणयिनीं रुक्मिणीं सहोदरः चेदिमहीभुजे स्वतमसा तम् असाधुम् उपाश्रयन् स्वयम् अदित्सत ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

देव, अथ त्वयि खलु प्रणयिनीं विदर्भसुतां रुक्मिणीम्, = हे देव ! उसके बाद आपको अधिक प्रेम करती विदर्भ (राजा) की पुत्री रुक्मिणी को

सहोदरः चेदिमहीभुजे स्वतमसा तम् असाधुम् उपाश्रयन् स्वयम् अदित्सत । = (उसका) बड़ा भाई, चेदि के राजा (शिशुपाल) को अपनी बुद्धिहीनता के कारण उस दुष्ट से मिलकर (विवाह में देने के लिए) स्वयं निश्चय किया ।

भावार्थ—हे देव ! उसके बाद विदर्भ (राजा) की पुत्री, आपको अधिक प्रेम करती रुक्मिणी को, (उसके) बड़े भाई, चेदि के राजा (शिशुपाल) को, अपनी बुद्धिहीनता के कारण उस दुष्ट से मिलकर, (विवाह में देने के लिए) स्वयं निश्चय किया ।

Words-Explanation :

प्रणयिन् = Loving, Attached, etc. (As in प्रणयिनीम् रुक्मिणीम्)

महीभुजः = King (As in चेदिमहीभुजे)

॥ ४ ॥

चिरधृतप्रणया त्वयि बालिका सपदि काम्क्षितभङ्गसमाकुला ।
तव निवेदयितुं द्विजमादिशत् स्वकदनं कदनङ्गविनिर्मितम् ॥

पदविभागः—चिरधृतप्रणया, त्वयि, बालिका, सपदि, काम्क्षितभङ्गसमाकुला, तव, निवेदयितुम्, द्विजम्, आदिशत्, स्वकदनम्, कदनङ्गविनिर्मितम् ॥

अन्वयः—त्वयि चिरधृतप्रणया बालिका सपदि काम्क्षितभङ्गसमाकुला कदनङ्गविनिर्मितं स्वकदनं तव निवेदयितुं (एकं) द्विजम् आदिशत् ॥

अन्वयार्थः

त्वयि चिरधृतप्रणया बालिका = आपमें बहुत समय से प्रेम करती उस बालिका ने

सपदि कांक्षितभङ्गसमाकुला = आशाओं के एकदम भंग होने पर व्याकुलता से

कदनङ्गविनिर्मितं स्वकदनम् = कामदेव से पीड़ित अपने दुःख को

तव निवेदयितुं (एकं) = आपको समझाने के लिए (एक)

द्विजम् आदिशत् । = ब्राह्मण को आपके पास भेजा ।

भावार्थ—आपमें बहुत समय से प्रेम करती उस बालिका ने (अपनी) इच्छाओं के एकदम भंग होने पर व्याकुलता से, कामदेव से पीड़ित अपनी व्यथाओं को आपको बतलाने के लिए (एक) ब्राह्मण को आपके पास भेजा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

कांक्ष् - (कांक्षति, काक्षित) = To wish, Desire, Long for, (As in कांक्षितभङ्ग-समाकुला)

आकुल = Overcome, Affected, Afflicted, Agitated, Perplexed, Undetermined, At a loss as to what to do etc. (As in कांक्षितभङ्गसमाकुला)

भङ्गः = Shattering, Breaking down, Downfall, etc. (As in कांक्षित-भङ्गसमाकुला)

कदनम् = Destruction, Slaughter, Havoc etc. (As in स्वकदनम्)

कदनङ्गः = Cupid, God by love, Kamdev. (As in कदनङ्गविनिर्मितम्)

॥ ५ ॥

द्विजसुतोऽपि च तूर्णमुपाययौ तव पुरं हि दुराशदुरासदम् ।
मुदमवाप च सादरपूजितः स भवता भवतापहृता स्वयम् ॥

पदविभागः—द्विजसुतः, अपि, च, तूर्णम्, उपाययौ, तव, पुरम्, हि, दुराशदुरासदम्, मुदम्, अवाप, च, सादरपूजितः, सः, भवता, भवतापहृता, स्वयम् ।

अन्वयः—द्विजसुतः अपि च दुराशदुरासदं हि तव पुरं तूर्णम् उपाययौ । सः भवतापहृता भवता स्वयं सादरपूजितः मुदम् अवाप च ॥

अन्वयार्थः

द्विजसुतः अपि च दुराशदुरासदम् हि तव पुरं तूर्णम् उपाययौ । = और (वह) ब्राह्मण भी दुराशा रखने वालों को अप्राप्त आपके नगर (द्वारका) में ही शीघ्र पहुँचा ।

सः भवतापहृता भवता स्वयं सादरपूजितः मुदम् अवाप च = वह (ब्राह्मण) सांसारिक दुःख को मिटाने वाले आप द्वारा स्वयं आदर सत्कार प्राप्त कर सन्तुष्ट हुआ ।

भावार्थ—और (वह) ब्राह्मण भी दुराशा रखने वालों को अप्राप्त आपके नगर (द्वारका) में ही शीघ्र पहुँचा । वह (ब्राह्मण) सांसारिक दुःख को मिटाने वाले आप द्वारा स्वयं आदर-सत्कार प्राप्त कर सन्तुष्ट हुआ ।

Words-Explanation :

दुरासद = Difficult to be approached or overtaken (As in दुराशदुरा-सदम्)

तूर्ण = Quick, Expeditious. (As in तूर्णम् उपाययौ)

॥ ६ ॥

स च भवन्तमवोचत कुण्डिने नृपसुता खलु राजति रुक्मिणी ।
त्वयि समुत्सुकया निजधीरतारहितया हि तया प्रहितोस्म्यहम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—सः, च, भवन्तम्, अवोचत, कुण्डिने, नृपसुता, खलु, राजति, रुक्मिणी, त्वयि, समुत्सुकया, निजधीरता-रहितया, हि, तया, प्रहितः, अस्मि, अहम् ॥

अन्वयः—सः भवन्तम् अवोचत च । "कुण्डिने खलु रुक्मिणी नृपसुता राजति । त्वयि समुत्सुकया, निजधीरतार-हितया तया हि अहं प्रहितः अस्मि ।"

अन्वयार्थः

सः भवन्तम् अवोचत च । = उस (ब्राह्मण ने) आपको इस प्रकार कहा ।

"कुण्डिने खलु रुक्मिणी नृपसुता राजति । = "कुण्डिन में रुक्मिणी नाम की राजपुत्री रहती है ।

त्वयि समुत्सुकया, निजधीरतारहितया तया हि अहं प्रहितः अस्मि ।" = (वह) आप में प्रेम रखती है, अपना धैर्य छोड़ चुकी उसके द्वारा ही मैं प्रेषित हूँ ।"

भावार्थ—उस (ब्राह्मण ने) आपको इस प्रकार कहा । "कुण्डिन में रुक्मिणी राजपुत्री रहती है । (वह) आप में प्रेम रखती है, अपना धैर्य छोड़ चुकी उसके द्वारा ही मैं प्रेषित हूँ ।"

Words-Explanation :

प्रहित = Sent, Despatched, Directed, Appointed, Placed, Put forth etc. (As in तया हि अहं प्रहितः अस्मि)

उत्सुक = Desirous, Anxiously desirous, Eagerly expecting, Fond of, Attached etc. (As in त्वयि समुत्सुकया—)

॥ ७ ॥

तव हतास्मि पुरैव गुणैरहं हरति मां किल चेदिनृपोऽधुना ।
अयि कृपालय पालय मामिति प्रजगदे जगदेकपते तया ॥

पदविभागः—तव, हता, अस्मि, पुरा, एव, गुणैः, अहम्, हरति, माम्, किल, चेदिनृपः, अधुना, अयि, कृपालय, पालय, माम्, इति, प्रजगदे, जगदेकपते, तया ।

अन्वयः—"अहं तव गुणैः पुरा एव हता अस्मि । अधुना चेदिनृपः मां हरति किल । अयि कृपालय मां पालय ।" इति जगदेकपते तया प्रजगदे ।

अन्वयार्थः

"अहं तव गुणैः पुरा इव हता अस्मि । = "पहले से ही मैं आपके गुणों से अपहृत हूँ ।

अधुना चेदिनृपः मां हरति किल । = लगता है अब चेदि का राजा मुझे ले जा रहा है ।

अयि कृपालय मां पालय ।" = हे, कृपालय ! मेरी रक्षा करो ।"

इति जगदेकपते तया प्रजगदे = इस प्रकार जगत् के एक ही आश्रय ! उसने प्रार्थना की ।

भावार्थ—"पहले से ही मैं आपके गुणों से अपहृत हूँ । लगता है अब चेदि का राजा मुझे ले जा रहा है । हे, कृपालय ! मेरी रक्षा करो ।" इस प्रकार जगत् के एक मात्र आश्रय ! उसने प्रार्थना की ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

हर, हरा, हरी = Taking away, Removing, Seizing, Grasping, Claiming, Captivating etc. (As in चेदिनृपः मां हरति)

हृत (हृते) = To take away, Seizing. (As in पुरा एव हृता)

अयि = Used as a gentle address to a friend such as : As a particle of entreaty or solicitation, As a kind of gentle or kind enquiry. Generally used for "Oh" "Ah" "Dear friend" etc. (Something like अरे in Hindi) (As in अयि कृपालय–)

॥ ८ ॥

अशरणां यदि मां त्वमुपेक्षसे सपदि जीवितमेव जहाम्यहम् ।
इति गिरा सुतनोरतनोद्भृशं सुहृदयं हृदयं तव कातरम् ॥

पदविभागः—अशरणाम्, यदि, माम्, त्वम्, उपेक्षसे, सपदि, जीवितम्, एव, जहामि, अहम्, इति, गिरा, सुतनोः, अतनोत्, भृशम्, सुहृत्, अयम्, हृदयम्, तव, कातरम् ॥

अन्वयः—"यदि त्वम् अशरणां माम् उपेक्षसे अहं सपदि जीवितं जहामि एव" । इति सुतनोः गिरा अयं सुहृत् (ब्राह्मणः) तव हृदयं भृशं कातरम् आतनोत् ।

अन्वयार्थः

"यदि त्वम् अशरणां माम् उपेक्षसे अहं सपदि जीवितं जहामि एव ।" = "यदि आप शरणहीन मेरी उपेक्षा करेंगे तो मैं उसी समय अपने जीवन का त्याग करूँगी ।"

इति सुतनोः गिरा अयं सुहृत् (ब्राह्मणः) तव हृदयं भृशं कातरम् अतनोत् । = इस प्रकार (उस) सुन्दरी की बातों से उस मित्र (ब्राह्मण) ने आपके मन को अत्यन्त भयभीत कर दिया ।

भावार्थ—"यदि आप आश्रय रहित मेरी उपेक्षा करेंगे तो मैं उसी समय अपने जीवन का त्याग करूँगी ।" इस प्रकार (उस) सुन्दरी की बातों से उस (ब्राह्मण) ने आपके मन को अत्यन्त भयभीत कर दिया ।

Words-Explanation :

जहत्/ जहती = Leaving, Abandoning. (As in जीवितं जहामि एव)

कातर = Agitated, Timid, Afraid, Disturbed etc. (As in कातरम् अतनोत्)

भृश् = Strong, Mighty, Excessive etc. (As in भृशं कातरम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ९ ॥

अकथयस्त्वमथैनमये सखे, तदधिका मम मन्मथवेदना।
नृपसमक्षमुपेत्य हराम्यहं तदयि तां दयितामसितेक्षणाम् ॥

पदविभागः—अकथयः, त्वम्, अथ, एनम्, अये, सखे, तदधिका, मम, मन्मथवेदना, नृपसमक्षम्, उपेत्य, हरामि, अहम्, तत्, अयि, ताम्, दयिताम्, असितेक्षणाम्।

अन्वयः—अथ त्वम् एनम् अकथयः। अये सखे,मम तदधिका मन्मथवेदना (अस्ति)। तत् अयि अहम् उपेत्य नृपसमक्षम् असितेक्षणां दयितां तां हरामि।

अन्वयार्थः

अथ त्वम् एनम् अकथयः। = उसके बाद आपने इससे कहा।

अये सखे, मम तदधिका मन्मथवेदना। = अरे सखे ! मुझे उससे अधिक मन्मथ वेदना है।

तत् अयि अहम् उपेत्य नृपसमक्षम् असितेक्षणां दयितां तां हरामि। = इसलिए मैं आकर राजा के सम्मुख उस काली आँखों वाली प्रेमिका को हर लाऊंगा।

भावार्थ—उसके बाद आपने इससे कहा। अरे सखे ! मुझे उससे अधिक मन्मथ वेदना है। इसलिए मैं आकर राजा के सम्मुख उस काली ऑखों वाली प्रेमिका को हर लाऊंगा।

Words-Explanation :

असित = Black (As in असितेक्षणां दयिताम् ताम्)

ईक्षणम् = An eye, Seeing, Beholding etc. (As in असितेक्षणाम्)

दयिता = Beloved woman, Ones Beloved woman, Wife etc. (As in असितेक्षणां दयिताम्)

॥ १० ॥

प्रमुदितेन च तेन समं तदा रथगतो लघु कुण्डिनमेयिवान्।
गुरुमरुत्पुरनायक, मे भवान् वितनुतां तनुतां निखिलापदाम् ॥

पदविभागः—प्रमुदितेन, च, तेन, समम्, तदा, रथगतः, लघु, कुण्डिनमेयिवान्, गुरुमरुत्पुरनायक, मे, भवान्, वितनुताम्, तनुताम्, निखिलापदाम् ॥

अन्वयः—गुरुमरुत्पुरनायक, तदा प्रमुदितेन तेन च समं रथगतः, लघु कुण्डिनम् एयिवान् भवान्, मे निखिलापदां तनुतां वितनुताम्।

अन्वयार्थः

गुरुमरुत्पुरनायक तदा = हे गुरुवायुपुराधीश ! उस समय

Funding by IKS-MoE

प्रमुदितेन तेन च समम् = सन्तुष्ट उसके साथ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रथगतः, लघु = रथ द्वारा जाकर, तुरन्त

कुण्डिनम् एयिवान् भवान् = कुण्डिन में पहुंचे आप

मे निखिलापदां तनुतां वितनुताम्। = मेरी समस्त आपदाओं को क्षीण कर दो।

भावार्थ—हे गुरुवायुपुराधीश ! उस समय सन्तुष्ट उस (ब्राह्मण) के साथ, रथ द्वारा जाकर, तुरन्त कुण्डिन में पहुंचे आप मेरी समस्त आपदाओं को क्षीण कर दो।

Words-Explanation :

तनु = Little, Small, Limited etc. (As in निखिलापदां तनुतां)

लघु = Fast, Quickly (As in रथगत लघु कुण्डिनम् एयिवान्)

आपदा = Misfortune, Calamity. (As in निखिलापदाम्)

॥ इति अष्टसप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-७९

रुक्मिणीस्वयंवरवर्णनम्

[द्रुतविलम्बितछन्दः]

॥ १ ॥

बलसमेतबलानुगतो भवान् पुरमगाहत भीष्मकमानितः ।
द्विजसुतं त्वदुपागमवादिनं धृतरसा तरसा प्रणनाम सा ॥

पदविभागः—बलसमेतबलानुगतः, भवान्, पुरम्, अगाहत, भीष्मकमानितः, द्विजसुतम्, त्वदुपागमवादिनम्, धृतरसा, तरसा, प्रणनाम, सा ।

अन्वयः—बलसमेतबलानुगतः भवान् भीष्मकमानितः पुरम् अगाहत । त्वदुपागमवादिनं द्विजसुतं सा तरसा धृतरसा प्रणनाम ।

अन्वयार्थ

बलसमेतबलानुगतः भवान् = सैनिकों सहित बलराम के द्वारा अनुगत आप

भीष्मकमानितः पुरम् अगाहत । = भीष्मक द्वारा सत्कार प्राप्त करके नगर में पहुंचे ।

त्वदुपागमवादिनं द्विजसुतम् = आपके आने के समाचार को बताने वाले ब्राह्मण कुमार को

सा तरसा धृतरसा प्रणनाम । = उस (रुक्मिणी) ने तुरन्त प्रसन्न होकर प्रणाम किया ।

भावार्थ—सैनिकों सहित बलराम के द्वारा अनुगत आप भीष्मक द्वारा सत्कार प्राप्त करके नगर (कुण्डिनपुरम्) में पहुंचे । आपके आने के समाचार को बताने वाले ब्राह्मण-कुमार को उस (रुक्मिणी) ने प्रसन्न होकर तुरन्त प्रणाम किया ।

Words-Explanation :

बलम् = Strength, Force, An Army etc. (As in बलसमेत—)

तरस् = Speed (As in तरसा धृतरसा प्रणनाम)

तरसा = Immediately (As in तरसा धृतरसा प्रणनाम)

॥ २ ॥

भुवनकान्तमवेक्ष्य भवद्वपुर्नृपसुतस्य निशम्य च चेष्टितम् ।
विपुलखेदजुषां पुरवासिनां सरुदितैरुदितैरगमन्निशाम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—भुवनकान्तम्, अवेक्ष्य, भवद्वपुः, नृपसुतस्य, निशम्य, च, चेष्टितम्, विपुलखेदजुषाम्, पुरवासिनाम्, सरुदितैः, उदितैः, अगमत्, निशाम् ॥

अन्वयः—भुवनकान्तं भवद्वपुः अवेक्ष्य, नृपसुतस्य चेष्टितं निशम्य च, विपुलखेदजुषां पुरवासिनां सरुदितैः उदितैः, निशाम् अगमत् ।

अन्वयार्थः

भुवनकान्तं भवद्वपुः अवेक्ष्य = भुवनसुन्दर आपके शरीर को देखकर,

नृपसुतस्य चेष्टितं निशम्य च = नृपकुमार के कामों को भी सुनकर,

विपुलखेदजुषां पुरवासिनाम् = बहुत दुःखी हुए नगरवासियों के

सरुदितैः उदितैः निशाम् अगमत् = रोने (तथा इसके बारे में) कहने में रात बीत गयी ।

भावार्थ—भुवनसुन्दर आपके शरीर को देखकर, तथा राजकुमार के कार्यों को सुनकर, बहुत दुःखी हुए नगरवासियों के रोने (तथा इसके बारे में) कहने में रात बीत गयी ।

Words-Explanation :

जुष् (occurs at the end of composite word) = Approaching, Visiting, Assuming, Resorting to etc. (As in विपुलखेदजुषां)

चेष्टा = Motion, Gesture, Action, Behaviour, Doing or work etc. (As in नृपसुतस्य चेष्टितम्)

॥ ३ ॥

तदनु वन्दितुमिन्दुमुखी शिवां विहितमङ्गलभूषणभासुरा ।
निरगमत् भवदर्पितजीविता स्वपुरतः पुरतः सुभटावृता ॥

पदविभागः—तदनु, वन्दितुम्, इन्दुमुखी, शिवाम्, विहितमङ्गलभूषणभासुरा, निरगमत्, भवदर्पितजीविता, स्वपुरतः, पुरतः, सुभटावृता ॥

अन्वयः—तदनु भवदर्पितजीविता इन्दुमुखी, विहितमङ्गलभूषणभासुरा पुरतः सुभटावृताः शिवां वन्दितुं स्वपुरतः निरगमत् ।

अन्वयार्थः

तदनु भवदर्पितजीविता इन्दुमुखी = उसके बाद आप में अपने जीवन को अर्पित करने वाली चन्द्रमुखी,

विहितमङ्गलभूषणभासुरा = मंगल आभरणों से सुसज्जित

पुरतः सुभटावृताः = आगे से भटों द्वारा आवृत (वह रुक्मिणी)

शिवां वन्दितुं स्वपुरतः निरगमत् = पार्वती की पूजा करने के लिए अपने अन्तःपुर से निकली ।

Funding by IKS-MHRD

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—उसके बाद आप में अपने जीवन को अर्पित करने वाली चन्द्रमुखी, मंगल आभरणों से अलंकृत आगे से भटों द्वारा आवृत (वह रुक्मिणी) देवी पार्वती की पूजा करने के लिए अपने अन्तःपुर से निकली।

Words-Explanation :

विहित = Done, Performed, Arranged, Fixed etc. (As in विहितमंगल-भूषणभासुरा)

भासुरी/ भासनम् = Shining, Bright, Splendid etc. (As in भूषणभासुरा)

भटः = A warrior, A soldier. (As in भटावृताः)

आवृत = Turning towards or surrounded by (As in भटावृताः)

॥ ४ ॥

कुलवधूभिरुपेत्य कुमारिका गिरिसुतां परिपूज्य च सादरम्।
मुहुरयाचत, तत्पदपङ्कजे निपतिता पतितां, तव केवलम्॥

पदविभागः—कुलवधूभिः, उपेत्य, कुमारिका, गिरिसुताम्, परिपूज्य, च, सादरम्, मुहुः, अयाचत, तत्पङ्कजे, निपतिता, पतिताम्, तव, केवलम्॥

अन्वयः—कुमारिका कुलवधूभिः उपेत्य सादरं गिरिसुतां च परिपूज्य तत्पदपङ्कजे निपतिता, केवलं तव पतितां मुहुः अयाचत।

अन्वयार्थः

कुमारिका कुलवधूभिः उपेत्य = कुमारी (रुक्मिणी) ने कुलवधुओं के साथ चलकर

सादरं गिरिसुतां च परिपूज्य तत्पदपङ्कजे निपतिता = आदर के साथ पार्वती देवी की पूजा करके, उनके चरणों में गिरकर (नमस्कार करके)

केवलं तव पतिताम् = केवल आपको पति के रूप में

मुहुः अयाचत। = बार-बार माँगा।

भावार्थ—कुमारी (रुक्मिणी) ने कुलवधुओं के साथ चलकर आदर से पार्वती देवी की पूजा करके उनके चरणों में गिरकर (प्रणाम करके) केवल आपको पति के रूप में बार-बार माँगा।

Words-Explanation :

गिरिसुता = Goddess Parwati. (As in गिरिसुतां च परिपूज्य)

निपतनम् = Falling down, (As in तत्पदपङ्कजे निपतिता)

मुहुस् = Often, Repeatedly, Constantly, Over and over again, Frequently etc. (As in मुहुः अयाचत)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ५ ॥

समवलोककुतूहलसङ्कुले नृपकुले निभृतं त्वयि च स्थिते।
नृपसुता निरगाद् गिरिजालयात् सुरुचिरं रुचिरञ्जितदिङ्मुखा ॥

पदविभागः—समवलोककुतूहलसङ्कुले, नृपकुले, निभृतम्, त्वयि, च, स्थिते, नृपसुता, निरगात्, गिरिजालयात्, सुरुचिरम्, रुचिरञ्जितदिङ्मुखा।

अन्वयः—नृपकुले समवलोककुतूहलसङ्कुले (सति) त्वयि निभृतं च स्थिते (सति) नृपसुता रुचिरञ्जितदिङ्मुखा, गिरिजालयात् सुरुचिरं निरगात्।

अन्वयार्थः

नृपकुले समवलोकुतूहलसङ्कुले (सति) = राजाओं के समूह के (रुक्मिणी को) देखने के लिए कौतूहल से एकत्रित होने पर और

त्वयि निभृतं च स्थिते (सति) = आपके स्थिर खड़े रहने पर,

नृपसुता रुचिरञ्जितदिङ्मुखा = दिशाओं को अपनी सुन्दरता से प्रकाशित कराती राजपुत्री

गिरिजालयात् सुरुचिरं निरगात्। = गिरिजा (पार्वती) के मंदिर से सहज सुन्दर भाव से निकली।

भावार्थ—राजाओं के समूह के (रुक्मिणी को) देखने के लिए कौतूहल से एकत्रित होने पर और, आपके स्थिर खड़े रहने पर, दिशाओं को अपनी सुन्दरता से प्रकाशित करती राजपुत्री गिरिजा (पार्वती) के मंदिर से सहज सुन्दर भाव से निकली।

Words-Explanation :

निभृत = Firm, Fixed, Steady, Resolute etc. (As in त्वयि निभृतं च स्थिते)

सङ्कुल = A collection, Thronged with, Confused etc. (As in कुतूहलसङ्कुले)

॥ ६ ॥

भुवनमोहनरूपरुचा तया विवशिताखिलराजकदम्बया।
त्वमपि देव, कटाक्षविमोक्षणैः प्रमदया मदयाञ्चकृषे मनाक् ॥

पदविभागः—भुवनमोहनरूपरुचा, तया, विवशिताखिलराजकदम्बया, त्वम्, अपि, देव, कटाक्षविमोक्षणैः, प्रमदया, मदयाञ्चकृषे, मनाक् ॥

अन्वयः—भुवनमोहनरूपरुचा, विवशिताखिलराजकदम्बया तया प्रमदया, देव, त्वम् अपि कटाक्षविमोक्षणैः मनाक् मदयाञ्चकृषे।

अन्वयार्थः

भुवनमोहनरूपरुचा = लोकों को मोहित करती देह कान्ति से

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवशिताखिलराजकदम्बया तया प्रमदया = समस्त राजाओं को विवश कराती उस सुन्दरी (रुक्मिणी) द्वारा

देव, त्वम् अपि कटाक्षविमोक्षणैः मनाक् मदयाञ्चकृषे। = हे देव ! आपको भी अपने कटाक्ष (दृष्टि की चालों) से किंचित् सम्मोहित किया गया।

भावार्थ—लोकों को मोहित करती शरीर की कान्ति से समस्त राजाओं को विवश कराती उस सुन्दरी (रुक्मिणी) द्वारा हे देव ! आपको भी अपने कटाक्ष (दृष्टि की चालों) से किंचित् सम्मोहित किया गया।

Words-Explanation :

प्रमदा = A young handsome woman (As in तया प्रमदया)

विमोक्षः = Release, Liberation, Shooting etc. (As in कटाक्षविमोक्षणैः)

मनाक् = A little, Slightly. (As in मदयाञ्चकृषे मनाक्)

मद् (माद्यति, मत्त) = Intoxicated, Maddened, To inflame with passion, Delight, Gladden etc. (As in मदयाञ्चकृषे)

॥ ७ ॥

क्वनु गमिष्यसि चन्द्रमुखीति तां सरसमेत्य करेण हरन् क्षणात्।
समधिरोप्य रथं त्वमपाहृथा भुवि ततो विततो निनदो द्विषाम्॥

पदविभागः—क्व, नु, गमिष्यसि, चन्द्रमुखि, इति, ताम्, सरसम्, एत्य, करेण, हरन्, क्षणात्, समधिरोप्य, रथम्, त्वम्, अपाहृथाः, भुवि, ततः, विततः, निनदः, द्विषाम्॥

अन्वयः—"चन्द्रमुखि, क्वनु गमिष्यसि ?" इति सरसम् एत्य त्वं क्षणात् तां करेण हरन् रथम् अधिरोप्य अपाहृथाः। ततः द्विषां निनदः भुवि विततः।

अन्वयार्थः

"चन्द्रमुखि, क्वनु गमिष्यसि ?" = "हे चन्द्रमुखी ! कहाँ जाती हो ?"

इति सरसम् एत्य = इस प्रकार सरस भाव से कहकर

त्वं क्षणात् तां करेण हरन्, = आप क्षण भर में उस को हाथ से

रथम् अधिरोप्य अपाहृथाः। = पकड़कर, रथ पर चढ़ाकर चले गये।

ततः द्विषां निनदः भुवि विततः। = उस समय शत्रुओं के शब्द संसार में प्रसारित हुए

भावार्थ—"हे चन्द्रमुखी ! कहाँ जाती हो ?" इस प्रकार सरस भाव से कहकर, आप क्षण भर में उसको हाथ से पकड़कर रथ पर चढ़ाकर चले गये। उस समय शत्रुओं के शब्द संसार में प्रसारित हुए।

Words-Explanation :

द्विष = An Enemy (As in द्विषां निनदः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सरस = Full of love, Impassioned (As in सरसम् एत्य)

वितत = Spread out, Stretched etc. (As in भुवि वितत)

॥ ८ ॥

"क्वनु गतः पशुपाल" इति क्रुधा कृतरणा यदुभिश्च जिता नृपाः ।
न तु भवानुदचाल्यत तैरहो पिशुनकैः शुनकैरिव केसरी ॥

पदविभागः—क्वनु, गतः, पशुपाल, इति, क्रुधा, कृतरणा, यदुभिश्च, जिता, नृपाः, न, तु, भवान्, उदचाल्यत, तैः, अहो, पिशुनकैः, शुनकैः, इव, केसरी ।

अन्वयः—"पशुपालः क्वनु गतः ?" इति क्रुधा कृतरणा नृपाः यदुभिः जिता च । भवान् तु अहो, शुनकैः केसरी इव पिशुनकैः तैः न उदचाल्यत ।

अन्वयार्थः

"पशुपालः क्वनु गतः ?" = "गाय चराने वाला कहां गया" ?

इति क्रुधा कृतरणा नृपाः = इस प्रकार क्रोधित युद्ध कर चुके राजाओं को

यदुभिः जिता च । = यादवों द्वारा जीता गया था ।

भवान् तु अहो, = आप तो ओह,

पिशुनकैः शुनकैः केसरी इव = दुष्ट कुत्तों द्वारा सिंह के समान

तैः न उदचाल्यत । = उन राजाओं द्वारा विचलित नहीं किये जा सके ।

भावार्थ—"गाय चराने वाला कहां गया" ? इस प्रकार क्रोधित युद्ध कर चुके राजाओं को यादवों द्वारा जीता गया था । आप तो ओह दुष्ट कुत्तों द्वारा सिंह के समान उन राजाओं द्वारा विचलित नहीं किये जा सके ।

Words-Explanation :

पिशुन् = Foolish, Stupid, Slanderous, Wicked, Back-biting etc. (As in पिशुनकैः तैः)

शुनकः = A dog. (Also a sage-descendent of Brighu) (As in शुनकैः केसरी इव)

क्व = Whither, Where. (As in पशुपालः क्वनु गतः ?)

॥ ९ ॥

तदनु रुक्मिणमागतमाहवे वधमुपेक्ष्य निबध्य विरूपयन् ।
हतमदं परिमुच्य बलोक्तिभिः पुरमया रमया सह कान्तया ॥

पदविभागः—तदनु, रुक्मिणम्, आगतम्, आहवे, वधम्, उपेक्ष्य, निबध्य, विरूपयन्, हतमदम्, परिमुच्य, बलोक्तिभिः, पुरम्, अयाः, रमया, सह, कान्तया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—तदनु आहवे आगतं रुक्मिणं वधम् उपेक्ष्य निबध्य विरूपयन् हृतमदं बलोक्तिभिः परिमुच्य रमया कान्तया सह पुरम् अयाः ॥

अन्वयार्थः

तदनु आहवे आगतम् = उसके बाद युद्ध के लिए आये

रुक्मिणं वधम् उपेक्ष्य = रुक्मि का वध न करके

निबध्य विरूपयन् हृतमदम् = (इसे) बाँधकर विरूप करते हुए घमण्ड नष्ट हुए (उसको)

बलोक्तिभिः परिमुच्य = बलराम के कथनानुसार छोड़कर

रमया कान्तया सह पुरम् अयाः = रमा (लक्ष्मी रूपी) पत्नी के साथ द्वारका पुरी को गये ।

भावार्थ—उसके बाद युद्ध के लिए आये रुक्मि का वध न करके (उसे) बाँधकर विरूप करते हुए घमण्ड नष्ट हुए (उसको) बलराम के कथनानुसार छोड़कर, अपनी प्रिय पत्नी के साथ (द्वारका) पुरी को गये ।

Words-Explanation :

आहवः = War, Battle (As in आहवे आगतम्)

रमा = Wife, Mistress, Also Goddess Lakshmi (As in रमया कान्तया)

कान्त = Desired, Favourate etc. (As in कान्तया सह)

॥ १० ॥

नवसमागमलज्जितमानसां प्रणयकौतुकजृम्भितमन्मथाम् ।
अरमयः खलु नाथ यथासुखं रहसि तां हसिताम्शुलसन्मुखीम् ॥

पदविभागः—नवसमागमलज्जितमानसाम्, प्रणयकौतुकजृम्भितमन्मथाम्, अरमयः, खलु, नाथ, यथासुखम्, रहसि, ताम्, हसिताम्शुलसन्मुखीम् ॥

अन्वयः—नवसमागमलज्जितमानसां प्रणयकौतुकजृम्भितमन्मथां तां हसितांशुलसन्मुखीं नाथ (त्वं) रहसि यथासुखम् अरमयः खलु ।

अन्वयार्थः

नवसमागमलज्जितमानसाम् = नये समागम से मन से लज्जित

प्रणयकौतुकजृम्भितमन्मथाम् = प्रेम तथा इच्छा से विकसित काम वाली

तां हसितांशुलसन्मुखीम् = उस मन्दहास की शोभा से सुन्दर मुख वाली को

नाथ (त्वं) रहसि = हे नाथ, (भगवन्) ! (आपने) एकांत में (इच्छानुसार)

यथासुखम् अरमयः खलु । = स्वतन्त्रता से रमण किया ।

भावार्थ—नये समागम से मन से लज्जित होकर प्रेम तथा इच्छा से विकसित काम वाली उस मन्दहास की प्रभा से सुन्दर मुख वाली के साथ हे भगवन् ! (आपने) एकांत में स्वतन्त्रता से (इच्छानुसार) रमण किया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

जृम्भ = To increase, To spread. (As in जृम्भितमन्मथाम्)

रहस् = Solitude, Lonliness. (As in रहसि यथासुखम्)

अंशुल = Radiant, Luminous. (As in हसितांशुलसन्मुखीम्)

कौतुकम् = Curiosity, Desire, Wish, Eagerness etc. (As in प्रणयकौतुक—)

प्रणयः = Seizing, Love, Affection, Fondness etc. (As in प्रणयकौतुक—)

आगम = Coming, Arrival, Acquisition etc. (As in नवसमागमलज्जित—)

॥ ११ ॥

विविधनर्मभिरेवमहर्निशं प्रमदमाकलयन् पुनरेकदा।
ऋजुमतेः किल वक्रगिरा भवान् वरतनोरतनोदतिलोलताम् ॥

पदविभागः—विविधनर्मभिः, एवम्, अहर्निशम्, प्रमदम्, आकलयन्, पुनः, एकदा, ऋजुमतेः, किल, वक्रगिरा, भवान्, वरतनोः, अतनोः, अतिलोलताम्।

अन्वयः—एवम् अहर्निशं विविधनर्मभिः प्रमदम् आकलयन् (त्वं) पुनः, एकदा ऋजुमतेः वरतनोः वक्रगिरा अतिलोलताम् आतनोः ॥

अन्वयार्थः

एवम् अहर्निशं विविधनर्मभिः प्रमदम् आकलयन् (त्वम्) = इस प्रकार दिन रात अनेक प्रकार की हंसी की बातों से वार्तालाप करते हुए (आपने)

पुनः एकदा ऋजुमतेः वरतनोः = फिर एक बार सरल मन वाली सुन्दरी की

वक्रगिरा अतिलोलताम् आतनोः = टेढ़ी (व्यञ्जना लक्षणपूर्ण) बातों से बहुत चंचलता बढ़ायी।

भावार्थ—इस प्रकार दिन रात अनेक प्रकार की हंसी की बातों से वार्तालाप करते हुए फिर एक बार सरल मन वाली सुन्दरी की टेढ़ी (व्यञ्जना लक्षणपूर्ण) बातों से बहुत चंचलता बढ़ायी।

Words-Explanation :

अहन् = A day (As in अहर्निशम्—)

नर्मन् = Sport, Amusement, Amorous humour, Wit etc. (As in विविधनर्मभिः)

आकलनम् = Confinement, Laying hold of, Seizing (As in नर्मभिः आकलयन्—)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋजु/ ऋजुक = Straight, Straight forward, Upright. (As in ऋजुमतेः वरतनोः)

वर = Best, Excellent. (As in वरतनोः)

॥ १२ ॥

तदधिकैरथ लालनकौशलैः प्रणयिनीमधिकं सुखयन्निमाम् ।
अयि मुकुन्द, भवच्चरितानि नः प्रगदतां गदतान्तिमपाकुरु ॥

पदविभागः—तदधिकैः, अथ, लालनकौशलैः, प्रणयिनीम्, अधिकम्, सुखयन्, इमाम्, अयि, मुकुन्द, भवच्चरितानि, नः, प्रगदताम्, गदतान्तिम्, अपाकुरु ॥

अन्वयः—अथ अधिकैः लालनकौशलैः इमाम् प्रणयिनीम् अधिकं सुखयन् (त्वम्) अयि मुकुन्द, भवच्चरितानि प्रगदतां नः गदतान्तिम् अपाकुरु ।

अन्वयार्थः

अथ अधिकैः लालनकौशलैः = बाद में अधिक स्नेहप्रद कौशलों के द्वारा

इमाम् प्रणयिनीम् अधिकम् सुखयन् (त्वम्) = इस प्रेमिका (रुक्मिणी) को अधिक सुख पहुंचाते हुए (आप)

अयि मुकुन्द = हे, गुरुवायुपुराधीश !

भवच्चरितानि प्रगदतां नः = आपके चरित्रों को कहते हुए मेरे

गदतान्तिम् अपाकुरु । = रोगों की पीड़ा को समाप्त करो ।

भावार्थ—बाद में अधिक स्नेहप्रद कौशलों के द्वारा इस प्रेमिका (रुक्मिणी) को अधिक सुख पहुंचाते हुए (आप) हे, गुरुवायुपुराधीश ! आपके चरित्रों को कहते हुए मेरे रोगों की पीड़ा को समाप्त करो ।

Words-Explanation :

तान्त = Wearied, Fatigued, Afflicted, Withered, Troubled, Languid etc. (As in गदतान्तिम् अपाकुरु)

लालनम् = Fondling, Caressing, Indulging etc. (As in लालनकौशलैः)

कौशलम् Skill, Skillful, Cleverness etc. (As in लालनकौशलैः)

गदः = Disease. (As in गदतान्तिम्)

॥ इति नवसप्ततितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-८०

स्यमन्तकोपाख्यानम्

[वसन्ततिलकछन्दः]

॥ १ ॥

सत्राजितस्त्वमथ लुब्धवदर्कलब्धं दिव्यं स्यमन्तकमणिं भगवन्नयाचीः ।
तत्कारणं बहुविधं मम भाति नूनं तस्यात्मजां त्वयि रतां छलतो विवोढुम् ॥

पदविभागः—सत्राजितः, त्वम्, अथ, लुब्धवत्, अर्कलब्धम्, दिव्यम्, स्यमन्तकमणिम्, भगवन्, अयाचीः, तत्कारणम्, बहुविधम्, मम, भाति नूनम्, तस्य, आत्मजाम्, त्वयि, रताम्, छलतः, विवोढुम् ॥

अन्वयः—भगवन्, अथ त्वं सत्रजितः लुब्धवत् अर्कलब्धं दिव्यं स्यमन्तकमणिम् अयाचीः । तत् कारणं बहुविधं मम भाति । नूनम् त्वयि रतां तस्य आत्मजां छलतः विवोढुं ।

अन्वयार्थः

भगवन्, अथ त्वं सत्राजितः लुब्धवत् = हे भगवन् ! उसके बाद आपने सत्राजित से मोहित हुए के समान

अर्कलब्धं = सूर्य से प्राप्त

दिव्यं स्यमन्तकमणिम् अयाचीः । = दिव्य स्यमन्तक रत्न को माँगा ।

तत् कारणं बहुविधं मम भाति । = उसके कारण बहुत हैं, इस प्रकार मुझे लगता है ।

नूनम् त्वयि रतां तस्य आत्मजां छलतः विवोढुं = निश्चय ही आपमें अनुरक्त उसकी पुत्री को कपट से विवाह करने के लिए है ।

भावार्थ—हे भगवन् ! उसके बाद आपने सत्राजित से मोहित हुए के समान सूर्य से प्राप्त दिव्य स्यमन्तक रत्न को माँगा । उसके कारण बहुत हैं, इस प्रकार मुझे लगता है । निश्चय ही आपमें अनुरक्त उसकी पुत्री को कपट से विवाह करने के लिए है ।

Words-Explanation :

लुब्ध = Greedy, Covetous, Avericious, etc. (As in त्वं लुब्धवत्)

विवोढुम् = For getting married. (As in छलतो विवोढुम्)

(विवोढृ) = (Husband, Bridegroom)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्कः = (As in अर्कलब्धम्) - Sun

रत = Pleased, Fondly attached. (As in रतां तस्य आत्मजाम्)

[शिखरिणिछन्दः]

॥ २ ॥

अदत्तं तं तुभ्यं मणिवरमनेनाल्पमनसा
प्रसेनस्तद्भ्राता गलभुवि वहन् प्राप मृगयाम्
अहन्नेनं सिंहो मणिमहसि मांसभ्रमवशात्
कपीन्द्रस्तं हत्वा मणिमपि च बालाय ददिवान् ॥

पदविभागः—अदत्तम्, तम्, मणिवरम्, अनेन, अल्पमनसा, प्रसेनः, तद्भ्राता, गलभुवि, वहन्, प्राप, मृगयाम्, अहन्, एनम्, सिंहः, मणिमहसि, मांसभ्रमवशात्, कपीन्द्रः, तम्, हत्वा, मणिम्, अपि, च, बालाय, ददिवान् ॥

अन्वयः—अल्पमनसा अनेन तुभ्यम् अदत्तं तं मणिवरम् गलभुवि वहन् तत् भ्राता प्रसेनः मृगयां प्राप। सिंहः मणिमहसि मांसभ्रमवशात् एनम् अहन्, अपि च, कपीन्द्र तं हत्वा, मणिं बालाय ददिवान्।

अन्वयार्थः

अल्पमनसा अनेन तुभ्यम् = संकुचित मन से उस (सत्राजित) के द्वारा आपको

अदत्तं तं मणिवरम् = न दिये गये उस श्रेष्ठ रत्न को

गलभुवि वहन तत् भ्राता प्रसेनः = गले में पहनकर उसका भाई प्रसेन

मृगयां प्राप। = शिकार के लिए गया।

सिंहः मणिमहसि मांसभ्रमवशात् = सिंह ने रत्न की प्रभा से उसको मांस के भ्रम से

एनम् अहन्। = उस (प्रसेन) को मार दिया।

अपि च, कपीन्द्रः तं हत्वा = और वानरों में श्रेष्ठ (जाम्बवान्) ने उस (सिंह) को मारकर

मणिं बालाय ददिवान्। = रत्न पुत्री को दे दिया।

भावार्थ—संकुचित मन से उस (सत्राजित) के द्वारा आपको न दिये गये उस श्रेष्ठ रत्न को गले में पहनकर उसका भाई प्रसेन शिकार के लिए गया। सिंह ने रत्न की प्रभा से उसको मांस भ्रम से उस (प्रसेन) को मार दिया। इतना ही नहीं, श्रेष्ठ वानर (जाम्बवान्) ने उस (सिंह) को मारकर रत्न पुत्री को दे दिया।

Words-Explanation :

महस् = Light, Lustre. (As in मणिमहसि मांसभ्रमात्)

हननम् = Killing (As in एनम् अहन्)

मृग् (मृग्यति/ मृग्यते) = To seek for, To hunt, Chase, Pursue etc.

Digitized by IKS Mohali

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ३ ॥

शशंसुः सत्राजिद्गिरमनु जनास्त्वां मणिहरम्
जनानां पीयूषं भवति गुणिनां दोषकणिका।
ततः सर्वज्ञोऽपि स्वजनसहितो मार्गणपरः
प्रसेनं तं दृष्ट्वा हरिमपि गतोऽभूः कपिगुहाम् ॥

पदविभागः—शशंसु, सत्राजिद्गिरम्, अनु, जनाः, त्वाम्, मणिहरम्, जनानाम्, पीयूषम्, भवति, गुणिनाम्, दोषकणिका, ततः, सर्वज्ञः, अपि, स्वजनसहितः, मार्गणपरः, प्रसेनम्, तम्, दृष्ट्वा, हरिम्, अपि, गतः, अभूः, कपिगुहाम्।

अन्वयः—सत्राजिद्गिरम् अनु जनाः त्वं मणिहरं शशंसुः। गुणिनां दोषकणिका जनानां पीयूषं भवति। ततः (त्वं) सर्वज्ञः अपि स्वजनसहितः मार्गणपरः तं प्रसेनं हरिम् अपि दृष्ट्वा कपिगुहां गतः अभूः ॥

अन्वयार्थः

सत्राजिद्गिरम् अनु जनाः = सत्राजित् के वचनानुसार लोगों ने

त्वां मणिहरं शशंसुः। = आपको रत्न की चोरी से आरोपित किया।

गुणिनां दोषकणिका जनानां पीयूषं भवति। = अच्छे लोगों के लेश मात्र दोष भी लोगों के लिए अमृत होता है।

ततः (त्वं) सर्वज्ञः अपि = इसलिए आप सर्वज्ञ होने पर भी

स्वजनसहितः मार्गणपरः तं प्रसेनं हरिम् अपि दृष्ट्वा कपिगुहां गतः अभूः। अपने लोगों के साथ (रत्न को) ढूंढने के इच्छुक होकर, उस प्रसेन और सिंह को भी देखकर वानर की गुफा में गये।

भावार्थ—सत्राजित् के वचन के अनुसार लोगों ने आपको रत्न की चोरी से आरोपित किया। अच्छे लोगों के लेश मात्र दोष भी लोगों के लिए अमृत होता है। इसलिए आप सर्वज्ञ होने पर भी अपने लोगों के साथ (रत्न को) ढूंढने के इच्छुक होकर, उस प्रसेन तथा सिंह को भी देखकर वानर (जाम्बवान्) की गुफा में गये।

Words-Explanation :

मार्ग - (मार्गति, मार्गयति, मार्ग्यते) = To seek, To strive, To hunt after etc. (As in मार्गणपरः)

कणिका = An atom, A minute particle. (As in दोषकणिका)

[पृथ्विच्छन्दः]

॥ ४ ॥

भवन्तमवितर्कयन्नतिवयाः स्वयं जाम्बवान्
मुकुन्दशरणं हि मां क इह रोद्धुमित्यालपन्।
विभो, रघुपते, हरे, जय जयेत्यलं मुष्टिभि-
श्चिरं तव समर्चनं व्यधित भक्तचूडामणिः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—भवन्तम्, अवितर्कयन्, अतिवयाः, स्वयम्, जाम्बवान्, मुकुन्दशरणम्, हि, माम्, कः, इह, रोद्धुम्, इति, आलपन्, विभो, रघुपते, हरे, जय, जय, इति, अलम्, मुष्टिभिः, चिरम्, तव, समर्चनम्, व्यधित, भक्तचूडामणिः ॥

अन्वयः—भक्तचूडामणिः अतिवयाः जाम्बवान् भवन्तम् अवितर्कयन् "मुकुन्दशरणं हि मां रोद्धुम् इह कः ?" इति स्वयम् आलपन् "विभो रघुपते हरे जय जय" इति अलं चिरं मुष्टिभिः तव समर्चनं व्यधित ।

अन्वयार्थः

भक्तचूडामणिः अतिवयाः = भक्तों में श्रेष्ठ वयोवृद्ध

जाम्बवान् भवन्तम् अवितर्कयन् = जांबवान् ने आपको बिना सोचे-समझे

"मुकुन्दशरणं हि माम् रोद्धुम् इह कः ?" = "(राम की) शरण में मुझे मोक्ष प्रदान करते रोकने के लिए इधर (इस जगत् में) कौन है ?"

इति स्वयम् आलपन् "विभो, रघुपते हरे, जय जय" = इस प्रकार अपने आप कहकर "हे विभोरघुपते ! हरे ! आपकी जय हो जय हो"

इति अलं चिरं मुष्टिभिः तव समर्चनं व्यधित । = इस प्रकार स्तुति करके बहुत समय तक मुष्ठियोंद्वारा आपकी पूजा की (आपको पीटा) ।

भावार्थ—भक्तों में श्रेष्ठ वयोवृद्ध जांबवान् ने आपको बिना सोचे समझे "राम की शरण में मुझे रोकने के लिएइधर कौन है ?" इस प्रकार अपने आप कहकर "हे विभो ! रघुपते ! हरे ! आपकी जय हो, जय हो" इस प्रकार (कहकर) बहुत समय तक मुष्ठियों द्वारा आपकी पूजा की अर्थात् आपको खूब पीटा ।

Words-Explanation :

(मुकुन्दः = Vishnu मुकुन्दकः - Onion) (As in मुकुन्दशरणं)

वितर्क = Reasoning, Guess, Argument, Supposition etc. (A kind of Drum, A gem, One of the treasures of Kubhera)

=[गीतिछन्दः]

॥ ५ ॥

बुद्ध्वाऽथ तेन दत्तां नवरमणीं वरमणिं च परिगृह्णन् ।
अनुगृह्णन्नमुमागाः सपदि च सत्राजिते मणिं प्रादाः ॥

पदविभागः—बुद्ध्वा, अथ, तेन, दत्ताम्, नवरमणीम्, वरमणिम्, च, परिगृह्णन्, अनुगृह्णन्, अमुम्, आगाः, सपदि, च, सत्राजिते, मणिम्, प्रादाः ॥

अन्वयः—अथ बुद्ध्वा तेन दत्तां नवरमणीं वरमणिं च परिगृह्णन्, अमुम् अनुगृह्णन् आगाः । सपदि च सत्राजिते (त्वं) मणिं प्रादाः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अथ बुद्ध्वा, तेन दत्ताम् = बाद में जानकर, उसके द्वारा (जाम्बवान् द्वारा)

नवरमणीं वरमणिं च परिगृहणन्, अमुम् अनुगृहणन् आगाः । = दी गयी युवा सुन्दरी (पुत्री जांबवती) को पत्नी के रूप में तथा श्रेष्ठ रत्न को भी स्वीकार करते हुए उस पर अनुग्रह करते हुए लौट आये ।

सपदि च सत्राजिते (त्वं) मणिं प्रादाः । = उसी समय सत्राजित् को रत्न भी (आपने) प्रदान किया ।

भावार्थ—बाद में जानकर, उस (जाम्बवान्) के द्वारा दी गयी युवा, सुन्दरी (पुत्री जांबवती) को पत्नी के रूप में तथा श्रेष्ठ रत्न को भी स्वीकार करते हुए उस पर अनुग्रह करते हुए लौट आये । तुरन्त सत्राजित् को (आपने) रत्न भी प्रदान किया ।

Words-Explanation :

नव = New, Fresh, Young. (As in नवरमणीं वरमणिम् च)

रमणी = Lovely young woman, A wife. (As in नवरमणीम्)

वर = Best Excellent. (As in वरमणिम्)

मणि = Jewel

[हरिणीछन्दः]

॥ ६ ॥

तदनु स खलु व्रीडालोलो विलोलविलोचनाम्
मुनिसदसि विश्वरूपं व्यावृण्वन् पुरीं क्षोभयित्वा आगतः अभूः। = मुनियों के सदन (सभा) में (आप) विश्वरूप दिखाते हुए नगर को कम्पित करके लौट आये।

भावार्थ—उसके बाद (महाभारत) युद्ध के आरम्भ के बारे में विचार-विमर्श करने के लिए मिलने पर, अर्जुन ने आप एक को ही मांगा। कौरव (दुर्योधन) को अपनी सेना को देकर, पाण्डवों के दूत का कार्य करने के लिए (आप) हस्तिनापुर को गये। भीष्म, द्रोण आदि के आपकी बातों को मानने पर भी दुर्योधन द्वारा तिरस्कार किये जाने पर, मुनियों की सभा में विश्वरूप दिखाते हुए नगर को कम्पित करके लौट आये।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

फलगुनः = Arjun

वृत् (वृत्यते) = To choose, Like etc. (As in त्वम् एकः वृतः)

धिक् (An interjection of censure, displeasure or menace) Reproach, Contempt etc. (As in कौरवेण धिक्कृते)

॥ ६ ॥

जिष्णोस्त्वं कृष्ण, सूतः खलु समरमुखे बंधुघाते दयालुम्
खिन्नं तं वीक्ष्य वीरं किमिदमयि सखे, नित्य एकोयमात्मा।
को वध्यः कोऽत्र हन्ता तदिह वधभियं प्रोज्झ्य मय्यर्पितात्मा
धर्म्यं युद्धं चरेति प्रकृतिमनयथा दर्शयन् विश्वरूपम्॥

पदविभागः—जिष्णोः, त्वम्, कृष्ण, सूतः, खलु, समरमुखे, बन्धुघाते, दयालुम्, खिन्नम्, तम्, वीक्ष्य, वीरम्, किम्, इदम्, अयि, सखे, नित्यः, एकः, अयम्, आत्मा, कः, वध्यः, कः, अत्र, हन्ता, तत्, इह, वधभियम्, प्रोज्झ्य, मय्यर्पितात्मा, धर्म्यम्, युद्धम्, चर, इति, प्रकृतिम्, अनयथाः, दर्शयन्, विश्वरूपम्।

अन्वयः—कृष्ण, त्वं खलु जिष्णोः सूतः समरमुखे वीरं तं बन्धुघाते दयालुं खिन्नं वीक्ष्य "अयि सखे, इदं किम्? अयम् आत्मा नित्यः एकः। अत्र वध्य कः? हन्ता कः? तत् इह वधभियं प्रोज्झ्य, मय्यर्पितात्मा (क्षत्रियं) धर्म्यम् युद्धं चर।" इति (उक्त्वा) विश्वरूपं दर्शयन् प्रकृतिम् अनयथाः।

अन्वयार्थः

कृष्ण! त्वं खलु जिष्णोः सूतः = हे कृष्ण! आपने तो अर्जुन का सारथी बनकर,

समरमुखे वीरं तं बन्धुघाते दयालुं खिन्नं वीक्ष्य, = युद्धारम्भ में उस वीर को बन्धुजनों का वध करने में दयालु तथा दुखी देखकर,

"अयि सखे, इदं किम्! = "अरे, मित्र! यह क्या है?

अयम् आत्मा नित्यः एकः। = यह आत्मा नित्य एक है।

अत्र वध्यः कः? हन्ता कः? = यहाँ कौन मरता है? कौन वध करता है?

तत् इह वधभियं प्रोज्झ्य, मय्यर्पितात्मा (क्षत्रियं) धर्म्यं युद्धं चर।" = इसलिए अब (इधर) वध करने के भय को छोड़कर, मुझे स्मरण करके (क्षत्रिय) धर्म का पालन करके युद्ध करो।"

इति (उक्त्वा) विश्वरूपं दर्शयन् = इस प्रकार (कहकर) विश्वरूप को दिखाकर

प्रकृतिम् अनयथाः। = पूर्व-स्थिति को ले गये।

भावार्थ—हे कृष्ण! आपने तो अर्जुन का सारथी बनकर, उस वीर को बन्धुओं का वध करने में दयालु तथा दुखी देखकर "अरे, मित्र! यह क्या है? यह आत्मा नित्य है, एक है। यहाँ कौर मरता है? कौन वध करता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

है ? इसलिए अब वध करने के भय को त्याग करके, मुझे स्मरण करके, (क्षत्रिय) धर्म का पालन करके युद्ध करो ।" इस प्रकार (कहकर) विश्वरूप को दिखाकर पूर्व-स्थिति को ले गये ।

Words-Explanation :

जिष्णुः = Arjun. (As in जिष्णोः सूतः)

सूतः = A charioteer (The son of a Kshtriya by a woman of the Brahmana caste) (As in जिष्णोः सूतः)

॥ ७ ॥

भक्तोत्तंसेऽथ भीष्मे तव धरणिभरक्षेपकृत्यैकसक्ते
नित्यं नित्यं विभिन्दत्यवनिभृदयुतं प्राप्तसादे च पार्थे ।
निश्शस्त्रत्वप्रतिज्ञां विजहदरिवरं धारयन् क्रोधशाली-
वाधावन् प्राञ्जलिं तं नतशिरसमथो वीक्ष्य मोदादपागाः ॥

पदविभागः—भक्तोत्तंसे, अथ, भीष्मे, तव, धरणिभरक्षेपकृत्यैकसक्ते, नित्यम्, नित्यम्, विभिन्दति, अवनि भृदयुतम्, प्राप्तसादे, च, पार्थे, निश्शस्त्रत्वप्रतिज्ञाम्, विजहत्, अरिवरम्, धारयन्, क्रोधशाली, इव, आधावन्, प्राञ्जलिम्, तम्, नतशिरसम्, अथो, वीक्ष्य, मोदात्, अपागाः ॥

अन्वयः—अथ भक्तोत्तंसे भीष्मे तव धरणिभरक्षेपकृत्यैकसक्ते, नित्यं नित्यं अवनिभृदयुतं विभिन्दति (सति), पार्थे च प्राप्तसादे त्वं निश्शस्त्रत्वप्रतिज्ञां विजहत् अरिवरं धारयन् क्रोधशाली इव आधावन्, अथो प्राञ्जलिं नतशिरसं तं (भीष्मं) वीक्ष्य, मोदात् अपागाः ॥

अन्वयार्थः

अथ भक्तोत्तंसे भीष्मे तव धरणिभरक्षेपकृत्यैकसक्ते नित्यं नित्यं अवनिभृदयुतं विभिन्दति (सति) = बाद में श्रेष्ठ भक्त भीष्म के धरती के भार को कम करने की आपकी इच्छा की पूर्ति करने के लिए प्रतिदिन दस हजार से अधिक राजाओं का वध करने पर

पार्थे च प्राप्तसादे त्वं निश्शस्त्रत्वप्रतिज्ञां विजहत् अरिवरं धारयन् क्रोधशाली इव, आधावन् = और अर्जुन के थकने पर, आपने अपनी अस्त्र न उठाने की प्रतिज्ञा को त्याग करके सुदर्शन-चक्र को धारण करते हुए क्रुद्ध जैसे दौड़कर आते हुए

अथो, प्राञ्जलिं नतशिरसं तं (भीष्मं) वीक्ष्य, मोदात् अपागाः । = तब हाथ जोड़कर सिर नीचे किये उस (भीष्म) को देखकर सन्तोष से लौट आये ।

भावार्थ—बाद में श्रेष्ठ भक्त भीष्म के धरती के, भार को कम करने की आपकी इच्छा को पूर्ण करने के लिए, प्रतिदिन दस हजार से अधिक राजाओं का वध करने पर और अर्जुन के थकने पर, आपने अपनी अस्त्र न उठाने की प्रतिज्ञा को त्याग करके श्रेष्ठ चक्र (सुदर्शन) को धारण करते हुए क्रुद्ध जैसे दौड़कर आते हुए तब हाथ जोड़कर, सिर नीचे किये उस (भीष्म) को देखकर सन्तोष से लौट आये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

भृत = Possessed. अवनिभृत् = King.

सादः = Sinking, Exhaustion, Weariness, etc. (As in प्राप्तसादे)

क्षेपः = Throwing.

जहत् = Abandoning, Leaving etc. (As in प्रतिज्ञां विजहत्)

सक्त = Stuck, Addicted, Fond of etc. (As in क्षेपकृत्यैकसक्ते)

॥ ८ ॥

युद्धे द्रोणस्य हस्तिस्थिररणभगदत्तेरितं वैष्णवास्त्रम्
वक्षस्याधत्त चक्रस्थगितरविमहाः प्रार्दयत्सिन्धुराजम्।
नागास्त्रे कर्णमुक्ते क्षितिमवनमयन् केवलं कृत्तमौलिम्
तत्रे तत्रापि पार्थं, किमिव नहि भवान् पाण्डवानामकार्षीत् ॥

पदविभागः—युद्धे, द्रोणस्य, हस्तिस्थिररणभगदत्तेरितम्, वैष्णवास्त्रम्, वक्षसि, आधत्त, चक्रस्थगितरविमहाः, प्रार्दयत्, सिन्धुराजम्, नागास्त्रे, कर्णमुक्ते, क्षितिम्, अवनमयन्, केवलम्, कृत्तमौलिम्, तत्रे, तत्र, अपि, पार्थम्, किमिव, नहि, भवान्, पाण्डवानाम्, अकार्षीत ॥

अन्वयः—द्रोणस्य युद्धे हस्तिस्थिररणभगदत्तेरितं वैष्णवास्त्रं वक्षसि आधत्त। चक्रस्थगितरविमहाः सिन्धुराजं प्रार्दयत्। नागास्त्रे कर्णमुक्तेक्षितिम् अवनमयन् तत्र अपि पार्थं केवलं कृत्तमौलिं तत्रे। भवान्, पाण्डवानां किमिव नहि अकार्षीत्।

अन्वयार्थः

द्रोणस्य युद्धे हस्तिस्थिररणभगदत्तेरितं वैष्णवास्त्रं वक्षसि आधत्त। = द्रोण के युद्ध में हाथी के ऊपर स्थिर बैठकर युद्ध करते हुए भगदत्त द्वारा प्रेषित वैष्णवास्त्र को छाती पर धारण किया।

चक्रस्थगितरविमहाः सिन्धुराजं प्रार्दयत्। = (सुदर्शन) चक्र से सूर्य-रश्मि को ढककर (रात के समान कर) सिन्धुराज (जयद्रथ) का वध किया।

नागास्त्रे कर्णमुक्ते क्षितिम् अवनमयन् तत्र अपि पार्थं केवलं कृत्तमौलिं तत्रे। = कर्ण द्वारा छोड़े नागास्त्र को भूमि को नीचे कराकर वहाँ भी (पार्थ के) केवल मुकुट को ही तुड़वाकर पार्थ को बचाया।

भवान्, पाण्डवानां किमिव नहि अकार्षीत्। = (इस प्रकार) आपने पाण्डवों के लिए क्या-क्या नहीं किया।

भावार्थ—द्रोण के युद्ध में हाथी के ऊपर स्थिर बैठकर युद्ध करते हुए भगदत्त द्वारा प्रेषित वैष्णवास्त्र को छाती पर धारण किया। (सुदर्शन) चक्र से सूर्य की प्रभा को ढककर (रातके समान कर) सिन्धु के राजा (जयद्रथ) का वध किया। कर्ण द्वारा मुक्त नागास्त्र को भूमि को नीचे कराकर वहाँ भी केवल (अर्जुन के) मुकुट को ही तुड़वाकर पार्थ को बचाया। (इस प्रकार) आपने पाण्डवों के लिए क्या-क्या नहीं किया।

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

मौलि = The crown of the head. (As in कृत्तमौलिम्)

ईर् (ईर्ते, ईर्ण) = To throw, Discharge, To set in motion, To utter etc. (As in भगदत्तेरितम्)

स्थगित = Covered, Hidden, Concealed. (As in चक्रस्थगित–)

महस् = Light.

॥ ९ ॥

युद्धादौ तीर्थगामी स खलु हलधरो नैमिशक्षेत्रमृच्छ-
न्नप्रत्युत्थायिसूतक्षयकृदथ सुतं तत्पदे कल्पयित्वा।
यज्ञघ्नं वल्वलं पर्वणि परिदलयन् स्नाततीर्थो रणान्ते
सम्प्राप्तो भीमदुर्योधनरणमशमं वीक्ष्य यातः पुरीं ते ॥

पदविभागः—युद्धादौ, तीर्थगामी, सः, खलु, हलधरः, नैमिशक्षेत्रम्, ऋच्छन्, अप्रत्युत्थायिसूतक्षयकृत्, अथ, सुतम्, तत्, पदे, कल्पयित्वा यज्ञघ्नम्, वल्वलम्, पर्वणि, परिदलयन्, स्नाततीर्थः, रणान्ते, सम्प्राप्तः, भीमदुर्योधन-रणम्, अशमम्, वीक्ष्य, यातः, पुरीम्, ते।

अन्वयः—सः खलु हलधरः युद्धादौ तीर्थगामी नैमिशक्षेत्रम् ऋच्छन् अप्रत्युत्थायिसूतक्षयकृत् अथ तत् पदे सुतं कल्पयित्वा पर्वणि यज्ञघ्नं वल्वलं परिदलयन्, स्नाततीर्थः रणान्ते सम्प्राप्तः भीमदुर्योधनरणम् अशमं वीक्ष्य ते पुरीं यातः।

अन्वयार्थः

सः खलु हलधरः युद्धादौ तीर्थगामी, नैमिशक्षेत्रम् ऋच्छन् (Reaching) = वह बलराम तो युद्ध के आरम्भ में तीर्थयात्रा पर नैमिशक्षेत्र में पहुँचता हुआ

अप्रत्युत्थायिसूतक्षयकृत् = उठकर सम्मान न करने वाले सूत का वध करके,

अथ तत् पदे सुतं कल्पयित्वा = बाद में उसके पुत्र को उस पद पर आसीन कराकर,

पर्वणि यज्ञघ्नं वल्वलं परिदलयन् = अमावस्या तथा पूर्णमासी के यज्ञ को भंग करते हुए वल्वल का वध करते हुए

स्नाततीर्थः रणान्ते सम्प्राप्तः = तीर्थ-स्नान करके, युद्ध के अन्त में आकर

भीमदुर्योधनरणम् अशमं वीक्ष्य = भीम तथा दुर्योधन के द्वन्द्व युद्ध को समाप्त न होते देखकर,

ते पुरीं यातः। = आपके नगर (द्वारका) को गया।

भावार्थ—वह बलराम तो युद्ध के आरम्भ में तीर्थयात्रा पर नैमिशक्षेत्र में पहुँचता हुआ, उठकर सम्मान न करने वाले सूत का वध करके, बाद में उसके पुत्र को उस पद पर आसीन कराकर, अमावस्या तथा पौर्णमासी

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

के यज्ञ को भंग करते हुए वल्वल का वध करते हुए तीर्थ-स्थान करके, युद्ध के अन्त में आकर भीम तथा दुर्योधन के द्वन्द्व युद्ध को समाप्त न होते देखकर, आपके नगर (द्वारका) को गया।

Words-Explanation :

ऋच्छ् - (ऋच्छति) = To go. (As in नैमिशक्षेत्रं ऋच्छन्)

पर्वणि = The Full Moon day or the New Moon day. (As in पर्वणि यज्ञघ्नम्)

दलनम् = Cutting, Bursting, Breaking, Crushing etc. (As in परिदलयन्)

॥ १० ॥

संसुप्तद्रौपदेयक्षपणहतधियं द्रौणिमेत्य त्वदुक्त्या
तन्मुक्तं ब्राह्ममस्त्रं समहृत विजयो मौलिरत्नं च जह्रे।
उच्छित्यै पाण्डवानां पुनरपि च विशत्युत्तरागर्भमस्त्रे
रक्षन्नङ्गुष्ठमात्रः किल जठरमगाश्चक्रपाणिर्विभो, त्वम्॥

पदविभागः—संसुप्तद्रौपदेयक्षपणहतधियम्, द्रोणिम्, एत्य, त्वदुक्त्या, तन्मुक्तम्, ब्राह्ममस्त्रम् समहृत, विजयः, मौलिरत्नम्, च, जह्रे, उच्छित्यै, पाण्डवानाम्, पुनः, अपि, च, विशति, उत्तरागर्भम्, अस्त्रे, रक्षन्, अङ्गुष्ठमात्रः, किल, जठरम्, अगाः, चक्रपाणिः, विभो, त्वम्॥

अन्वयः—संसुप्तद्रौपदेयक्षपणहतधियं द्रौणिम् एत्य, तन्मुक्तं ब्राह्ममस्त्रं त्वदुक्त्या विजयः समहृत मौलिरत्नं जह्रे च। पुनः अपि च पाण्डवानाम् उच्छित्यै अस्त्रे उत्तरागर्भं विशति (सति), विभो त्वम् अङ्गुष्ठमात्रः चक्रपाणिः रक्षन् जठरम् अगाः किल।

अन्वयार्थः

संसुप्तद्रौपदेयक्षपणहतधियं द्रौणिम् एत्य = सोते हुए द्रौपदी के पुत्रों का वध करने वाले नीच-बुद्धि द्रोणपुत्र (अश्वत्थामा) को सम्मुख करके

तन्मुक्तं ब्राह्ममस्त्रं त्वदुक्त्या विजयः समहृत मौलिरत्नं जह्रे च। = उसके द्वारा भेजे गये ब्रह्मास्त्र को आपके कहने पर अर्जुन ने पकड़ कर और उस (अश्वत्थामा) के शिरोरत्न को निकाल दिया।

पुनः अपि च पाण्डवानाम् उच्छित्यै अस्त्रे उत्तरागर्भं विशति (सति) = उसके बाद फिर से पाण्डवों में बचे लोगों का नाश करने के लिए अस्त्र के उत्तरा के गर्भ में छोड़ने पर

विभो, त्वम् अङ्गुष्ठमात्रः चक्रपाणिः रक्षन् जठरम् अगाः किल। = हे विभो (सर्वव्यापी)! आपने अंगुली के समान होकर हाथ में सुदर्शन-चक्र लेकर रक्षा करते हुए उत्तरा के पेट में प्रवेश किया।

भावार्थ—सोते हुए द्रौपदी के पुत्रों का वध करने वाले नीच-बुद्धि द्रोण के पुत्र (अश्वत्थामा) को सम्मुख करके उसके द्वारा भेजे गये ब्रह्मास्त्र को आपके कहने पर अर्जुन ने पकड़कर और उस (अश्वत्थामा) के शिरोरत्न को भी निकाल दिया। उसके बाद फिर से पाण्डवों के वंश का नाश करने के लिए अस्त्र के उत्तरा के

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गर्भ में छोड़ने पर हे विभो, (सर्वव्यापी) ! आपने अंगुली के समान रूप धारण करके हाथ में सुदर्शन चक्र लेकर, रक्षा करते हुए उत्तरा के पेट में प्रवेश किया ।

Words-Explanation :

विजयः = Arjun (As in विजयः मौलिरत्नं च जह्रे)

छित्ति = Cutting, Emaciating. (As in उच्छित्यै पाण्डवानाम्)

॥ ११ ॥

धर्मौघं धर्मसूनोरभिदधदखिलं छन्दमृत्युः स भीष्म-
स्त्वां पश्यन् भक्तिभूम्नैव हि सपदि ययौ निष्कलब्रह्मभूयम् ।

संयाज्याथाश्वमेधैस्त्रिभिरतिमहितैर्धर्मजं पूर्णकामम्
सम्प्राप्तो द्वारकां त्वं पवनपुरपते, पाहि मां सर्वरोगात् ॥

पदविभागः—धर्मौघम्, धर्मसूनोः, अभिदधत्, अखिलम्, छन्दमृत्युः, सः, भीष्मः, त्वाम्, पश्यन्, भक्तिभूम्ना, एव, हि, सपदि, ययौ, निष्कलब्रह्मभूयम्, सम्याज्य, अथ, त्रिभिः अश्वमेधैः, धर्मजम्, पूर्णकामम्, सम्प्राप्तः, द्वारकाम्, त्वम्, पवनपुरपते, पाहि, माम्, सर्वरोगात् ॥

अन्वयः—छन्दमृत्युः सः भीष्मः धर्मसूनोः अखिलं धर्मौघम् अभिदधत्, त्वां पश्यन् भक्तिभूम्ना एव हि सपदि निष्कलब्रह्मभूयं ययौ । अथ पूर्णकामं धर्मजम् अतिमहितैः त्रिभिः अश्वमेधैः सम्याज्य, द्वारकां सम्प्राप्तः त्वं पवनपुरपते, मां सर्वरोगात् पाहि ।

अन्वयार्थः

छन्दमृत्युः सः भीष्मः धर्मसूनोः अखिलं धर्मौघम् अभिदधत्, = इच्छानुसार मृत्यु का वरण करने वाले उस भीष्म ने युधिष्ठिर को समस्त धर्मों के कोश का उपदेश दिया ।

त्वां पश्यन् भक्तिभूम्ना एव हि सपदि निष्कलब्रह्मभूयं ययौ । = आपको देखते हुए भक्ति से भरपूर होकर क्षणभर में ही ब्रह्मपद को प्राप्त किया ।

अथ पूर्णकामं धर्मजम् अतिमहितैः त्रिभिः अश्वमेधैः सम्याज्य, = उसके बाद पूर्ण इच्छा वाले युधिष्ठिर से श्रेष्ठ तीन अश्वमेध यज्ञों को कराकर

द्वारकां सम्प्राप्तः त्वं, पवनपुरपते, मां सर्वरोगात् पाहि । = द्वारका में लौटे आप, हे गुरुपवनपुराधीश ! समस्त रोगों से मेरी रक्षा करें ।

भावार्थ—इच्छानुसार मृत्यु का वरण करने वाले उस भीष्म ने युधिष्ठिर को समस्त धर्मों के कोश का उपदेश दिया । आप को देखते हुए भक्ति से भरपूर होकर क्षणभर में ही ब्रह्मपद को प्राप्त किया । उसके बाद पूर्ण इच्छा वाले युधिष्ठिर से अति श्रेष्ठ तीन अश्वमेध यज्ञों को कराकर, द्वारका में लौटे आप, हे गुरुपवनपुराधीश ! मुझे समस्त रोगों से मेरी रक्षा करें ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

छन्द = Wish, Free will, One's own choice, Whim, Desire etc. (As in छन्दमृत्युः)

भूमन् = A great quantity, Abundance, Plenty etc. (As in भक्ति-भूम्ना)

॥ इति षडशीतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-८७

कुचेलोपाख्यानम्

[वंशस्थछन्दः]

॥ १ ॥

कुचेलनामा भवतः सतीर्थ्यतां गतः स सान्दीपनिमन्दिरे द्विजः ।
त्वदेकरागेण धनादिनिस्पृहो दिनानि निन्ये प्रशमी गृहाश्रमी ॥

पदविभागः—कुचेलनामा, भवतः, सतीर्थ्यताम्, गतः, सः, सान्दीपनिमन्दिरे, द्विजः, त्वदेकरागेण, धनादिनिस्पृहः, दिनानि, निन्ये, प्रशमी, गृहाश्रमी ।

अन्वयः—सान्दीपनिमन्दिरे भवतः सतीर्थ्यतां गतः कुचेलनामा गृहाश्रमी सः द्विजः, त्वदेकरागेण धनादिनिस्पृहः प्रशमी दिनानि निन्ये ।

अन्वयार्थः

सान्दीपनिमन्दिरे भवतः = सान्दीपनि मुनि के आश्रम में आपके साथ

सतीर्थ्यतां गतः = सहपाठी होकर गये

कुचेलनामा गृहाश्रमी = कुचेल नाम के गृहस्थ

सः द्विजः = उस ब्राह्मण ने

त्वदेकरागेण धनादिनिस्पृहः = आप में ही भक्ति रखते हुए, धन आदि से इच्छारहित,

प्रशमी दिनानि निन्ये । = शान्त होकर दिन बिताये ।

भावार्थ—सान्दीपनि मुनि के आश्रम में आपके साथ सहपाठी होकर गये कुचेल नाम के गृहस्थ उस ब्राह्मण ने, आप में ही भक्ति रखते हुए, धन आदि से इच्छारहित शान्त होकर, दिन बिताये ।

Words-Explanation :

तीर्थ = A Teacher or Percepter, A holy place (तीर्थ्यम् = Studentship) (As in भवतः सतीर्थ्यतां गतः)

शम् (शाम्यति, शांत) = To be calm, Quiet, Tranquil etc. (As in प्रशमी दिनानि निन्ये)

स्पृह् (स्पृह्यति, स्पृह्यते) = To wish, To long for, To desire, To yearn etc.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(निस्पृह् = Without desire)

॥ २ ॥

समानशीलापि तदीयवल्लभा तथैव नो चित्तजयं समेयुषी।
कदाचिदूचे बत "वृत्तिलब्धये रमापतिः किं न सखा निषेव्यते ?" ॥

पदविभागः—समानशीलापि, तदीयवल्लभा, तथा, एव, नो, चित्तजयम्, समेयुषी, कदाचित्, ऊचे, बत, वृत्तिलब्धये, रमापतिः, किम्, न, सखा, निषेव्यते।

अन्वयः—तदीयवल्लभा समानशीला अपि, तथा एव चित्तजयं नो समेयुषी कदाचित् ऊचे। "वृत्तिलब्धये सखा रमापतिः किं न निषेव्यते ?"

अन्वयार्थः

तदीयवल्लभा समानशीला अपि = उस (कुचेल) की पत्नी शान्तशील होते हुए भी

तथा एव चित्तजयं नो समेयुषी = उस (कुचेल) के समान मन को न जीतने पर

कदाचित् ऊचे। = कभी (किसी दिन) बोली।

"वृत्तिलब्धये सखा रमापतिः किं न निषेव्यते ?" = "धन-प्राप्ति के लिए मित्र रमापति (कृष्ण) से क्यों नहीं निवेदन करते ?"

भावार्थ—उस (कुचेल) की पत्नी शान्तशील होते हुए भी उस (कुचेल) के समान मन को न जीतने पर कभी (किसी दिन) बोली। "धन-प्राप्ति के लिए मित्र रमापति (कृष्ण) से क्यों नहीं निवेदन करते ?"

Words-Explanation :

समान = Sane, Good, Virtuous etc. (As in समानशीला अपि)

निषेवणम्। निषेवा = Serving, Enjoying, Using, Waiting upon, Familiarity with etc. (As in किं न निषेव्यते ?)

॥ ३ ॥

इतीरितोऽयं प्रियया क्षुधार्तया जुगुप्समानोऽपि धने मदावहे।
तदा त्वदालोकनकौतुकाद्ययौ वहन् पटान्ते पृथुकानुपायनम् ॥

पदविभागः—इति, ईरितः, अयम्, प्रियया, क्षुधार्तया, जुगुप्समानः, अपि, धने, मदावहे, तदा, त्वदालोकनकौतुकात्, ययौ, वहन्, पटान्ते, पृथुकान्, उपायनम्।

अन्वयः—क्षुधार्तया प्रियया इति ईरितः अयं (कुचेलः) मदावहे धने जुगुप्समानः अपि तदा त्वदालोकनकौतुकात् पटान्ते पृथुकान् उपायनं वहन् ययौ।

अन्वयार्थः

क्षुधार्तया प्रियया = भूख से व्याकुल पत्नी द्वारा

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति ईरितः अयं (कुचेलः) = इस प्रकार कहने पर वह (कुचेल)

मदावहे धने जुगुप्समानः अपि = मद (अहंकार) उत्पन्न करने वाले धन के प्रति घृणा करने पर भी

तदा त्वदालोकनकौतुकात् = उस समय आपको देखने की इच्छा से

पटान्ते पृथुकान् उपायनं वहन् ययौ। = वस्त्र के कोने में चिड़वा को लेकर गया।

भावार्थ—भूख से व्याकुल पत्नी द्वारा इस प्रकार कहने पर वह (कुचेल) मद (अहंकार) उत्पन्न करने वाले धन के प्रति घृणा करने पर भी उस समय आप को देखने की इच्छा से वस्त्र के कोने में चिड़वा को लेकर गया।

Words-Explanation :

उपायनम् = A Gift, A Present. (As in पृथुकान् उपायनं वहन्)

पृथुकम्/ पृथुकः = Rice, Parched and flattened.

[पृथुकः = Parched flattened Rice (चिड़वा) But पृथुः = opium] (As in पृथुकान् उपायनं वहन्)

पटः/ पटम् = A Garment (As in पटान्ते पृथुकान्—)

क्षुध्/ क्षुधा = Hunger, (As in क्षुधार्तया प्रियया)

क्षुधार्त = Afflicted with hunger.

आर्त = Afflicted.

जुगुप्तसनम्/ जुगुप्सा = Dislike, Aversion, Disgust, Abhorrence etc. (As in जुगुप्समानः अपि)

॥ ४ ॥

गतोऽयमाश्चर्यमयीं भवत्पुरीं गृहेषु शैब्याभवनं समेयिवान्।
प्रविश्य वैकुण्ठमिवाप निर्वृतिं तवातिसम्भावनया तु किं पुनः ॥

पदविभागः—गतः, अयम्, आश्चर्यमयीम्, भवत्पुरीम्, गृहेषु, शैब्याभवनम्, समेयिवान्, प्रविश्य, वैकुण्ठम्, इव, आप, निर्वृतिम्, तव, अतिसम्भावनया, तु, किम्, पुनः।

अन्वयः—आश्चर्यमयीं भवत्पुरीं गतः अयम् गृहेषु शैब्याभवनं समेयिवान्। वैकुण्ठं प्रविश्य इव निर्वृतिम् आप। अतिसम्भावनया तु पुनः किम्?

अन्वयार्थः

आश्चर्यमयीं भवत्पुरीं गतः अयम् = आश्चर्यमय आपके नगर में गये उस (कुचेल) ने

गृहेषु शैब्याभवनं समेयिवान्। = अनेक घरों में से शैब्या भवन में प्रवेश किया।

वैकुण्ठं प्रविश्य इव निर्वृतिम् आप। = और वैकुण्ठ में प्रवेश करने के समान आनन्द को प्राप्त किया।

तव अतिसम्भावनया तु पुनः किम्? = आपके अत्युत्तम सत्कार आदि से तो और क्या (कहना)?

Funding By IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—आश्चर्यमय आपके नगर में गए उस (कुचेल) ने अनेक घरों में से शैब्या भवन में प्रवेश किया और वैकुण्ठ में प्रवेश करने के समान आनन्द को प्राप्त किया। आपके अत्युत्तम् सत्कार आदि से तो और क्या (कहना ?)

Words-Explanation :

निर्वृतिः = Happiness, Satisfaction, Tranquility, Final emancipation or liberation from worldly existence, (Moksha). (As in निर्वृतिम् आप)

सम्भावनमं/ सम्भावना = Respect, Honour, Esteem, Regard, Affection, Love etc. (As in अतिसम्भावनया)

॥ ५ ॥

प्रपूजितं तं प्रियया च वीजितम् करे गृहीत्वाकथयः पुरा कृतम्।
यदिन्धनार्थं गुरुदारचोदितैरपर्तुवर्षं तदमर्षि कानने॥

पदविभागः—प्रपूजितम्, तम्, प्रियया, च, वीजितम्, करे, गृहीत्वा, अकथयः, पुरा, कृतम्, यत्, इन्धनार्थम्, गुरुदारचोदितैः, अपर्तुवर्षम्, तत्, अमर्षि कानने।

अन्वयः—प्रपूजितं प्रियया च वीजितं तं करे गृहीत्वा पुराकृतम् अकथयः यत् "इन्धनार्थं गुरुदारचोदितैः (अस्माभिः) कानने तत् अपर्तुवर्षम् अमर्षि"।

अन्वयार्थः

प्रपूजितम् प्रियया च वीजितं तम् = स्वागत-उपचार आदि के समाप्त होने पर पत्नी (रुक्मिणी) द्वारा पङ्खे से सेव्यमान उस (कुचेल) को

करे गृहीत्वा पुराकृतम् अकथयः = हाथों से पकड़कर पूर्व में हुई बातें कही

यत् "इन्धनार्थं गुरुदारचोदितैः (अस्माभिः) कानने तत् अपर्तुवर्षम् अमर्षि"। = कि, "लकड़ी लेने के लिए गुरुपत्नी द्वारा भेजे गये (हम लोग) वन में उस अकाल-वृष्टि में पीड़ित हुए थे"।

भावार्थ—स्वागत-उपचार आदि के समाप्त होने पर पत्नी (रुक्मिणी) द्वारा पंखों से सेव्यमान उस (कुचेल) को हाथों से पकड़कर पूर्व में घटी बातों को कही कि, "लकड़ी लेने के लिए गुरुपत्नी द्वारा प्रेषित (हम लोग) वन में उस अकाल-वर्षा में पीड़ित हुए थे"।

Words-Explanation :

वीज् (वीजते) - (वीजयति, वीजयते) = To fan, To cool by fanning. (As in प्रियया च वीजितं तम्)

इन्धनम् = Fuel, Wood (As in इन्धनार्थ)

अमर्ष = Not enduring, Not bearing. (One of the 33 minor feelings).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पतत् = Descending, Falling, Coming down etc. (As in अपर्तुवर्षम्)

॥ ६ ॥

त्रपाजुषोऽस्मात् पृथुकं बलादथ प्रगृह्य मुष्टौ सकृदाशिते त्वया ।
कृतं कृतं नन्वियतेति सम्भ्रमाद्रमा किलोपेत्य करं रुरोध ते ॥

पदविभागः—त्रपाजुषः, अस्मात्, पृथुकम्, बलात्, अथ, प्रगृह्य, मुष्टौ, सकृत्, आशिते, त्वया, कृतम्, कृतम्, ननु, इयता, इति, रमा, किल, उपेत्य, रुरोध, ते ।

अन्वयः—अथ त्रपाजुषः अस्मात् पृथुकं बलात् प्रगृह्य, त्वया मुष्टौ सकृत् आशिते (सति), सम्भ्रमात् रमा उपेत्य, "इयता ननु कृतं कृतम्" इति ते करं रुरोध किल ।

अन्वयार्थः

अथ त्रपाजुषः अस्मात् पृथुकं बलात् प्रगृह्य, = बाद में लज्जा के कारण स्थित उस (कुचेल) से चिड़वे को बलात् लेकर

त्वया मुष्टौ सकृत् आशिते (सति) , = आपके द्वारा मुट्ठी भर (चिड़वे को) खाने पर,

सम्भ्रमात् रमा उपेत्य, = भ्रमित होकर लक्ष्मी (रुक्मिणी) ने समीप आकर,

"इयता ननु कृतं कृतम्" इति = "इतने से निश्चित रूप से कर दिया कर दिया" इस प्रकार (कहकर)

ते करं रुरोध किल । = आपके हाथ को रोक दिया ।

भावार्थ—बाद में लज्जा के कारण स्थित उस (कुचेल) से चिड़वे को आपके द्वारा मुट्ठी भर (चिड़वे को) खाने पर, भ्रमित होकर लक्ष्मी जी (रुक्मिणी) ने समीप में आकर, "इतने से निश्चित रूप से कर दिया कर दिया" इस प्रकार (कहकर) आपके हाथ को रोक दिया ।

Words-Explanation :

त्रप्- (त्रपति, त्रपित) = To be ashamed or abashed, Be embarrassed etc.

जुष्- (Added at the end of a composite word like त्रपाजुषः etc.) - Enjoying, Liking, Inhabiting, Assuming etc. (As in त्रपाजुषः—)

इयत् = So much, So large, Of this extent etc. (As in इयता ननु कृतं—)

आशित = Eating, Given to eat, Satisfied by eating etc. (As in सकृत आशिते)

॥ ७ ॥

भक्तेषु भक्तेन स मानितस्त्वया पुरीं वसन्नेकनिशां महासुखम् ।
बतापरेद्युर्द्रविणं विना ययौ विचित्ररूपस्तव खल्वनुग्रहः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—भक्तेषु, भक्तेन, सः, मानितः, त्वया, पुरीम्, वसन्, एकनिशाम्, महासुखम्, बत, अपरेद्युः, द्रविणम्, विना ययौ, विचित्ररूपः, तव, खलु, अनुग्रहः ॥

अन्वयः—भक्तेषु भक्तेन त्वया मानितः सः, पुरीम् एकनिशां महासुखं वसन्, अपरेद्युः, द्रविणं विना ययौ, बत । तव अनुग्रहः विचित्ररूपः खलु ।

अन्वयार्थः

भक्तेषु भक्तेन त्वया मानितः सः, = भक्तों में भक्ति रखते आप द्वारा सम्मानित वह

पुरीम् एकनिशां महासुखं वसन् = नगर (द्वारका) में एक रात अधिक सुख से रहता हुआ

अपरेद्युः, द्रविणं विना ययौ, बत । = दूसरे दिन धन के बिना लौटा, हाय ।

तव अनुग्रहः विचित्ररूपः खलु । = आपकी कृपा तो विचित्र प्रकार की है ।

भावार्थ—भक्तों में भक्ति रखते आप द्वारा सम्मानित वह (कुचेल) नगर (द्वारका) में एक रात बहुत सुख से रहता हुआ, दूसरे दिन, धन के बिना लौटा, हाय ! आपकी कृपा तो विचित्र प्रकार की है ।

Words-Explanation :

द्रविणम् = Wealth, Money, Property, Substance, etc. (As in द्रविणं विना ययौ)

द्यु = A day. (As in अपरेद्युः)

अपर = Another, Other, Second etc. (As in अपरेद्युः)

बत = A particle expressing sorrow, regret, pity or compassion, joy, satisfaction, wonder or surprise, censure etc. (Here the meaning is "alas") (As in द्रविणं विना ययौ, बत)

॥ ८ ॥

यदि ह्ययाचिष्यमदास्यदच्युतो वदामि भार्या किमिति व्रजन्नसौ ।
त्वदुक्तिलीलास्मितमग्नधीः पुनः क्रमादपश्यन्मणिदीप्रमालयम् ॥

पदविभागः—यदि, हि, अयाचिष्यम्, अदास्यत्, अच्युतः, वदामि, भार्या, किम्, इति, व्रजन् असौ, त्वदुक्तिलीलास्मितमग्नधीः, पुनः, क्रमात्, अपश्यत्, मणिदीप्रम्, आलयम् ।

अन्वयः—"यदि हि अयाचिष्यम् अच्युतः अदास्यत् । भार्यां किं वदामि ?" इति (चिन्तयन्) पुनः क्रमात् त्वदुक्तिलीलास्मितमगन्धीः व्रजन् असौ मणिदीप्रम् आलयम् अपश्यत् ।

अन्वयार्थः

"यदि हि अयाचिष्यम् अच्युतः अदास्यत् । = "यदि मैंने माँग लिया होता तो अच्युत (कृष्ण) देते ।

भार्यां किं वदामि ?" । इति (चिन्तयन्) = पत्नी को क्या कहूँ ?" इस प्रकार सोचता हुआ

CC-0. JK-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनः क्रमात् त्वदुक्तिलीलास्मितमग्नधीः = फिर बारी-बारी आपके वचनों, कार्यों तथा मन्दहास पर तल्लीन

व्रजन् असौ मणिदीप्रम् आलयम् अपश्यत्। = चलते-चलते उसने रत्नों से प्रज्वलित गृह को देखा।

भावार्थ—"यदि मैंने माँग लिया होता तो अच्युत (कृष्ण) (धन) देते। पत्नी को क्या कहूँ?" इस प्रकार (सोचता हुआ), फिर बारी-बारी से आपके वचनों, कार्यों तथा मन्दहास पर तल्लीन चलते-चलते उसने रत्नों से प्रज्वलित गृह को देखा।

Words-Explanation :

हि (This is never used at the beginning of a sentence) - (As in यदि हि अयाचिष्यम्) - For, Because, Indeed, Surely, for instance, only, alone, (sometimes also used merely as an expletive).

स्मित = Smiled, Smiling, Gentle laugh. (As in लीलास्मितमग्नधीः)

आलयम् = An abode, Dwelling, A house etc. (As in मणिदीप्रमालयम्)

॥ ९ ॥

किं मार्गविभ्रंश इति भ्रमन् क्षणं गृहं प्रविष्टः स ददर्श वल्लभाम्।
सखीपरीतां मणिहेमभूषितां बुबोध च त्वत्करुणां महाद्भुताम्॥

पदविभागः—किम्, मार्गविभ्रम्शः, इति, भ्रमन्, क्षणम्, गृहम्, प्रविष्टः, सः, ददर्श, वल्लभाम्, सखीपरीताम्, मणिहेम-भूषिताम्, बुबोध च, त्वत्करुणाम्, महाद्भुताम्॥

अन्वयः—किं मार्गविभ्रम्शः इति क्षणं भ्रमन्, गृहं प्रविष्टः सः सखीपरीतां, मणिहेमभूषितां वल्लभां ददर्श। त्वत्करुणां महाद्भुतां बुबोध च।

अन्वयार्थः

किं मार्गविभ्रम्शः इति क्षणं भ्रमन्, = क्या मार्ग विचलित हो गया, इस प्रकार क्षण भर के लिए भ्रमित होता हुआ,

गृहं प्रविष्टः सः सखीपरीतां मणिहेमभूषितां वल्लभां ददर्श। = घर में प्रवेश करके उसने सखियों से घिरी हुई, स्वर्ण तथा रत्नों से सुसज्जित पत्नी को देखा।

त्वत्करुणां महाद्भुतां बुबोध च। = और आपकी करुणा बहुत आश्चर्यजनक है यह जान लिया।

भावार्थ—क्या मार्ग विचलित हो गया इस प्रकार क्षण भर के लिए भ्रमित होता हुआ, घर में प्रवेश करके उसने सखियों से घिरी हुई स्वर्ण तथा रत्नों से सुसज्जित पत्नी को देखा और आपकी करुणा बहुत आश्चर्यजनक है यह जान लिया।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

विभ्रम्शः = Falling away. (As in किं मार्गविभ्रम्शः इति–)

वल्लभा = Wife. (As in मणिहेमभूषितां वल्लभाम्)

हेमन् = Gold. (As in मणिहेमभूषिताम्)

॥ १० ॥

स रत्नशालासु वसन्नपि स्वयं समुन्नमद्भक्तिभरोऽमृतं ययौ ।
त्वमेवमापूरितभक्तवाञ्छितो मरुत्पुराधीश, हरस्व मे गदान् ॥

पदविभागः—सः, रत्नशालासु वसन्, अपि, स्वयम्, समुन्नमद्भक्तिभरः, अमृतम्, ययौ, त्वम्, एवम्, आपूरित भक्तवाञ्छितः, मरुत्पुराधीश, हरस्व, मे, गदान् ।

अन्वयः—सः रत्नशालासु वसन् अपि स्वयं समुन्नमद्भक्तिभरः अमृतं ययौ । मरुत्पुराधीश, एवम् आपूरित भक्तवाञ्छितः त्वं मे गदान् हरस्व ।

अन्वयार्थः

सः रत्नशालासु वसन् अपि = वह (कुचेल) मणिमय गृह में रहने पर भी

स्वयं समुन्नमद्भक्तिभरः = स्वयं ऊपर-ऊपर उड़ते हुए भक्ति से भरकर

अमृतं ययौ । = अमृतत्त्व को प्राप्त हुआ ।

मरुत्पुराधीश, एवम् = हे गुरुवायुपुराधीश ! इस प्रकार

आपूरितभक्तवाञ्छितः त्वं मे गदान् हरस्व । = भक्तों की इच्छा की पूर्ति करने वाले आप मेरे रोगों का निवारण करें ।

भावार्थ—वह (कुचेल) मणिमय गृह में रहने पर भी स्वयं ऊपर-ऊपर उड़ते हुए भक्ति से भरकर अमृतत्त्व को प्राप्त हुआ । हे गुरुवायुपुराधीश ! इस प्रकार भक्तों की इच्छा को पूर्ण करने वाले मेरे रोगों का निवारण करें ।

Words-Explanation :

शाला = An apartment, A room, A hall, Saloon etc. (As in रत्नाशालासु वसन्)

उन्नत = Raised, Elevated etc. (As in समुन्नमद्भक्तिभरः)

भर = Bearing. (As in समुन्नमद्भक्तिभरः)

॥ इति सप्ताशीतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-८८

सन्तानगोपालोपाख्यानम्

[स्रग्धरछन्दः]

॥ १ ॥

प्रागेवाचार्यपुत्राहृतिनिशमनया स्वीयषट्सूनुवीक्षाम्
कांक्षन्त्या मातुरुक्त्या सुतलभुवि बलिं प्राप्य तेनार्पितांस्त्वम् ।
धातुः शापाद्धिरण्यान्वितकशिपुभवान् शौरिजान् कंस भग्ना-
नानीयैनान्, प्रदर्श्य स्वपदमनयथाः पूर्वपुत्रान् मरीचेः ॥

पदविभागः—प्राक्, एव, आचार्यपुत्राहृतिनिशमनया, स्वीयषट्सूनुवीक्षाम्, कांक्षन्त्याः, मातुः, उक्त्या, सुतलभुवि, बलिम्, प्राप्य, तेन, अर्पितान्, त्वम्, धातुः, शापात्, हिरण्यान्वितकशिपुभवान्, शौरिजान्, कम्सभग्नान्, आनीय, एनान्, प्रदर्श्य, स्वपदम्, अनयथाः, पूर्वपुत्रान्, मरीचेः ॥

अन्वयः—आचार्यपुत्राहृतिनिशमनया प्राक् एव स्वीयषट्सूनुवीक्षां कांक्षन्त्याः मातुः उक्त्या सुतलभुवि बलिं प्राप्य, तेन अर्पितान् धातुः शापात् हिरण्यान्वितकशिपुभवान्, (पुनः) शौरिजान् कंसभग्नान्, मरीचेः पूर्वपुत्रान् आनीय प्रदर्श्य त्वम् एनान् स्वपदं अनयथाः ।

अन्वयार्थः

आचार्यपुत्राहृतिनिशमनया प्राक् एव = आचार्य के मरे हुए पुत्र को फिर वापिस लाने की बात सुनकर पहले ही

स्वीयषट्सूनुवीक्षां कांक्षन्त्याः मातुः उक्त्या = अपने छह पुत्रों को देखने की इच्छा प्रकट करने वाली माता के वचनानुसार

सुतलभुवि बलिं प्राप्य तेन अर्पितान् धातुः शापात् हिरण्यान्वितकशिपुभवान्, (पुनः) शौरिजान् कंस भग्नान्, मरीचेः पूर्वपुत्रान् आनीय प्रदर्श्य त्वम् एनान् स्वपदं अनयथाः । - सुतल लोक में महाबलि के पास जाकर उसके दिये ब्रह्माजी के शाप से हिरण्यकशिपु के पुत्र होकर जन्मे, (फिर से) वसुदेव के पुत्र के रूप में जन्मे, कंस द्वारा मारे गये, मरीचि के पूर्व पुत्रों को लाकर, दिखाकर आपने, इनको अपने धाम को भेज दिया ।

भावार्थ—आचार्य के मृत्यु-प्राप्त पुत्र को फिर वापिस लाने की बात सुनकर, पूर्व में ही अपने छह पुत्रों को देखने की इच्छा प्रकट करने वाली माता के वचनानुसार, सुतल लोक में बलि के पास जाकर, उसके दिये,

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्माजी के शाप से हिरण्यकशिपु के पुत्र बनकर जन्म लिये, (फिर से) वसुदेव के पुत्र के रूप में जन्म लिये, कंस द्वारा मारे गये, मरीचि के पूर्व-पुत्रों को लाकर, (माताजी को) दिखाकर आपने, इनको अपने धाम को भेज दिया।

Words-Explanation :

निशमनम् = Hearing, Becoming aware of etc. (As in पुत्रहतिनिशमनया)

धातृ = Brahma, The Creator. (As in धातुः शापात्—)

[वसन्तमालिकेतिछन्दः]

॥ २ ॥

श्रुतदेव इति श्रुतं द्विजेन्द्रं बहुलाश्वं नृपतिं च भक्तिपूर्णम्।
युगपत्वमनुग्रहीतुकामो मिथिलां प्रापिथ तापसैः समेतः॥

पदविभागः—श्रुतदेवः, इति, श्रुतम्, द्विजेन्द्रम्, बहुलाश्वम्, नृपतिम्, च, भक्तिपूर्णम्, युगपत्, त्वम्, अनुग्रहीतुकामः, मिथिलाम्, प्रापिथ तापसैः, समेतः, ।

अन्वयः—श्रुतदेवः इति श्रुतं द्विजेन्द्रं, भक्तिपूर्णं नृपतिं बहुलाश्वं च युगपत् अनुग्रहीतुकामः त्वं तापसैः समेतः मिथिलां प्रापिथ॥

अन्वयार्थः

श्रुतदेवः इति श्रुतं द्विजेन्द्रम् = श्रुतदेव इस प्रकार के प्रसिद्ध श्रेष्ठ ब्राह्मण को और

भक्तिपूर्णं नृपतिं बहुलाश्वम् च = श्रेष्ठ भक्त राजा बहुलाश्व को

युगपत् अनुग्रहीतुकामः = एक ही समय में अनुग्रहीत करने की इच्छा से

त्वं तापसैः समेतः मिथिलां प्रापिथ। = आप महर्षियों के साथ मिथिला में आये।

भावार्थ—श्रुतदेव इस प्रकार के प्रसिद्ध श्रेष्ठ ब्राह्मण को और श्रेष्ठ भक्त राजा बहुलाश्व को, एक साथ (एक ही समय में) अनुग्रहीत करने की इच्छा से आप, महर्षियों के साथ मिथिला में आये।

Words-Explanation :

युगपत् = Simultaneously. (As in युगपत् अनुग्रहीतुकामः)

॥ ३ ॥

गच्छन् द्विमूर्तिरुभयोर्युगपन्निकेतमेकेन भूरिविभवैर्विहितोपचारः।
अन्येन तद्दिनभृतैश्च फलौदनाद्यैस्तुल्यं प्रसेदिथ ददाथ च मुक्तिमाभ्याम्॥

पदविभागः—गच्छन्, द्विमूर्तिः, उभयोः, युगपत्, निकेतम्, एकेन, भूरिविभवैः, विहितोपचारः, अन्येन, तद्दिनभृतैः, च, फलौदनाद्यैः, तुल्यम्, प्रसेदिथ, ददाथ, च, मुक्तिम्, आभ्याम्॥

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—(त्वं) द्विमूर्तिः उभयोः निकेतं युगपत् गच्छन्, एकेन भूरिविभवैः विहितोपचारः, अन्येन तद्दिनभृतैः फलौदनाद्यैः च (विहितोपचारः), तुल्यं प्रसेदिथ। (त्वं) आभ्यां मुक्तिं ददाथ च ॥

अन्वयार्थः

(त्वं) द्विमूर्तिः उभयोः निकेतम् युगपत् गच्छन्, = (आप ने) दो रूप धारण करके दोनों के घरों पर एक ही समय में जाकर,

एकेन भूरिविभवैः विहितोपचारः। = एक द्वारा बहुत वैभव से पूजा सत्कार किये जाने पर

अन्येन तद्दिनभृतैः फलौदनाद्यैः च (विहितोपचारः) = दूसरे के द्वारा उस दिन अर्जित (इकट्ठा किये) फल और चावल (भात) से (पूजा सत्कार किये जाने पर)

तुल्यं प्रसेदिथ। = (दोनों पर) एक समान सन्तुष्ट हुए।

आभ्यां मुक्तिं ददाथ च। = और दोनों को मुक्ति भी प्रदान की।

भावार्थ—(आप ने) दो रूप धारण करके दोनों के घरों पर एक ही समय में जाकर, एक द्वारा बहुत बैभव से पूजा सत्कार आदि किये जाने पर दूसरे के द्वारा उस दिन अर्जित (इकट्ठा किया) फल तथा भात (चावल) से (पूजा सत्कार किये जाने पर) (दोनों पर) एक समान आप सन्तुष्ट हुए। और दोनों को मुक्ति भी प्रदान की।

Words-Explanation :

ओदनः/ ओदनम् = Food, Boiled Rice. (As in फलौदनाद्यैः)

विभवः = Wealth, Exhalted position, Rank, etc. (As in भूरिविभवैः)

भृतकः/ भृतः = Hired servant, (Here Procured on that date) (As in तद्दिनभृतैः)

[स्रग्धरछन्दः]

॥ ४ ॥

भूयोऽथ द्वारवत्यां द्विजतनयमृतिं तत् प्रलापानपि त्वम्
को वा दैवं निरुन्ध्यादिति किल कथयन् विश्ववोढाऽप्यसोढाः।

जिष्णोर्गर्वं विनेतुं त्वयि मनुजधिया कुण्ठितां चास्य बुद्धिम्
तत्वारूढां विधातुं परमतमपदप्रेक्षणेनेति मन्ये॥

पदविभागः—भूयः, अथ, द्वारवत्याम्, द्विजतनयमृतिम्, तत्, प्रलापन्, अपि, त्वम्, कः, वा, दैवम्, निरुन्ध्यात्, इति, किल, कथयन्, विश्ववोढा, अपि, असोढाः, जिष्णोः, गर्वम्, विनेतुम्, त्वयि, मनुजधिया, कुण्ठिताम्, च, अस्य, बुद्धिम्, तत्वारुढाम्, विधातुम्, परमतमप्रेक्षणेन, इति, मन्ये।

Digitized by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—अथ द्वारवत्यां भूयः द्विजतनयमृतिं तत्प्रलापान् अपि त्वं विश्ववोढा अपि "दैवं कः वा निरुन्ध्यात् ?" इति कथयन् असोढाः किल । जिष्णोः गर्वं विनेतुं मनुजधिया त्वयि कुण्ठितां अस्य बुद्धिं परमतमप्रेक्षणेन तत्वारूढां विधातुं च इति (अहं) मन्ये ।

अन्वयार्थः

अथ द्वारवत्यां भूयः द्विजतनयमृतिम् = बाद में द्वारका में हुए ब्राह्मण के पुत्रों की मृत्यु को

तत्प्रलापान् अपि त्वं विश्ववोढा अपि "दैवं कः वा निरुन्ध्यात् ?" इति कथयन् असोढाः किल । = उसके विलापों को भी समस्त विश्व को धारण कर्त्ता होते हुए भी आप "ईश्वर के कामों को कौन रोक सकता है ?" इस प्रकार कहते हुए सहन किया ।

जिष्णोः गर्वं विनेतुं मनुजधिया त्वयि कुण्ठितां अस्य बुद्धिं परमतमप्रेक्षणेन तत्वारूढां विधातुं च इति मन्ये = अर्जुन के गर्व को निकालने वाले आप मनुष्य हैं इस प्रकार के मन से निकालकर वैकुण्ठ दिखाकर सत्य को समझाने के लिए ही इस प्रकार आपने किया, इस प्रकार मैं समझता हूँ ।

भावार्थ—बाद में द्वारका में हुए ब्राह्मण के पुत्रों की मृत्यु को उसके विलापों को भी समस्त विश्व को धारण कर्त्ता होते हुए भी आपने "ईश्वर के कामों को कौन रोक सकता है ?" इस प्रकार कहकर सहन किया । अर्जुन के गर्व को निकालने वाले आप मनुष्य हैं इस प्रकार की धारणा को निकालकर परमपद वैकुण्ठ को दिखाकर सत्य को समझाने के लिए ही आपने इस प्रकार किया, ऐसा मैं समझता हूँ ।

Words-Explanation :

सोढ = Borne, Suffered, Endured, Put up with.

वह् - (वहति, वहते, ऊढ, उह्यते) = To carry, To bear, etc. (As in विश्ववोढा अपि)

॥ ५ ॥

नष्टा अष्टास्य पुत्राः पुनरपि तव तूपेक्षया कष्टवादः
स्पष्टो जातो जनानामथ तदवसरे द्वारकामार पार्थः ।
मैत्र्या तत्रोषितोऽसौ नवमसुतमृतौ विप्रवर्यप्ररोदम्
श्रुत्वा चक्रे प्रतिज्ञामनुपहतसुतः सन्निवेक्ष्ये कृशानुम् ॥ ५ ॥

पदविभागः—नष्टाः, अष्टाः, अस्य, पुत्राः, पुनः, अपि, तव, तु, उपेक्षया, कष्टवादः, स्पष्टः, जातः, जनानाम्, अथ, तदवसरे, द्वारकाम्, आर, पार्थः, मैत्र्या, तत्र, उषितः, असौ, नवमसुतमृतौ, विप्रवर्यप्ररोदम्, श्रुत्वा, चक्रे, प्रतिज्ञाम्, अनुपहतसुतः, सन्निवेक्ष्ये, कृशानुम् ॥

अन्वयः—अस्य अष्टाः पुत्राः नष्टाः । पुनः अपि तु तव उपेक्षया जनानां स्पष्टः कष्टवादः जातः । अथ तदवसरे पार्थः द्वारकाम् आर । मैत्र्या तत्र उषितः असौ नवमसुतमृतौ विप्रवर्यप्ररोदं श्रुत्वा "अनुपहतसुतः कृशानुं सन्निवेक्ष्ये" इति प्रतिज्ञां चक्रे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

अस्य अष्टाः पुत्राः नष्टाः । = उसके आठ पुत्रों की मृत्यु हुई थी ।

पुनः अपि तु तव उपेक्षया जनानां स्पष्टः कष्टवादः जातः । = फिर भी तो आपकी उपेक्षा (अवहेलना) से लोगों में "कष्ट कष्ट" "हाय हाय" इस प्रकार के नाद प्रकट होने लग गये ।

अथ तदवसरे पार्थः द्वारकाम् आर । मैत्र्या तत्र उषितः असौ = बाद में उस समय अर्जुन द्वारका में आया । मित्रता के कारण वहां ठहरे उस (अर्जुन) ने

नवमसुतमृतौ विप्रवर्यप्ररोदं श्रुत्वा "अनुपहतसुतः कृशानुं सन्निवेक्ष्ये" इति प्रतिज्ञां चक्रे । = नौवें पुत्र की मृत्यु पर ब्राह्मण का रोना सुनकर, "इसके बाद जन्मे पुत्र को लाकर नहीं देने से मैं अग्निप्रवेश करूँगा" इस प्रकार प्रतिज्ञा की ।

भावार्थ—उसके बाद आठ पुत्रों की मृत्यु हुई थी । फिर भी तो आपकी उपेक्षा से लोगों में "ब्राह्मण कुमारों को नहीं रक्षा कर पाया हाय हाय" इस प्रकार स्पष्ट रूप से धारणा हो गयी । बाद में उस समय अर्जुन द्वारका में आया । मित्रता के कारण वह (कृष्ण के यहाँ) ठहरे वह (अर्जुन ने) नौवां पुत्र के मृत्यु पर ब्राह्मण का रोना सुनकर, "इसके बाद जन्म होने वाले पुत्र को लाकर नहीं देने से मैं अग्निप्रवेश करूँगा" इस प्रकार प्रतिज्ञा की ।

Words-Explanation :

कृशानुः = Fire. (As in कृशानुं सन्निवेक्ष्ये)

उषित = Dwelt, Stayed etc. (As in मैत्र्या तत्र उषितः)

॥ ६ ॥

मानी स त्वामपृष्ट्वा द्विजनिलयगतो बाणजालैर्महास्त्रै
रुन्धानः सूतिगेहं पुनरपि सहसा दृष्टनष्टे कुमारे ।
याम्यामैन्द्रीं तथान्याः सुरवरनगरीर्विद्ययासाद्य सद्यो
मोघोद्योगः पतिष्यन् हुतभुजि भवता सस्मितं वारितोऽभूत् ॥

पदविभागः—मानी, सः, त्वाम्, अपृष्ट्वा, द्विजनिलयगतः, बाणजालैः, महास्त्रैः, रुन्धानः, सूतिगेहम्, पुनः, अपि, सहसा, दृष्टनष्टे, कुमारे, याम्याम्, ऐन्द्रीम्, तथा, अन्याः, सुरवरनगरीः, विद्यया, आसाद्य, सद्यः, मोघोद्योगः, पतिष्यन्, हुतभुजि, भवता, सस्मितम्, वारितः, अभूत् ॥

अन्वयः—मानी सः त्वाम् अपृष्ट्वा द्विजनिलयगतः बाणजालैः महास्त्रैः सूतिगेहं रुन्धानः । पुनः अपि कुमारे सहसा दृष्टनष्टे, याम्याम्, ऐन्द्रीं तथा अन्याः सुरवरनगरीः विद्यया आसाद्य सद्यः मोघोद्योगः हुतभुजि पतिष्यन् भवता सस्मितं वारितः अभूत् ॥

अन्वयार्थः

मानी सः त्वाम् अपृष्ट्वा, = अभिमानी उस अर्जुन ने आपसे न पूछकर,

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्विजनिलयगतः बाणजालैः महास्त्रैः सूतिगेहं रुन्धानः । = ब्राह्मण के घर में जाकर बाणों के समूह से तथा अन्य महान् अस्त्रों से प्रसूति घर को रोक लिया (रक्षा किया) ।

पुनः अपि कुमारे सहसा दृष्टनष्टे याम्यां, ऐन्द्रीं तथा अन्याः सुरवरनगरीः विद्यया आसाद्य सद्यः = फिर भी कुमार के पैदा होकर नष्ट होता देखने पर यमलोक, स्वर्गलोक तथा अन्य श्रेष्ठ देवों के नगरों में अपनी योगविद्या से जाकर तुरन्त देखकर,

मोघोद्योगः - अन्वेषण करके न मिलने से निराश होकर

हुतभुजि पतिष्यन् भवता सस्मितं वारितः अभूत् । - अग्नि में गिरते समय आपने मन्दहास करते हुए रोक लिया ।

भावार्थ—अभिमानी उस अर्जुन ने आप से न पूछकर ब्राह्मण के घर में जाकर, बाणों के समूह से तथा अन्य महा अस्त्रों से प्रसूति-घर की रक्षा की । फिर भी कुमार (बच्चे) के पैदा होकर नष्ट होने पर, यमलोक, स्वर्गलोक तथा अन्य श्रेष्ठ देवों के नगरों में अपनी योगविद्या से जाकर, विफल होने पर अग्नि में गिरते समय आपने मन्दहास करते हुए रोक लिया ।

Words-Explanation :

मोघ = Vain, Useless, Fruitless, Unsuccessful etc. (As in मोघोद्योगः)

हुत भुज = Fire. (ngle - offered as an oblation to fire.) (As in हुतभुजि)

॥ ७ ॥

सार्धं तेन प्रतीचीं दिशमतिजविनास्यन्दनेनाभियातो
लोकालोकं व्यतीतस्तिमिरभरमथो चक्रधाम्ना निरुन्धन् ।
चक्रांशुक्लिष्टदृष्टिं स्थितमथविजयं पश्य पश्येति वाराम्
पारे त्वं प्राददर्श किमपि हि तमसाम् दूरदूरं पदं ते ॥

पदविभागः—सार्धम्, तेन, प्रतीचीम्, दिशम्, अतिजविनास्यन्दनेन, अभियातः, लोकालोकम्, व्यतीतः, तिमिरभरम्, अथ, चक्रधाम्ना, निरुन्धन्, चक्रांशुक्लिष्टदृष्टिम्, स्थितम्, अथ, विजयम्, पश्य, पश्य, इति, वाराम्, पारे, त्वम्, प्राददर्शः, किमपि, हि, तमसाम्, दूरदूरम्, पदम् ते ॥

अन्वयः—त्वं तेन सार्धं प्रतीचीं दिशम् अतिजविनास्यन्दनेन अभियातः । लोकालोकं व्यतीतः अथ तिमिरभरं चक्रधाम्ना निरुन्धन् अथ चक्रांशुक्लिष्टदृष्टिं स्थितं विजयं वारां पारे "पश्य पश्य" इति तमसां दूरदूरं किमपि हि ते पदं प्राददर्शः ।

अन्वयार्थः

त्वं तेन सार्धं प्रतीचीं दिशम् = आप उस (अर्जुन) के साथ पश्चिम दिशा को

अतिजविनास्यन्दनेन अभियातः । = बहुत शीघ्र जाते रथ पर चढ़कर गये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकालोकं व्यतीतः अथ तिमिरभरं चक्रधाम्ना निरन्धन् = लोकालोक (पर्वत) को पार करके, उसके बाद अन्धकार को चक्र की प्रभा से रोककर,

अथ चक्रांशुक्लिष्टदृष्टिं स्थितं विजयम् = बाद में (सुदर्शन) चक्र की प्रभा से देखने में असमर्थ खड़े अर्जुन को

वारां पारे "पश्य पश्य", इति तमसां दूरदूरं किमपि हि ते पदं प्राददर्शः । = समुद्र (सप्तसिन्धु) के पार "देखो-देखो" इस प्रकार तमोगुण से बहुत दूर (तमोगुण से रहित) अपने धाम (वैकुण्ठ) को दिखाया ।

भावार्थ—आप उस (अर्जुन) के साथ पश्चिम दिशा की ओर अतिशीघ्र जाते रथ पर चढ़कर गये । लोकालोक (पर्वत) को पार करके, उसके बाद अन्धकार को चक्र की प्रभा से रोककर बाद में (सुदर्शन) चक्र की प्रभा से देखने में असमर्थ खड़े अर्जुन को समुद्र (सप्तसिन्धु के) पार "देखो-देखो" इस प्रकार तमोगुण से बहुत दूर (तमोगुण रहित) अपने धाम (वैकुण्ठ) को दिखाया ।

Words-Explanation :

जव = Quickly, Rapidly, etc. (As in अतिजविना—)

स्यन्दनः A war chariot. (As in अतिजविनास्यन्दनेन) =

अम्शुः = A ray, Beam of light, Lustre, Brilliance, (As in चक्राम्शु—)

॥ ८ ॥

तत्रासीनं भुजङ्गाधिपशयनतले दिव्यभूषायुधाद्यै-
रावीतं पीतचेलं प्रतिनवजलदश्यामलं श्रीमदङ्गम् ।
मूर्त्तीनामीशितारं परमिह त्रिसृणामेकमर्थं श्रुतीनाम्
त्वामेव त्वं परात्मन्, प्रियसखसहितो नेमिथ क्षेमरूपम् ॥

पदविभागः—तत्र , आसीनम्, भुजङ्गाधिपशयनतले, दिव्यभूषायुधाद्यैः, आवीतम्, पीतचेलम्, प्रतिनवजलदश्यामलम्, श्रीमदङ्गम्, मूर्त्तीनाम्, ईशितारम्, परम्, इह, त्रिसृणाम्, एकम्, अर्थम्, श्रुतीनाम्, त्वाम्, एव, त्वम्, परात्मन्, प्रियसखसहितः, नेमिथ, क्षेमरूपम् ।

अन्वयः—परमात्मन्, तव भुजङ्गाधिपशयने आसीनं, दिव्यभूषायुद्यैः आवीतं पीतचेलं, प्रतिनवजलदश्यामलं श्रीमदङ्गं तिसृणां मूर्तिनाम् ईशितारम्, इह परं, श्रुतीनाम् एकम् अर्थम्, क्षेमरूपं, त्वाम् एव त्वं, प्रियसखसहितः नेमिथ ॥

अन्वयार्थः

परमात्मन्, तत्र भुजङ्गाधिपशयनतले = हे परमात्मन् ! वहाँ शेषनाग के शयन-आसन पर

आसीनं, दिव्यभूषायुद्यैः आवीतं पीतचेलम् = आसीन होकर, दिव्य आभरणों तथा पीले वस्त्रों वाले

प्रतिनवजलदश्यामलं श्रीमदङ्गम् = नये काले बादल जैसे शरीर वाले, लक्ष्मी देवी के क्रीड़ास्थल,

तिसृणां मूर्त्तीनाम् ईशितारम् = तीनों मूर्तियों के नायक,

Digitized by NKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इह परं, श्रुतीनाम् एकम् अर्थम् = इधर सबसे ऊंचे स्थान को प्राप्त, वेदों के एक अर्थ,

क्षेमरूपं त्वाम् एव त्वं प्रियसखसहितः नेमिथ। = सुख प्रदान करने वाले अपने आपको ही आपने प्रियमित्र (अर्जुन) के साथ प्रणाम किया।

भावार्थ—हे परमात्मन ! वहाँ शेषनाग के शयन-आसन पर आसीन, दिव्य आभरणों तथा आयुधों के साथ पीले वस्त्र धारण करके, नये काले बादल जैसे शरीर वाले लक्ष्मी देवी के क्रीड़ास्थल, तीनों मूर्तियों के नायक, इस लोक में सबसे ऊंचे स्थान को प्राप्त, वेदों के एक अर्थ, सुख प्रदान करने वाले अपने आपको ही आपने प्रियमित्र (अर्जुन) के साथ प्रणाम किया।

Words-Explanation :

ईशिता = Superiority, Greatness. (As in तिसृणां मूर्त्तीनाम् ईशितारम्)

क्षेम = Conferring happiness. (As in क्षेमरूपम्)

[शिखरिणीछन्दः]

॥ ९ ॥

युवां मामेव द्वावधिकविवृतान्तर्हिततया
विभिन्नौ सन्द्रष्टुं स्वयमहमहार्षं द्विजसुतान्।
नयेतं द्रागेतानिति खलु वितीर्णान् पुनरमून्
द्विजायादायादाः प्रणुतमहिमा पाण्डुजनुषा॥

पदविभागः—युवाम्, माम्, एव, द्वौ, अधिकविवृतान्तर्हिततया, विभिन्नौ, सन्द्रष्टुं, स्वयम्, अहम्, अहार्षम्, द्विजसुतान्, नयेतम्, द्राक्, एतान्, इति, खलु, वितीर्णान्, पुनः, अमून्, द्विजाय, आदाय, अदाः, प्रणुतमहिमा, पाण्डुजनुषा।

अन्वयः—"माम् एव अधिकविवृतान्तर्हिततया विभिन्नौ युवां द्वौ सन्द्रष्टुम् अहं स्वयं द्विजसुतान् अहार्षम्। एतान् द्राक् नयेतं" इति वितीर्णान् अमून् आदाय, पुनः पाण्डुजनुषा प्रणुतमहिमा त्वं द्विजाय अदाः खलु।

अन्वयार्थः

"माम् एव अधिकविवृतान्तर्हिततया विभिन्नौ युवां द्वौ = "मैं ही प्रकट ईश्वर रूपी (परमात्मा) (Patent) तथा अप्रकट ईश्वर रूपी (जीवात्मा) (Latent) विभिन्न प्रकार के आप दोनों को

सन्द्रष्टुम् अहं स्वयं द्विजसुतान् अहार्षम्। = देखने के लिए स्वयं ब्राह्मण पुत्रों को हर कर लाया हूँ।

एतान् द्राक् नयेतं" इति वितीर्णान् अमून् आदाय, = इनको तुरन्त ले जायें", इस प्रकार (कहकर) दिये उनको प्राप्त करके

पुनः पाण्डुजनुषा प्रणुतमहिमा त्वं द्विजाय अदाः खलु। = फिर, पाण्डुपुत्र (अर्जुन) द्वारा आपकी महिमा की प्रशंसा प्राप्त करके आपने ब्राह्मण को दान दिया।

भावार्थ—"मैं ही प्रकट ईश्वर रूपी (परमात्मा - Divinity in Patent form) तथा अप्रकट ईश्वर रूपी (जीवात्मा - Divinity in latent form) इस प्रकार के विभिन्न प्रकार के आप दोनों को देखने

Digitized by IGNCA

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कें लिए मैं स्वयं ब्राह्मणपुत्रों को हर कर लाया हूँ। इनको तुरन्त ले जायें।" इस प्रकार (कहकर) दिये उनको प्राप्त करके फिर, पाण्डुपुत्र (अर्जुन) द्वारा आपकी महिमा को प्रशंसा किये आपने (पुत्रों को) ब्राह्मण को दान दिया था।

Words-Explanation :

विवृत = Displayed, Manifested. (As in अधिकविवृतान्तर्हिततया—)

वितीर्ण = Passed over, Bestowed, Given etc. (As in इति वितीर्णान्)

प्रणुत = Praised (As in प्रणुतमहिमा)

महिमन् = Greatness, Glory, Majesty etc. (As in प्रणुतमहिमा)

[स्रग्धरछन्दः]

॥ १० ॥

एवं नानाविहारैर्जगदभिरमयन् वृष्णिवंशं प्रपुष्ण-
न्नीजानो यज्ञभेदैरतुलविहृतिभिः प्रीणयन्नेणनेत्राः।
भूभारक्षेपदम्भात् पदकमलजुषां मोक्षणायावतीर्णः
पूर्णं ब्रह्मैव साक्षाद्यदुषु मनुजतारूषितस्त्वं व्यलासीः॥

पदविभागः—एवम्, नानाविहारैः, जगद्, अभिरमयन्, वृष्णिवंशम्, प्रपुष्णन्, ईजानः, यज्ञभेदैः, अतुलविहृतिभिः, प्रीणयन्, एणनेत्राः, भूभारक्षेपदम्भात्, पदकमलजुषाम्, मोक्षणाय, अवतीर्णः, पूर्णम्, ब्रह्म, एव, साक्षात्, यदुषु, मनुजतारूषितः त्वम्, व्यलासीः।

अन्वयः—भूभारक्षेपदम्भात् पदकमलजुषां मोक्षणाय अवतीर्णः पूर्णं ब्रह्म एव त्वम् एवं नानाविहारैः जगत् अभिरमयन्, वृष्णिवंशं प्रपुष्णन्, यज्ञभेदैः ईजानः अतुलविहृतिभिः एणनेत्राः प्रीणयन्, यदुषु मनुजतारूषितः साक्षात् व्यलासीः॥

अन्वयार्थः

भूभारक्षेपदम्भात् पदकमलजुषाम् मोक्षणाय अवतीर्णः पूर्णं ब्रह्म एव त्वम् एवं नानाविहारैः जगत् अभिरमयन् = भूमि के भार को कम करने के बहाने, चरणों में आश्रितों को मोक्ष प्रदान करने के लिए अवतार करने वाले पूर्ण ब्रह्म स्वरूप आप ही इस प्रकार अनेक प्रकार की लीलायें करके जगत् को आनन्दित करते हुए

वृष्णिवंशं प्रपुष्णन् यज्ञभेदैः ईजानः, अतुलविहृतिभिः एणनेत्राः प्रीणयन्, = यादव वंश का पोषण करते हुए, अनेक प्रकार के यज्ञों को कराकर, अनेक अतुल्य लीलाओं द्वारा मृगनयनियों को हर्षित करते हुए,

यदुषु मनुजतारूषितः साक्षात् व्यलासीः। = यादवों में मनुष्य रूप को धारण करते हुए प्रत्यक्ष रूप में विराजमान रहे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—भूमि के भार को कम करने के बहाने चरणकमलों में आश्रितों को मोक्ष प्रदान करने के लिए अवतार करने वाले पूर्ण ब्रह्म स्वरूप आप ही, इस प्रकार की लीलायें करके जगत् को सन्तुष्ट आनन्दित करते हुए यादव वंश का पोषण करते हुए, अनेक प्रकार के यज्ञों को कराकर, अनेक अतुल्य लीलाओं द्वारा मृगनयनियों को सन्तुष्ट कराकर, यादवों में मनुष्य रूप को धारण करते हुए, प्रत्यक्ष रूप में विराजमान रहे।

Words-Explanation :

दम्भ, दभ - (दभति, दम्नोति, दब्ध, धिप्सति, धीप्सति, विदंभिषति) - To deceive, To cheat. (As in भूभारक्षेपदम्भात्—)

रूषित = Adorned, Smeared, Decorated etc. (As in मनुजतारूषितः)

॥ ११ ॥

प्रायेण द्वारवत्यामवृतदयि, तदा नारदस्त्वद्रसार्द्र-
स्तस्माल्लेभे कदाचित् खलु सुकृतनिधिस्त्वत्पिता तत्वबोधम्।

भक्तानामग्रयायी स च खलु मतिमानुद्धवस्त्वत्त एव
प्राप्तो विज्ञानसारं स किल जनहितायाधुनास्ते बदर्याम्॥

पदविभागः—प्रायेण, द्वारवत्याम्, अवृतत्, अयि, तदा, नारदः, त्वद्रसार्द्रः, तस्मात्, लेभे, कदाचित्, खलु, सुकृतिनिधिः, त्वत्, पिता, तत्वबोधम्, भक्तानाम्, अग्रयायी, सः, च, खलु, मतिमान्, उद्धवः, त्वत्तः, एव, प्राप्तः, विज्ञानसारम्, सः, किल, जनहिताय, अधुना, आस्ते, बदर्याम्॥

अन्वयः—अयि, तदा नारदः त्वद्रसार्द्रः द्वारवत्यां प्रायेण अवृतत्। कदाचित्, सुकृतिनिधिः त्वत् पिता तस्मात् तत्वबोधं लेभे खलु। भक्तानाम् अग्रयायी मतिमान सः उद्धवः च त्वत्तः एव विज्ञानसारं प्राप्तः खलु। सः जनहिताय अधुना बदर्याम् आस्ते किल।

अन्वयार्थः

अयि, तदा नारदः त्वद्रसार्द्रः = हे (प्रभो !) उस समय नारद आप में मन से लीन होकर

द्वारवत्यां प्रायेण अवृतत्। = प्रायः द्वारका में ही रहते थे।

कदाचित् सुकृतिनिधिः त्वत् पिता = कभी पुण्य से भरपूर आपके पिताजी (वसुदेव) ने

तस्मात् तत्वबोधं लेभे खलु। = उन (नारद) से तत्त्व ज्ञान प्राप्त किया था।

भक्तानां अग्रयायी मतिमान सः उद्धवः च त्वत्तः एव विज्ञानसारं प्राप्तः खलु। = भक्तों में श्रेष्ठ, बुद्धिमान् उस उद्धव ने भी आपसे ही विज्ञान के सार तत्त्व को प्राप्त किया था।

सः जनहिताय अधुना बदर्याम् आस्ते किल। = वह (उद्धव) लोगों के कल्याण के लिए आज भी बदर्याश्रम में रहता है।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—हे प्रभो ! उस समय नारद आप में मन से लीन होकर प्रायः द्वारका में ही रहते थे । कभी पुण्य से भरपूर आपके पिताजी (वसुदेव) ने उन (नारद) से तत्त्व ज्ञान प्राप्त किया था । भक्तों में श्रेष्ठ, बुद्धिमान् उस उद्धव ने भी आपसे ही विज्ञान के सार तत्त्व को प्राप्त किया था । वह (उद्धव) लोगों के कल्याण के लिए आज भी बदर्याश्रम में रहता है ।

Words-Explanation :

प्रायेण = Mostly, As a general rule, (As in द्वारवत्यां प्रायेण अवृतत्)

विज्ञानम् = Worldly or Profane knowledge, Knowledge of Brahma or Supreme Spirit. (As in विज्ञानसारं प्राप्तः)

॥ १२ ॥

सोऽयं कृष्णावतारो जयति तव विभो यत्र सौहार्दभीति-
स्नेहद्वेषानुरागप्रभृतिभिरतुलैरश्रमैर्योगभेदैः ।
आर्तिं तीर्त्वा समस्तामामृतपदमगुः सर्वतः सर्वलोकाः
स त्वं विश्वार्तिशान्त्यै पवनपुरपते, भक्तिपूर्त्यै च भूयाः ॥

पदविभागः—सः, अयम्, कृष्णावतारः, जयति, तव, विभो, यत्र, सौहार्दभीतिस्नेहद्वेषानुरागप्रभृतिभिः, अतुलैः आश्रमैः, योगभेदैः, आर्तिम्, तीर्त्वा, समस्ताम्, अमृतपदम्, अगुः, सर्वतः, सर्वलोकाः, सः, त्वम्, विश्वार्तिशान्त्यै, पवनपुरपते, भक्तिपूर्त्यै, च, भूयाः ।

अन्वयः—विभो, तव सः अयं कृष्णावतारः जयति । सर्वतः सर्वलोकाः यत्र सौहार्दभीतिस्नेहद्वेषानुरागप्रभृतिभिः, अतुलैः, अश्रमैः योगभेदैः समस्ताम् आर्तिं तीर्त्वा अमृतपदम् अगुः । पवनपुरपते सः त्वं विश्वार्तिशान्त्यै, भक्तिपूर्त्यै च भूयाः ।

अन्वयार्थः

विभो, तव सः अयं कृष्णावतारः जयति । = हे विभो ! आपका यह कृष्णावतार उन्नत रूप से जय को प्राप्त है ।

सर्वतः सर्वलोकाः यत्र सौहार्दभीतिस्नेहद्वेषानुरागप्रभृतिभिः, = सब जगह, सब लोगों ने जहाँ सौहार्द, भय, स्नेह, अनुराग आदि,

अतुलैः, अश्रमैः योगभेदैः समस्ताम् आर्तिं तीर्त्वा अमृतपदम् अगुः । = अपार, अश्रम, योगों के प्रकारों द्वारा समस्त दुखों को पार करके अमृतत्त्व को प्राप्त किया ।

पवनपुरपते, सः त्वं विश्वार्तिशान्त्यै भक्तिपूर्त्यै च भूयाः । = हे गुरुवायुपुराधीश !, उस प्रकार के आप समस्त दुःखों की समाप्ति के लिए तथा पूर्ण शक्ति प्राप्त करने के लिए (मुझ पर) अनुग्रह करें ।

भावार्थ—हे विभो ! आपका यह कृष्ण-अवतार उन्नत रूप से जय को प्राप्त है । सब जगह, समस्त लोगों ने जहाँ सौहार्द, भय, स्नेह, अनुराग आदि, असमान, अश्रम योगों के प्रकारों द्वारा समस्त दुःखों को पार करके

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमृतत्त्व को प्राप्त किया । हे गुरुवायुपुराधीश ! उस प्रकार के आप समस्त दु:खों की समाप्ति के लिए तथा संपूर्ण भक्ति को प्राप्त करने के लिए (मुझ पर) अनुग्रह करें ।

Words-Explanation :

अतुल = Matchless, unequalled. (As in अतुलै: अश्रमै: योगभेदै:)

आर्ति: = Distress. (As in आर्तिं तीर्त्वा)

॥ इति अष्टाशीतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-८९

वृकासुरवधवर्णनम्

[शिखरिणीछन्दः]

॥ १ ॥

रमाजाने, जाने यदिह तव भक्तेषु विभवो
न सम्पद्यः सद्य, स्तदिह मदकृत्वादशमिनाम् ।
प्रशान्तिं कृत्वैव प्रदिशसि ततः काममखिलम्
प्रशान्तेषु क्षिप्रं न खलु भवदीये च्युतिकथा ॥

पदविभागः—रमाजाने, जाने, यत्, इह, तव, भक्तेषु, विभवः, न, सम्पद्यः, सद्यः, तत्, इह, मदकृत्वात्, अशमिनाम्, प्रशान्तिम्, कृत्वा, एव, प्रदशसि, ततः,कामम्, अखिलम्, प्रशान्तेषु, क्षिप्रम्, न, खलु, भवदीये, च्युतिकथा ॥

अन्वयः—इह (लोके) तव भक्तेषु विभवः सद्यः न सम्पद्यः यत तत् इह अशमिनां मदकृत्वात् (इति) रमाजाने (अहं) जाने । (त्वं) प्रशान्तिं कृत्वा ततः एव अखिलं कामं प्रदिशसि । प्रशान्तेषु क्षिप्रम् (कामं प्रदिशसि) । भवदीये न खलु च्युतिकथा ।

अन्वयार्थः

इह (लोके) तव भक्तेषु विभवः = इधर (इस लोक में) आपके भक्तों को ऐश्वर्य

सद्यः न सम्पद्यः यत् तत् = तुरन्त प्राप्त नहीं होता, क्योंकि वह

इह अशमिनां मदकृत्वात् (इति) रमाजाने (अहं) जाने । = इधर अशान्त लोगों में मद (अहंकार) करने वाला है (इसको) रमा के पति (मैं) जानता हूँ ।

(त्वं) प्रशान्तिं कृत्वा ततः एव अखिलं कामं प्रदिशसि । = (आप) शान्ति प्रदान करने के बाद ही समस्त इच्छाओं को देते हो ।

प्रशान्तेषु क्षिप्रम् (कामं प्रदिशसि) । = शान्त लोगों को तुरन्त (समस्त इच्छायें देते हो) ।

भवदीये न खलु च्युतिकथा । = आपके भक्तों में कोई गिरावट है ही नहीं ।

भावार्थ—इधर (इस लोक में) आपके भक्तों को ऐश्वर्य तुरन्त प्राप्त नहीं होता, क्योंकि वह इधर अशान्त लोगों में मद (अहंकार) करने वाला है (इसको) रमा के पति, (मैं) जानता हूँ । (आप) शान्ति प्रदान करने के बाद ही समस्त इच्छाओं को पूर्ण करते हो । शान्त लोगों की तुरन्त (समस्त इच्छायें पूर्ण करते हो) । आपके भक्तों में कोई गिरावट है ही नहीं ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

विभव = Wealth, Prosperity, Rich, Power, Might etc. (As in भक्तेषु विभवः—)

शम् - (शम्यति, शान्त) = To be calm, Tranquil. (As in अशमिनां मदकृत्वात्)

(अशमिनाम् = To the proud tumultous person)

क्षिप्र = Quick, Speedy etc. (As in प्रशान्तेषु क्षिप्रम्)

च्युति = Dropping, Vanishing, Deviation.

[वसन्ततिलकछन्दः]

॥ २ ॥

सद्यः प्रसादरुषितान् विधिशङ्करादीन् केचिद्विभो, निजगुणानुगुणं भजन्तः ।
भ्रष्टा भवन्ति बत कष्टमदीर्घदृष्ट्या स्पष्टं वृकासुर उदाहरणं किलास्मिन् ॥ २ ॥

पदविभागः—सद्यः, प्रसादरुषितान्, विधिशङ्करादीन्, केचित्, विभो, निजगुणानुगुणम्, भजन्तः, भ्रष्टाः, भवन्ति, बत, कष्टम्, अदीर्घदृष्ट्या, स्पष्टम्, वृकासुर, उदाहरणम्, किल, अस्मिन् ॥

अन्वयः—विभो, केचित् निजगुणानुगुणं सद्यः प्रसादरुषितान्, विधिशङ्करादीन् भजन्तः, कष्टम्, अदीर्घदृष्ट्या भ्रष्टाः भवन्ति बत । अस्मिन् स्पष्टम् उदाहरणं वृकासुरः किल ।

अन्वयार्थः

विभो केचित् निजगुणानुगुणम् = हे विभो ! कुछ लोग अपने गुण के अनुसार

सद्यः प्रसादरुषितान् विधिशंकरादीन् भजन्तः = तुरन्त प्रसन्न तथा तुरन्त क्रोधित, ब्रह्मा, शंकर आदि देवों का भजन करते हुए

कष्टम्, अदीर्घदृष्ट्या = हाय ! दीर्घ-दृष्टि न होने के कारण

भ्रष्टाः भवन्ति बत = भ्रष्ट हो जाते हैं, आश्चर्य !

अस्मिन् स्पष्टम् उदाहरणं = इस में स्पष्ट उदाहरण

वृकासुरः किल । = वृकासुर का है ।

भावार्थ—हे सर्वव्यापी ! कुछ लोग, अपने गुण के अनुसार, तुरन्त प्रसन्न तथा तुरन्त क्रोधित, ब्रह्मा, शिवशंकर आदि देवताओं का भजन करते हुए, हाय ! दीर्घदृष्टि न होने के कारण भ्रष्ट हो जाते हैं । आश्चर्य ! इस में स्पष्ट उदाहरण वृकासुर का है ।

Words-Explanation :

भ्रष्ट = Fallen, Dropped down (As in भ्रष्टाः भवन्ति)

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुगुण = Having similar qualities, Of the some nature. (As in निजगुणानुगुणम्)

[द्रुतविलम्बितछन्दः]

॥ ३ ॥

शकुनिजः स तु नारदमेकदा त्वरिततोषमपृच्छदधीश्वरम् ।
स च दिदेश गिरीशमुपासितुं न तु भवन्तमबन्धुमसाधुषु ॥

पदविभागः—शकुनिजः, सः, तु, नारदम्, एकदा, त्वरिततोषम्, अपृच्छत्, अधीश्वरम्, सः, च, दिदेश, गिरीशम्, उपासितुम्, न, तु, भवन्तम्, अबन्धुम्, असाधुषु ॥

अन्वयः—शकुनिजः सः तु एकदा नारदं त्वरिततोषम् अधीश्वरम् अपृच्छत् । गिरिशम् उपासितुं सः दिदेश च । असाधुषु अबन्धुं भवन्तं तु न (दिदेश) ।

अन्वयार्थः

शकुनिजः सः तु एकदा = शकुनि के पुत्र उस (वृकासुर) ने तो एक बार

नारदं त्वरिततोषम् = नारद मुनि से अतिशीघ्र प्रसन्न होते हुए

अधीश्वरम् अपृच्छत् । = ईश्वर (कौन है) के बारे में पूछा ।

गिरीशम् उपासितुं सः दिदेश च । = और गिरीश (शिवजी) की उपासना करने के लिए उस (नारद) ने कहा ।

असाधुषु अबन्धुं भवन्तं तु न (दिदेश) । = असाधु लोगों से बन्धुत्व न करने वाले आपको तो नहीं (कहा) ।

भावार्थ—शकुनि के पुत्र उस (वृकासुर) ने तो एक बार नारद मुनि से अतिशीघ्र प्रसन्न होते हुए ईश्वर (कौन है) के बारे में पूछा । और गिरीश (शिवजी) की उपासना करने के लिए उस (नारद) ने कहा । असाधु लोगों से बन्धुत्व न करने वाले आपको तो नहीं (कहा) ।

Words-Explanation :

अधीश्वरः = Lord, Supreme Lord. (As in अधीश्वरम् अपृच्छत्)

उपासनम्, उपासना = Worship, Respect, Service, Attendance, Waiting upon, Engaging in, Religious meditation, Adoration etc. (As in उपासितुं, सः दिदेश)

साधु = Good, Excellent, Perfect, Proper, Right, Fit.(असाधु X साधु). (As in असाधुषु अबन्धुं भवन्तम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[शिखरिणीछन्दः]

॥ ४ ॥

तपस्तप्त्वा घोरं स खलु कुपितः सप्तमदिने
शिरश्छित्वा सद्यः पुरहरमुपस्थाप्य पुरतः ।
अतिक्षुद्रं रौद्रं शिरसि करदानेन निधनम्
जगन्नाथाद्वव्रे, भवति विमुखानां क्व शुभधीः ॥

पदविभागः—तपः, तप्त्वा, घोरम्, सः, खलु, कुपितः, सप्तमदिने, शिरः, छित्वा, सद्यः, पुरहरम्, उपस्थाप्य, पुरतः, अतिक्षुद्रम्, रौद्रम्, शिरसि, करदानेन, निधनम्, जगन्नाथात्, वव्रे, भवति, विमुखानाम्, क्व, शुभधीः ।

अन्वयः—घोरं तपः तप्त्वा सः कुपितः खलु, सप्तमदिने शिरः छित्वा, पुरहरं सद्य पुरतः उपस्थाप्य, अतिक्षुद्रं रौद्रं शिरसि करदानेन निधनं जगन्नाथात् वव्रे । भवति विमुखानां क्व शुभधीः ?

अन्वयार्थः

घोरं तपः तप्त्वा सः कुपितः खलु, सप्तमदिने शिरः छित्वा, पुरहरं सद्य पुरतः उपस्थाप्य, = घोर तपस्या करके उस वृकासुर ने क्रुद्ध होकर, सातवें दिन, (अपने) सिर को काटकर, तुरन्त शिवजी के सामने प्रत्यक्ष कराकर

अतिक्षुद्रं रौद्रं शिरसि करदानेन निधनं जगन्नाथात् वव्रे । = अतिक्षुद्र, (नीच), घोर "सिर पर हाथ रखने से मरण" का वर जगन्नाथ शिवजी से मांगा ।

भवति विमुखानां क्व शुभधीः ? = आप में विमुख (भक्ति रहित) लोगों में कहां से अच्छी बुद्धि (हो सकती है) ?

भावार्थ—घोर तपस्या करके उस (वृकासुर) ने क्रुद्ध होकर, सातवें दिन, (अपने) सिर को काटकर, तुरन्त शिवजी के सामने प्रकट कराकर, अतिक्षुद्र, घोर "सिर पर हाथ रखने से मरण" का वर जगन्नाथ शिवजी से मांगा । आप में विमुख (भक्ति रहित) लोगों में कहां से अच्छी बुद्धि (हो सकती है) ?

Words-Explanation :

छित्तिः = Cutting, Dividing (As in शिरः छित्वा)

क्षुद्र = Low, Mean, Vile, Cruel, Wicked etc. (As in अतिक्षुद्रं रौद्रम्—)

[स्रग्धरछन्दः]

॥ ५ ॥

मोक्तारं बन्धमुक्तो हरिणपतिरिव प्राद्रवत्सोऽथ रुद्रम्
दैत्याद् भीत्या स्म देवो दिशि दिशि चलते पृष्ठतो दत्तदृष्टिः ।

Digitized by IKS & MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तूष्णीके सर्वलोके तव पदमधिरोक्ष्यन्तमुद्वीक्ष्य शर्वम्
दूरादेवाग्रतस्त्वं पटुवटुवपुषा तस्थिषे दानवाय ॥

पदविभागः—मोक्तारम्, बन्धमुक्तः, हरिणपतिः, इव, प्राद्रवत्, सः, अथ, रुद्रम्, दैत्यात्, भीत्या, स्म, देवः, दिशि, दिशि, वलते, पृष्टतः, दत्तदृष्टिः, तूष्णीके, सर्वलोके, तव, पदम्, अतिरोक्ष्यन्तम्, उद्वीक्ष्य, शर्वम्, दूरात्, एव, अग्रतः, त्वम्, पटुवटुवपुषा, तस्थिषे, दानवाय ।

अन्वयः—अथ सः (वृकासुरः) बन्धमुक्तः हरिणपतिः मोक्तारम् इव रुद्रं प्राद्रवत् । देवः दैत्यात् भीत्या, पृष्टतः दत्तदृष्टिः, दिशि दिशि वलते स्म । सर्वलोके तूष्णीके (सति), तव पदम् अधिरोक्ष्यन्तं शर्वम् उद्वीक्ष्य, त्वं दूरात् एव पटुवटुवपुषा दानवाय अग्रतः तस्थिषे ।

अन्वयार्थः

अथ सः (वृकासुरः) बन्धमुक्तः = बाद में वह (वृकासुर) बन्धन से मुक्त

हरिणपतिः मोक्तारम् इव = सिंह के समान मुक्त कराने वाले

रुद्रं प्राद्रवत् । = शिवजी के सामने कूद कर आया ।

देवः दैत्यात् भीत्या = शंकर भगवान् असुर से भयभीत होकर,

पृष्टतः दत्तदृष्टिः दिशि दिशि वलते स्म । = पीछे देख-देखकर अनेक प्रदेशों में घूमते रहे ।

सर्वलोके तूष्णीके (सति) = सभी लोकों के मौन रहने पर,

तव पदम् अधिरोक्ष्यन्तं शर्वम् उद्वीक्ष्य, त्वं दूरात् एव पटुवटुवपुषा दानवाय अग्रतः तस्थिषे । = आपके धाम (वैकुण्ठ) को आते शिवजी को देखकर, आप दूर से ही एक समर्थ ब्रह्मचारी (बालक) का रूप धारण करके, असुर के सामने खड़े हो गये ।

भावार्थ—बाद में वह (वृकासुर) बन्धन से मुक्त सिंह के समान मुक्त कराने वाले शिवजी के सामने कूद कर आया । शंकर भगवान् असुर से भयभीत होकर, पीछे देख-देखकर, अनेक दिशाओं में घूमते रहे । सभी लोकों के मौन रहने पर, आपके पद (वैकुण्ठ) को आते शिवजी को देखकर, आप दूर से ही एक समर्थ बालक (ब्रह्मचारी) का रूप धारण करके, असुर के सामने खड़े हो गये ।

Words-Explanation :

हरिणपतिः = Lion

पटु = Clever, Skillful

तूष्णीम् = In silence, Silently, without speaking

वलनम् = Moving, Moving round in a circle.

॥ ६ ॥

भद्रं ते शाकुनेय, भ्रमसि किमधुना त्वं पिशाचस्य वाचा
सन्देहश्चेन्मदुक्तौ तव किमु न करोष्यङ्गुलीमङ्ग, मौलौ ?

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्थं त्वद्वाक्यमूढः शिरसि कृतकरः सोऽपतच्छिन्नपातम्,
भ्रम्शो ह्येवं परोपासितुरपि च गतिः शूलिनोऽपि त्वमेव ॥

पदविभागः—भद्रम्, ते, शाकुनेय, भ्रमसि, किम्, अधुना, त्वम्, पिशाचस्य, वाचा, सन्देहः चेत्, मदुक्तौ, तव, किमु, न, करोषि, अङ्गुलीम्, अङ्ग, मौलौ, इत्थम्, त्वद्वाक्यमूढः, शिरसि, कृतकरः, सः, अपतत्, छिन्नपातम्, भ्रम्शः, हि, एवम्, परोपासितुः अपि, च, गतिः, शूलिनः, अपि, त्वम्, एव ।

अन्वयः—"शाकुनेय, ते भद्रम् । अधुना त्वं पिशाचस्य वाचा किं भ्रमसि ? मदुक्तौ सन्देहः चेत्, अङ्ग, तव मौलौ अङ्गुलीं किमु न करोषि ?" इत्थं त्वद्वाक्यमूढः सः शिरसि कृतकरः छिन्नपातम् अपतत् । एवं परोपासितुः भ्रम्शः हि, अपि च शूलिनः अपि त्वम् एव गतिः ।

अनव्यार्थ

"शाकुनेय, ते भद्रम् । अधुना त्वं पिशाचस्य वाचा किं भ्रमसि ? = "शकुनि के पुत्र आपका मंगल हो । अब तुम एक पिशाच की बातों से क्यों भ्रमित होते हो ?

मदुक्तौ सन्देहः चेत् अङ्ग, तव मौलौ अङ्गुलीं किमु न करोषि ?" = मेरे कहने पर सन्देह हो तो, हे (असुर !) अपने सिर के ऊपर अंगुली को क्यों नहीं लगाते हो ?"

इत्थं त्वद्वाक्यमूढः सः शिरसि कृतकरः छिन्नपातम् अपतत् । = इस प्रकार के आपके वचनों से मूढ वह (अपने) सिर पर हाथ रखकर काटकर डाले गये जैसे गिर पड़ा ।

एवं परोपासितुः भ्रम्शः हि, अपि च शूलिनः अपि त्वम् एव गतिः । = इस प्रकार अन्य देवताओं की उपासना करते लोग नष्ट ही होते हैं, और शिवजी के भी आप ही शरणदाता हैं ।

भावार्थ—"शकुनि के पुत्र आपका मंगल हो । अब तुम एक पिशाच की बातों में आकर क्यों भ्रमित होते हो ? मेरे कहने पर सन्देह हो तो, हे (असुर)अपने सिर के ऊपर अंगुली क्यों नहीं रखते हो ?" इस प्रकार के आपके वचनों से मूढ वह (अपने) सिर पर हाथ रखकर, काटकर डाले गये जैसे गिर पड़ा । इस प्रकार अन्य देवताओं की उपासना करते लोग नष्ट ही होते हैं, शिवजी के भी आप ही शरणदाता हैं ।

Words-Explanation :

अङ्ग = A provocative article meaning "Well", "Well sir", "Indeed", "True" etc.

भ्रम्शः = Falling.

[पृथ्वीछन्दः]

॥ ७ ॥

भृगुं किल सरस्वतीनिकटवासिनस्तापसा-
स्त्रिमूर्तिषु समादिशन्नधिकसत्वतां वेदितुम् ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयं पुनरनादरादुदितरुद्धरोषे विधौ
हरेऽपि च जिहिंसिषौ गिरिजया धृते, त्वामगात् ॥

पदविभागः—भृगुम्, किल, सरस्वतीनिकटवासिनः, तापसाः, त्रिमूर्तिषु, समादिशन्, अधिकसत्वताम्, वेदितुम्, अयम्, पुनः, अनादरात्, उदितरुद्धरोषे, विधौ, हरे, अपि, च, जिहिंसिषौ, गिरिजया, धृते, त्वाम्, अगात् ॥

अन्वयः—सरस्वतीनिकटतटवासिनः तापसाः, त्रिमूर्तिषु अधिकसत्वतां वेदितुं भृगुं समादिशन् किल । अयं पुनः विधौ अनादरात् उदितरुद्धरोषे (सति) अपि च हरे जिहिंसिषौ, गिरिजया धृते (च सति) त्वम् अगात् ।

अन्वयार्थः

सरस्वतीनिकटतटवासिनः तापसाः = सरस्वती-नदी के समीप रहते तपस्विगण ने

त्रिमूर्तिषु अधिकसत्वतां वेदितुम् = तीनों मूर्तियों (ब्रह्मा, विष्णु, महेश्वर) में कौन अधिक सत्वगुण रखते हैं यह जानने के लिए,

भृगुं समादिशन् किल । = भृगु महर्षि को आदेश दिया ।

अयं पुनः विधौ अनादरात् = फिर वह, ब्रह्माजी द्वारा अनादर करने पर

उदितरुद्धरोषे (सति) = उत्पन्न क्रोध को रोकने के बाद

अपि च हरे जिहिंसिषौ, गिरिजया धृते (च सति) त्वम् अगात् । = और शिवजी के द्वारा वध करने के लिए उद्यत होने पर, पार्वती द्वारा रोके जाने पर आपके पास आये ।

भावार्थ—सरस्वती नदी के समीप रहते तपस्विगण ने तीनों मूर्तियों (ब्रह्मा, विष्णु, महेश) में किस में अधिक मात्रा में सत्वगुण है, यह जानने के लिए, भृगु महर्षि को आदेश दिया । फिर वह (भृगु मुनि) ब्रह्माजी द्वारा अनादर करने पर उत्पन्न क्रोध को रोककर, और शिवजी द्वारा वध करने को उद्यत होने पर, पार्वती द्वारा (हाथ को रोके जाने पर) आपके पास आये ।

Words-Explanation :

वेदिन् = Knowing. (As in अधिकसत्वतां वेदितुम्)

[वसन्ततिलकवृत्तः]

॥ ८ ॥

सुप्तं रमाङ्कभुवि पङ्कजलोचनं त्वां विप्रे विनिघ्नति पदेन मुदोत्थितस्त्वम् ।
सर्वं क्षमस्व मुनिवर्य, भवेत् सदा मे त्वत्पादचिह्नमिह भूषणमित्यवादीः ॥

पदविभागः—सुप्तम्, रमाङ्कभुवि, पङ्कजलोचनम्, त्वाम्, विप्रे, विनिघ्नति, पदेन, मुदा उत्थितः, त्वम्, सर्वम्, क्षमस्व, मुनिवर्य, भवेत्, सदा, मे, त्वत्पादचिह्नम्, इह, भूषणम्, इति, अवादीः ॥

अन्वयः—रमाङ्क भुवि सुप्तम् पङ्कजलोचनं त्वां विप्रे पदेन विनिघ्नति (सति) त्वं मुदा उत्थितः "मनिवर्य, सर्वं क्षमस्व त्वत्पादचिह्नम् इह मे सदा भूषणं भवेत्" इति अवादीः ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

रमाङ्कभुवि सुप्तम् = लक्ष्मी देवी के अंक (गोदी) पर सोते

पङ्कजलोचनं त्वाम् विप्रे = पंकज-लोचन आपको ब्राह्मण (भृगु) द्वारा

पदेन विनिघ्नति (सति) = चरण से प्रहार किये जाने पर

त्वं मुदा उत्थितः = आपने हँसते हुए खड़े होकर

"मुनिवर्य, सर्वं क्षमस्व = "हे मुनिवर्य ! सबको क्षमा करें

त्वत्पादचिह्नम् इह मे = आपके चरण-चिह्न इधर मुझे

सदा भूषणं भवेत" इति = सर्वदा आभरण बनकर रहें" इस प्रकार

अवादीः । = कहा ।

भावार्थ—लक्ष्मी देवी के अंक (गोदी) पर सोते कमलनयन आपको ब्राह्मण (भृगु) द्वारा चरण से प्रहार किये जाने पर आपने हँसते हुए खड़े होकर "हे मुनिवर्य ! सबको क्षमा करें, आपके चरण-चिह्न (श्रीवत्स नामक चिह्न) इधर सर्वदा आभूषण बनकर रहें" इस प्रकार कहा ।

Words-Explanation :

सुप्त = Slept, Sleeping, Asleep etc. (As in रमाङ्कभुवि सुप्तम्)

अङ्क = The Lap. (As in रमाङ्कभुवि सुप्तम्)

उत्थानम् = The act of rising or standing up, Getting up, Rising etc. (As in त्वं मुदः उत्थितः)

भूषणम् = An ornament, Decoration etc. (As in भूषणं भवेत्)

॥ ९ ॥

निश्चित्य ते च सुदृढं त्वयि बद्धभावाः सारस्वता मुनिवरा दधिरे विमोक्षम् ।
त्वामेवमच्युत, पुनश्च्युतिदोषहीनं सत्वोच्चयैकतनुमेव वयं भजामः ॥

पदविभागः—निश्चित्य, ते, च, सुदृढम्, त्वयि, बद्धभावाः, सारस्वताः, मुनिवराः, दधिरे, विमोक्षम्, त्वाम्, एवम्, अच्युत, पुनश्च्युतिदोषहीनम्, सत्वोच्चयैकतनुम्, एव, वयम्, भजामः ॥

अन्वयः—सारस्वताः ते मुनिवराः निश्चित्य च, त्वयि सुदृढं बद्धभावाः विमोक्षं दधिरे । एवं पुनश्च्युतिदोषहीनम् सत्वोच्चयैकतनुम्, अच्युत, त्वाम् एव वयं भजामः ॥

अन्वयार्थः

सारस्वताः ते मुनिवराः निश्चित्य च, त्वयि सुदृढं बद्धभावाः विमोक्षं दधिरे । = सरस्वती नदी के तट पर रहने वाले श्रेष्ठ मुनियों ने निश्चित करके, आप में दृढ़ भक्ति को अपनाकर मुक्ति प्राप्त की ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं पुनश्च्युतिदोषहीनम् सत्वोच्चयैकतनुम्, अच्युत, त्वाम् एव वयं भजामः = इस प्रकार च्युति-दोष से मुक्त, पूर्ण सत्त्वगुण के एक ही रूप, हे अच्युत ! आपको ही हम भजते हैं ।

भावार्थ—सरस्वती नदी के तट पर रहने वाले श्रेष्ठ मुनियों ने निश्चित करके, आप में दृढ़ भक्ति को अपनाकर मुक्ति प्राप्त की । इस प्रकार च्युति दोष से मुक्त, पूर्ण सत्त्वगुण के एक ही रूप, हे अच्युत ! हम आपका ही भजन करते हैं ।

Words-Explanation :

च्युति = Falling down (As in च्युतिदोषहीनम्)

विमोक्ष = Liberation, Release, Final Emancipation or beatitude. (As in विमोक्षं दधिरे)

[शिखरिणीछन्दः]

॥ १० ॥

जगत्सृष्ट्यादौ त्वां निगमनिवहैर्वन्दिभिरिव
स्तुतं विष्णो, सच्चित्परमरसनिर्द्वैतवपुषम् ।
परात्मानं भूमन्, पशुपवनिताभाग्यनिवहम्
परीतापश्रान्त्यै पवनपुरवासिन्, परिभजे ॥

पदविभागः—जगत्सृष्ट्यादौ, त्वाम्, निगमनिवहैः, वन्दिभिः, इव, स्तुतम्, विष्णो, सच्चित्परमरसनिर्द्वैतवपुषम्, परात्मानम्, भूमन्, पशुपवनिताभाग्यनिवहम्, परीतापश्रान्त्यै, पवनपुरवासिन्, परिभजे ॥

अन्वयः—जगत्सृष्ट्यादौ वन्दिभिः इव निगमनिवहैः स्तुतं विष्णो सच्चित्परमरसनिर्द्वैतवपुषं, परात्मानं, पशुपवनिता-भाग्यनिवहं, पवनपुरवासिन्, भूमन्, परीतापश्रान्त्यै त्वां परिभजे ॥

अन्वयार्थः

जगत्सृष्ट्यादौ वन्दिभिः इव = जगत् की सृष्टि के प्रारम्भ में स्तुति करने वालों के समान

निगमनिवहैः स्तुतम् = वेद-समूह से स्तुति-प्राप्त

विष्णो, सच्चित्परमरसनिर्द्वैतवपुषम्, परात्मानम् = हे विष्णो ! सत्, चित्, आनन्द रूपी, हे परमात्मन !

पशुपवनिताभाग्यनिवहम् = गोपस्त्रियों के भाग्यों के एकत्रित स्वरूप

पवनपुरवासिन्, भूमन् = हे गुरुवायुपुराधीश ! हे सर्वव्यापी !

परीतापश्रान्त्यै त्वाम् परिभजे । = समस्त दुःखों का शमन करने के लिए आपका भजन करता हूँ ।

भावार्थ—जगत् की सृष्टि के प्रारम्भ में स्तुति करने वालों के समान वेद-समूह से स्तुति-प्राप्त हे विष्णो ! सत्, चित्, आनन्द रूपी हे परमात्मन् ! गोपस्त्रियों के भाग्यों के एकत्रित स्वरूप हे गुरुवायुपुराधीश ! हे सर्वव्यापी ! समस्त दुःखों का शमन करने के लिए आपका भजन करता हूँ ।

Digitized by eGangotri

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

निगमः = (निगमनिवहैः स्तुतम्) = The Vedas, Any portion of the Vedas.

निवहः = A multitude, A collection. (As in निगमनिवहैः स्तुतम्)

आदौ = In the beginning. (As in जगत्सृष्ट्यादौ)

परितापः/ परीतापः = Pain, Agony. (As in परीतापश्रान्त्यै)

वंद् = To Salute, To greet respectfully. (As in वन्दिभिः इव)

॥ इति नवाशीतितमं दशकं समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-९०

आगमादीनां परमतात्पर्यनिरूपणम्

[मालिनिछन्दः]

॥ १ ॥

वृकभृगुमुनिमोहिन्यम्बरीषादिवृत्तेष्वयि, तव हि महत्वं सर्वशर्वादिजैत्रम् ।
स्थितमिह परमात्मन्, निष्कलार्वागभिन्नं किमपि यदवभातं तद्धि रूपं तवैव ॥

पदविभागः—वृकभृगुमुनिमोहिन्यम्बरीषादिवृत्तेषु, अयि, तव, हि, महत्वम्, सर्वशर्वादिजैत्रम्, स्थितम्, इह, परमात्मन्, निष्कलार्वागभिन्नम्, किमपि, यत्, अवभातम्, तत्, हि, रूपम्, तव, एव, ।

अन्वयः—अयि परमात्मन्, वृकभृगुमुनिमोहिन्यम्बरीषादिवृत्तेषु तव हि महत्वं सर्वशर्वादिजैत्रम् इह (भागवते) स्थितम् । निष्कलार्वागभिन्नं किमपि यत् अव भातम्, तत् रूपं तव एव हि ।

अन्वयार्थः

अयि परमात्मन्, वृक भृगुमुनिमोहिन्यम्बरीषादिवृत्तेषु = हे, परमात्मा ! वृकासुर, भृगुमुनि, मोहिनी, अम्बरीष आदि वृत्तान्तों में

तव हि महत्वं सर्वशर्वादिजैत्रम् इह (भागवते) स्थितम् । = आपका महत्त्व ही शंकर आदि देवताओं के महत्त्व को जीतता है, इस प्रकार इधर (श्रीमद्भागवत में) प्रकट है ।

निष्कलार्वागभिन्नं किमपि यत् अवभातम् = सकल-रूपों से अभिन्न जो कुछ भी प्रकाशित है

तत् रूपं तव एव हि । = वह रूप आपका ही है ।

भावार्थ—हे, परमात्मा ! वृकासुर, भृगुमुनि, मोहिनी, अम्बरीष आदि की कथाओं में आप का महत्त्व ही शंकर आदि समस्त देवताओं के महत्त्व को जीतता है । इस प्रकार इधर (श्रीमद्भागवत में) प्रकट है । सकल-रूपों से अभिन्न जो कुछ भी प्रकाशित है, वह रूप आपका ही है ।

Words-Explanation :

शर्वः = Lord Siva (As in सर्वशर्वादिजैत्रम्)

अवभासः = Lustre, Splendour, Light, Perception etc. (As in यत् अवभातम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[वसन्ततिलकछन्दः]

॥ २ ॥

मूर्तित्रयेश्वरसदाशिवपञ्चकं यत् प्राहुः परात्मवपुरेव सदाशिवोऽस्मिन् ।
तत्रेश्वरस्तु स विकुण्ठपदस्त्वमेव त्रित्वं पुनर्भजसि सत्यपदे त्रिभागे ॥

पदविभागः—मूर्तित्रयेश्वरसदाशिवपञ्चकम्, यत्, प्राहुः, परात्मवपुः, एव, सदाशिवः, अस्मिन्, तत्र, ईश्वरः, तु, सः, विकुण्ठपदः, त्वम्, एव, त्रित्वम्, पुनः, भजसि, सत्यपदे, त्रिभागे ।

अन्वयः—मूर्तित्रयेश्वरसदाशिवपञ्चकं यत् प्राहुः, अस्मिन् सदाशिवः परात्मवपुः त्वम् एव । तत्र ईश्वरः तु विकुण्ठपदः सः त्वम् एव । त्वं पुनः त्रिभागे सत्यपदे त्रित्वं भजसि ।

अन्वयार्थः

मूर्तित्रयेश्वरसदाशिवपञ्चकम् यत् प्राहुः = तीन मूर्तियां, ईश्वर तथा सदाशिव आदि पाँच रूप जो कहे जाते हैं

अस्मिन् सदाशिवः परात्मवपुः त्वम् एव । = इसमें "सदाशिव", परमात्मस्वरूप आप ही हैं ।

तत्र ईश्वरः तु विकुण्ठपदः सः त्वम् एव । = उसमें "ईश्वर" तो, वैकुण्ठवासी वह आप ही हैं ।

त्वं पुनः त्रिभागे सत्यपदे त्रित्वं भजसि । = आप फिर तीन भाग के सत्यलोक में त्रिमूर्ति के रूप को धारण करते हैं ।

भावार्थ—तीन मूर्तियाँ (ब्रह्मा, विष्णु, महेश), ईश्वर तथा सदाशिव आदि पाँच रूप जो कहे जाते हैं, इसमें "सदाशिव" परमात्मरूप आप ही हैं । उसमें "ईश्वर" तो, वैकुण्ठवासी वह आप ही हैं । आप फिर से तीन भाग के सत्यलोक में तीन मूर्तियों के रूप को धारण करते हैं ।

Words-Explanation :

भज् (भजति, भजते) = To enjoy, To possess, Have, To practise, To share, To divide, To distribute etc. (As in त्रित्वं भजसि)

॥ ३ ॥

तत्रापि सात्विकतनुं तव विष्णुमाहुर्धाता तु सत्वविरलो रजसैव पूर्णः ।
सत्वोत्कटत्वमपि चास्ति तमोविकारचेष्टादिकञ्च तव शङ्करनाम्नि मूर्त्तौ ॥

पदविभागः—तत्र, अपि, सात्विकतनुम्, तव, विष्णुम्, आहुः, धाता, तु, सत्वविरलः, रजसा, एव, पूर्णः, सत्वोत्कटत्वम्, अपि, च, अस्ति, तमोविकारचेष्टादिकम्, च, तव, शङ्करनाम्नि, मूर्त्तौ ।

अन्वयः—तत्र अपि तव सात्विकतनुं विष्णुम् आहुः । धाता तु सत्वविरलः, रजसा एव पूर्णः । तव शङ्करनाम्निमूर्त्तौ सत्वोत्कटत्वम् अपि च तमोविकारचेष्टादिकं च अस्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयार्थः

तत्र अपि तव सात्विकतनुं विष्णुम् आहुः । = वहाँ (उन तीन मूर्तियों में) भी आपके सत्त्वगुण रूप को विष्णु कहते हैं ।

धाता तु सत्वविरलः रजसा एव पूर्णः । = ब्रह्मांजी तो सत्त्व गुण में बहुत कम, रजोगुण से ही पूर्ण हैं ।

तव शङ्करनाम्निमूर्त्तौ सत्वोत्कटत्वम् अपि च तमोविकारचेष्टादिकं च अस्ति । = आपके शंकर नाम के रूप में सत्त्वगुण अधिक मात्रा में होने पर भी तमोविकार का कार्य भी हैं ।

भावार्थ—वहाँ (उन तीन मूर्तियों में) भी आपके सत्त्वगुण रूप को विष्णु कहते हैं । ब्रह्माजी तो सत्त्वगुण में बहुत कम, रजोगुण से ही पूर्ण हैं । आपके शंकर नाम के रूप में अधिक मात्रा में सत्त्वगुण और इसके अतिरिक्त तमोगुण के कार्य भी हैं ।

Words-Explanation :

उत्कट = Excessive, Powerful, Large, Much, Abounding in, Richly endowed with etc. (As in सत्वोत्कटत्वम्)

विरल = Few, Little, Thin, Not thick or compact etc. (As in सत्वविरलः)

चेष्टा = Movement, Motion, Gesture, Action etc. (As in तमोविकार-चेष्टादिकम्)

॥ ४ ॥

तं च त्रिमूर्त्यतिगतं परपूरुषं त्वां शर्वात्मनापि खलु सर्वमयत्वहेतोः ।
शंसन्त्युपासनविधौ तदपि स्वतस्तु त्वद्रूपमित्यतिदृढं बहु नः प्रमाणम् ॥

पदविभागः—तम्, च, त्रिमूर्त्यतिगतम्, परपूरुषम्, त्वाम्, शर्वात्मना, अपि, खलु, सर्वमयत्वहेतोः, शंसन्ति, उपासन-विधौ, तदपि, स्वतः, तु, त्वद्रूपम्, इति, अतिदृढम्, बहु, नः, प्रमाणम् ॥

अन्वयः—त्रिमूर्त्यतिगतं तं च त्वां, परपूरुषं च त्वां सर्वमयत्वहेतोः उपासनाविधौ शर्वात्मना अपि शंसन्ति खलु । तदपि स्वतः तु त्वद्रूपं इति नः अतिदृढं बहुप्रमाणम् ।

अन्वयार्थः

त्रिमूर्त्यतिगतं तं च त्वाम्, = त्रिमूर्तियों में श्रेष्ठ उस आपको, और

परपूरुषं च त्वाम्, = परमात्म-स्वरूप आपको

सर्वमयत्वहेतोः उपासनाविधौ शर्वात्मना अपि शंसन्ति खलु । = सर्वमय होने के कारण उपासना विधि में शिव स्वरूप भी कहते हैं ।

तदपि स्वतः तु त्वद्रूपं इति नः अतिदृढं बहुप्रमाणम् । = फिर भी सत्य में (अपने आप में) तो आपके ही रूप हैं, इस प्रकार हमारा अत्यधिक दृढ़ प्रमाण है ।

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—त्रिमूर्तियों में श्रेष्ठ उस आपको और परमात्म स्वरूप आपको, सर्वमय (सर्वव्यापी) होने के कारण उपासना (पूजा करने की विधि में विविध प्रकार होने के कारण) शिव स्वरूप भी कहते हैं। फिर भी, सत्य में (अपने आप में) तो आपके ही रूप हैं इस प्रकार हमारा अत्यधिक दृढ़ प्रणाम है।

Words-Explanation :

स्वतस् = Of one self, By one self. (As in तदपि स्वतः तु–)

॥ ५ ॥

श्रीशङ्करोऽपि भगवान् सकलेषु तावत्त्वामेव मानयति यो नहि पक्षपाती।
त्वन्निष्ठमेव स हि नामसहस्रकादि व्याख्यत् भवत्स्तुतिपरश्च गतिं गतोऽन्ते॥

पदविभागः—श्रीशङ्करः, अपि, भगवान्, सकलेषु, तावत्, त्वाम्, एव, मानयति, यः, न, हि, पक्षपाती, त्वन्निष्ठम्, एव, सः, हि, नामसहस्रकादि, व्याख्यत्, भवत्स्तुतिपरः, च, गतिम्, गतः, अन्ते।

अन्वयः—भगवान् श्रीशङ्करः अपि सकलेषु तावत् त्वाम् एव मानयति हि। यः पक्षपाती न। सः हि नामसहस्रकादि त्वन्निष्ठम् एव व्याख्यत्। अन्ते, भवत्स्तुतिपरः गतिं गतः च।

अन्वयार्थः

भगवान् श्रीशङ्करः अपि = भगवान् श्रीशंकराचार्य भी

सकलेषु तावत् त्वाम् एव मानयति हि। = सकल मूर्तियों में तो आपको ही सम्मान देते हैं।

यः पक्षपाती न। = वे तो पक्षपाती (एक पक्ष को ही अधिक मानने वाले) नहीं हैं।

सः हि नामसहस्रकादि त्वन्निष्ठम् एव व्याख्यत्। = उन्होंने ही तो सहस्र नाम आदि को आप में ही आधारित व्याख्यान किया है।

अन्ते, भवत्स्तुतिपरः गतिं गतः च। = और अन्त में आपसे सम्बन्धित स्तुति करके मुक्ति को प्राप्त किया।

भावार्थ—भगवान् श्रीशंकराचार्य भी सकल मूर्तियों में तो आपको ही सम्मान देते हैं। वे तो पक्षपाती (एक पक्ष को ही आवश्यकता से अधिक मानने वाले) नहीं हैं। उन्होंने ही तो सहस्रनाम आदि को आप में ही आधारित व्याख्यान किया है और अन्त में आप से सम्बन्धित स्तुति करके मुक्ति को प्राप्त किया।

Words-Explanation :

हि - (This "हि" is never used in the beginning of a sentence - The meanings of this are:- For, Indeed, Surely, For instance, Only, Alone, Because (expressing strict logical reason), etc. Sometimes used as a mere explative also.) (As in सः हि नामसहस्रकादि–)

व्याख्यानम् = Narration, Explanation etc. (As in त्वन्निष्ठम् एव व्याख्यत्)

Funding by IKS-MoE

निष्ठः = Relating to, Depending on etc.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ६ ॥

मूर्तित्रयातिगमुवाच च मन्त्रशास्त्रस्यादौ कलायसुषमं सकलेश्वरं त्वाम्।
ध्यानञ्च निष्कलमसौ प्रणवे खलूक्त्वा त्वामेव तत्र सकलं निजगाद नान्यम् ॥

पदविभागः—मूर्तित्रयातिगम्, उवाच, च, मन्त्रशास्त्रस्य, आदौ, कलायसुषमम्, सकलेश्वरम्, त्वाम्, ध्यानम्, च, निष्कलम्, असौ, प्रणवे, खलु, उक्त्वा, त्वाम्, एव, तत्र, सकलम्, निजगाद, न, अन्यम् ॥

अन्वयः—असौ मन्त्रशास्त्रस्य आदौ, सकलेश्वरं कलायसुषमं त्वां मूर्तित्रयातिगम् उवाच च। प्रणवे खलु निष्कलं ध्यानम् उक्त्वा, सकलं त्वाम् एव निजगाद, न अन्यम्।

अन्वयार्थः

असौ मन्त्रशास्त्रस्य आदौ = इन्होंने (शंकराचार्य) मन्त्रशास्त्र के आरम्भ में

सकलेश्वरं कलायसुषमं = सकलेश्वर, कलाय पुष्प के समान सुन्दर

त्वां मूर्तित्रयातिगम् उवाच च। = आपको तीनों मूर्तियों में श्रेष्ठ बताया।

प्रणवे खलु निष्कलं ध्यानम् = प्रणव में निष्कल ध्यान को

उक्त्वा, सकलं त्वाम् एव निजगाद, = कहकर, सकलस्वरूप में आपको ही बताया है।

न अन्यम्। = किसी अन्य को नहीं।

भावार्थ—इन्होंने (शंकराचार्य) मन्त्रशास्त्र के आरम्भ में सकलेश्वर, कलायपुष्प के समान सुन्दर, आपको तीनों मूर्तियों के ऊपर (श्रेष्ठ) बताया। प्रणव में निष्कल ध्यान कहकर, सकलस्वरूप में आपको ही बताया है। किसी अन्य को नहीं।

Words-Explanation :

सुषम = Very lovely, Beautiful, Handsome, Very pleasing. (As in कलायसुषमम्)

अतिग = Exceeding, Transcending, Excelling etc. (As in मूर्तित्रयातिगम्)

[वंशस्थछन्दः]

॥ ७ ॥

समस्तसारे च पुराणसङ्ग्रहे विसंशयं त्वन्महिमैव वर्ण्यते।
त्रिमूर्तियुक्सत्यपदत्रिभागतः परं पदं ते कथितं, न शूलिनः ॥

पदविभागः—समस्तसारे, च, पुराणसङ्ग्रहे, विसंशयम्, त्वन्महिमा, एव, वर्ण्यते, त्रिमूर्तियुक्सत्यपदत्रिभागतः, परम्, पदम्, ते, कथितम्, न, शूलिनः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—समस्तसारे पुराणसङ्ग्रहे च विसंशयं त्वन्महिमा एव वर्ण्यते । त्रिमूर्तियुक्सत्यपदत्रिभागतः परं ते पदं कथितं, न शूलिनः ।

अन्वयार्थः

समस्तसारे पुराणसङ्ग्रहे च विसंशयं त्वन्महिमा एव वर्ण्यते । = समस्त पुराणों के सार तथा पुराण सङ्ग्रह में भी निश्चित रूप से आपकी महिमा का ही वर्णन किया गया है ।

त्रिमूर्तियुक्सत्यपदत्रिभागतः परं ते पदं कथितं, न शूलिनः । = तीनों मूर्तियों के स्थान सत्यलोक के ऊपर स्थित आपके पद (वैकुण्ठ) को ही कहा है, न कि शिवजी के ।

भावार्थ—समस्त पुराणों के सार तथा पुराण सङ्ग्रह में भी निश्चित रूप से आपकी महिमा का ही वर्णन किया गया है, तीनों मूर्तियों के पद सत्यलोक के ऊपर विराजमान आपके पद (वैकुण्ठ) को ही कहा है, न कि शिवजी के ।

Words-Explanation :

युक् (युक्त) = Joined. (As in त्रिमूर्तियुक्सत्यपदत्रिभागतः)

[वसन्ततिलकछन्दः]

॥ ८ ॥

यद्ब्राह्मकल्प इह भागवतद्वितीयस्कन्धोदितं वपुरनावृतमीश धात्रे ।
तस्यैव नाम हरिशर्वमुखं जगाद श्रीमाधवः शिवपरोऽपि पुराणसारे ॥

पदविभागः—यत्, ब्राह्मकल्पे, इह, भागवतद्वितीयस्कन्धोदितम्, वपुः, अनावृतम्, ईश, धात्रे, तस्य, एव, नाम, हरिशर्वमुखम्, जगाद, श्रीमाधवः, शिवपरः, अपि, पुराणसारे ।

अन्वयः—ईश, इह ब्राह्मकल्पे धात्रे अनावृतं, भागवतद्वितीयस्कन्धोदितं यत् वपुः तस्य एव हरिशर्वमुखं नाम शिवपरः अपि श्रीमाधवः पुराणसारे जगाद ।

अन्वयार्थः

ईश, इह ब्राह्मकल्पे, धात्रे अनावृतम् = हे ईश ! इधर ब्राह्मकल्प में ब्रह्माजी को दिखाया गया

भागवतद्वितीयस्कन्धोदितम् = भागवत के दूसरे स्कन्ध में वर्णित

यत् वपुः, तस्य एव = जो रूप है, उसको ही

हरिशर्वमुखं नाम = हरि, शिव आदि नाम से

शिवपरोऽपि श्रीमाधवः पुराणसारे जगाद । = शिव भक्त होने पर भी श्रीमाधवाचार्य ने पुराणसार नामक ग्रन्थ में कहा है ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावार्थ—हे ईश ! इधर ब्राह्मकल्प में ब्रह्माजी को दिखाया गया, भागवत के दूसरे स्कन्ध में वर्णित जो रूप है, उसको ही, हरि, शिव आदि नाम से शिव भक्त होने पर भी श्रीमाधवाचार्य ने पुराणसार नामक ग्रन्थ में कहा है ।

Words-Explanation :

उदित = Risen, Spoken, Uttered etc. (As in द्वितीयस्कन्धोदितम्)

॥ ९ ॥

ये स्वप्रकृत्यनुगुणा गिरिशं भजन्ते तेषां फलं हि दृढयैव तदीयभक्त्या ।
व्यासो हि तेन कृतवानधिकारिहेतोः स्कान्दादिकेषु तव हानिवचोऽर्थवादैः ॥

पदविभागः—ये, स्वप्रकृत्यनुगुणाः, गिरिशम्, भजन्ते, तेषाम्, फलम्, हि, दृढया, एव, तदीयभक्त्या, व्यासः, हि, तेन, कृतवान्, अधिकारिहेतोः, स्कान्दादिकेषु, तव, हानिवचः, अर्थवादैः ॥

अन्वयः—ये स्वप्रकृत्यनुगुणाः गिरिशं भजन्ते तेषां हि दृढया तदीयभक्त्या एव फलम् । तेन हि व्यासः अधिकारिहेतोः स्कान्दादिकेषु अर्थवादैः तव हानिवचः कृतवान् ।

अन्वयार्थः

ये स्वप्रकृत्यनुगुणाः गिरिशं भजन्ते, तेषां हि = जो अपने गुण के अनुसार, शिवजी को भजते हैं, उनको अवश्य

दृढ़या तदीयभक्त्या एव फलम् । = उस दृढ़ भक्ति के कारण ही फल प्राप्त होते हैं ।

तेन हि व्यासः अधिकारिहेतोः = इसलिए ही व्यास भगवान् ने ऐसे पूजा आराधना करने के लिए

स्कान्दादिकेषु अर्थवादैः तव हानिवचः कृतवान् । = स्कान्द पुराण आदि में अर्थवादों के द्वारा आपको नीचा दिखाया ।

भावार्थ—जो अपने गुण के अनुसार शिवजी को भजते हैं, उन लोगों को अवश्य उस दृढ़ भक्ति के कारण ही फल प्राप्त होते हैं । इसलिए ही व्यास भगवान् ने इस प्रकार की पूजा-आराधना करने के लिए, स्कान्दपुराण आदि में अर्थवादों के द्वारा आप को नीचा दिखाया ।

Words-Explanation :

हानिः = Damage, Detriment etc. (As in हानिवचः)

अर्थवादः = Declaration of any purpose (To tell more than what is required or hiding the truth or telling the opinion in praise or in insult or while praising one it becomes an insult to the other - These are called Arthavada) (As in अर्थवादैः तव—)

Digitized by MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ १० ॥

भूतार्थकीर्तिरनुवादविरुद्धवादौ त्रेधार्थवादगतयः खलु रोचनार्थाः ।
स्कान्दादिकेषु बहवोऽत्र विरुद्धवादास्त्वत्तामसत्वपरिभूत्युपशिक्षणाद्याः ॥

पदविभागः—भूतार्थकीर्तिः, अनुवादविरुद्धवादौ, त्रेधा, अर्थवातगतयः, खलु, रोचनार्थाः, स्कान्दादिकेषु, बहवः, अत्र, विरुद्धवादाः, त्वत्तामसत्वपरिभूत्युपशिक्षणाद्याः ।

अन्वयः—भूतार्थकीर्तिः, अनुवादविरुद्धवादौ (इति) अर्थवादगतयः त्रेधा रोचनार्थाः खलु । अत्र स्कान्दादिकेषु त्वत्तामसत्वपरिभूत्युपशिक्षणाद्याः बहवः विरुद्धवादाः ।

अन्वयार्थः

भूतार्थकीर्तिः = सत्य को ऊंचा करके कहना, (अतिशयोक्ति)

अनुवादविरुद्धवादौ (इति) = विरुद्ध गुण न होने पर भी, विरुद्ध गुण है, इस प्रकार कहना, जो है उसके विपरीत को दर्शाना इस प्रकार

अर्थवादगतयः त्रेधा रोचनार्थाः खलु । = अर्थवाद के चलन तीन प्रकार से रुचि बढ़ाने के लिए (लिखे) हैं ।

अत्र स्कान्दादिकेषु = इधर स्कान्द आदि में

त्वत्तामसत्वपरिभूत्युपशिक्षणाद्याः बहवः विरुद्धवादाः । = आपके तमोगुण, पराजित होना, शिक्षण लेना आदि बहुत विरुद्धवाद हैं ।

भावार्थ—सत्य को ऊंचा (अतिशयोक्तिपूर्वक) कहना, विरुद्ध गुण है, जो विराजमान गुण है उसके विपरीत कहना, इस प्रकार अर्थवाद के तीन प्रकार की विधाएँ (केवल) रुचि बढ़ाने के लिए (लिखे) हैं । इधर स्कान्द आदि (पुराणों) में आपके तमोगुण, पराजित होना, शिक्षा लेना आदि बहुत विरुद्धवाद हैं ।

Words-Explanation :

परिभूति = Disrespect, Humiliation, Contempt, Insult etc. (As in परिभूत्युपशिक्षणाद्याः)

उपशिक्षा/ उपशिक्षणम् = Training, Learning (As in परिभूत्युपशिक्षणाद्याः)

भूत = Existing, Being, True, Actually happened etc. (As in भूतार्थकीर्ति)

त्रेधा = In three parts, In three ways, Trebly

॥ ११ ॥

यत्किञ्चिदप्यविदुषापि विभो, मयोक्तम् तन्मन्त्रशास्त्रवचनाद्यभिदृष्टमेव ।
व्यासोक्तिसारमयभागवतोपगीत, क्लेशान् विधूय कुरु भक्तिभरं परात्मन् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदविभागः—यत्, किञ्चित्, अपि, अविदुषा, अपि, विभो, मया, उक्तम्, तत्, मन्त्रशास्त्रवचनाद्यभिदृष्टम्, एव, व्यासोक्तिसारमयभागवतोपगीत, क्लेशान्, विधूय, कुरु, भक्तिभरम्, परात्मन् ।

अन्वयः—विभो, अविदुषा अपि मया यत् किञ्चित् अपि उक्तं तत् मन्त्रशास्त्रवचनाद्यभिदृष्टम् एव । व्यासोक्तिसारमयभागवतोपगीत परात्मन् (गुरुवायुपुराधीश), (त्वं) क्लेशान् विधूय भक्तिभरं कुरु ।

अन्वयार्थः

विभो, अविदुषा अपि मया यत् किञ्चित् अपि उक्तम् = हे विभो ! अधिक ज्ञान न होने पर भी मैंने जो कुछ भी कहा,

तत् मन्त्रशास्त्रवचनाद्यभिदृष्टम् एव । = वह मन्त्रशास्त्रादि वचनों में देखा ही है ।

व्यासोक्तिसारमयभागवतोपगीत परात्मन् (गुरुपवनपुराधीश) , = व्यास भगवान् द्वारा कहे गये पुराणों के सार भागवत में गाये गये हे परमात्मस्वरूप (गुरुवायुपुराधीश) !

(त्वं) क्लेशान् विधूय भक्तिभरं कुरु । = (आप) दुःखों को दूर करके दृढ़ भक्ति को प्रदान करें ।

भावार्थ—हे विभो ! अधिक ज्ञान न होने पर भी मैंने जो कुछ भी कहा, वह मन्त्रशास्त्रादि वचनों में देखा ही है । व्यास भगवान् द्वारा कहे पुराणों के सार श्रीमदभागवत में प्रशंसित हे परमात्मस्वरूप (गुरुवायुपुराधीश) ! (आप) दुःखों को दूर करके दृढ़ भक्ति को प्रदान करें ।

Words-Explanation :

उपगीत = Sung, Chanted, Declared, Told, Said etc. (As in भागवतोपगीत)

॥ इति नवतितमं दशकं समाप्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशकम्-९१

भक्तिस्वरूपवर्णनम्

[स्रग्धरछन्दः]

॥ १ ॥

श्रीकृष्ण, त्वत्पदोपासनमभयतमं वद्धमिथ्यार्थदृष्टे-
र्मर्त्यस्यार्तस्य मन्ये, व्यपसरति भयं येन सर्वात्मनैव।
यत्तावत्त्वत्प्रणीतानिह भजनविधीनास्थितो मोहमार्गे
धावन्नप्यावृताक्षः स्खलति न कुहचिद्देवदेवाखिलात्मन् ॥

पदविभागः—श्रीकृष्ण, त्वत्पदोपासनम्, अभयतमम्, बद्धमिथ्यार्थदृष्टे, मर्तस्य, आर्तस्य, मन्ये, व्यपसरति, भयम्, येन, सर्वात्मना, एव, यत्, तावत्, त्वत्, प्रणीतान्, इह, भजनविधीन्, आस्थितः, मोहमार्गे, धावन्, अपि, आवृताक्षः, स्खलति, न, कुहचित्, देवदेव, अखिलात्मन् ॥

अन्वयः—अखिलात्मन्, देव, देव, श्रीकृष्ण, वद्धमिथ्यार्थदृष्टेः आर्तस्य मर्तस्य त्वत्पादोपासनम् अभयतमम् (इति अहं) मन्ये। येन एव सर्वात्मना भयं व्यपसरति। यत् तावत् इह त्वत् प्रणीतान् भजनविधीन् आस्थितः मोहमार्गे आवृताक्षः धावन अपि, कुहचित् न स्खलति।

अन्वयार्थः

अखिलात्मन्, देव देव, श्रीकृष्ण, बद्धमिथ्यार्थदृष्टेः आर्तस्य मर्तस्य त्वत्पादोपासनम् अभयतमम् (अहम्) मन्ये। = सबके अन्दर रहने वाले, देवादिदेव हे श्रीकृष्ण ! जो नहीं है उसको सत्य समझकर दुःख सहन करके मरते मनुष्य को आप के चरणों के भजन ही भय-निवारण करने का उपाय है; इस प्रकार मैं मानता हूँ।

येन एव सर्वात्मना भयं व्यपसरति। = जिस (भक्ति) से ही सब प्रकार का भय दूर हो सकता है।

यत् तावत् इह त्वत् प्रणीतान् भजनविधीन् आस्थितः = इसलिए इधर आप द्वारा कही भजन विधियों का आश्रय करके रहने वाला

मोहमार्गे आवृताक्षः धावन् अपि कुहचित् न स्खलति। = मोहमार्ग में आँखें बन्द करके दौड़ते हुए भी कहीं भी नहीं गिरता।

भावार्थ—सबके अन्दर रहने वाले, देवों के देव हे श्रीकृष्ण ! जो असत्य है उसको सत्य मानकर, दुःखी होकर मरते मनुष्य को आपके चरणों के भजन ही भय-निवारण करने का उपाय है इस प्रकार मैं मानता हूँ। जिस

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(भक्ति) से ही सब प्रकार का भय दूर हो सकता है। इसलिए इधर आप द्वारा कही भजन की विधियों का आश्रय करके रहता मनुष्य मोहमार्ग में आँख बन्द करके दौड़ते हुए भी नहीं गिरता।

Words-Explanation :

प्रणीत = Put forward, Delivered, Presented, Offered, Taught, Prescribed, etc. (As in त्वत् प्रणीतान्)

मोह = Delution, Confusion, Ignorance, Folly etc. (As in मोहमार्गे)

॥ २ ॥

भूमन्, कायेन वाचा मुहुरपि मनसा त्वद्बलप्रेरितात्मा
यद्यत् कुर्वे समस्तं तदिह परतरे त्वय्यसावर्पयामि।
जात्यापीह श्वपाकस्त्वयि निहितमनः कर्मवागिन्द्रियार्थ-
प्राणो विश्वं पुनीते न तु विमुखमनास्त्वत्पदाद्विप्रवर्यः ॥

पदविभागः—भूमन्, कायेन, वाचा, मुहुः, अपि, मनसा, त्वद्बलप्रेरितात्मा, यत्, यत्, कुर्वे, समस्तम्, तत्, इह, परतरे, त्वयि, असौ, अर्पयामि, जात्या, अपि, इह, श्वापकः, त्वयि, निहितमनः, कर्मवागिन्द्रियार्थप्राणः, विश्वम्, पुनीते, न, तु, विमुखमनाः, त्वत्पदात्, विप्रवर्यः ॥

अन्वयः—भूमन्, त्वत्बलप्रेरितात्मा, कायेन वाचा मनसा अपि मुहुः यत् यत् कुर्वे तत् समस्तम् इह परतरे त्वयि असौ (अहम्) अर्पयामि। इह जात्या श्वपाकः अपि, त्वयि निहितमनः कर्मवागिन्द्रियार्थप्राणः विश्वं पुनीते। त्वत्पदात् विमुखमनाः विप्रवर्यः तु न (पुनीते)।

अन्वयार्थः

भूमन्, त्वत्बलप्रेरितात्मा = हे भूमन्! आपकी शक्ति से प्रेरित

कायेन वाचा मनसा अपि = शरीर से, वाणी से, मन से भी

मुहुः यत् यत् कुर्वे = बार-बार जो जो करूँ

तत् समस्तम् इह परतरे त्वयि = उन सबको इधर परमात्मा आप में ही

असौ (अहम्) अर्पयामि। = अब (मैं) समर्पित करता हूँ।

इह जात्या श्वपाकः अपि त्वयि निहितमनः कर्मवागिन्द्रियार्थप्राणः विश्वं पुनीते। = इधर जाति से कुत्ते को पकाकर खाने वाला भी आप में भक्ति से कार्य, वाणी, इन्द्रियार्थ (रूप रस आदि), प्राण इत्यादि सब आपको समर्पित करता हुआ लोक को पवित्र कराता है।

त्वत्पदात् विमुखमनाः विप्रवर्यः तु न (पुनीते) । = आपके चरणों की अवहेलना (विमुख) करते श्रेष्ठ ब्राह्मण तो नहीं (पवित्र कराता है)

भावार्थ—हे भूमन्! आपकी शक्ति से प्रेरित शरीर, वाणी, मन आदि से भी बार-बार जो-जो कार्य करूँ, वे सब इधर परमात्मा आपको ही अब (मैं) समर्पित करता हूँ। इधर जाति से कुत्ते को पकाकर खाने वाला भी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आप में भक्ति रखकर, वाणी, कर्मेन्द्रिय, ज्ञानेन्द्रिय आदि से करते काम, प्राण आदि सब आपको समर्पित करता हुआ विश्व को पवित्र बना देता है। आपके चरणों से विमुख रहते श्रेष्ठ ब्राह्मण तो नहीं (पवित्र कराता है)।

Words-Explanation :

श्वपाकः = One who cooks dog meat (As in श्वपाकः अपि)

प्रेरणं/ प्रेरणा = Driving or urging on, Inciting etc. (As in त्वत्बलप्रेरितात्मा)

आर्थ = Relating to, Dependent on etc. (As in कर्मवागिन्द्रियार्थप्राणः)

॥ ३ ॥

भीतिर्नाम द्वितीयाद् भवति, ननु मनः कल्पितं च द्वितीयम्,
तेनैक्याभ्यासशीलो हृदयमिह यथाशक्ति बुद्धया निरुन्ध्याम्।
मायाविद्धे तु तस्मिन् पुनरपि न तथा भाति, मायाधिनाथम्
तं त्वां भक्त्या महत्या सततमनुभजन्नीश, भीतिं विजह्याम्॥

पदविभागः—भीतिः, नाम, द्वितीयात्, भवति, ननु, मनः, कल्पितम्, च, द्वितीयम्, तेन, ऐक्याभ्यासशीलः, हृदयम्, इह, यथाशक्ति, बुद्धया, निरुन्ध्याम्, मायाविद्धे, तु, तस्मिन्, पुनः, अपि, न, तथा, भाति, मायाधिनाथम्, तम्, त्वाम्, भक्त्या, महत्या, सततम्, अनु भजन्, ईश, भीतिं, विजह्याम्॥

अन्वयः—भीतिः नाम द्वितीयात् ननु भवति। द्वितीयं मनः कल्पितं च। तेन इह ऐक्याभ्यासशीलः बुद्धया हृदयं यथाशक्ति निरुन्ध्याम्। पुनः अपि तस्मिन् मायाविद्धे तथा न भाति। तं मायाधिनाथं त्वां महत्या भक्त्या सततम् अनुभजन्, ईश, भीतिं विजह्याम्।

अन्वयार्थः

भीतिः नाम द्वितीयात् ननु भवति। = निश्चय भय तो दूसरे से ही तो होता है।

द्वितीयं मनः कल्पितं च। = और "दूसरा" तो मन द्वारा कल्पित है।

तेन इह ऐक्याभ्यासशीलः बुद्धया हृदयं यथाशक्ति निरुन्ध्याम्। = इसलिए इधर मन से "सब एक हैं" इस प्रकार विचार करके मन को यथाशक्ति (शक्ति के अनुसार) रोकें।

पुनः अपि तस्मिन् मायाविद्धे तथा न भाति। = फिर भी उस (मन) में माया आने पर उस प्रकार नहीं होता।

तं मायाधिनाथं त्वां महत्या भक्त्या सततम् अनुभजन्, ईश, भीतिं विजह्याम्। = उस माया के नाथ आपको महती भक्ति से सर्वदा भजता हुआ, हे ईश! (मैं) भय पर विजय प्राप्त करूँगा।

भावार्थ—निश्चय भय तो दूसरे से ही होता है। और "दूसरा" तो मन द्वारा कल्पित है। इसलिए इधर मन से "सब एक हैं" इस प्रकार के ऐक्य भाव को धारण करके मन को शक्ति के अनुसार रोकें। फिर भी, उस (मन)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

में माया आने पर उस प्रकार (भय) नहीं होता। उस माया के नाथ, आपको, महान् महती भक्ति से सर्वदा भजता हुआ, हे ईश ! (मैं) भय पर विजय प्राप्त करूँगा।

Words-Explanation :

ननु = Surely, Certainly, Indeed, Is it not, Indeed etc. (As in द्वितीयात् ननु भवति)

विद्-(विदित, वेत्ति, वेद) = To feel, To experience, To display, To show, etc. (As in तस्मिन् मायावद्धे–)

॥ ४ ॥

भक्तेरुत्पत्तिवृद्धी तव चरणजुषां सङ्गमेनैव पुम्सा-
मासाद्ये पुण्यभाजां, श्रिय इव जगति श्रीमतां सङ्गमेन।
तत्सङ्गो देव, भूयान्मम खलु सततं, तन्मुखादुन्मिषद्भि-
स्त्वन्माहात्म्यप्रकारैर्भवति च सुदृढा भक्तिरुद्धूतपापा॥

पदविभागः—भक्तेः, उत्पत्तिवृद्धी, तव, चरणजुषाम्, सङ्गमेन, एव, पुम्साम्, आसाद्ये, पुण्यभाजाम्, श्रियः, इव, जगति, श्रीमताम्, सङ्गमेन, तत्सङ्गः, देव, भूयात्, मम, खलु, सततम्, तन्मुखात्, उन्मिषद्भिः, त्वन्माहात्म्यप्रकारैः, भवति, च, सुदृढा, भक्तिः, उद्धूतपापा॥

अन्वयः—जगति श्रीमतां सङ्गमेन श्रियः इव भक्तः उत्पत्तिवृद्धी तव चरणजुषां सङ्गमेन एव पुण्यभाजां पुम्साम् आसाद्ये। देव, मम खलु सततं तत्सङ्गः भूयात्। तन्मुखात् उन्मिषद्भिः त्वन्माहात्म्यप्रकारैः उद्धूतपापा सुदृढा भक्तिः भवति च।

अन्वयार्थः

जगति श्रीमतां सङ्गमेन श्रियः इव = जगत् में धनवानों के सम्पर्क से धन-प्राप्ति के समान

भक्तः उत्पत्तिवृद्धी तव चरणजुषां सङ्गमेन एव पुण्यभाजां पुम्साम् आसाद्ये। = भक्ति की उत्पत्ति और अभिवृद्धि आपके चरणों को भजने वाले लोगों के सम्पर्क से ही पुण्यवान् लोगों को मिलती है।

देव, मम खलु सततं तत्सङ्गः भूयात्। = हे देव, मुझे हर समय उन लोगों के सम्पर्क प्राप्त हों।

तन्मुखात् उन्मिषाद्भिः त्वन्माहात्म्यप्रकारैः उद्धूतपापा सुदृढा भक्तिः भवित च। = उन (भक्तों) के मुख से निकलते आप के माहात्म्य की कथाऐं (सुनकर) पापों को निकालकर (आप में) सुदृढ भक्ति कराती हैं।

भावार्थ—जगत् में धनवानों के सम्पर्क से धन-प्राप्ति के समान भक्ति की उत्पत्ति और उसकी वृद्धि, आपके चरणों को भजने वाले लोगों के सम्पर्क से ही पुण्यवान् लोगों को मिलती है। हे देव ! मुझे हर समय उन (भक्त) लोगों के सम्पर्क प्राप्त हों। उन (भक्तों) के मुख से निकलते आपके माहात्म्य की कथायें (सुनकर) पापों को निकालकर (आप में) सुदृढ़ भक्ति कराती हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

जुष् - (जुषते, जुष्ट) = To like, Fond of, Take pleasure, Delight. (As in चरणजुषाम्)

उन्मिषित = Opened (as eyes), Blown, Expanded. (As in तन्मुखात् उन्मिषद्भिः)

॥ ५ ॥

श्रेयोमार्गेषु भक्तावधिकबहुमतिर्जन्मकर्माणि भूयो
गायन् क्षेमाणि नामान्यपि तदुभयतः प्रद्रुतं प्रद्रुतात्मा।
उद्यद्धासः कदाचित् कुहचिदपि रुदन् क्वापि गर्जन् प्रगाय-
न्नुन्मादीव प्रनृत्यन्नयि, कुरु करुणां लोकबाह्यश्चरेयम् ॥

पदविभागः—श्रेयोमार्गेषु, भक्तौ, अधिकबहुमतिः, जन्मकर्माणि, भूयः, गायन्, क्षेमाणि, नामानि, अपि, तदुभयतः, प्रद्रुतम्, प्रद्रुतात्मा, उद्यद्धासः, कदाचित्, कुहचित्, अपि, रुदन्, क्वापि, गर्जन, प्रगायन्, उन्मादी, इव, प्रनृत्यन्, अयि, कुरु, करुणाम्, लोकबाह्यः, चरेयम् ॥

अन्वयः—श्रेयोमार्गेषु भक्तौ अधिकबहुमतिः क्षेमाणि जन्मकर्माणि नामानि अपि भूयः गायन्, तदुभयतः प्रद्रुतं प्रद्रुतात्मा, कदाचित् उद्यद्धासः (उद्यत्+हासः), कुहचित् अपि रुदन् क्वापि गर्जन्, प्रगायन्, उन्मादी इव प्रनृत्यन् लोकबाह्यः चरेयम् । अयि करुणां कुरु ।

अन्वयार्थः

श्रेयोमार्गेषु भक्तौ अधिकबहुमतिः = मोक्ष के अनेक मार्गों में भक्तिमार्ग को अधिक सम्मान करके

क्षेमाणि जन्मकर्माणि नामानि अपि भूयः गायन्, तदुभयतः प्रद्रुतं प्रद्रुतात्मा, = क्षेम पहुँचाते आपके अवतारों की कथाओं को तथा आपके नामों को भी गाते हुए, उन दोनों से तुरन्त द्रवित मन वाला,

कदाचित् उद्यद्धासः, कुहचित् अपि रुदन्, क्वापि गर्जन्, प्रगायन्, उन्मादी इव प्रनृत्यन् लोकबाह्यः चरेयम् । = कभी जोर-जोर से हँसता हुआ कभी रोता हुआ, कभी गर्जन करता हुआ, गाता हुआ पागल के समान नृत्य करता हुआ, सामान्य लोगों से अलग होकर चलूँगा ।

अयि, करुणां कुरु । = हे, (उसके लिए) कृपा करें ।

भावार्थ—मोक्ष के अनेक मार्गों में भक्तिमार्ग को अधिक सम्मान करके क्षेम (सुख) पहुँचाते आपके अवतारों की कथाओं को तथा आपके नामों को भी जी भरके गाते हुए, उन दोनों द्वारा अत्यन्त द्रवित मन वाला कभी जोर-जोर से हँसता हुआ, कभी रोता हुआ, कभी गर्जन करता हुआ, गाता हुआ पागल के समान नृत्य करता हुआ सामान्य लोगों से अलग होकर चलूँगा । हे (भगवन्) ! (उसके लिए) कृपा करें ॥

Words-Explanation :

उद्यद्धासः = (उद्यत्+हासः) उद्यत = Raised, Lifted up. हासः = Laughter

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षेम = Conferring happiness, Good, Beneficial etc. (As in क्षेमाणि जन्मकर्माणि)

उभय = Both. (As in तदुभयतः)

॥ ६ ॥

भूतान्येतानि भूतात्मकमपि सकलं पक्षिमत्स्यान् मृगादीन्
मर्त्यान् मित्राणि शत्रूनपि यमितमतिस्त्वन्मयान्यानमानि ।
त्वत्सेवायां हि सिध्येन्मम तव कृपया भक्तिदार्ढ्यं विराग-
स्त्वत्तत्वस्यावबोधोऽपि च भुवनपते, यत्नभेदं विनैव ॥

पदविभागः—भूतानि, एतानि, भूतात्मकम्, अपि, सकलम्, पक्षिमत्स्यान्, मृगादीन्, मर्त्यान्, मित्राणि, शत्रून्, अपि, यमितमतिः, त्वनमयानि, आनमानि, त्वत्सेवायाम्, हि, सिध्येत्, मम, तव, कृपया, भक्तिदार्ढ्यम्, विरागः, त्वत्तत्वस्य, अवबोधः, अपि, च, भुवनपते, यत्नभेदम्, विना, एव ।

अन्वयः—त्वन्मयानि एतानि भूतानि, पक्षिमत्स्यान् मृगादीन्, मर्त्यान्, मित्रान्, शत्रून् अपि, भूतात्मकं सकलम् अपि, यमितमतिः आनमानि । भुवनपते, त्वत्सेवायां हि तव कृपया भक्तिदार्ढ्यं, विरागः, त्वत्तत्वस्य अवबोधः अपि च यत्नभेदं विना एव मम सिध्येत् ।

अन्वयार्थः

त्वन्मयानि एतानि भूतानि = आपके ही स्वरूप इन पञ्च भूतों को,

पक्षिमत्स्यान् मृगादीन् = पक्षी, मछली, जानवर आदि को,

मर्त्यान्, मित्राणि, शत्रूनपि, = मनुष्यों, मित्रों और शत्रुओं को भी,

भूतात्मकं सकलम् अपि, = पञ्चभूतों से बने सबको भी,

यमितमतिः आनमानि । = सन्तुलित मन से (मैं) नमस्कार करूँगा ।

भुवनपते, त्वत्सेवायां हि तव कृपया = हे भुवनपते ! आपकी सेवा (भजन) में ही आपकी कृपा से

भक्तिदार्ढ्यं, विरागः त्वत्तत्वस्य = दृढ़ भक्ति, वैराग्य आदि सब कुछ आप ही हैं

अवबोधः अपि च = इस प्रकार का ज्ञान

यत्नभेदं विना एव मम सिध्येत् । = प्रयत्न के बिना ही मुझे प्राप्त होंगे ।

भावार्थ—आपके ही स्वरूप इन पञ्च भूतों को, पक्षी, मछली, जानवर आदि को, मनुष्यों, मित्रों और शत्रुओं को भी पंचभूतों से बने सबको भी, सन्तुलित मन से नमस्कार करूँगा । हे भुवनपते ! आपकी सेवा में ही, आपकी कृपा से, दृढ़ भक्ति, वैराग्य आदि सब कुछ आप ही हैं, इस प्रकार का ज्ञान प्रयत्न के बिना ही मुझे प्राप्त होंगे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Words-Explanation :

यमः = Controlling, Restraining, Control, Curbing etc. (As in यमितमतिः)

यत्नः = Effort, Exertion etc. (As in यत्नभेदं विना–)

विरागः = Aversion, Indifference, Disinclination etc. (As in विरागः त्वत्तत्वस्य अवबोधः)

अवबोधनम् = Knowledge. (As in अवबोधः अपि च)

॥ ७ ॥

नो मुह्यन् क्षुत्तृडाद्यैर्भवसरणिभवैस्त्वन्निलीनाशयत्वा-
च्चिन्तासातत्यशाली निमिषलवमपि त्वत्पादादप्रकम्पः ।
इष्टानिष्टेषुतुष्टिव्यसनविरहितो मायिकत्वावबोधा-
ज्ज्योत्स्नाभिस्त्वन्नखेन्दोरधिकशिशिरितेनात्मना सञ्चरेयम् ॥

पदविभागः—नो, मुह्यन्, क्षुत्तृडाद्यैः, भवसरणिभवैः, त्वन्निलीनाशयत्वात्, चिन्तासात्यशाली, निमिषलवम्, अपि, त्वत्पादात्, अप्रकम्पः, इष्टानिष्टेषु, तुष्टिव्यसनविरहितः, मायिकत्वावबोधात्, जोत्स्नाभिः, त्वन्नखेन्दोः, अधिकशिशिरितेन, आत्मना, सञ्चरेयम् ।

अन्वयः—त्वन्निलीनाशयत्वात् भवसरणिभवैः क्षुत्तृडाद्यैः नो मुह्यन्, चिन्तासातत्यशाली निमिषलवम् अपि त्वत्पादात् अप्रकम्पः मायिकत्वावबोधात् इष्टानिष्टेषु तुष्टिव्यसनविहरितः त्वन्नखेन्दोः ज्योत्स्नाभिः अधिकशिशिरितेन आत्मना सञ्चरेयम् ।

अन्वयार्थः

त्वन्निलीनाशयत्वात् भवसरणिभवैः क्षुत्तृडाद्यैः नो मुह्यन्, = आप में मन लीन होने के कारण संसार के मार्गों से होते हुए भूख, प्यास आदि में मोहित न होता हुआ

चिन्तासातत्यशाली निमिषलवम् अपि त्वत्पादात् अप्रकम्पः = सदा चिन्तन (ध्यान) करते हुए अल्प समय के लिए भी आपके चरणों से न हिलकर,

मायिकत्वावबोधात् = "यह सब माया द्वारा बनाया है" इसको जानकर

इष्टानिष्टेषु तुष्टिव्यसनविरहितः = पसंद और नापसंद में सन्तोष या दुःख से रहित,

त्वन्नखेन्दोः ज्योत्स्नाभिः = आपके नख (नाखून) चन्द्र की चाँदनी द्वारा

अधिकशिशिरितेन आत्मना सञ्चरेयम् । = शीतल मन से (मैं) विचरण करूँगा ।

भावार्थ—आप में मन के लीन होने के कारण सांसारिक मार्गों से होते हुए भूख, प्यास आदि में मोहित (मग्न) न होकर, सदा चिन्तन (ध्यान) करते हुए अल्प समय के लिए भी आपके चरणों से न हिलकर, "यह सब

Foundation and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माया द्वारा बनाया है" इस प्रकार जानकर, पसंद तथा नापसंद में सन्तोष या दुःख से रहित, आपके नख (नाखून) चन्द्र की चाँदनी द्वारा शीतल मन से मैं विचरण करूँगा।

Words-Explanation :

सरणिः/ सरणी = A Pathway, A Road, A course etc. (As in भवसरणि-भवैः)

मुह् (मुह्यति, मुग्ध, मूढ) = To Stupify, Infatuate, Loss consciousness etc. (As in नो मुह्यन्)

सातत्यम् = Permanance, Continuity. (As in चिन्तासातत्यशाली)

शालिन् = Endowed with, Possessed, Possessing etc - (used at the end of a compound word as भाग्यशाली etc). (As in चिन्तासातत्यशाली)

आशय = Intention. (As in त्वन्निलीनाशयत्वात्)

क्षुधा, क्षुध् = Hunger

तृष्, तृट्, तृड् = Thirst

॥ ८ ॥

भूतेष्वेषु त्वदैक्यस्मृतिसमधिगतौ नाधिकारोऽधुना चेत्
त्वत्प्रेम त्वत्कमैत्री जडमतिषु कृपा द्विट्सु भूयादुपेक्षा।
अर्चायां वा समर्चाकुतकमुरुतरश्रद्धया वर्धतां मे
त्वत्संसेवी तथापि द्रुतमुपलभते भक्तलोकोत्तमत्वम्॥

पदविभागः—भूतेषु, एषु, त्वदैक्यस्मृतिसमधिगतौ, न, अधिकारः, अधुना, चेत्, त्वत्प्रेम, त्वत्कमैत्री, जडमतिषु, कृपा, द्विट्सु, भूयात्, उपेक्षा, अर्चायाम्, वा, समर्चाकुतुकम्, उरुतरश्रद्धया, वर्धताम्, मे, त्वत्संसेवी, तथा, अपि, द्रुतम्, उपलभते, भक्तलोकोत्तमत्वम्॥

अन्वयः—एषु भूतेषु त्वदैक्यस्मृतिसमधिगतौ अधुना अधिकारः न चेत्, त्वत्प्रेम, त्वत्कमैत्री, जडमतिषु कृपा, द्विट्सु उपेक्षा (च) भूयात्। उरुतरश्रद्धया अर्चायां समर्चाकुतुकं वा मे वर्धताम्। तथा त्वत्संसेवी अपि द्रुतं भक्तलोकोत्तमत्वम् उपलभते।

अन्वयार्थः

एषु भूतेषु त्वदैक्यस्मृतिसमधिगतौ = इन जीवों में आपकी उपस्थिति को समझने के लिए

अधुना अधिकारः न चेत् = अब अधिकार नहीं है तो,

त्वत्प्रेम, त्वत्कमैत्री, जडमतिषु कृपा, द्विट्सु उपेक्षा (च) भूयात्। = आप में प्रेम, आपके भक्तों के साथ मित्रता, बुद्धिहीनों में कृपा और शत्रुओं की उपेक्षा करना (मेरी भावना) हो।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उरुतरश्रद्धया अर्चायां समर्चाकुतुकं वा मे वर्धताम्। = बहुत अधिक श्रद्धा से पूजा करने में उत्साह कम से कम मुझ में अधिक हो जाय।

तथा त्वत्संसेवी अपि द्रुतं भक्तलोकोत्तमत्वं उपलभते। = उस प्रकार आपकी सेवा करते भक्त को भी अतिशीघ्र उत्तम भक्तिभाव प्राप्त होता है।

भावार्थ—इन जीवों में आपकी उपस्थिति को समझने के लिए अब अधिकार (योग्य) नहीं है, तो आप में प्रेम, आपके भक्तों के साथ मित्रता, बुद्धिहीनों में कृपा तथा शत्रुओं की उपेक्षा करना आदि (मेरी भावना) हो। बहुत अधिक श्रद्धा से पूजन-भजन करने में उत्साह तो कम से कम मुझे अधिक हो जाये। उस प्रकार आपकी सेवा करते भक्त को भी अतिशीघ्र उत्तम भक्तिभाव प्राप्त होता है।

Words-Explanation :

अर्चा = Worship. (As in अर्चायां समर्चाकुतुकम्—)

उरु = Wide, Spacious, Large, Excessive, Abundant etc. (As in उरुतरश्रद्धया)

